Serving JinShasan
053534
gyanmandir@kobatirth.org

P-9188

॥ श्रीजिनाय नमः ॥

॥ श्रीधर्मरत्नकरंडटीका भाग १. ॥

(कर्ता—श्रीवर्धमानसूरिः)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

वीरसंवत्—२४४१. विक्रमसंवत—१९७१. सने—१९१५.

किं. रु.–७–८–०

☞ श्रीजैनभास्करोदय प्रेस. जामनगर.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

॥ अथ श्रीधर्मरत्नकरंमटीका प्रारभ्यते ॥

॥ प्रथमो भागः ॥

(कर्ता—श्रीवर्धमानसूरिः)

छपावी प्रसिद्ध करनार—पंमित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

प्रणम्य श्रीजिनं वीरं । वीरितांतरशात्रवं ॥ कल्पद्रुममिवानल्प—संकल्पितफलप्रदं ॥ १ ॥ यथावबोधं विबुद्धीनां । सुखसंबोधहेतवे ॥ वक्ष्ये वृत्तिं समासेन । धर्मरत्नकरंमके ॥ २ ॥ तत्र तावदादावेव प्रकरणकारः शिष्टसमयप्रतिपालनाय प्रत्यूहव्यूहव्यपोहकृतेऽभीष्टदेवतानमस्काररूपभावमंगलाभिधानार्थं प्रयोजनादित्रयप्रतिपादनार्थं च श्लोकचतुष्टयमुपन्यस्तवान्, तद्यथा—

॥ मूलम् ॥—सर्वनीतिप्रणेतारं । सर्वधर्मप्रदर्शकं ॥ सर्वविद्यालतामूलं । नौमि श्रीनाभिनं·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दनं ॥ १ ॥ सर्वकर्मविनिर्मुक्तं । सर्वलोकैकजास्करं ॥ सर्वामरनरैर्वंद्यं । वंदे वीरं जिनेश्वरं ॥ २ ॥ अन्यानपि नमस्यामि । श्रीमतस्तीर्थनायकान् ॥ सिद्धांश्च सर्वसूरींश्च । वाचकांश्च मुनींस्तथा ॥३॥ एवं कृतनमस्कारः । स्वान्योपकृतिवांछया ॥ वक्ष्ये प्रकरणं नाम्ना । धर्मरत्नकरंमकं ॥ ४ ॥ व्याख्या —इह हि शिष्टाः कचिदभीष्टे वस्तुनि प्रवर्तमानाः संतोऽजीष्टदेवतानमस्कारपुरस्सरमेव प्रवर्तंते, यत उक्तं—प्रेक्ष्य पूर्वकृतां प्रायः । प्रारंजेषु चतुष्टयं ॥ वक्तुं युक्तं विनेयानां । वृत्त्युत्साहनिबंधनं ॥ १ ॥ मंगलं शास्त्रसंबंधः । शरीरं सप्रयोजनं ॥ चतुष्टयमजिप्रेतं । प्रत्यूहापोहिमंगलं ॥ २ ॥ इत्यादि, अयमप्याचार्यो न हि न शिष्ट इत्यतः शिष्टसमयपरिपालनाय, तथा श्रेयांसि बहुविघ्नानि जवंतीत्युक्तं च—श्रेयांसि बहुविघ्नानि । जवंति महतामपि ॥ अश्रेयसि प्रवृत्तानां । कापि यांति विनायकाः ॥ १ ॥ इति. इदं च प्रकरणं धर्माधर्मादिफलप्रतिपादकत्वेन सम्यग्दर्शनज्ञानादिहेतुत्वात श्रेयोभूतं वर्तते, अतो विघ्नविनायकोपशांतये, तथा प्रयोजनादिरहिते प्रेक्षावंतो न प्रवर्तंते, तदुक्तं—सर्वस्यैव हि शास्त्रस्य । कर्मणो वापि कस्यचित् ॥ यावत्प्रयोजनं नोक्तं । तावत्तत्केन गृह्यतां ॥ १ ॥ तथा—सिद्धार्थं सिद्धसंबंधं । श्रोतुं श्रोता प्रवर्तते ॥ शास्त्रादौ तेन वक्तव्यः । संबं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धः सप्रयोजनः ॥ १ ॥ अतः प्रयोजनादिप्रतिपादनार्थं च, तत्र सर्वनीतिप्रणेतारमित्यादिश्लोकत्र येणाभीष्टदेवतानमस्कारमाह, अयमेव चोक्तन्यायेन प्रत्यूहप्रतिहतिहेतुः, एवं कृतनमस्कार इत्यादिना श्लोकेन प्रयोजनादित्रयमुक्तं, तथाहि—

स्वान्योपकृतिवांछयेति वदता प्रयोजनमुक्तं, वक्ष्ये प्रकरणं नाम्ना धर्मरत्नकरंडकमित्यनेन पुनरिदं प्रकरणमभिधेयतया निर्दिष्टं. अभिधानाभिधेयलक्षणश्च संबंध इति समुदायार्थः. अवयवार्थो व्याख्यालक्षणानुरोधाद्योजनीयस्तच्चेदं—संहिता च पदं चैव । पदार्थः पदविग्रहः ॥ चालनाप्रत्यवस्थानं । व्याख्यातंतस्य षड्विधाः ॥ १ ॥ इह च गमनिकामात्रफलत्वात्प्रस्तुतारंभस्य प्रायः संहितादिचर्चव्यपोहेन भावार्थकथनमेव क्रियते, शेषव्याख्यालक्षणयोजना तु स्वयमेव सुधिया वर्णनीया. तत्र सर्वनीतिप्रणेतारमित्यत्र नौमीति क्रिया, ततश्च नौमि स्तौमि, कं कर्मतापन्नं? श्रीनाभिनंदनं, नाभेर्नाभिकुलकरस्य नंदनः पुत्रो नाभिनंदनः, श्रिया लक्ष्म्योपलक्षितो नाभिनंदनः श्रीनाभिनंदनो युगादिदेव इत्यर्थस्तं, किंविशिष्टं? सर्वनीतिप्रणेतारं, सर्वाश्च ता नीतयश्च लोकलोकोत्तरव्यवहाराः सर्वनीतयस्तासां प्रणेता स्रष्टा सर्वनीतिप्रणेता तं, पुनरपि किंविशिष्टं? सर्वधर्म·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रदर्शकं, सर्वे च तेऽस्तिधर्मश्रुतधर्मचारित्रधर्मग्रामधर्मादयो धर्माश्च सर्वधर्माः, तेषां प्रदर्शकः प्रका-
शकः सर्वधर्मप्रदर्शकस्तं, भूयोऽपि किंभूतं? सर्वविद्यालतामूलं, सर्वाश्च ता विद्याश्च शब्दविद्याप्रभृ-
तयः प्रज्ञप्त्यादयश्च सर्वविद्यास्ता एव वल्लयः सर्वविद्यालतास्तासां मूलं कारणं सर्वविद्यालतामूलं,
तं श्रीनाभिनंदनं नौमीति श्लोकार्थः. तथा सर्वकर्मविनिर्मुक्तमित्यत्र श्लोके वंदे इति क्रिया, कं वं-
दे? वीरं, किंविशिष्टं? जिनेश्वरं जिनाः केवलमनःपर्यायावधिज्ञानिनश्चतुर्दशनवपूर्वविदश्च, तेषा-
मीश्वरो जिनेश्वरस्तं. पुनरपि किंविशिष्टं? सर्वकर्मविनिर्मुक्तं. सर्वकर्माणि ज्ञानावरणादीनि तेभ्यो
विशेषेण बंधोदयोदीरणापेक्षया नितरां सत्तापेक्षया मुक्तः सर्वकर्मविनिर्मुक्तस्तं. पुनरपि किंविशि-
ष्टं? सर्वलोकैकभास्करं सर्वश्चासौ लोकश्च सर्वलोकस्तस्य प्रकाशकारित्वादेकोऽद्वितीयो भास्कर इ-
व भास्करस्तं. भूयोऽपि किंविशिष्टं? सर्वामरनरैर्वंद्यं सकलसुरनराणां स्तुत्यमिति श्लोकार्थः. तथा-
न्यानप्यजितादीन् महाविदेहजादींश्च नमस्यामि नमस्करोमि श्रीमतो लक्ष्मीवतस्तीर्थनायकांस्तीर्था-
धिपतीन् सिद्धांश्चेत्यादौ चकाराः समुच्चयार्थाः. ततश्च सिद्धांश्च सकलकर्मक्षयेण निष्ठितार्थान्, सू-
रींश्चाचार्यांश्च वाचकांश्चोपाध्यायांश्च मुनीन् साधून् तथा तेनैव प्रकारेण नमस्यामीति श्लोकार्थः.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततश्चैवं कृतनमस्कार एवममुना प्रकारेण पूर्वोक्तेन कृतो विहितो नमस्कारः प्रणामो येन मया स कृतनमस्कारोऽहं स्वान्योपकृतिवांछया स्वस्यात्मनोऽन्येषां च परेषामुपकृतिरुपकारस्तस्यां वांछेच्छा स्वान्योपकृतिवांछा तया स्वान्योपकृतिवांछया, अनेन कर्तुः श्रोतुश्चानंतरं प्रयोजनमुक्तं, परंपरं तु द्वयोरपि मुक्तिरिति वक्ष्येऽभिधास्ये प्रकरणं लघुशास्त्रविशेषं नाम्ना नामधेयेन धर्मरत्नकरंडकं, धर्मस्य शुभाध्यवसायरूपस्य संबंधीनि रत्नानीव रत्नानि, पुण्यप्राणिभिरेव प्राप्यत्वादचिंत्यचिंतामणिकल्पत्वेन सकलसमीहितार्थप्रदायकत्वाच्च ज्ञानदर्शनचारित्ररूपाणि, दानशीलतपोभावनास्वभावानि, दयादानदाक्षिण्यसौजन्यौदार्यगांभीर्यविनयनयप्रशमादिसत्पुरुषगुणगणरूपाणि च धर्मरत्नानि, तेषां करंडक इव करंडकस्तं धर्मरत्नकरंडकं वक्ष्ये, इति श्लोकचतुष्टयार्थः. अथ प्रकरणाधिकारांस्तत्संख्यां च बिभणिषुः श्लोकपंचकमाह—

॥ मूलम् ॥—धर्माधर्मौ १ जिने पूजा २ । गुरुभक्तिरकृत्रिमा ३ ॥ परोपकारः ४ संतोषः ५ । संसारासारतामतिः ६ ॥ १ ॥ शोकशंकोः समुच्छेद ७—श्चेतसो निष्कषायिता ८ ॥ सर्वलोकविरुद्धानां । दूरतः परिवर्जनं ९ ॥ २ ॥ दानं १० शीलं ११ तपो १२ भावः १३ । शिष्टसंगो १४ वि·

नीतता १५ ॥ विषयेषु च वैमुख्यं १६ । विवेको १७ मृदुजाषिता १८ ॥ ३ ॥ सर्वधर्मशिरोरत्नं । दयाधर्मः सदोत्तमः १९ ॥ विधिवत्संघपूजा च २० । सर्वत्रामी न सद्गुणाः ॥ ४ ॥ धर्माधर्मादिक्रमेनां । संघपूजावसानिकां ॥ वक्ष्येऽहमधिकाराणा—मानुपूर्व्येह विंशतिं ॥ ५ ॥ व्याख्या—तत्र धर्माधर्मौ प्रतीतौ, तावत्र प्रकरणे जणिष्येते, इति क्रिया सर्वत्र योज्या, जिनपूजेत्यादिचतुष्टयं सुगमं. संसारासारतामतिरिति संसारस्यासारता संसारासारता, तस्यां मतिः संसारासारतामतिः, सा चात्र जणिष्यते, शोकशंकोः शोककीलस्य समुछेदः सर्वथा विनाशः. चेतसश्चित्तस्य निष्कषायिता कषायकालुष्यरहितत्वं. सर्वलोकविरुद्धानां सर्वलोकस्य सकलशिष्टजनस्य विरुद्धानि विरोधवंति कर्माणि सर्वलोकविरुद्धानि, परुषता वा तेषां दूरतो दूरेण परिवर्जनं परित्याग इति, इतः पदनवकं सुगममेव. तथा सर्वधर्मशिरोरत्नमिति सर्वधर्माणां शिरोरत्नमिव चूडामणिरिव दयाधर्मो दयैव धर्मो दयाधर्मः, सदा सर्वकालमुत्तमः प्रधान इति. विधानेन विधिवद्विधिपूर्वकमित्यर्थः, संघपूजा साधुसाध्वीश्रावकश्राविकालक्षणचतुर्विधश्रमणसंघसपर्या कर्तव्येति तात्पर्यमिति. सर्वत्र सर्वप्राणिष्वमी एते न नैव सद्गुणाः शोजनगुणा जवंतीति गम्यते. तथा धर्माधर्मावादी यस्याः सा धर्माधर्मा-

दिका, तां धर्माधर्मादिकानामेनामिमां, संघपूजावसानं पर्यंतो यस्याः सा संघपूजावसानिका, तां वक्ष्ये नणिष्याम्यहमधिकाराणां प्रस्तावनामानुपूर्व्या परिपाट्या इहात्र प्रकरणे विंशतिं, विंशतिप्रमाणानधिकारानिति नावः. इति श्लोकपंचकसमासार्थः. अथ प्रथममधिकारमनिधित्सुर्धर्माधर्मयोरेकार्थिकशब्दान् श्लोकद्वयेनाह—

॥ मूलम् ॥—धर्मः पुण्यं वृषः श्रेयः । सद्वृत्तं सुकृतं शुभं ॥ सदनुष्ठानमित्याद्याः । शब्दास्तुल्यार्थवाचकाः ॥ १ ॥ अधर्मः किल्बिषं पाप—मवद्यं दुष्कृतं तथा ॥ दुरनुष्ठानमित्याद्याः । शब्दास्तुल्यार्थवाचकाः ॥ २ ॥ व्याख्या—तत्र दुर्गतिपतज्जंतुधारणाद्धर्मः, तदुक्तं—दुर्गतिप्रसृतान् जंतून् । यस्माद्धारयते ततः ॥ धत्ते चैतान् शुन्ने स्थाने । तस्माद्धर्म इति स्मृतः ॥ १ ॥ स च जीवस्य शुन्नपरिणामः, कारणे कार्योपचारेण तत्वार्थश्रद्धानं चैत्यवंदनादिक्रियाकलापरूपं बाह्यमनुष्ठानं चोच्यते, यथा तंदुलान् वर्षति पर्जन्यः, पर्जन्यो हि जलं वर्षति, तेन च तंदुला निष्पद्यंते, ततो जले कारणनूते तंदुलाः कार्यनूता उपचर्यंते इति. एवं धर्मोऽपि शुन्नाध्यावसायरूपः कारणं, सदनुष्ठानं च क्रियारूपं कार्यं, तत्र शुन्नाध्यवसाये कारणनूते सदनुष्ठानं कार्यनूतमुपचर्यते, अयमनिप्रायः—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सदनुष्ठानं क्रियारूपं धर्मशब्देन व्यपदिश्यत इति. एवं सर्वत्र कार्यकारणभावो वेदितव्यः. तथा धर्महेतुत्वात्पुण्यमपि धर्मः, पुण्यं च पुण्यप्रकृतयः, ताश्चेमाः—सायं उच्चगोयं । सत्ततीसं च नाम पगईउ ॥ तिन्नि य आउणि तहा । बायालं पुन्नपगईउ ॥ १ ॥ सत्ततीसं नामस्स । पगईउ पुन्नमाय ता य इमा ॥ मणुयगइ तयणुपुव्वी । देवगइ तयणुपुव्वी य ॥ २ ॥ पंचिंदियजाई तह । देहाणं पंचयं च ते य इमे ॥ उरालिय वेउव्विय । आहारय तेय कम्मइगा ॥ ३ ॥ अंगोवंगा तिन्नेव । आइमा आइमं च संघयणं ॥ समचउरंसं अणहा । वन्न रसा गंध फासा य ॥ ४ ॥ अगुरुलहु पराघायं । उसासं आयवं च उज्जोयं ॥ सुपसत्था विहगगइ । तसायदसगं च निम्माणं ॥ ५ ॥ तस बायर पज्जत्तं । पत्तेय थिरं सुभं च सुभगं च ॥ सूसरआएज्जजसं । तसाइदसगं इमं होइ ॥ ६ ॥ तित्थयरेणं सहिया । सत्ततीसं तु नाम पगईउ ॥ तिन्नि य आउणित्ति य । सुरनरतिरियाउभेएण ॥ ७ ॥ तथा वृषः, वृषशब्देन धर्मोऽभिधीयते. श्रेयः श्रेयःकर्म प्रशस्यं सदनुष्ठानमेव. सद्वृत्तं सुकृतं च तदेव. शुभस्य पुण्यव्याख्या. सदनुष्ठानमिति, सच्च तदनुष्ठानं च शुभव्यापाररूपं सदनुष्ठानं. इत्याद्या एवमाद्याः, आदिशब्दात सच्चारित्रं सुचरितं चरणं निवृत्तिर्विरति-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नियमः संयमश्चैवमादयो दृष्टव्याः, शब्दा ध्वनयस्तुल्यार्थवाचका एकार्थवाचका इति. इह च कथं-
चिद्भेदेऽपि तुल्यार्थत्वेन विवक्षितत्वान्न पर्यनुयोगः कर्तव्य इति श्लोकार्थः. अधर्मो धर्मविपक्षस्तस्य
व्याख्यानं पूर्ववद्विपक्षत्वेनैव कर्तव्यं. किल्बिषमित्यधर्महेतुकत्वादतीवनिंद्यं कर्म अधर्मशब्दाभिधायि
भवतीति सर्वत्र योज्यं. पापमिति जीवस्वरूपपांशनान्मलिनकारित्वात् पापं पापकर्मप्रकृतयस्ताश्चे-
माः—नाणंतरायदसगं । दंसण नव मोहपयडिछवीसं ॥ नामस्स य चउतीसं । तिण्हं एक्केकपावा-
उ ॥ १ ॥ मइसुयउहीमणपज्ज—वाण तह केवलस्स आवरणं ॥ नाणावरणं कम्मं । पंचविहं
होइ एवं तु ॥ २ ॥ जं दाणलाभभोगो—वभोगविरयाण विग्घसंजणणं ॥ तेणंतरायकम्मं । पं-
चविहं वन्नियं समए ॥ ३ ॥ चक्खू अचक्खू उही । वरकेवलदंसणाण आवरणं ॥ चउरो पंच य
निद्दा । दंसण उवउग विग्घहा ॥ ४ ॥ निद्दा निद्दा निद्दा । पयला अन्ना उ पयलपयलत्ति ॥
थीणद्धी य तहेवं । दंसणावरणं भवे नवहा ॥ ५ ॥ मिछत्तमोहणीयं । सोलसभेयं कसायमोह-
णीयं ॥ कोहाईण चउण्हं—णंताइ चउविहत्तणाउ ॥ ६ ॥ इत्थीपुरिसनपुंसग—वेया हासो य
रइ य अरइ य ॥ सोगो भयं दुगंछत्ति । नवविहं इयरमोहणियं ॥ ७ ॥ मोहछवीस एसा । एसा

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

पुण होइ नाम चउतीसा ॥ नरयगई तिरियगई । एसिं चिय आणुपुवीउ ॥ ८ ॥ एगिंदियाइ· चउरो । जाई बीयाइ कम्मसंघयणा ॥ एवं संठाणत्ति य । वन्नाइचउक्कमपसत्थं ॥ ९ ॥ उवघायं कुविहगई । थावरसुहुमं तहा अपज्जत्तं ॥ साहारणा थिराऽसुभ—मसुभगदूसर अणाइज्जं ॥१०॥ अजसकित्ति य तहा । तिएहं एक्केक्कियत्ति अपसत्था ॥ गोयाउवेयणिज्जा—णुपावमेक्केक्किया पगई ॥ ११ ॥ नीयं गोत्तं निरया—उयं च असायवेयणिज्जं च ॥ एया सव्वामिलिया । बासीई पावपगईउ ॥ १२ ॥ तथा अवद्यं पापमेव हिंसादि अधर्महेतुकत्वेन, तदप्यधर्मः. दुःकृतं दुष्टं कृतं दुःकृतं, दुरध्यवसायनिमित्तकत्वादेतदप्यधर्मः. दुरनुष्ठानं दुष्टं हिंसादिमहारंभादिरूपमनुष्ठानमशुभपरिणामप्रवृत्तिकत्वादिदमप्यधर्म एव. इत्याद्या एवंप्रभृतयः, आदिशब्दाद्दुश्चरितदुश्चेष्टितादिग्रहः. शब्दा ध्वनयस्तुल्यार्था एकार्था भवंतीति श्लोकद्वयसमासार्थः. अथ धर्माधर्मयोर्बाह्यांतरहेतूनुपदर्शयन् श्लोकषट्कमाह—

॥ मूलम् ॥—मानुष्यं शोभनो देशः । शुभा जातिः शुभं कुलं ॥ सुरूपं दीर्घमायुष्य—मारोग्यं बुद्धिपाटवं ॥ १ ॥ कल्याणमित्रसंसर्गः । पापमित्रविवर्जनं ॥ शुश्रूषा सुश्रुतिश्चैव । सुकलत्रा·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दिपरिग्रहः ॥ २ ॥ अंतरंगद्विषां मांद्य—मौदार्यं पापभीरुता ॥ सुनीतौ प्रीतिरित्याद्या । बहवो धर्महेतवः ॥ ३ ॥ कुदेशः कुत्सितो वासः । कुजातिः कुत्सिता गतिः ॥ कुशास्त्राणि कुमित्राणि । कुकलत्रादिपरिग्रहः ॥ ४ ॥ कुश्रुतिः कुमतिश्चैव । कुविद्या कुत्सितो गुरुः ॥ अत्यंतमुत्कटो रागो । द्वेषो मोहश्च कुग्रहः ॥ ५ ॥ महारंभो महादंभो । महालोभो महामदः ॥ कुनीतौ प्रीतिरित्याद्या । बहवः पापहेतवः ॥ ६ ॥ व्याख्या—मानुष्यं मानुषत्वं धर्मस्य बाह्यो हेतुर्भवतीति सर्वत्र क्रियायोगः कर्तव्यः. इदं चातीवदुर्लभत्वेन संपूर्णधर्मकर्मकारणत्वेन च धर्मप्राप्तौ बाह्यहेतुत्वेन प्रथममुपन्यस्तमिति, दुर्लभत्वं चास्य चुल्लकादिदृष्टांतैर्भावनीयं, ते चामी—चुल्लग १ पासग २ धन्ने ३ । जूए ४ रयणे य ५ सुमिण ६ चक्के य ७ ॥ चम्म ८ जुगे ९ परमाणू १० । दस दिठंता मणुयलंभे ॥ १ ॥ एतत्कथानकानि पुनरतिक्षुण्णत्वान्न लिख्यंतेऽस्माभिः, आवश्यकादिभ्य एवावसेयानि. तथा शोभनो देश इति, शोभनः प्रधानो देशो जनपद आर्यदेश इत्यर्थः, सोऽपि धर्मस्य बाह्यो हेतुरिति, स च शोभनो देशः सार्धपंचविंशतिजनपदात्मको यथा—

रायगिहमगह १ चंपा । अंगा २ तह तामलित्ति वंगा य ३ ॥ कंचणपुरं कलिंगा ४ । वा

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

णारसी चेव कासी य ५ ॥ १ ॥ साकेय कोसला ६ गय—उरं च कुरु ७ सोरियं कुसट्टा य ८ ॥ कंपिल्लं पंचाला ९ । अहिछत्ता जंगला चेव १० ॥ २ ॥ बारवई य सुरठा ११ । मिहिल विदेहा य १२ वछ कोसंबी १३ ॥ नंदिपुरं संडिल्ला १४ । ऋद्दिलपुरमेव मलया य १५ ॥ ३ ॥ वइराम व- छ १६ वरणा—वछा १७ तह मत्तियावइ दसन्ना १८ ॥ सुत्तिमईया चेई १९ । वीअजयं सिंधुसो- वीरा २० ॥ ४ ॥ महुरा य सूरसेणा २१ । पावा जंगीय २२ मासपरिवट्टा २३ ॥ सावत्थी य कुणा- ला २४ । कोमीवरिसं च लाटा य २५ ॥ ५ ॥ सेयंवियावि य नयरी । केईअर्द्ध च आयरियं ज- णियं ॥ जत्थुप्पत्ति जिणाणं । चक्कीणं रामकण्हाणं ॥ ६ ॥ शुना जातिः शुनं कुलमिति, तत्र मातृसमुत्रा जातिः, सापि शुना धर्मस्य बाह्यो हेतुः, पितृसमुबं कुलं, तदपि शुनं तथैव. अथवा ब्राह्मणक्षत्रियवैश्यशूद्रस्वरूपा जातिः, उग्रजोगज्ञातइक्ष्वाकुकौरव्यहरिवंशादिकं कुलमिति. तथा सु- रूपमिति शोजनं रूपं सुरूपमविकलपंचेंद्रियत्वमिदमपि धर्मस्य हेतुः, यस्मादनुपहतपूर्णपंचेंद्रियत्व एव जीवः संपूर्णधर्मयोग्यो जवति, न त्वितर इति. तथा दीर्घमायुष्कमिति, दीर्घ वर्षशतादिजीवन- त्वेन प्रलंबमायुष्कं जीवितं, एतदपि धर्मस्य बाह्यं कारणं, यस्मादल्पायुर्जीवो मानुष्यादिसामग्रीं प्रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्यापि न धर्मं साधयितुमलमिति. तथारोग्यमिति, आरोग्यस्य जाव आरोग्यमिदमपि धर्मस्य बाह्यं निमित्तं, यतो दीर्घायुरपि जंतुः सरुक् धर्मं कर्तुं न समर्थ इति. तथा बुद्धिपाटवमिति बुद्धेः प्रज्ञायाः पाटवं दक्षत्वं बुद्धिपाटवं तीक्ष्णधिषणत्वमित्यर्थः, एतच्च धर्मस्यांतरंगमंगं, यतो दीर्घायुरपि नीरोगोऽपि सद्बुद्धिविकलः प्राणी न धर्मकर्माणि सम्यक्कर्तुं पारयति. तथा कल्याणमित्रसंसर्गः, कल्याणं सुखं, तत्कारीणि मित्राणि, तैः सह संसर्गः संबंधः कल्याणमित्रसंसर्गः सदुपदेशदायिजनसंपर्क इत्यर्थः. कल्याणमित्रसंगर्गो हि धर्मस्य बाह्यं प्रधानं कारणमिति.

तथा पापमित्रवर्जनमिति, पापकारीणि मित्राणि पापमित्राणि, तेषां विवर्जनं परिहरणं पापमित्रविवर्जनं, पापमित्रसंगतो हि पापेष्वेव रमते, न धर्मकर्मसु, तत्संगपरिहारी तु विबंधकाजावात् सुखेनैव धर्मं प्रतिपद्यते, अतः पापमित्रवर्जनमपि बाह्यं धर्मनिबंधनमिति. तथा शुश्रूषा श्रोतुमिच्छा शुश्रूषा सदागमस्येति गम्यते. सुश्रुतिश्चैवेति, चवेति समुच्चये, शोजना श्रुतिः सुश्रुतिः सम्यगागमश्रवणं. सुकलत्रादिपरिछद इति, शोजनानि कलत्राणि सुकलत्राणि, तान्यादिर्यस्य सुपुत्रसुमित्रभ्रातृसुस्वजनादिकस्य सुकलत्रादिः, स चादौ परिछदश्च परिवारश्च सुकलत्रादिपरिछदः, अयमपि

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

धर्मस्य बाह्यो हेतुः, यतः शोभनेषु कलत्रपुत्रादिष्वाज्ञाविधेयतया सुखं धर्मः प्रतिपत्तुं कर्तुं च शक्यत इति. तथांतरंगद्विषां मांद्यमिति, अंतरंगद्विषो रागादयो ज्ञानावरणादिकर्माणि च. तेषां मांद्यं मंदता प्रतनुत्वमित्यर्थः. तथौदार्यं, उदारस्य भाव औदार्यं दानरसिकत्वमित्यर्थः. पापभीरुता पापेभ्यः पापकर्मभ्यो भीरुता सभयत्वं पापभीरुता. सुनीतौ प्रीतिरिति, शोभना चासौ नीतिश्च सुनीतिः सुन्यायस्तस्यां सुनीतौ प्रीतिः प्रमोदः. इत्याद्या एवमादयः, आदिशब्दाद्दाक्षिण्यसौजन्यपरोपकर्तृत्वौचित्यकरणत्वादिपरिग्रहः, बहवः प्रभूता धर्महेतवो धर्मकारणानि, इह च बुद्धिपाटवशुश्रूषा सुश्रुतिः, रागादिमांद्यं, औदार्यं पापभीरुता सुनीतिप्रीतिरित्येते सप्तांतरंगा धर्महेतवः, मानुष्यं सुदेशः सुजातिः सुकुलं सुरूपं दीर्घायुष्कमारोग्यं कल्याणमित्रसंसर्गः, पापमित्रविवर्जनं, सुकलत्रादिपरिच्छदश्चेत्येते दश बाह्या धर्महेतव इति श्लोकत्रयार्थः.

अथाधर्महेतूनाह—तत्र कुदेश इत्यनार्यदेशः, तत्राधर्म एव प्रवर्तते, न धर्मस्य नामापि ज्ञायते, अतः कुदेशः सर्वेषामपि प्राणिनामधर्महेतुरेव, एवं सर्वत्राधर्महेतुत्वं भावनीयमिति. कुत्सितो वास इति, यत्र बहवो मद्यमांसाशिनः पापिष्ठलोका वसंति स कुत्सितो वासः, आर्यदेशेऽपि

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तथाविधग्रामादौ वसतां प्रायो न धर्मप्राप्तिरिति. कुजातिश्चांमालकोलिकादिका, तत्रापि समुत्पन्नो जंतुः प्रायः पापेष्वेव रमते. कुत्सिता गतिरिति नरकतिर्यक्त्वमानुषत्वकुदेवत्वलक्षणा कुत्सिता ग· तिः, तत्रापि प्रायः प्राणिनः पापप्रिया एव भवंति. कुशास्त्राणीति कुत्सितानि शास्त्राणि, येषु धर्म-व्याजेनापि प्राणिनां वधो वर्ण्यते यथा वेदेषु, तथा यानि वात्स्यायनवशीकरणधातुर्वादादिशास्त्रा· णि, तान्यपि प्रायः श्रूयमाणानि पापमेव पुष्णंति. कुमित्राणीति पापमित्राणि, तान्यपि पापेष्वेव प्रेरयंतीति. कुकलत्रादिपरिच्छद इति, कुत्सितः पापप्रियः कलत्रादिपरिवारः, तेन धार्मिकोऽपि बला· दपि पापकर्मसु प्रेर्यत इति. कुश्रुतिरिति कुत्सितागमश्रवणं, तदपि प्राणिवधादौ प्रेरयतीति. कुमति· रिति कुत्सिता मतिः, कुमतिरनर्थपरंपरावर्तिका, तयाप्यधर्म एव प्राणी प्रवर्त्यत इति. कुविद्येति कु· त्सिता विद्या खड्गधनुर्वेदविद्यादिका, सापि पापप्रवर्तिकैव. कुत्सितो गुरुरिति कुधर्माचार्यः, सोऽपि व्याजेनाधर्ममेव कारयतीति, अत्यंतमुत्कटो राग इति सचेतनाचेतनवस्तुषु नितरामभिष्वंगः, स च पापहेतुत्वेन प्रसिद्ध एव. एवं द्वेषो मोहः कुग्रहश्च, नवरं द्वेषोऽनिष्टवस्तुषु रोषप्रसरः, मोहः पुनर· ज्ञानं ममत्वं वा, कुग्रहो यत्र कुत्रापि शोभनेऽशोभने वा वस्तुनि लग्नस्तत्र बद्धाग्रहत्वमिति. महा·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रंभ इति महान् कृष्याद्यारंभः, अयमपि पापहेतुत्वेन प्रसिद्ध एव. महादंभो नानाकूटकपटैरत्यंतमपरेषां वंचनं, पापहेतुत्वमस्य प्रकटमेव. महालोभो महामदश्च प्रतीतौ, कुनीतौ प्रीतिरित्यन्यायप्रियत्वमित्यर्थः. इत्याद्या एवं प्रभृतयः, आदिशब्दान्महापरिग्रहादिग्रहः, बहवो भूयांसः पापहेतवः पापकरणानीति. इह च कुदेशादयो बाह्या अधर्महेतवः, रागादयः पुनरंतरंगा इति स्वधिया भावनीयमिति श्लोकषट्कार्थः. अथ धर्माधर्मयोः स्वरूपमुपदर्शयन् श्लोकद्वयमाह—

॥ मूलम् ॥—यत्राहिंसा वचः सत्य—मस्तेयं ब्रह्मसेवनं ॥ संतोषश्च स विज्ञेयो । धर्मः सर्वज्ञभाषितः ॥ १ ॥ यत्र हिंसा मृषा भाषा । चौर्यं मैथुनसेवनं ॥ महालोभश्च सोऽधर्मो । विज्ञेयो जिनदेशितः ॥ २ ॥ व्याख्या—यत्रेति धर्मेऽहिंसादया सर्वसत्वेषु वर्ण्यते क्रियते च स धर्मो विज्ञेय इति क्रिया सर्वत्र योज्या. वचो वचनं सत्यं तथ्यं वर्ण्यते भाष्यते च स धर्म इति. यत्र वा चौर्यं चोरस्य भावश्चौर्यं स्तैन्यं तद्विपरीतमचौर्यं वर्ण्यते च स धर्म इति. ब्रह्मसेवनमिति. ब्रह्म ब्रह्मचर्यं, तस्य सेवनं पालनं ब्रह्मचर्यसेवनं, तद्यत्र वर्ण्यते पाल्यते च स धर्म इति. संतोषः संतुष्टता सचित्ताचित्तवस्तुषु मूर्छापरिहार इत्यर्थः. स च यत्र वर्ण्यते सेव्यते स विज्ञेयो ज्ञातव्यो धर्मः श्रु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तच्चारित्रात्मकः सर्वज्ञभाषितः सर्ववेदिभिः प्ररूपित इति. उक्तं धर्मस्वरूपमथाधर्मस्वरूपमाह—यत्र यस्मिन्नधर्मे हिंसा प्राणिप्रहाणरूपा वर्ण्यते क्रियते च सोऽधर्म इति सर्वत्र योज्यं. मृषा वितथा भाषा वाणी यत्र वर्ण्यते भाष्यते च, चौर्यं स्तैन्यं यत्र प्ररूप्यते विधीयते, यत्र मैथुनसेवनमब्रह्मनिषेवनं स्त्रीसेवनमित्यर्थः प्रदर्श्यते सेव्यते च, यत्र महालोभश्च सचित्ताचित्तवस्तुषु महाभिलाषश्च मूर्छातिरेकश्च निरूप्यते क्रियते च सोऽयमधर्मः पापं विज्ञेयो वेदितव्यो जिनदेशितो जिनप्ररूपित इति श्लोकद्वयार्थः. अथ धर्माधर्मयोः फलमुपदर्शयन् श्लोकचतुष्टयमाह—

॥ मूलम् ॥—सत्कुले जातिरारोग्यं । सौभाग्यं रूपसंपदः ॥ आयुर्दीर्घं वरा लक्ष्मीः । कीर्तिर्विद्या वरस्त्रियः ॥ १ ॥ यदन्यदपि सद्वस्तु । सुंदरं हृदयेप्सितं ॥ जीवानां जायते लोके । सर्वं धर्मस्य तत्फलं ॥ २ ॥ हीनजातिः सरोगत्वं । दरिद्रत्वं पराभवः ॥ अल्पमायुः कुरूपत्वं । दौर्भाग्यं दीनवृत्तिता ॥ ३ ॥ यदन्यदपि वस्त्वत्र । प्राणभाजां न सुंदरं ॥ दुःखाय जायते लोके । तत्सर्वं पापजृंभितं ॥ ४ ॥ व्याख्या—सत्कुले शोभनवंशे उग्रभोगादौ जातिरुत्पत्तिर्यद्भवति तद्धर्मफलमिति सर्वत्र संबंधः कार्यः. आरोग्यं नीरोगता, सौभाग्यं सर्वजनवल्लभत्वं, रूपसंपदः शरीरसौंदर्यश्रियः,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आयुर्जीवितं दीर्घं प्रलंबं, वरा प्रधाना लक्ष्मी राज्यादिसंपत्, कीर्तिः ख्यातिः, विद्या शब्दविद्यादिका पांडित्यमित्यर्थः, वरस्त्रियः प्रधानयोषितः, यदन्यदपि यदपरमपि सत् शोभनं वस्तु पदार्थः सुंदरं रमणीयं हृदयेप्सितं हृदयवांछितं जीवानां प्राणिनां जायते संपद्यते लोके जगति सर्वं समस्तं धर्मस्याहिंसादिरूपसदनुष्ठानस्य फलं, सत्कुलजात्यादिप्राप्तिरूपं सर्वमेतद्धर्ममाहात्म्यमित्यर्थः. अथाधर्मफलमाह—

हीनेत्यादि, हीना हीनम्लेच्छादिलोकसंबंधिनी जातिरुत्पत्तिर्वंशरूपा, सरोगत्वं सव्याधित्वं, दःरिद्रत्वं दुर्गतत्वं, पराभवः परैरपमाननं, अल्पं स्तोकमायुर्जीवितं, कुरूपत्वं हीनरूपत्वं, दौर्भाग्यं लोकावल्लभत्वं, दीनवृत्तिता दीनाऽनुकंपार्हा वृत्तिर्वर्तनं यस्य स दीनवृत्तिस्तस्य भावो दीनवृत्तिता, जघन्यवृत्त्या परप्रेष्यत्वसेवकत्वरूपया निर्वाह इत्यर्थः. यदन्यदपि यदपरमपि वस्तु कलत्रादिकः पदार्थोऽत्रास्मिन् लोके प्राणभाजां प्राणिनां न सुंदरमशोभनं दुःखाय चित्तसंतापाय जायते संपद्यते लोके भुवने तत्सर्वं तत्समस्तं पापजृंभितं पापविलसितं, तदेतत्सर्वमशुभं पापानुष्ठानविपाकेन प्राप्यते प्राणिभिरित्यर्थः, इति श्लोकचतुष्टयार्थः. अथ धार्मिकाधार्मिकयोः स्वरूपं पूज्यतां निंद्यतां च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रदर्शयन् श्लोकद्वयमाह—

॥ मूलम् ॥—निवृत्ताः सर्वपापेभ्यः । प्रवृत्ता धर्मकर्मसु ॥ इहैव धार्मिका लोकाः । पूज्यंते मनुजामरैः ॥ १ ॥ इहैव पापकर्माणि । कुर्वंतः पापिनो जनाः ॥ निंद्यंते सर्वलोकेन । प्राप्यंते च कदर्थनाः ॥ २ ॥ व्याख्या—निवृत्ता व्यावृत्ताः सर्वपापेभ्यः, सर्वाणि च तानि पापानि च प्राणिवधादीनि तेभ्यः सर्वपापेभ्यः, प्रवृत्ताः प्रवृत्तिं कृतवंतो धर्मकर्मसु धर्मक्रियासु, इहैवात्रैव लोके धार्मिका धर्मवंतो लोका जनाः पूज्यंतेऽर्च्यंते मनुजामरैर्नरत्रिदशैरिति. इहैव पापकर्माणि अत्रैव प्राणिवधमहारंभादिपापक्रियां कुर्वंतो निर्वर्तयंतः पापिनः पापिष्टा जना लोका निंद्यंते हील्यंते सर्वलोकेन सकलजनेन, प्राप्यंते लभ्यंते कदर्थना विडंबना इति श्लोकद्वयार्थः. अथ धर्माधर्मप्रशंसाऽप्रशंसार्थं श्लोकद्वादशकमाह—

॥ मूलम् ॥—तस्मादधर्ममुत्सृज्य । धर्मे चित्तं निवेश्यतां ॥ स्वर्गापवर्गसंसर्ग—हेतुर्धर्मो यतोंगिनां ॥ १ ॥ सेतुर्भवार्णवे धर्मो । दुर्गतिद्वाररोधकः ॥ कृशानुः कर्मकांतारे । निःश्रेणिः शिवमंदिरे ॥ २ ॥ सर्वापायविनिर्मुक्तः । सर्वशिष्टनिषेवितः ॥ माङ्गीःप्रदायको लोके । धर्म एव न चा-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

परः ॥ ३ ॥ जननी जनको भ्राता । पुत्रः पुत्री सुहृज्जनं ॥ एतानि कृत्रिमाण्येव । धर्मः पुनरकृत्रिमः ॥ ४ ॥ तिष्ठंत्यर्थो गृहेष्वेव । श्मशानेषु च बांधवाः ॥ दत्वा जलांजलिं भूयो । मोदंते गृहमागताः ॥ ५ ॥ परलोकप्रयाणस्थं । विमुक्तं मित्रबांधवैः ॥ धर्माधर्माविमं जीवं । गच्छंतमनुगच्छतः ॥ ६ ॥ यत्र यत्र प्रयात्येष । जीवो धर्मसहायकः ॥ तत्र तत्रास्य सौख्यानि । जायंते चोत्तराः श्रियः ॥ ७ ॥ यत्र यत्र प्रयात्येष । जीवः पापसमन्वितः ॥ तत्र तत्रास्य दुःखानि । दारिद्र्यं च प्रजायते ॥ ८ ॥ दुःखद्विषो जनाः सर्वे । सर्वेऽपि सुखलिप्सवः ॥ सुखं च धर्मतः सर्वं । दुःखं पुनरधर्मतः ॥ ९ ॥ जानंतोऽप्येवमत्यर्थं । महामोहवशंगताः ॥ सक्ताः सांसारिके सौख्ये । धर्म्यं कर्म न कुर्वते ॥ १० ॥ सुखे वैषयिके लुब्धाः । प्रार्थयंतस्तदेव हि ॥ दुःसहान्यपि दुःखानि । गणयंति न देहिनः ॥ ११ ॥ हस्त्यादिभ्यो महाभीतिं । विगणय्य विमूढधीः ॥ मधुबिंदुरसासक्तो । यथा कूपगतो नरः ॥ १२ ॥ व्याख्या—तस्मात्कारणादधर्मं पापानुष्ठानमुत्सृज्य परित्यज्य धर्मे सदनुष्ठानरूपे चित्तं मनो निवेश्यतां निधीयतां? स्वर्गापवर्गसंसर्गहेतुर्देवलोकसिद्धिसंपर्ककारणं धर्मो दयाप्रधानमनुष्ठानं यतो यस्मात्कारणादंगिनां शरीरिणामिति. सेतुर्मार्गो भवार्णवे संसारसमुद्रे, दुर्गतिद्वाररो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धको नरकादिदुःखपिधायकः, कृशानुर्ज्वलनः कर्मकांतारे कर्मवनगहने, निःश्रेणिरधिरोहिणी शि-
वमंदिरे परमपदप्रासाद इति. ॥ २ ॥ सर्वापायविनिर्मुक्तः सर्वदोषविवर्जितः, सर्वशिष्टनिषेवितः स-
र्वसाधुजनाचरितः, माभीःप्रदायको मा भयं कार्षुरित्येवमाश्वासकवचनदायकः, लोके जगति धर्म
एव शुभानुष्ठानमेव. न चापरो नान्य इत्यर्थः. ॥ ३ ॥ जननी माता, जनकः पिता, भ्राता सहोद-
रः, पुत्रः सुतः, पुत्री दुहिता, सुहृन्मित्रं, धनं द्रव्यं, एतान्यमूनि कृत्रिमाण्येवासहजान्येव, धर्मः पु-
नः शुभानुष्ठानं पुनरकृत्रिमः सहज एवैकरूप इत्यर्थः. ॥ ४ ॥ तिष्ठंत्यासतेऽर्था द्रव्याणि गृहेष्वेव
मंदिरेष्वेव, श्मशाने पितृवने यांति गच्छंति बांधवाः स्वजनाः, दत्वा वितीर्य जलांजलिं पानीयांज-
लिं भूयोऽपि पुनरपि, अपेर्गम्यमानत्वान्मोदंते क्रीडंते गृहं मंदिरमागता आयाता इति. ॥ ५ ॥
परलोकप्रयाणस्थं परभवे प्रस्थितं, विमुक्तं परित्यक्तं मित्रबांधवैः सुहृज्जनैः, धर्माधर्माविमं जीवं सु-
कृतदुःकृते एनं जंतुं गच्छंतं व्रजंतमनुगच्छतोऽनुव्रजत इति. ॥ ६ ॥ यत्र यत्र यस्मिन् यस्मिन् स्थाने
प्रयाति प्रगच्छति एषोऽयं जीवो जंतुर्धर्मसहायको धर्मद्वितीयस्तत्र तत्रास्यैतस्य सौख्यानि सुकर्माणि
जायंते संपद्यंते, चस्य भिन्नक्रमत्वादुत्तराः प्रधानाः श्रियः संपदश्च. ॥ ७ ॥ यत्र यत्र प्रयात्येष जी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व इति पूर्ववत पापसमन्वितः पापयुक्तस्तत्र तत्रास्य दुःखानि दारिद्र्यं च प्रजायते, दुःखानि शारी-
रमानसिकसंतापाः, दारिद्र्यं निर्धनत्वं च भवतीत्यर्थः. ॥ ८ ॥ दुःखद्विषो दुःखद्वेषिणो जना लोकाः
सर्वे समस्ताः, सर्वे च सुखलिप्सवः सुखाभिलाषिणः, सुखं च शर्म च धर्मतो धर्मादेव, दुःखं पुनर-
धर्मतो दुरनुष्ठानादेव. ॥ ९ ॥ जानंतोऽपि विदंतोऽप्येवममुना प्रकारेणात्यर्थमतिशयेन महामो-
हवशंगता बृहदज्ञानवश्यतां प्राप्ताः, सक्ता आसक्ताः सांसारिके भवसंबंधिनि सुखे शर्मणि धर्म्ये ध-
र्माहें कर्मानुष्ठानं न कुर्वते न विदधतीति. ॥ १० ॥ सुखे शर्मणि वैषयिके शब्दरसरूपगंधस्पर्शरू-
पविषयजे लुब्धा गृध्राः प्रार्थयंतो वांछंतस्तदेव विषयसुखमेव, हिः पूरणे, दुःसहान्यपि दुःखानि कृ-
च्छ्राणि गणयंति तेनैव देहिनो जीवा इति. ॥ ११ ॥ हस्त्यादिभ्यो गजादिभ्यः, आदिशब्दादज-
गरमूषकमक्षिकादिपरिग्रहः. महाभीतिं महती चासौ भीतिश्च महाभीतिस्तां महाभयमित्यर्थः, विग-
णय्यापकर्ण्य विमूढधीर्विशेषेण मूढा मोहं गता धीर्बुद्धिर्यस्य स विमूढधीः, मधुबिंदुरसासक्तो मधुनः
क्षौद्रस्य बिंदवो लवा मधुबिंदवस्तेषां रसस्तत्रासक्तो गृध्नो मधुबिंदुरसासक्तो यथा येन प्रकारेण कू-
पगतोऽवटमध्यप्रविष्टो नरो मानव इति श्लोकद्वादशकार्थः ॥ १२ ॥ अवटगतमधुबिंदुरसासक्तमनु-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

जकथानकमिदं—

बभूव भारते क्षेत्रे । देशे च मगधाभिधे ॥ क्षितिप्रतिष्टितं नाम । पुरं शक्रपुरोपमं ॥ १ ॥
भांति यत्र सपद्मानि । सरांसि च गृहाणि च ॥ कामिन्यः काव्यबंधाश्च । सालंकाराश्चकासति ॥
॥ २ ॥ शूरः सत्यप्रतिज्ञश्च । तत्रासीद् दुर्गशासनः ॥ चंद्र इव प्रजानंदो । द्रोणमेघो नराधिपः ॥
॥ ३ ॥ सहजातो क्रीडितो धूल्या । सहैव च विवर्धितः ॥ निर्भाग्यशेखरस्तस्य । डुंगरोऽजनि सेवकः ॥ ४ ॥ ददाति शतशो राजा । बालमित्रधिया धनं ॥ तच्च तस्य क्वचिद्याति । दारिद्र्यमवतिष्टते ॥ ५ ॥ ततोऽसौ निष्फलारंभो । दीनो दारिद्र्यभाजनं ॥ कष्टां दशां समापन्नः । कष्टं नयति वासरान् ॥ ६ ॥ अन्येद्युः साधिताशेष—प्राभातिकप्रयोजने ॥ सभासिंहासनासीने । द्रोणमेघनराधिपे ॥ ७ ॥ वर्णगंधरसस्पर्शै—र्हृद्यं जनमनोहरं ॥ बीजपूरफलं राज्ञे । मालाकारेण ढौकितं ॥
॥ ८ ॥ प्रयोजनवशायाता । राजमाता वसुंधरा ॥ सन्मानिता नरेंद्रेण । भद्रासनमुपाश्रिता ॥ ९ ॥
यावदास्ते क्षणं तावद् । डुंगरोऽपि समागतः ॥ प्रणम्य भूभुजः पादा—न्निविष्टो दर्शितासने ॥
॥ १० ॥ वसुंधरा बभाणेदं । राजानं जातविस्मया ॥ किमेष दुःखितो वत्स । डुंगरस्तव सेवकः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ११ ॥ त्वं हि विश्वंभरो राजा । डुंगरश्च त्वदाश्रितः ॥ रत्नाकरः सखा यस्य । स कथं दुर्गताय-
ते ॥ १२ ॥ एतन्निशम्य संजात—गुरुखेदो नराधिपः ॥ जगादेदं जगत्पूज्यो । मातृप्रत्यायनाकृते
॥ १३ ॥ दत्तमस्मै मया मात—र्धनं जीवनहेतवे ॥ न तिष्ठति परं याति । छिद्रहस्ते यथा जलं
॥ १४ ॥ एवमुक्त्वा समाहूतः । शिल्पिकश्छेदकोविदः ॥ तथा च पाटितं तेन । मातुलिंगं प्रवेशि-
तं ॥ १५ ॥ नृपांगुलीयकं तत्र । लक्षमूल्यं मनोहरं ॥ सीवितं च तथा तेन । दुर्लक्षं जायते यथा
॥ १६ ॥ युग्मं ॥ भणिता वसुंधरा राज्ञा । स्वहस्तेन समर्पय ॥ फलमस्मै महामूल्यं । मुद्रालंका-
रसंभृतं ॥ १७ ॥ तयापि ढौकितं तस्मै । चलितोऽसौ निजे गृहे ॥ गछता चिंतितं तेन । किमने-
न करोम्यहं ॥ १८ ॥ यस्य मे भोजनं नास्ति । फलं तस्य करोति किं ॥ ततश्च गछता तेन । व-
णिक्पुत्रो धनंजयः ॥ १९ ॥ धनवानग्रतो दृष्टः । फलमस्मै समर्पितं ॥ तेनापि रूपको दत्त—स्त-
मादाय गृहं गतः ॥ २० ॥ युग्मं ॥

न ददात्यधिकं दातुं । विधिरस्य विडंबकः ॥ इतश्चास्ति सशृंगारा । मान्या मन्मथमंदिरं ॥
॥ २१ ॥ मगधासुंदरीनाम । राजपिंमविलासिनी ॥ धनंजयेन तत्तस्यै । दत्तं कामसुखार्थिना ॥२२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युग्मं ॥ तयापि सुंदरं ज्ञात्वा । रक्षितं न तु भक्षितं ॥ प्रभाते च तमादाय । सा गता नृपमंदिरे
॥ २३ ॥ प्रणम्य भूपतेः पादौ । तया तत्फलमर्पितं ॥ प्रत्यायनाकृते राज्ञा । समाहूता वसुंधरा ॥
॥ २४ ॥ ततः सुखासनस्थाया । दत्तमस्याः करे फलं ॥ ततो विलासिनी पृष्टा । कुतो लब्धमिदं
त्वया ॥ २५ ॥ तया वणिक्सुतः शिष्टो । वणिजापि च डुंगरः ॥ एतत् श्रुत्वा च दृष्ट्वा च । विस्म-
यस्मेरलोचना ॥ २६ ॥ प्रोवाचेदं सभामध्ये । राजमाता वसुंधरा ॥ अहो सत्यापितोऽनेन । जन-
वादोऽयमीदृशः ॥ २७ ॥ युग्मं ॥ अथवास्यापि नो दोषो । यस्य कर्म पराङ्मुखं ॥ द्रोणमेघजलं
जातु । डुंगरे नावतिष्ठते ॥ २८ ॥ अप्राप्तं जायते नैव । नाकृतं कर्म भुज्यते ॥ संप्राप्तं च कृतं
चैव । कर्म जीवफलप्रदं ॥ २९ ॥ भणितं च—जो जेत्तियस्स अत्थस्स । भायणं लहइ तेत्तियं
सो उ ॥ वुठेवि दोणमेहे । न डुंगरे पाणियं ठाइ ॥ ३० ॥ न हि भवति यन्न भाव्यं । भवति
च भाव्यं विनापि यत्नेन ॥ करगतमपि नश्यति । यस्य तु भवितव्यता नास्ति ॥ ३१ ॥ यद्यावद्या-
दृशं येन । कृतं कर्म शुभाशुभं ॥ तत्तावत्तादृशं तस्य । फलमप्यवतिष्ठते ॥ ३२ ॥ एवमुक्त्वा ग-
ता राज्ञी । विसर्जितसभो नृपः ॥ राजकार्यपरो जातो । डुंगरोऽपि गतो गृहं ॥ ३३ ॥ विषादवि-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

धुरो दीनः । खेदखेदितविग्रहः ॥ नष्टचेता निरानंद—श्चिंतयामास मानसे ॥ ३४ ॥ युग्मं ॥ वरं मृतो वरं दग्धो । वरं देशांतरे गतः ॥ यो जीवति पराबज्ञा—दुःखदग्धोऽपि मानवः ॥ ३५ ॥ मरणं वा विदेशो वा । द्वयमेव मे संगतं ॥ एवं विचिंत्य सुप्तोऽसौ । कृपा क्वापमुपागता ॥ ३६ ॥ रत्नसागरसंबंधी । भेरीझांकारभीषणः ॥ प्रभाते चलितः सार्थः । सोऽपि तेन समं गतः ॥ ३७ ॥ कृतरक्षो महायोधैः । सुखावासप्रयाणकैः ॥ दिनैः कतिपयैरेव । महाटव्यां विवेश सः ॥ ३८ ॥ या च नानाविधैर्वृंदै—र्विहगैश्च विराजिता ॥ विचरत्खड्गिशार्दूला । संत्रासितजगज्जना ॥ ३९ ॥ नभःश्रीरिव कुत्रापि । चलचित्रोपशोभिता ॥ अन्यत्र सिंहज्येष्टार्क—मूलमंदारराजिता ॥ ४० ॥ क्वचिद्भूतगणोपेता । भवानीव मनोहरा ॥ क्वचिद्भ्रमन्महाभोग—भुजंगशतसंकुला ॥ ४१ ॥ क्वचिन्महाशिवासंघ—फेत्कारसंरवाकुला ॥ क्वचित्प्रेतरसेवोच्चैः । सर्वलोकभयंकरा ॥ ४२ ॥ चतुर्भिः कलापकं ॥ स तस्यां दैवयोगेन । सार्थाद्भ्रष्टो भयद्रुतः ॥ बभ्राम भीषणेऽरण्ये । एकाकी कर्मयोगतः ॥४३॥ ततः प्रचंडशुंडेन । भीषिताखिलजंतुना ॥ ऊर्ध्ववालधिना तूर्ण—मितश्चेतश्च धावता ॥४४॥ वनवल्लीवितानानि । क्रोधावेशात्प्रभंजता ॥ गर्जता घनशब्देन । तुंगेन च तरस्विना ॥४५॥ का-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

लेनेव तु कालेन । नगजेन गजेन सः ॥ दृष्टः क्रूरदृशा तेन । हेलया हंतुमिछता ॥ ४६ ॥ त्रि-
भिर्विशेषकं ॥ डुंगरोऽपि गजस्याग्रे । धावमानः शनैः शनैः ॥ जराजर्जरसर्वांगीं । स्त्रियमेकां व्य-
लोकयत् ॥ ४७ ॥ सोऽपि तं गजमालोक्य । समागछंतमातुरः ॥ नश्यन्नितस्ततः शीघ्रं । वटमेक-
मुपागतः ॥ ४८ ॥ शतशाखं सुविस्तारं । सुपत्रं द्विजसेवितं ॥ पुण्यं पुण्यफलोपेतं । सत्पुरुषमि-
वोन्नतं ॥ ४९ ॥ कलापिकोकिलाकांत—सारिकाशुकशब्दितैः ॥ गायंतमिव नृत्यंतं । मरुत्कंपित-
पल्लवैः ॥ ५० ॥ तमारोढुमशक्तेन । भयभीतेन सर्वतः ॥ अधोऽधः पश्यता तेन । अंधकूपो विलो-
कितः ॥ ५१ ॥ त्रिभिर्विशेषकं ॥ वन्यवारणभीतेन । प्राणप्रीणनवांछया ॥ तेनात्मा चावटे क्षिप्तः
। सरस्तंबस्तदंतरे ॥ ५२ ॥

विलोकितो गृहीतश्च । भुजाभ्यां जीवितार्थिना ॥ स तत्र लंबमानो हि । यावदास्ते क्षणां-
तरं ॥ ५३ ॥ तावत्कूपतले दृष्टो—ऽजगरो यमसन्निभः ॥ ऊर्ध्ववक्त्रो महाकायो । बृहत्कुक्षिर्महो-
दरः ॥ ५४ ॥ रौद्रः संदर्शनादेव । संपादितमहादरः ॥ इतश्च पश्यता तेन । कूपांतश्च दरीस्थिताः
॥ ५५ ॥ चत्वारः पन्नगा दृष्टा । महाकाया महाभयाः ॥ सनीरनीरदछाया । रक्ताक्षाः क्षामकुक्षयः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५६ ॥ स्निग्धस्त्रीवेणिसंकाशा । द्विजिह्वा दुर्जनोपमाः ॥ सरस्तंबतले दृष्टौ । शुक्लकृष्णौ च वर्णतः ॥ ५७ ॥ मूषकौ तस्य मूलानि । खनंतौ तावनारतं ॥ इतश्च दंतिना तेन । क्रोधांधीकृतचक्षुषा ॥ ५८ ॥ तिर्यग्दत्तप्रकारेण । समुध्धृतकरेण च ॥ बलिना मदमत्तेन । दंताभ्यामाहतो वटः ॥ ॥ ५९ ॥ अष्टभिः कुलकं ॥ स शाखी शतशाखोऽपि । दशनाघातपीडितः ॥ चकंपे शत्रुणा रुद्धो । यथा कातरमानवः ॥ ६० ॥ नानानीडसमुड्डीन—विहंगमविकूजितैः ॥ मुक्तकंठं कठोरेण । शोदितीव स्वरेण सः ॥ ६१ ॥ अल्पसत्वस्य सत्वस्य । महतोऽपि महाभयं ॥ सिंहे लघुशरीरेऽपि । सत्वतो मृगराजता ॥ ६२ ॥ कूपस्योपरि या शाखा । तस्यां यन्मधूपुटकं ॥ तद्भग्नं मक्षिका नष्टा । धाविता डुंगरंप्रति ॥ ६३ ॥ स ताभिश्चंडतुंडाभिः । खाद्यमानो मुहुर्मुहुः ॥ किं करोति सहत्येव । तीव्रडुःखं परवशः ॥ ६४ ॥ शाखातः पतितो बिंदु—र्मधुनस्तस्य मस्तके ॥ शनैः शनैर्लुठन्नेष । मुखमूलमुपागतः ॥ ६५ ॥

ततः सर्वाणि डुःखानि । हस्त्यादीनि भयानि च ॥ विहाय पृष्टतः पापः । पपौ तं मधुबिंदुकं ॥ ६६ ॥ ललल्लालाकरालेन । जिह्वाग्रेण समंततः ॥ लिलेह स्वं मुखं श्वेव । रसास्वादनतत्परः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६७ ॥ दृष्टांतोऽयं समाख्यात । एष दार्ष्टांतिकोऽधुना ॥ भण्यते भव्यसत्वानां । भवनिर्वेदहेतवे
॥ ६८ ॥ जीवः पथिकसंकाशः । संसारश्च महाटवी ॥ वनहस्तिसमो मृत्यु—र्वनिता च जरा म-
ता ॥ ६९ ॥ मंदं मंदं प्रयात्येषा । पृष्ठौ लग्ना शरीरिणां ॥ एषैव सर्वजीवानां । राक्षसीव भयंकरा
॥ ७० ॥ कूपो नरभवः प्रोक्त—स्तमःस्तोमसमाकुलः ॥ आयुष्कं च सरस्तंब—मूलतुल्यं प्रचक्ष्यते
॥ ७१ ॥ वटो मोक्षसमः प्रोक्तः । सर्वजीवाभयंकरः ॥ यदर्थं योगिनः सर्वे । यतंते कृतनिश्चयाः
॥ ७२ ॥ द्वौ पक्षौ मूषकौ ज्ञेया—वायुर्मूलविनाशकौ ॥ पन्नगा इव चत्वारः । कषाया दुःखहेतवः
॥ ७३ ॥ रोगा मधुकरीतुल्या । नानादुःखनिबंधनाः ॥ यैरतीवाहतो जीवो । बंभ्रमीति भवाध्वनि ॥
॥ ७४ ॥ वक्रमाजगरं यत्तु । तद्घोरनरकोपमं ॥ गुरुकर्मरसासक्तो । धर्मकर्मपराङ्मुखः ॥ ७५ ॥
अभव्यो दूरभव्यो वा । पुमानेष विभाव्यतां ॥ ततो भव्या भवांभोधे—र्यदि वस्तरणे मतिः ॥
॥ ७६ ॥ तदेहदैर्न वै भाव्यं । भवभीतभवादृशैः ॥ तदिदं धर्मसर्वस्व—मुपदेशोऽयमुत्तमः ॥ ७७ ॥
इति मधुबिंदुरसासक्तकूपगतनरकथानकं समाप्तमिति. ॥ एवं स्थिते यत्कर्तव्यं तदुपदिशन्नाह—
॥ मूलम् ॥—तदहो मानुषत्वादि—सामग्रीं प्राप्य दुर्लभां ॥ सर्वसौख्यकरे नित्यं । धर्मे य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्नो विधीयतां ॥ १ ॥ व्याख्या—तत्तस्मात्कारणादहो इत्यामंत्रणे मानुषत्वं मनुजत्वमादिर्यस्याः सा चासौ सामग्री च तां, आदिशब्दादार्योत्रकुलादिग्रहः, प्राप्य लब्ध्वा दुर्लभां दुःप्रापां सर्वसौख्यकरे सकलसुखकरे जैने जैनेंद्रे धर्मे शुभानुष्ठाने यत्नः प्रयत्नो विधीयतां क्रियतामिति. ॥ अथ मानुषत्वं धर्मस्य मूलहेतुतया दर्शयन्नाह—

॥ मूलम् ॥—मानुषत्वं हि सद्धर्म—मूलनीवीसमं बुधैः ॥ कथ्यते समये श्रेष्टि—पुत्रत्रयनिदर्शनात् ॥ १ ॥ व्याख्या—श्लोकोऽयं सुगमो, न वरं सद्धर्ममूलनीवी प्रथमभांडमूल्यं तया समिति. तथा समये सिद्धांते श्रेष्टिपुत्रत्रयनिदर्शनाद्वणिक्सुतत्रयदृष्टांतादिति. कथानकमत्र—बभूव भुवनाख्याते । पुरे भूरिधनालये ॥ त्रिदशालयसंकाशे । वसंतपुरनामनि ॥ १ ॥ श्रियः स्थानं घनो नाम । श्रेष्टी धनदसन्निभः ॥ राजादीनां सदा मान्यः । सुहृद्बंधुसमाश्रयः ॥ २ ॥ बुभुजे निजकां लक्ष्मीं । बध्ध्वा सुगुणरज्जुभिः ॥ प्रियां कांतां समालिंग्य । बाहुभ्यामिव मारभाक् ॥ ३ ॥ मान्या प्रियंवदा शांता । सुरूपा शीलशालिनी ॥ सुभद्रेति बभूवास्य । गृहिणी गुणधारिणी ॥४॥ परस्परेण निश्छिद्र—प्रेमपूरितयोस्तयोः ॥ एकमेवाभवच्चित्तं । पृथक्त्वं देहमात्रतः ॥ ५ ॥ मनोर·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

थशतैर्जाता—स्तयोः पुत्रास्त्रयः क्रमात् ॥ धनयक्षो धनावासो । धनचंद्रः कनिष्ठकः ॥ ६ ॥ कृता-
नि नामधेयानि । वर्धापनकपूर्वकं ॥ प्रहृष्टश्च पिता चित्ते । माता माति न भूतले ॥ ७ ॥ पंचधा-
त्रीगृहीताश्च । परिवारकृतादराः ॥ सुखंसुखेन वर्धते । नंदने पादपा यथा ॥ ८ ॥ लालिताः पा-
लिताश्चैव । पाठिताः परिणायिताः ॥ विकारबहुले याव—दारूढा नवयौवने ॥ ९ ॥ भार्यायत्तत-
या ताव—न्मातृपितृपराङ्मुखाः ॥ ये निजास्ते परे जाता । धिग्धिग् यौवनजृंभितं ॥ १० ॥ प-
रस्परेण पितॄणां । जायते चित्तखेदनं ॥ कलहायोपतिष्ठंते । श्वश्र्वा सार्धं वधूटिकाः ॥ ११ ॥ अ-
न्येद्युः श्रेष्ठिनाचिंति । नेदं गृहविवृद्धिकृत ॥ यथा पृष्टा किलेंद्रेण । हे लक्ष्मि क्वोष्यते त्वया ॥
॥ १२ ॥ श्रुत्वा शक्रवचो लक्ष्मीः । किंचिदुत्फुल्ललोचना ॥ जगादेदं सुराधीशं । हृष्टवक्त्रा स्फुटाक्षरं
॥ १३ ॥ श्रूयतां श्रूयतां स्वामिन् । कथ्यते कथ्यते तव ॥ गुरवो यत्र पूज्यंते । धान्यं यत्र सुसं-
चितं ॥ १४॥ न दंतकलहो यत्र । तत्र शक्र वसाम्यहं ॥ कुटुंबकलहो नापि । तत्र वासो भवेन्म-
म ॥ १४ ॥ परिच्छेदो हि पांडित्यं । तदायत्ता हि सिद्धयः ॥ अपरिच्छिन्नतत्त्वानां । काचकिच्यं पदे
पदे ॥ १५ ॥ राज्यमंदिरगच्छानां । भारोऽयमतिदुर्वहः ॥ अयोग्यस्थापितो नूनं । स्थाणुतां न स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मश्नुते ॥ १६ ॥ ततः कृत्वा स्वपुत्राणां । योग्यायोग्यपरीक्षणं ॥ पात्रभूते गृहभारं । निवेश्याहं निराकुलः ॥ १७ ॥ करोमि धर्मकर्माणि । सृतं मे गृहचिंतया ॥ एवं विनिश्चयं कृत्वा । भणिता तेन गेहिनी ॥ १८ ॥ युग्मं ॥

कुसूत्रं ते गृहं भद्रे । वद किं क्रियतेऽधुना ॥ आर्यपुत्रो विजानाति । कार्याकार्यविवेचनं ॥ ॥ १९ ॥ आज्ञाकारी जनस्तेऽयं । ततः श्रेष्ठी बभाषतां ॥ महाकटकृतछायं । सर्वतो रचितासनं ॥ ॥ २० ॥ महांतं महतां योग्यं । रम्यं रंजितसज्जनं ॥ सर्वतोऽपि परिक्षिप्तं । मंडपं रचयाम्यहं ॥२१॥ युग्मं ॥ भवत्यपि वराहारं । निष्पादयतु सत्वरं ॥ येनैष भोज्यते लोको । मंडपे चोपवेश्यते ॥ ॥ २२ ॥ तथेति प्रतिपद्यासौ । पाकं कर्तुं समुद्यता ॥ निष्पन्नस्तत्क्षणादेव । पाकः पुण्यजनोचितः ॥ २३ ॥ वैवाहिकाः स्वगोत्राश्च । ये चान्ये राजपूजिताः ॥ श्रेष्ठिनामंत्रिताः सर्वे । भोजनार्थं निजे गृहे ॥ २४ ॥ आयाता भोजिताश्चैव । मंडपे चोपवेशिताः ॥ तांबूलादिप्रदानेन । कृताः सन्मानभाजनं ॥ २५ ॥ स्वयं मंडपमध्यस्थो । निषण्णो वरविष्टरे ॥ मंडपागतलोकेन । सर्वतः परिवारितः ॥ २६ ॥ सहस्रमानमेकैकं । तद्भृत्यैर्वासनत्रयं ॥ श्रेष्ठिवाक्यात समानीय । मुक्तं तत्पाद-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

योः पुरः ॥ २७ ॥ समाहूताः सुताः सर्वे । जनाध्यक्षं च जाषिताः ॥ वत्सा या मंदिरे लक्ष्मीः । सा सर्वापि मयार्जिता ॥ २८ ॥ तया गर्वो न कर्तव्य—स्तद्भागोऽपि न संगतः ॥ यतः सा जननीतुल्या । वंदनीया विवेकिनां ॥ २९ ॥ यौवनेऽपि समारूढा । अर्थोपार्जनवर्जिताः ॥ नरास्ते रूपमात्रेण । तत्वतो नरकीटकाः ॥ ३० ॥ न देशजाषाविज्ञानं । न देशाचारविज्ञता ॥ न च नेपथ्यविज्ञानं । न स्वपुण्यपरीक्षणं ॥ ३१ ॥ वाणिज्येन विना नैत—न्नराणामुपजायते ॥ वाणिज्यविकला लोके । पशवः शृंगवर्जिताः ॥ ३२ ॥ स्वभुजोपात्तवित्तेन । जोगो दानं च शोजते ॥ पितृलक्ष्म्या तु कुर्वंति । ये ते मानविवर्जिताः ॥ ३३ ॥ कालकारी नरो लोके । केन केन न शस्यते ॥ प्राप्नोति वांछितं चार्थं । यतोऽवाचि विचक्षणैः ॥ ३४ ॥ प्रथमे नार्जिता विद्या । द्वितीये नार्जितं धनं ॥ तृतीये नार्जितो धर्म—श्चतुर्थे किं करिष्यति ॥ ३५ ॥ इत्याद्युक्त्वा स्वहस्तेन । पुत्राणां च करे कृतं ॥ एकैकं वासनं तेन । यात यातेति जल्पता ॥ ३६ ॥

अथ प्राचींप्रति ज्येष्ठ—श्चलितो हृदि पीडितः ॥ दिनैः कतिपयैरेव । प्राप्तो विश्वपुरं पुरं ॥ ॥ ३७ ॥ वेश्यास्तांबूलिकास्तत्र । द्यूतकाराश्च मालिकाः ॥ वसंति बहवो लोका । धनाकर्षणहेतवे

॥ ३८ ॥ अथ तत्र पुरे तस्य । संजाता चित्तनिर्वृतिः ॥ उन्मुद्य वासनं पैत्र्यं । चिंतितं मूढचेत·
सा ॥ ३९ ॥ सत्यापितश्च तातेन । जनवादोऽयमीदृशः ॥ वृद्धत्वे हि मनुष्याणां । पंचानिष्टसमु·
द्भवाः ॥ ४० ॥ दुर्भाषालीकभाषित्वं । निर्लज्जत्वं भयं तथा ॥ तृष्णा च प्रत्यहं तस्य । देहेन स·
ह वर्धते ॥ ४१ ॥ यदसौ न विजानाति । युक्तायुक्तविवेचनं ॥ विवेकविकलो वृद्धो । जरया वि·
मनीकृतः ॥ ४२ ॥ धनिनो यौवने धन्या । धनभोगोपभोगिनः ॥ संरक्षितेन किं तेन । दत्तभुक्त·
फलं धनं ॥ ४३ ॥ एवं वितर्क्य स स्वांते । गतः कांदविकापणे ॥ भुक्तो यथेच्छया तेना—हारश्च
मनसः प्रियः ॥ ४४ ॥ किंचिद्व्ययमधन्येन । वेश्याभिः सह भक्षितं ॥ किंचिद्द्यूतेन तत्तेन । हा·
रितं हीनकर्मणा ॥ ४५ ॥ पुष्पेषु व्ययितं किंचि—त्किंचित्तांबूलभक्षणे ॥ किंचिद्गायकलोकेषु ।
नग्नाचार्येषु किंचन ॥ ४६ ॥ किंचित्किंचित्कृतं सर्वं । तस्य हस्ते न किंचन ॥ ततो नकिंचनो जा·
तः । क्षामकुक्षिः सुधालयः ॥ ४७ ॥ पाटिताखिलसद्वस्त्रः । कृतकर्पटकः कुधीः ॥ कुंभकारापणे ग·
त्वा । गृहीत्वाखंडहंडिकां ॥ ४८ ॥ रज्ज्वा संयम्य यत्नेन । गृहीत्वा दक्षिणे करे ॥ भिक्षां बभ्राम
सर्वत्र । पुरे कार्पटिको यथा ॥ ४९ ॥ युग्मं ॥ यतः—अभिमतमहामानग्रंथिप्रभेदपटीयसी । गु·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रुतरगुणग्रामांभोजस्फुटोज्ज्वलचंद्रिका ॥ विपुलविलसल्लज्जावल्लीवितानकुगरिका । जठरपिठरी दुः-
पुरेयं करोति विडंबनां ॥ ५० ॥ निर्गत्य सरसीतीरे । जलस्नेहं कुभोजनं ॥ भुक्त्वा नीत्वा दिनं
तत्र । मक्षिकाशतसंकुलः ॥ ५१ ॥ नक्तं सुष्वाप शून्येषु । देवगेहेषु दुःस्थितः ॥ वर्षावधिं नय-
त्येष । जीवन्मृतकसन्निभः ॥ ५२ ॥ धनावासोऽपि कौबेरीं । गत्वैकत्र पुरे स्थितः ॥ सोऽपि संचिं-
तयामास । यथा ज्येष्टेन चिंतितं ॥ ५३ ॥ समस्ति कारणं किंचि—ज्ज्ञातो वेत्ति न चापरः ॥ त-
तो यामद्वयं याव—द्व्यवहारो मम संगतः ॥ ५४ ॥ उपार्जितस्य चार्थस्य । भक्षणं मूलरक्षणं ॥
सोऽपि शास्त्रे वणिग्दृष्टो । मूलं यस्य न नश्यति ॥ ५५ ॥

एवं च कुर्वतस्तस्य । प्रत्यहं यांति वासराः ॥ धनचंद्रो वारुणीं गत्वा । स्थितश्चैकत्र पत्तने ॥
॥ ५६ ॥ चिंतितं सुधिया तेन । स्वस्थानेऽपि न सुंदरं ॥ व्यसनं शिष्टलोकानां । विदेशेषु विशे-
षतः ॥ ५७ ॥ असारेऽप्यत्र संसारे । पितरौ सारतां गतौ ॥ यच्चाहितौ तदा कोऽन्यो । हितो हंत
भविष्यति ॥ ५८ ॥ व्यसनं सकलं त्यक्त्वा । ग्रासाछादनतत्परः ॥ अर्थचिंतापरः शेते । यामद्वंद्वं
यथा मुनिः ॥ ५९ ॥ शेषकालं गतालस्यो । व्यवहारं चकार सः ॥ जातश्चाष्टगुणो लाभ—स्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्य स्वल्पदिनैरपि ॥ ६० ॥ संपूर्णविधयः सर्वे । चलिताः स्वगृहोन्मुखाः ॥ सुखं सुखेन संप्राप्ता । ग्रामे ते गुणसुंदरे ॥ ६१ ॥ कनिष्टेन पुमानेको । वार्ताकथनहेतवे ॥ प्रेषितः श्रेष्टिनस्तेन । सर्वा वार्ता निवेदिता ॥ ६२ ॥ जणिता श्रेष्टिना जद्रा । सुजडे तव नंदनाः ॥ तिष्टंति मिलिताः सर्वे । ग्रामे ते गुणसुंदरे ॥ ६३ ॥ गमने यो विधिस्तेषा—मागमेऽपि स एव हि ॥ क्रियतां येन लोकस्य । प्रतीतिर्जायते प्रिये ॥ ६४ ॥ तथैव विहितं सर्वं । लोके मंडपमाश्रिते ॥ ग्रामादानायिता पुत्राः । समासन्नाश्च धारिताः ॥ ६५ ॥ पूर्वं प्रवेशितो ज्येष्टो । भृत्यैर्वामकरैर्धृतः ॥ लज्जानधोमुखः क्षीणः । स्खलत्पादः पदे पदे ॥ ६६ ॥ पापः प्रकटकौपीनः । कृतकच्छोटकः कटौ ॥ सर्वलोककृपास्थानं । दुर्बलोऽतिमलाविलः ॥ ६७ ॥ भृत्यद्वयेन लज्जालु—र्धृत्वा वामेतरे करे ॥ मुक्तोऽग्रे स समानीय । श्रेष्टिनः श्रेष्टकर्मणः ॥ ६८ ॥ जणितः श्रेष्टिना वत्स । पादं पूजय मामकं ॥ दक्षिणं मूलनीत्या त्वं । लब्धलाजेन वामकं ॥ ६९ ॥ ग्रहैरिव गृहीतोऽसौ । मंत्रैरिव जम्नीकृतः ॥ निरुद्धवचनः शून्यो । जणितोऽपि न जाषते ॥ ७० ॥ आकारसंवरं कृत्वा । पृष्टं शपथपूर्वकं ॥ वत्स सत्यं प्रवक्तव्यं । तत्र गत्वा पुरे त्वया ॥ ७१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किमुक्तं चिंतितं किं वा । किं वा कर्म त्वया कृतं ॥ तेनापि च यथा वृत्तं । तथा सर्वं निवेदितं ॥ ७२ ॥ युग्मं ॥ तत श्रुत्वा कुपितः श्रेष्ठी । किंचित्कंपितकंधरः ॥ उवाच मिलितं लोकं । सर्वं सावेशमानसः ॥ ७३ ॥ जो पश्यत जना यूयं । ज्येष्टपुत्रस्य चेष्टितं ॥ व्यवसायं पितृजक्तिं च । शरीरस्य स्थितिं तथा ॥ ७४ ॥ एवंविधेन वेषेण । साधुरेव प्रशस्यते ॥ पूज्यते च जनैः सर्वैः । स्तूयते स्तुतिजिस्तथा ॥ ७५ ॥ निर्धनः श्लाघ्यते साधु—रहो मुनिरकिंचनः ॥ मलिनो मान्यतामेति । मलधारी महामुनिः ॥ ७६ ॥ दुर्बलः पूज्यते लोके । जो कष्टं तप्यते तपः ॥ दुष्टदुर्मुखवाक्यानि । सहन् लोकेन शस्यते ॥ ७७ ॥ क्षमावानेष वंद्योऽयं । धन्यो धर्मशिरोमणिः ॥ कदन्नजोजी लोकेन । जाण्यते निःस्पृहो मुनिः ॥ ७८ ॥ जूमिशायी मुनिर्लोके । कष्टकारीति जण्यते ॥ रोमपादनखादीनां । वर्धनं गुणवर्धनं ॥ ७९ ॥ परुषत्वमचर्या च । केशानां श्लाघ्यते जने ॥ अस्नानं च प्रशस्यंति । नैव स्नांति दमे रताः ॥ ८० ॥ स्नानमुद्वर्तनाभ्यंगे । नखकेशादिसत्क्रियां ॥ गंधं माल्यं च तांबूलं । प्रदीपं तु मुनिस्त्यजेत् ॥ ८१ ॥ स्मृतिरपि—ब्रह्मचर्यस्थितो नैव—मन्नमद्यादि निंदितं ॥ दंतधावनगीतादि । ब्रह्मचारी विवर्जयेत् ॥ ८२ ॥ एतान्युन्नतिकारीणि । साधू·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नां शीलशालिनां ॥ अनुन्नतिकराण्येव । जायंते गृहमेधिनां ॥ ८३ ॥ उक्तं च—कार्श्यं क्षुत्प्रभ-
वं कदन्नमशनं शीतोष्णयोः पात्रता । पारुष्यं च शिरोरुहेषु शयनं मह्यास्तले केवलं ॥ यान्येवाव-
नतिं वहंति गृहिणां तान्युन्नतिं संयमे । दोषाश्चापि गुणीभवंति हि नृणां योग्ये पदे योजिताः ॥
॥ ८४ ॥ तदेष ज्येष्ठपुत्रो मे । निर्भाग्यो गुरुतल्पगः ॥ अयोग्यो गृहभारस्य । बाह्यकर्मकरोऽ-
स्त्विति ॥ ८३ ॥ मूलनीवीधनं मुक्त्वा । पादाग्रे प्रणतिं गतः ॥ द्वितीयो भणितः पित्रा । पुत्रेदं
मामकं धनं ॥ ८४ ॥ दूरं दूरतरं यांति । पुरुषा लाभवांछया ॥ समूलं ते समेतस्य । बहिश्चारो
निरर्थकः ॥ ८५ ॥ ज्येष्ठवदनुज्येष्ठोऽपि । कृतः शपथशापितः ॥ तेनापि कथितं सर्वं । यत्कृतं यच्च
चिंतितं ॥ ८६ ॥ लोकाः शृणुत सर्वेऽपि । मिलिता मामकं वचः ॥ एषोऽपि कर्मकार्येव । मंदिरे
किंतु मध्यमः ॥ ८७ ॥ कनिष्ठोऽपि समायातो । भृत्यवर्गसमन्वितः ॥ आदेशार्थी पुरोभूय । स्थि-
तो विरचितांजलिः ॥ ८८ ॥ मूलनीवीधनं सर्वं । पादे मे मुंच दक्षिणे ॥ वामे विवर्धितं मुक्त्वा ।
ममोत्संगे निवेश्यतां ॥ ८९ ॥ त्वन्मुखामृतपानस्य । चिरकालमुत्कंठितः ॥ अद्याहं मुदितो जातो
। जात त्वय्यवलोकिते ॥ ९० ॥ क्व मेघा बर्हिणः कुत्र । क्व चंद्रः क्व च सागरः ॥ गुणाः कुर्वंति

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दूतत्वं । दूरेऽपि वसतां सतां ॥ ७१ ॥ धनचंडस्तथा प्रोक्तः । पितुरंकमुपागतः ॥ हर्षाश्रुपूरिताक्षे-
ण । तेनाचुंबि स मस्तके ॥ ७२ ॥ भणितो वत्स किं तत्र । वाणिज्यं कुर्वता सता ॥ अयमासा-
दितो लाभो । मूलादष्टगुणो महान् ॥ ७३ ॥ तेनापि कथितं सर्वं । यत्कृतं यच्च चिंतितं ॥ ला-
भश्च पूज्यपादानां । पुण्यैरासादितो मया ॥ ७४ ॥ निशम्य तस्य वाक्यानि । धनो मनसि रंजि-
तः ॥ हर्षाश्रुपूरिते बिभ्र—च्चक्षुषी गद्गदस्वरो ॥ ७५ ॥ पुण्यानुबंधिपुण्येन । जन्म संभाव्यते तव
॥ सुक्षेत्रमिव शस्यानां । त्वं पात्रं सर्वसंपदां ॥ ७६ ॥ लभ्यते ऋक्षसंख्यापि । गण्यंते द्वीपसागराः
॥ तव देहे गुणानां तु । पर्यंतोऽपि न लभ्यते ॥ ७७ ॥ त्वयैव पुत्री पुत्राहं । त्वयैव गुणवानहं ॥
त्वयैव श्लाघ्यतां नीत—स्त्वया जातो निराकुलः ॥ ७८ ॥ मनांसि शिष्टलोकानां । कूपोदकसमा-
न्यहो ॥ निर्गुणैः स्तब्धकैः शून्यै—र्गृह्यंते न कदाचन ॥ ७९ ॥ भो लोकाः साक्षिणो यूयं । वि-
संवादनिवारणे ॥ कनिष्ठेऽपि गुणाधारे । धनचंडेऽस्ति मे मनः ॥ १०० ॥ यत उक्तं—गुणा गौ-
रवमायांति । महत्त्वेन न रूपतः ॥ कलंकी न तथा पूज्यो । निष्कलंको यथा शशी ॥ १ ॥ त-
तश्च सर्वलोकानां । पुरतो मंगलपूर्वकं ॥ गृहभारोऽश्रुणा सार्धं । मूर्ध्नि तस्य निवेशितः ॥ २ ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

कुबुद्ध्या नाशितो ज्येष्ठो । गृहे कर्मकरः कृतः ॥ सुबुद्धियोगतो जातो । धनचंडो गृहाधिपः ॥३॥ कुबुद्धिदानतः क्रुद्धः । कुमित्रपरिवारितः ॥ विधिरेष उपायेन । पुंसो हरति संपदं ॥ ४ ॥ सुबुद्धिदानतस्तुष्टः । सुमित्रपरिवारितः ॥ विधिरेष उपायेन । नरस्य कुरुते श्रियं ॥ ५ ॥ नास्त्यसाध्यं सुचीर्णानां । पुरा जन्मनि कर्मणां ॥ धनचंडेण येनात्मा । लघुनापि गुरूकृतः ॥ ६ ॥ उक्तं च—लहुएणवि वड्डबीयं—कुरेण साहिसयाए मझंमि ॥ तह संठविउं अप्पा । जह सेसतरू तले तस्स ॥ ७ ॥ वीचिव्याप्तवियद्वितानवसुधं कागाधरंध्रं पयो । गोलांगूलसलीलपाणिकलिताः क्षुद्राः क ते क्ष्माभृतः ॥ बध्ध्वा दाशरथिस्तथापि जलधिं प्रत्याजहार प्रियां । ग्रावाणोऽपि तरंति वारिणि यदा पुंसोऽनुकूलो विधिः ॥ ८ ॥ ततस्तं शिक्षयामास । श्रेष्ठी स्नेहपरायणः ॥ वत्सावहितचित्तेन । श्रोतव्यं मामकं वचः ॥ ९ ॥ एष भारो महाभारो । दुर्वहः किन्नरैर्नरैः ॥ तदयं पुत्र वोढव्यो । गतालस्येन सर्वदा ॥ १० ॥ यथा न तरलायंते । दुर्जना दुःखदायिनः ॥ श्यामायंते यथा नैते । सज्जनाः सुखकारिणः ॥ ११ ॥ सर्वदैव सलज्जेन । स्वोपयोगेन सर्वदा ॥ व्यसनं व्यसनं कृत्वा । कर्तव्यं सुगुणार्जनं ॥ १२ ॥ देवानां च गुरूणां च । कार्या भक्तिरकृत्रिमा ॥ सर्वत्रो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चितवृत्त्या च । वर्तितव्यं विवेकिना ॥ १३ ॥ माननीया जना मान्या । निंदनीया न केचन ॥ परमर्म न वक्तव्यं । कर्तव्यो धर्मसंग्रहः ॥ १४ ॥ कर्कशं न वचो वाच्यं । न शाठ्यं बद्धमुष्टिना ॥ इंद्रियाणि वशीकृत्य । पालनीयो गृहाश्रमः ॥ १५ ॥ गृहांतर्वातलः कोऽपि । पित्तलः कोऽपि कोपनः ॥ मानी मायी च लोभी च । कलही चापि कश्चन ॥ १६ ॥ दुःशीलो दुर्भगः कोऽपि । कोऽपि दुष्टो परो जडः ॥ गृहनायकेन कर्तव्या । सर्वेषामनुवर्तना ॥ १७ ॥ स्वल्पजल्पक्रियाकारी । देहादर्शितविक्रियः ॥ श्लाघ्यते सर्वलोकेन । यत उक्तं महात्मभिः ॥ १८ ॥ न खनति खुरैः क्षोणीपृष्टं न नर्दति सादरं । प्रकृतिपुरुषं प्रेक्ष्याप्यग्रे न कुप्यति गोंतरं ॥ वहति च धुरं धुर्यो धैर्यादनुद्धरकंधरो । जगति गुणिनः कार्यौदार्यात्परानतिशेरते ॥ १९ ॥ दानादिगुणसंयुक्तः । सदाचारपरायणः ॥ कुलाचारैकचित्तश्च । केन केन न शस्यते ॥ २० ॥ यतः—

त्यागैः सच्चरितैर्दयाभिरतुलैरन्योपकारैर्गुणै—र्गुर्वादेर्विनयैस्तपोभिरमलैः शुभ्रैर्यशोभिर्नयैः ॥ तारस्फारविवेकतो निजकुलाचारात्तथा धर्मतो । यो धीरैर्धुरि देहिनां न गणितः किं सोऽपि मर्त्यो भुवि ॥ २१ ॥ सर्वस्य चोन्नतिः कार्या । वार्या दुर्जनसंगतिः ॥ स्त्रीणां वशे न गंतव्यं । वचो वा-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

च्यं न कर्कशं ॥ २२ ॥ एवं च जायते कीर्ति—र्यशः सर्वत्र जृंभते ॥ लभ्यते प्रथमा रेखा । स-
त्पुरुषविचारणे ॥ २३ ॥ कियत्ते कथ्यते वत्स । संक्षेपात् शृणु सांप्रतं ॥ दोषा हेया गुणा ग्राह्याः
। कर्तव्या निर्मला दया ॥ २४ ॥ एवं श्रेष्ठी समाश्वास्य । धनचंद्रं मुदं दधौ ॥ गुणिन्यपि गुणा-
धानं । गुणायैवोपजायते ॥ २५ ॥ गृहस्य स्वामिनं कृत्वा । दत्वा परिजनं निजं ॥ स्वयं श्रेष्ठी स-
मारब्धो । धर्म कर्तुमनाकुलः ॥ २६ ॥ दृष्टांतोऽयं समाख्यातो । दार्ष्टांतिक इहोच्यते ॥ संसारिका-
स्त्रयः सत्वा । मानुषीं योनिमागताः ॥ २७ ॥ तत्रैको लब्धसम्यक्त्वः । सत्यशौचसमन्वितः ॥ ल-
ब्धलाभवणिक्तुल्यो । मृत्वा देवेषु जायते ॥ २८ ॥ परस्तनुकषायत्वा—द्दानदातृत्वयोगतः ॥ मू-
लाहारिवणिक्तुल्यो । मृत्वा भवति मानवः ॥ २९ ॥ तृतीयस्तु महापापो । धर्मकर्मबहिर्मुखः ॥
जीवघाती मृषावादी । चौर्यचातुर्यसंगतः ॥ ३० ॥ परनार्यारतः पापो । महारंभपरिग्रहः ॥ समूल-
हारिणा तुल्यो । नरकं याति दारुणं ॥ ३१ ॥ मानुषत्वं भवेन्मूलं । लाभो देवगतिर्भवेत् ॥ मूल-
नाशेन जीवानां । नारकतिर्यग्योनिता ॥ ३२ ॥ लब्धलाभसमैर्भाव्यं । सर्वथा भव्यजंतुभिः ॥ मू-
लाहारिसमैर्वापि । न तुल्यैर्मूलहारिणा ॥ ३३ ॥ तदहो दुर्लभं प्राप्य । मानुष्यं भवकोटिभिः ॥ य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तध्वं सर्वदा धर्मे । येनेदं सफलं जवेत् ॥ ३४ ॥ इति वणिक्त्रयकथानकं परिसमाप्तं ॥ भूयोऽपि धर्मं प्रशंसयन् श्लोकचतुष्टयमाह—

॥ मूलम् ॥—संप्राप्य मानुषं जन्म । दुर्लजं जवकोटिजिः ॥ व्यापारितं सदा धर्मे । यैस्ते ह्यत्र नरोत्तमाः ॥ १ ॥ गछतां दुर्गसंसार—मार्गे पर्यंतवर्जिते ॥ धर्मसंबलमृते पुंसां । दुःखमानि पदे पदे ॥ २ ॥ सीदंत्यत्र न यैर्धर्मः । सम्यगासेवितः पुरा ॥ सांप्रतं न च कुर्वंति । तेषामग्रेऽपि नो सुखं ॥ ३ ॥ तदेष जगवान् धर्मो । दुर्गतिगतधारकः ॥ सद्भिः सदैव कर्तव्यः । सर्वसौख्यनिबंधनं ॥ ४ ॥ व्याख्या—संप्राप्य लब्ध्वा मानुषं मनुजजवसंबंधि जन्म जननं दुर्लभं दुःप्रापं जवकोटिजिर्नरकादिजवलक्षशतसहस्रैर्व्यापारितं नियोजितं सदा नित्यं धर्मे सदनुष्ठानरूपे यैः कैश्चिदनिर्दिष्टनामजिस्तेऽत्रास्मिन् लोके नरोत्तमाः प्रधानपुरुषाः. ॥ १ ॥ गछतां व्रजतां दुर्गसंसारमार्गे विषमजववर्त्मनि पर्यंतवर्जिते निधनरहिते धर्मसंबलं धर्मपाथेयमृते विना पुंसां पुरुषाणां दुःखमानि दुःखशतविधायित्वाद् दुःखानि पदे पदे स्थाने स्थान इति. ॥ २ ॥ सीदंति समजिलषितार्थापूर्त्या दुःखमनुजवंति, अत्र मनुष्यजवे न नैव यैर्नरैर्धर्मः सुदरानुष्ठानं सम्यक् शोजनेन न्यायेनासेवितः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कृतः पुरा पूर्वं, सांप्रतमधुना च नैव कुर्वंति विदधति तेषामग्रेऽपि तेषां नराणामग्रेऽपि परलोकेऽपि नो नैव सुखं समेति. ॥ ३ ॥ तस्मात्कारणादेषोऽयं पूर्वोक्तो भगवान् सकललोकपूजनीयो धर्मः श्रुतधर्मश्चारित्रधर्मश्च दुर्गतिगतधारको दुर्गतिप्रस्थितजंतुनिवारकः सद्भिः सत्पुरुषैः सदैव सदाकालं कर्तव्यो विधेयः सर्वसौख्यनिबंधनं सकलशर्मकारणमिति श्लोकचतुष्टयसमासार्थः. ॥ ४ ॥ तथा—

॥ मूलम् ॥—धर्मो विजयी सर्वत्रा—ऽधर्मो विजयवर्जितः ॥ ततोऽधर्मं परित्यज्य । धर्मे यत्नो विधीयतां ॥ १ ॥ व्याख्या—धर्मः शोभनानुष्टानं विजयी विजयवान् सर्वत्र सर्वलोके, अधर्मो धर्मविपक्षो विजयवर्जितो जयरहितः, ततस्तस्मात्कारणादधर्मं परित्यज्य विमुच्य धर्मे यत्न आदरो विधीयतां क्रियतामिति. ॥ १ ॥ स च सदनुष्टानेन शिष्टसमाचारपालनेन च भवति. लोकाश्चेह बहवो महारंभमहापरिग्रहासक्ताश्चौर्यपारदार्यप्रभृतिदुर्नयकारिणश्च, तथाप्यात्मानं धार्मिकाणां धुरि धारयंति, आत्मसंतुष्टत्वाज्जगत इति. एतदर्थप्रतिपादकश्च दृष्टांतोऽयं, तद्यथा—

अस्तीह मगधो नाम । देशो देशशिरोमणिः ॥ महेश्वरकृतावासः । स कैलाश इवोन्नतः ॥ ॥ १ ॥ यत्र नार्यश्च वाप्यश्च । निर्मलाः सुपयोधराः ॥ सुतेजसः सुवंशोत्था । मुक्ताश्च मुनयोऽपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च ॥ २ ॥ पुरं राजगृहं तत्र । निवासः सर्वसंपदां ॥ विशालेनोच्चशालेन । परितः परिवेष्टितं ॥३॥
तत्रासीत् श्रेणिको राजा । स्वगुणै रंजितप्रजः ॥ भांडागारादिसंपूर्णः । सुप्रतापी परंदमः ॥ ४ ॥
गृहीतहृदया तस्य । चेल्लणा नाम गेहिनी ॥ रोहिणीव शशांकस्य । विलसत्तारतारिका ॥ ५ ॥
तथाभयाभिधानश्च । मंत्रिपुत्रश्च सद्गुणः ॥ बुद्ध्या सर्वातिशायिन्या । त्रिदशाचार्यसन्निभः ॥ ६ ॥
अथान्यदा समारूढः । प्रासादे मेदिनीपतिः ॥ परितः प्रेषयामास । दृष्टिं दृष्टव्यदर्शनः ॥ ७ ॥ य-
त्र यत्र प्रयात्यस्य । दृष्टिर्दर्शनलोलुपा ॥ पश्यति तत्र तत्रापि । लक्षशः कोटिशो जनान् ॥ ८ ॥
ततः सकौतुको राजा । प्रासादादवतीर्य सः ॥ सर्वतः पुरमालोक्य । सभामंडपमागतः ॥ ९ ॥
सामंतमंत्रिणः सर्वे । समायाताश्च तत्क्षणं ॥ संनिषण्णा निजे स्थाने । तान् सन्मान्य ततो नृपः ॥
॥ १० ॥ लोकविस्मयकारीद—मकालजलदोपमं ॥ प्रोवाचि च नरेंद्रेण । मंत्रिणो मिलितान् प्र-
ति ॥ ११ ॥ एतस्मिन्नगरे लोका । बहवो ये वसंति नः ॥ किं पापा धार्मिका वेति । ममेदं क-
थ्यतां द्रुतं ॥ १२ ॥ श्रुत्वेदं मंत्रिणो बुद्ध्या । पर्यालोच्य परस्परं ॥ प्रोचुश्च बहवः पापा । वसंत्यत्र
पुरे प्रभो ॥ १३ ॥ धार्मिका गणिताः केचि—च्छतांशादपि दुर्लभाः ॥ कुकर्मकारिणां पुंसां । पर्य-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

तोऽपि न लभ्यते ॥ १४ ॥ तन्मंत्रिजल्पितं वाक्यं । राज्ञोऽपि हृदि संस्थितं ॥ केवलं वक्ति नो किंचि—दन्नयो मंत्रिणां वरः ॥ १५ ॥ अशृण्वन्निव तूष्णीक । आस्तेऽधोनमितेक्षणः ॥ जल्पितो नृभृता मंत्रि—न्नुत्तरं किं न दीयते ॥ १६ ॥ स प्राह न विजानेऽहं । देवोत्तरमुदीरितुं ॥ अजानानस्य सर्वत्र । मौनं सर्वार्थसाधनं ॥ १७ ॥ यथैते तव जानंति । मंत्रिणः कार्यनिश्चयं ॥ तथाहं न विजानामि । विभिन्ना मतयो नृणां ॥ १८ ॥ अहं तु ननु जानामि । प्रभूता धार्मिका जनाः ॥ वसंति च स्वल्पाः पापाः । कुरु तात परीक्षणं ॥ १९ ॥ स्वल्पशौचा अधर्मिष्ठा । अरण्यानीनिवासिनः ॥ अविचारा न शस्यंते । नरा गड्डुरिका यथा ॥ २० ॥ अपरीक्षितकारित्वं । मृतानां देहमंडनं ॥ बधिरेण समं मंत्रो । जात्यंधमुखमंडनं ॥ २१ ॥ ततः परीक्षणाहेतोः । पुरमध्ये सितेतरं ॥ प्रासादद्वयमुत्तुंगं । कारयित्वा मनोहरं ॥ २२ ॥ परितः पटहेनाशु । श्रावयित्वाखिलं जनं ॥ यथा नो नृभृता धर्म्यः । प्रासादः कारितो महान् ॥ २३ ॥ द्वितीयः पापनामा च । तत्र यः कोऽपि धार्मिकः ॥ धर्म्यं प्रासादमागत्य । स आरोहतु सत्वरं ॥ २४ ॥ पापो जनो द्वितीयं तु । प्रासादमुपगच्छतु ॥ एतत् श्रुत्वा जनः सर्वो । धावितो धर्ममंदिरे ॥ २५ ॥ त्विभिर्विशेषकं ॥ निरोद्धुं श·

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

क्यते नैव । प्रतीहारशतैरपि ॥ चक्रिणः कल्पपालाश्च । मत्स्यबंधाश्च खट्टिकाः ॥ २६ ॥ वेश्या वा गुरिका गोप्ता । ये चान्ये पापकारिणः ॥ प्रतीहारेण ते प्रोक्ताः । किं यूयमिह चागताः ॥ २७ ॥ मद्यमांसरसासक्ता । जीवघातपरायणाः ॥ अधर्मिष्ठाः कुकर्माणो । लोकनिंद्याश्च सर्वदा ॥ २८ ॥ त्रिभिर्विशेषकं ॥ जगाद चक्री चक्रं नो । धर्मांगं प्रथमं स्मृतं ॥ विचारय प्रतीहार । कथ्यमानं वचो मम ॥ २९ ॥ द्विजपाखंडिदीनांध—पंगुभ्यस्तैलधारया ॥ दत्तया किं न धर्मो न । इति सम्यग्विज्ञाप्यतां ॥ ३० ॥

तडागे खन्यमाने तु । लेष्ठाकर्षणसन्निभं ॥ अर्थमात्रसमुद्भं वा । पुण्यं केन निवार्यते ॥३१॥ सौवासिनी द्विजेभ्यश्च । दक्षिणा या प्रदीयते ॥ तद्भवो धर्मसंतानः । किमस्माकं न जायते ॥ ॥ ३२ ॥ ततो वयं सुधर्मिष्टा । धर्मकर्मविचक्षणाः ॥ धर्मप्रासादयोग्याश्च । मुधा वारयते भवान् ॥ ॥ ३३ ॥ अत्रांतरे समायाता । सुनंदवणिगंगजा ॥ विटभोज्या महापापा । न वेश्या न कुलांगना ॥ ३४ ॥ जारघातितभर्तृका । निर्मर्यादा गतत्रपा ॥ वर्जिता पितृवर्गेण । श्वशुरेणापि वर्जिता ॥ ३५ ॥ उद्घाटमस्तका लोकै—र्हस्यमाना मुहुर्मुहुः ॥ कुलंकुलमटंती च । सा कुलटेति विश्रु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ता ॥ ३६ ॥ अन्यायार्जितवित्तेन । तया यक्षस्य मंदिरं ॥ कारितं तेन यक्षोऽपि । तन्नामा भुवि विश्रुतः ॥ ३७ ॥ कुलटायक्ष इत्येषा । ख्यातिर्यक्षस्य जृंभते ॥ किं कुर्वंति विगुप्यंते । देवा अपि कुसंगतः ॥ ३८ ॥ प्रतीहारेण सा रुद्धा । प्रोक्ता च धर्ममंदिरे ॥ प्रवेशे कोऽधिकारस्ते । सावोचदिदमंजसा ॥ ३९ ॥ अहं धर्मवतां सीमा । यथा यक्षस्य मंदिरं ॥ कारितं निजवित्तेन । त्वमज्ञ इव लक्ष्यसे ॥ ४० ॥ ततो मदनमंजूषा—नाम्नी वरविलासिनी ॥ प्रतीहारनिरुद्धासा—विदं वचनमब्रवीत् ॥ ४१ ॥ धर्मसौधे प्रविशंत्या । निषेधः क्रियते कथं ॥ स्वल्पाक्षरैः प्रतीहार—स्तामवोचद्विलासिनीं ॥ ४२ ॥ स्वकर्म किं न जानासि । पापे पापगृहोचितं ॥ प्रतीहारप्रबोधाय । जगादेदं विलासिनी ॥ ४३ ॥ त्रीन् वारान् प्रतिमासांते । कामसत्रं ददाम्यहं ॥ द्विजादिदुःस्थलोकानां । सुस्थत्वे किं न मे शुभं ॥ ४४ ॥ एवमन्येऽपि सर्वेऽपि । मत्स्यबंध्यादयो नराः ॥ आत्मानं धार्मिकंमन्या । धर्मसौधमुपागताः ॥ ४५ ॥ प्रतीहारोऽचिंतयत—सर्वस्यात्मा गुणवान् । सर्वः परदोषदर्शने कुशलः ॥ सर्वस्य चास्ति वाच्यं । न चात्मदोषान् वदति कश्चित् ॥ ४६ ॥ सत्यापितः प्रवादोऽयं । जने नैवं प्रजल्पता ॥ जगदात्मनि संतुष्टं । सर्वः स्वं चारु मन्यते ॥ ४७ ॥ बहिष्टान्मस्त·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

के मध्ये । पार्श्वतः पृष्ठतोऽपि च ॥ सर्वतो नागरो लोको । धर्मागारमुपाश्रितः ॥ ४७ ॥ शून्यं पापगृहं सर्वं । न कोऽपि क्वापि दृश्यते ॥ खरांशुर्मस्तके रूढ—स्तीव्रतेजाः सुदुस्सहः ॥ ४८ ॥ नरेंद्रश्च समासन्नः । प्रधानपरिवारितः ॥ जनं च जनजल्पं च । पश्यति च शृणोति च ॥ ४९ ॥ अत्रांतरे च पापीयः—प्रासादे कालिमालये ॥ द्वावेव पुरुषौ राज्ञा । विशंताववलोकितौ ॥ ५० ॥ विस्मयापन्नचित्तेन । अन्योऽन्यानि जृंभृता ॥ कावेतौ पुरुषौ भद्र । पापप्रासादमागतौ ॥ ५१ ॥ तेनोचे श्रावकावेतौ । प्रियंकरशुभंकरौ ॥ कारणं तत्र तद्याने । समाकार्य विचार्यतां ॥ ५२ ॥ ततो राज्ञा प्रतीहार—मुखेनाकारितावुभौ ॥ आगत्य प्रणतौ राज्ञे । निषण्णावुचितासने ॥ ५३ ॥ राज्ञा पृष्टौ यथा जैन—शासने श्रावकौ युवां ॥ देवश्च युवयोः श्रीमान् । समग्रैश्वर्यसंयुतः ॥५४॥ सर्वज्ञः सर्वदर्शी च । सर्वदेवनमस्कृतः ॥ गुरवः साधवश्चैव । प्राप्यंते नाल्पपुण्यकैः ॥ ५५ ॥ सद्विवेकः श्रिया सार्धं । विनयो विद्यया सह ॥ आत्मगुणैरनुत्सेको । युष्मास्वेव विलोक्यते ॥५६॥ भो भद्रौ शेषलोकेभ्यो । गुणित्वं वां समर्गलं ॥ ततः केन निमित्तेन । पापप्रासादमाश्रितौ ॥ ॥ ५७ ॥ तावूचतुर्महाराज । यत्र तुष्टिर्निजैर्गुणैः ॥ क्रियाकांडमपि स्वीयं । न तच्चेतसि वर्तते ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५८ ॥ जगद्बंधुर्जिनाधीशो । देवो नौ देवदेवता ॥ क्षमावंतः श्रुताधारा । गुरवश्च सुसाधवः ॥ ॥ ५९ ॥ श्रूयते तद्वचो नित्यं । क्रियते पर्युपासना ॥ क्रियाकाले पुनः सर्वं । काकवासितसन्निभं ॥ ६० ॥ जिनाज्ञा हृदयेऽस्माक—मनुष्ठानं सकल्मषं ॥ मोक्षाध्वनि स्थितस्येदं । प्रस्थानं नरका· ध्वनि ॥ ६१ ॥ ते शोच्या ये न जानंति । सर्वज्ञमतमुज्ज्वलं ॥ शोच्यानामपि ते शोच्या । ज्ञा· त्वा ये न प्रकुर्वते ॥ ६२ ॥

आपादितचमत्कारा । इंद्रजालिकसन्निभाः ॥ बहवो विरलास्ते च । ये रंजितस्वमानसाः ॥ ॥ ६३ ॥ अंतःशून्या बहिः सारा । नित्यशो भोजनप्रियाः ॥ ध्वनिसाराश्च संसारे । बहवो मर्दलो· पमाः ॥ ६४ ॥ अंतःसद्वासनोपेता । बहिश्च बकवृत्तयः ॥ वाचंयमाः क्षमावंतो । निःस्पृहा विरला जनाः ॥ ६५ ॥ सुधर्मादिमुनींद्राणां । मौनींद्रगुणधारिणां ॥ जिनाज्ञायोगयुक्तानां । धर्मप्रासाद· योग्यता ॥ ६६ ॥ तेनात्र वयमारूढा । मूढाः सन्मार्गवर्त्मनि ॥ कुकर्मकारका दत्त—सत्यंकारा भ· वाध्वनि ॥ ६७ ॥ जगादाथात्रयो देव । स्वदोषे यस्य दोषधीः ॥ स धन्यो वंदनीयश्च । स धार्मि· कशिरोमणिः ॥ ६८ ॥ दोषबुद्धिः स्वदोषेषु । गुणबुद्धिर्गुणेषु च ॥ दोषेभ्यस्ते विरज्यंते । प्रवर्तंते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गुणेषु च ॥ ६९ ॥ दोषा अपि गुणत्वेन । यैः प्रपन्ना नराधमैः ॥ दोषेभ्यश्च कदा तेषां । विनि-
वृत्तिर्भविष्यति ॥ ७० ॥ दर्शने परदोषाणां । लोकानां लोचनद्वयं ॥ सहस्रगुणतां याति । हा हा
मत्सरजृंभितं ॥ ७१ ॥ स्वदोषदर्शने द्वे तु । जात्यंध इव चक्षुषी ॥ ये तु धर्मपरालोका—स्ते स्व-
ल्पा न तु भूरिशः ॥ ७२ ॥ यो हि यत्कुरुते कार्यं । तदेतत्तस्य सुंदरं ॥ आत्मसंतुष्टमेवेदं । वि-
चाररहितं जगत ॥ ७३ ॥ तेन राजन् मया प्रोक्त—मल्पे पातककारिणः ॥ स्वबुद्ध्या धार्मिकाः
सर्वे । वसंति नगरे तव ॥ ७४ ॥ ततोऽसौ रंजितो राजा । श्रेणिको मगधाधिपः ॥ श्लाघां कुर्वन्
जगादेदं । प्रतीत्य श्रावकौ तकौ ॥ ७५ ॥ अहो विवेकता वां च । अहो वां च सुभाषितं ॥ अ-
हो वां धर्मदार्ढ्यत्वं । न तन्मूल्यं जगत्त्रये ॥ ७६ ॥ विसर्जितौ नरेंद्रेण । प्रियंकरशुभंकरौ ॥ श्ला-
घ्यमानौ च लोकेन । सादरं स्वगृहं गतौ ॥ ७७ ॥ अहो अभय ते बुद्धिः । सर्वेषामुपरि स्थिता
॥ नाम्नैव मंत्रिणः शेषा—स्त्वमाद्यो मंत्रदर्शिनां ॥ ७८ ॥ अभयाय निजं दत्वा । देहस्यांशुकभू-
षणं ॥ विसर्जितसभो राजा । जगाम निजमंदिरं ॥ ७९ ॥ कृतस्नानो विशुद्धात्मा । संवीतशुचिशा-
टकः ॥ शांतः कृतोत्तरासंगो । धर्मधीर्धर्ममूर्तिकः ॥ ८० ॥ मालतीजात्यपत्रादि—सांद्रपुष्पैः सुगंधि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भिः ॥ पूजयित्वा विधानेन । श्रेणिकः श्रीजिनेश्वरं ॥ ८१ ॥ जात्यकांचननिर्मित—यवानां साष्ट·
कं शतं ॥ प्रत्यहं कारयित्वा च । अष्टमंगलहेतवे ॥ ८२ ॥ मंगलानि पुरो ह्यष्ट । विलेख्य विधि·
पूर्वकं ॥ रोमांचार्चितसर्वांगो । योगमुद्रापुरस्सरं ॥ ८३ ॥ देवेंद्रादिस्तवैः सारैः । स्तुत्वा भुवनबां·
धवं ॥ अष्टस्वंगेषु चैकैकं । नमस्कारपुरस्सरं ॥ ८४ ॥ पुष्पं दत्वा ततो भुंक्ते । निर्मलीकृतदर्शनः
॥ एवं च कुर्वतो राज्यं । तस्य गछंति वासराः ॥ ८५ ॥ कुलकं ॥

तदहो धार्मिकाः स्तोका । शिष्टाचारपरा नराः ॥ अन्यायकारिणो लोका । भूयांसो धर्मवर्जि·
ताः ॥ ८६ ॥ सर्वदा सर्वकल्याण—कारके भवतारके ॥ यतध्वं भो जना धर्मे । सामग्री दुर्लभा
पुनः ॥ ८७ ॥ श्रीमदभयदेवाख्य—सूरिपादांतवासिना ॥ सूरिणा वर्धमानेन । धर्मरत्नकरंमके ॥
॥ ८८ ॥ धर्माधर्मकृताह्वाने । धर्माधर्मविवेचके ॥ प्रस्तावे प्रथमे वृत्तिः । संक्षेपादेव चर्चिता ॥
॥ ८९ ॥ उक्तो धर्माधर्माविति प्रथमाधिकारः ॥ अथ द्वितीयो जिनपूजेति व्याख्यायते, अस्य
चायमभिसंबंधः—प्रथमाधिकारे धर्माधर्मौ सप्रपंचावभिहितौ, तत्र चाधर्मं परित्यज्य धर्मे यत्नो वि·
धेय इत्युक्तं, धर्मार्थिनां पुनर्देवतापूजनं प्रथममेवानुष्ठानं, अतोऽत्राधिकारे पूजाविधिरुच्यते, इत्य·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नेन संबंधेन समायातोऽयमधिकारो व्याख्यायते, तत्र द्रव्यभावभेदेन द्वैविध्यं पूजाया उपवर्णयन् श्लोकमेकमाह—

॥ मूलम् ॥—द्रव्यतो भावतश्चैव । द्विविधं देवतार्चनं ॥ द्रव्यतो जिनवेश्मादि । स्तुतिस्तोत्रादि भावतः ॥ १ ॥ व्याख्या—द्रव्यतो द्रव्यमाश्रित्य, भावतो भावमाश्रित्य, चः समुच्चये, एवोऽवधारणे, स च भिन्नक्रमो द्विविधमेवेत्यत्र द्रष्टव्यं, ततो द्विविधमेव द्विप्रकारमेव देवतार्चनं देवपूजनं, ततो द्रव्यतो द्रव्यमाश्रित्य जिनवेश्मादि जिनमंदिरादि, आदिशब्दाज्जिनबिंबप्रतिष्ठादिपरिग्रहः, उक्तं च—जिणभवणबिंबठावण—जत्तापूयाइ सत्तउ विहिणा ॥ दवत्थउत्ति नेयं । भावत्थयकारणत्तेण ॥ १ ॥ विहियाणुठ्ठाणमिणं । तिचेवमेयं सया करंताणं ॥ होइ चरणस्स हेउ । नो इह लोगा दविक्खाए ॥ २ ॥ तथा स्तुतिस्तोत्रादि भावतो भावमाश्रित्य भावपूजेत्यर्थः. तत्र स्तुतय एकश्लोकाद्या यावदष्टौ, ततः परं स्तोत्राणि भण्यंते. आदिशब्दात् पौषधसामायिकस्वाध्यायादिपरिग्रहः. साधूनाश्रित्य पुनः सकलमपि यत्यनुष्ठानं भावस्तव एवेति श्लोकार्थः. ॥ १ ॥ अथ द्विविधस्यापि पूजनस्याधिकारिणो निरूपयन्नाह—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ मूलम् ॥—अस्याधिकारिणो ज्ञेया । द्विविधस्याप्यगारिणः ॥ प्रायो भावस्तवे चैव । साधूनामधिकारिता ॥ १ ॥ व्याख्या—अस्यैतस्य देवतार्चनस्याधिकारिणो योग्यतावंतो ज्ञेया ज्ञातव्या द्विविधस्यापि द्रव्यभावभेदेन द्विप्रकारस्याप्यगारिणो गृहस्थाः. तथा प्रायो बाहुल्येन भावस्तवे चैव भावार्चन एव, प्रायोग्रहणात्संयमाबाधया गुणमपेक्ष्य कदाचिद् द्रव्यस्तवेऽपि साधूनां यतीनामधिकारिताऽधिकारित्वं योग्यत्वमित्यर्थः. उक्तं च—दव्वत्थउ य भाव—त्थउ य दव्वत्थउ बहुगुणोत्ति बुद्धिसिया ॥ अनिउणमइवयणमिणं । छज्जीवहियं जिणा बिंति ॥ १ ॥ छज्जीवकायसंजमो । दव्वत्थए सो विरुज्झई कसिणो ॥ तो कसिणसंजमविऊ । पुप्फाईयं न इच्छंति ॥ २ ॥ अकसिणपवत्तयाणं । विरयाविरयाण एस खलु इजुत्तो ॥ संसारपयणुकरणो । दव्वत्थए कूवदिठ्ठंतो ॥ ३ ॥ इति श्लोकार्थः ॥ १ ॥ अथ द्रव्यस्वरूपं तत्राधिकारिणस्तदुपदेशं च श्लोकेनाह—

॥ मूलम् ॥—विधाप्य विधिना श्राद्धः । सुंदरं जिनमंदिरं ॥ तत्र बिंबं प्रतिष्ठाप्य । पूजयेत् प्रतिवासरं ॥ १ ॥ व्याख्या—विधाप्य कारयित्वा विधिना शास्त्रोक्तविधानेन श्राद्धः श्रावकः सुंदरं शोभनं जिनमंदिरं जिनगृहं, तत्र तस्मिन् बिंबं जिनप्रतिमां प्रतिष्ठाप्य शास्त्रोक्तविधिना प्रतिष्ठां का-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रयित्वा पूजयेदर्चयेत् प्रतिवासरं प्रतिदिनमिति. तत्र विधाप्य विधिना श्राद्ध इत्यनेन जिनभवनं विधिनैवाधिकारिणैव च कारयितव्यमिति दर्शयति. तत्राधिकारी गृहस्थ एव शुभस्वजनादिविशेषणयुक्तो वेदितव्यः, यत उक्तं—अहिगारिउ य गिहत्थो । सुहसयणो वित्तसंजुउ कुलजो ॥ अखुद्दो धीबलिउ । मइमं तह धम्मरागी य ॥ १ ॥ गुरुपूयाकरणरुई । सुस्सूसाइगुणसंगउ चेव ॥ नाया अहिगयविहाणस्स । धणियमाणो पहाणो य ॥ २ ॥ एसो गुणिड्ढिजोगो । अणेगसत्ताण तीएविणिउगा ॥ गुणरयणवियरणेणं । तं कारिंतो हियं कुणइ ॥ ३ ॥ तं तह पवत्तमाणं । दट्ठुं केइ गुणरागिणो मग्गं ॥ अन्ने उ तस्स बीयं । सहुभावाउ पवज्जंति ॥ ४ ॥ जो चिय सुहभावो खलु । सव्वन्नुमयंमि होइ परिसुद्धो ॥ सो चिय जायइ बीयं । बोहीए तेण नाएण ॥ ५ ॥ जिनभवनविधिः पुनः शुद्धभूमिग्रहादिकः, भणितं च—जिणभवणकारणविही । सुद्धा भूमी दलं च कट्ठाई ॥ नियगाण य संधाणं । सासणवुड्ढी य जयणा य ॥ १ ॥ दव्वे भावे य तहा । सुद्धा भूमी पएसकीला य ॥ दव्वे अ पत्तिगरहिया । अन्नेसिं होइ भावेउ ॥ २ ॥ इत्यादिर्जिनभवनविधापनविधिर्वक्तव्य इति. तथा तत्र बिंबं प्रतिष्ठाप्येत्यनेन जिनबिंबप्रतिष्ठाविधिः सूचितः, स चेत्थं क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेभ्यस्तद्यथा—

निप्फन्नस्स य बिंबस्स । दिवसदसगस्स मज्झयारंमि ॥ कायव्वा उ पइट्ठा । सा पुण तिविहा विणिदिट्ठा ॥ १ ॥ वत्तक्खा खलु एक्का । खेत्तक्खा वन्निया तहा अपरा ॥ अन्ना य महक्खा इह । ताण सरूवं इमं होई ॥ २ ॥ जो तित्थवई जइया । तइया तब्बिंबठावणा पढमा ॥ उसभाईणं सव्वेसिं । जाण बीया पइट्ठत्ति ॥ ३ ॥ तइया सत्तरिसमहिय—तित्थयरसयस्स पुण पइट्ठत्ति ॥ जो जस्स जहा भावं । जणेइ सा तस्स तह जुत्ता ॥ ४ ॥ आसायणदोसोवि हु । बिंबबहुत्तेन मज्जणाइकउ ॥ संकेयव्वो जं तीए । संभवो जाव दोसो उ ॥ ५ ॥ आवस्सयाइचुन्निसु । वुत्तोवि हु बिंबठावणाइविही ॥ चरियाणुकित्तणाउ । न सेसपडिसेहगो सोवि ॥ ६ ॥ इय जहसत्तीए गुरुं । लहुं व सेलुब्भवं मणिमयं वा ॥ जिणबिंबं कारिंतो । कल्लाणपरंपरं लहइ ॥ ७ ॥ प्रतिष्ठाविधिः पुनरयं—घोसावेज्ज अमारिं । रन्ना संघस्स तह य वाहरणं ॥ विन्नाणियसम्माणं । कुज्जा खेत्तस्स य विसुद्धिं ॥ १ ॥ तह य दिसिपालठवणं । तक्किरियं गाणसंनिहाणं च ॥ दुविहसुई पोसहिउ । चेईए ठवेज्ज जिणबिंबं ॥ २ ॥ नवरं सुमुहुत्तंमि । पुव्वुत्तरदिसिमुहं सउणपुव्वं ॥ वज्जंतेसु च-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उविह—मंगलतूरेसु पउरेसु ॥ ३ ॥ तो सव्वसंघसहिउ । ठवणायरियं ठवेत्तु पडिमपुरो ॥ देवे वंदइ सूरी । परिहरियनिरुवहयसुइवत्थो ॥ ४ ॥ संतिसुयदेवयाणं । करेइ उस्सग्गथुइपयाणं च ॥ सहिरन्नदाहिणकरो । सयलीकरणं तउ कुज्जा ॥ ५ ॥ ते सुद्धोभयपक्खा । दक्खा खेयण्णुया विहियरक्खा ॥ एहवणगरा उविवंती । दिसासु सव्वासु सुद्धबलिं ॥ ६ ॥ तयणंतरं तु मुद्दिय—कलसचउक्केण ते एहवंति जिणं ॥ पंचरयणोदएणं । कसायसलिलेण एहवयंति ॥ ७ ॥ चंदणजलेण कुंकुम—जलकुंभेहिं च तित्थसलिलेण ॥ सुद्धकलसेहिं पच्छा । गुरुणा अभिमंतिएहिं तहा ॥८॥ एहाणाणं सव्वाणंवि । जलधारापुप्फधूयगंधाई ॥ दायव्वमंतराले । जावंति कलसपब्भावो ॥ ९ ॥ एवं एहविए बिंबे । नाणकलाना समाचरेज्जा गुरू ॥ तो सरससुयंधेणं । लिंपेज्जा चंदणदव्वेण ॥ ॥ १० ॥ कुसुमाइं सुयंधाइं । आरोवेत्ता ठवेज्ज बिंबपुरो ॥ नंदावत्तयपट्टं । पूएज्जय चारुदव्वेहिं ॥ ॥ ११ ॥ चंदणछडुज्जडेणं । वत्थेणं छायए य तं पट्टं ॥ अह पडिसरमारोवे । जिणबिंबे रिद्धिविधिजुयं ॥ १२ ॥ तो सरससुयंधाइं । फलाइं पुरउ ठवेज्ज बिंबस्स ॥ जंबीरबीजपूरा—इयाइं तो देज्ज गंधाइं ॥ १३ ॥ मुद्दामंतन्नासं । बिंबे हत्थंमि कंकणनिवेसं ॥ मंतेण धारणविहिं । करेज्ज

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बिंबस्स तो पुरउ ॥ १४ ॥ बहुविहपक्कन्नाणं । ठवणा वरवत्थुगंधपुडियाणं ॥ वरवंजणाण य तहा । जाइफलाणं च सविसेसं ॥ १५ ॥ सागिख्खूवरसोलग—खंडाईणं च रोसहीणं च ॥ संपुन्नबलीय तहा । ठवणं पुरउ जिणिंदस्स ॥ १६ ॥ घयगुडदीवो सुकुमा—रियाजुउ चउजवारया दिसिसु ॥ बिंबपुरउ ठवेज्जा । पूयाए बलिं तउ देज्जा ॥ १७ ॥ आरत्तियमंगलदीव—यं च उत्तारिऊण जिणनाहं ॥ वंदेज्ज हि सासणदेव—याए उस्सग्गथुइदाणं ॥ १८ ॥ अह जिणपंचंगेसु । ठवेइ गुरुथिरीकरणमंतं ॥ वारा उ तिन्नि पंच व । सत्तव अच्चंतमपमत्तो ॥ १९ ॥ मयणहले आरोवइ । अहिवासणमंतनासमवि कुणइ ॥ झायइ य तयं बिंबं । सजियंव जहा फुडं होइ ॥ २० ॥ एवमहिवासियं तं । बिंबं ठाएज्ज सदसवत्थेण ॥ चंदणछुप्पडेणं । तदुवरि पुप्फाइं विखिविज्जा ॥ ॥ २१ ॥ हावेज्जा सत्तधन्नेण । तयणु जीवंत उभयपक्खाहिं ॥ नारीहिं चउहिं समलं—कियाहिं जीवंतनाहाहिं ॥ २२ ॥ पम्मिपुन्नचत्तसुत्तेण । वेढणं चउगुणं च काऊणं ॥ उमिणणं कारेज्जा । तुठाहिं हिरन्नदाणजुयं ॥ २३ ॥ तो वंदेज्जा देवे । पइट्ठदेवीए काउस्सग्गं ॥ दिज्ज थुईतीए चिय । ठवेज्ज पुरउ य घयपत्तं ॥ २४ ॥ सोवन्नवट्टियाए । कुज्जा महुसक्कराहिं भरियाए ॥ कण-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गसलागाए बिंब—नयणउम्मीलणं लग्गे ॥ २५ ॥ सम्मं पइठमंतेण । अंगसंधीसु अक्खरन्नासं ॥
कुणमाणो एगमणो । सूरी वासे खिवेज्ज तहा ॥ २६ ॥ पुप्फक्खयंजलीहिं । तो गुरुणा घोसणा
ससंवेण ॥ थेज्जत्थं कायव्वा । मंगलसद्देहिं बिंबस्स ॥ २७ ॥ जह सिद्धिमेरुकुल—पव्वयाण पंच-
त्थिकायकालाणं ॥ इह सासया पइठा । सुपइठा होउ तह एसा ॥ २८ ॥ तह दीवसिंधुससहर-
दिणयरसुरवासवासखेत्ताणं ॥ इह सासया पइठा । सुपइठा होउ तह एसा ॥ २९ ॥ एवं सुह-
भावकए । अक्खयखेवे कयंमि बिंबस्स ॥ सविसेसं पुण पूया । किच्चा चिइवंदणा य तहा ॥३०॥
मुहउग्घाडणसमणं—तरं च पूया य समणसंघस्स ॥ फासुयघयगुडगोरस—णंतयमाईहिं काय-
व्वा ॥ ३१ ॥ सोहणदिणे य सोहग्गं । मंतविन्नासपुव्वयमवस्सं ॥ मयणहलकंकणकर—यलाउ बिं-
बस्स अणवेज्जा ॥ ३२ ॥ जिणबिंबस्स य विसये । नियनियठाणेसु सव्वमुद्दाउ ॥ गुरुणा उवउ-
त्तेणं । पउंजियव्वाउ ता य इमा ॥ ३३ ॥ जिणमुद्द १ कलस २ परमेठि ३ । अंग ४ अंजलि ५
तहासणा ६ चक्का ७ ॥ सुरही ८ पवयण ९ गरुडा १० । सोहग्ग ११ पयंजली चेव ॥ ३४ ॥ जि-
णमुद्दाए चउकलस—ठवणं तह करेह थिरकरणं ॥ अहिवासमंतनसणं । आसणमुद्दाए अन्नेउ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ३५ ॥ कलसाए कलसएहवणं । परमेठीए उ आहवणमंतं ॥ अंगाए समालजणं । अंजलिणा
पुप्फरुहणाइ ॥ ३६ ॥ आसणयाए पट्टस्स । पूयणं अंगफुसणचक्काए ॥ सुरहिए अमयमुत्ती । प
वयणमुद्दाए पडिबोहो ॥ ३७ ॥ गरुडाए दुठरक्का । सोहग्गाए य मंतसोहग्गं ॥ तह अंजलिए दे-
सण—मुद्दाइं कुणह कज्जाइं ॥ ३८ ॥ चोएइ एव कोइ । जह किर सामाईयंमि किं गुरुणो ॥
जुत्तो ठियस्स एसो । सावज्जो विहिसमारंभो ॥ ३९ ॥ कायवहचरणभंसा । तंमि जउ तस्स नि-
यमउ हुंति ॥ जायई य अविस्सासो । गुरूवएसेसु सीसाणं ॥ ४० ॥ भन्नइ एव समाही । कह
वि जइ होइ कोइ कायवहो ॥ तहवि हु गुरुवयणाउ । आयरणाउ य नो दुठो ॥ ४१ ॥ वि-
हिवयणं च पमाणं । सुत्तुत्तं जेण ठावणा गुरुणा ॥ कज्जा जिणबिंबाणं । तं सविसयं हवइ कर-
णे ॥ ४२ ॥ अन्नह निव्विसयत्तं । पावेइ तयं तु तेण सो जुत्तो ॥ तइया तह गुरुठवणे । बिंब-
स्स उ गउरवाइगुणा ॥ ४३ ॥ अन्नं च सुत्तविहिणा । संभवजयणाए बिंबठवणाए ॥ नो काय-
वहाइया । दोसा जिणभवणकरणेव ॥ ४४ ॥ जिणभवणबिंबपूया—इयं च न विणा गुरुं गिही
मुणई ॥ न य तत्र न कायवहो । गुरुणो दोसो य न य वुत्तो ॥ ४५ ॥ अलमेत्र पसंगेणं । ठ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विए एवं जिणस्स बिंबंमि ॥ अट्ठोत्तरकलससएण । मज्जिए पुण जहा विहवं ॥ ४६ ॥ पूयाइए-
सु जत्तो । परमोपइदियहमेव कायव्वो ॥ एवं जयंताण लहुं । जायइ चारित्तपरिणामो ॥ ४७ ॥
अथ पूजाविधिमुपदर्शयन् श्लोकमेकमाचष्टे—

॥ मूलम् ॥—विधिना शुचिभूतेन । काले सत्कुसुमादिभिः ॥ स्तुतिस्तोत्रैश्च गंभीरैः । क-
र्तव्यं जिनपूजनं ॥ १ ॥ व्याख्या—विधिना विधानेनाशातनापरिहारेण मुखस्थगनलक्षणेन शु-
चिभूतेन द्रव्यभावशौचवतेत्यर्थः, काले संध्यात्रयलक्षणे सत्कुसुमादिभिः शोभनपुष्पादिभिः स्तुति-
स्तोत्रैश्च लघुबृहद्भिः स्तवनैश्च गंभीरैर्गंभीरार्थैः कर्तव्यं विधेयं जिनपूजनं जिनार्चनमिति श्लोकस-
मासार्थः. ॥ १ ॥ तत्र विधिरागमविद्भिरेवमुक्तस्तद्यथा—वत्थेण बंधिऊणं । नासं अहवा जहा स-
माहीए ॥ वज्जेयव्वं तु तया । देहंमिवि कंडुयणमाई ॥ १ ॥ भिच्चावि सामिणो तिह । जत्तेण कु-
णंति जे भसणिज्जं ॥ हुंति फलभायणं ते । इयरेसिं किलेसमेत्तं तु ॥ २ ॥ भुवणगुरूण जि-
णाणं । विसेसओ एवमेव दट्ठव्वं ॥ ता एवं चिय पूया । एयाण बुहेहिं कायव्वा ॥ ३ ॥ इत्यादि.
शुचिभूतत्वं पुनरेवमुक्तं—तत्थ सुइणा दुहावि हु । दव्वे न्हाएण सुद्धवत्थेण ॥ भावे उ अवत्थो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिय । विसुद्धचित्तपहाणेण ॥ १ ॥ इत्यादि, कालस्त्वेवमभिहितस्तद्यथा—कालंमि कीरमाणं । किसिकम्मं बहुफलं जहा लोए ॥ इय सव्वा चिय किरिया । नियनियकालंमि विन्नेया ॥ १ ॥ सो पुण इह विन्नेओ । संझाओ तिन्नि ताव ओहेण ॥ वित्तिकिरियाविरुद्धो । अहवा जो जस्स जाव इओ ॥ २ ॥ इत्यादि. सत्कुसुमादीनि पुनरेवं कथितानि, तद्यथा—वरगंधधूयसव्वो—सहेहिं उदगाइएहिं दव्वेहिं ॥ सुरहिविलेवणवरकुसुम—दामावलिदीवएहिं च ॥ १ ॥ सिद्धत्थयदहिअक्खय—गोरोयणमाइएहिं जहलाभं ॥ कंचणमोत्तियरयणाइ—दामएहिं च विविहेहिं ॥ २ ॥ पवरेहिं साहणेहिं । पायं भावोवि जायई पवरो ॥ न य अन्नो उवओगो । एएसिं सयाण लठ्यरो ॥ ३ ॥ इह लोयपरलोइया । कज्जाणं पारलोइयं अहियं ॥ तंपि य भावपहाणं । सोवि य इय कज्जगम्मोत्ति ॥ ४ ॥ ता नियविहवणुरूवं । विसिठ्ठपुप्फाइएहिं जिणपूया ॥ कायव्वा बुद्धिमया । तम्मि बहुमाणसारा य ॥ ५ ॥ इत्यादि. गंभीरार्थस्तुतिस्तोत्राणि पुनरेवं—थुइथोत्ता पुण नेया । गंभीरपयत्थविरइया जे उ ॥ सब्भूयगुणुकित्तण—रूवा खलु ते जिणाणं तु ॥ १ ॥ तेसिं अत्थाहिगमे । नियमेणं होइ कुसलपरिणामो ॥ सुंदरभावा तेसिं । इयरंमिवि रयणनाएण ॥ २ ॥ जरसमणा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ईरयणा । अन्ना य गुणावि ते समेंति जहा ॥ कम्मजराईथुइमा—इयावि तह नावरयणाउ ॥
॥ ३ ॥ इति श्लोकनावार्थः ॥ १ ॥ अथ सा पूजा कतिविधेति दर्शयन्नाह—

॥ मूलम् ॥—चारुपुष्पामिषस्तोत्रै—स्त्रिविधा जिनपूजना ॥ पुष्पगंधादिनिश्चान्यै—रष्टधेयं निगद्यते ॥ १ ॥ व्याख्या—चारुपुष्पामिषस्तोत्रैरिति, चारूणि प्रधानानि पुष्पाणि कुसुमानि, आमिषानि नैवेद्यानि, स्तोत्राणि स्तवनानि, तैश्चारुपुष्पामिषस्तोत्रैस्त्रिविधा त्रिप्रकारा जिनपूजा जिनार्चना पुष्पगंधादिनिः कुसुमवासादिनिः, आदिशब्दाध्धूपदीपाक्षतादिग्रहः, चः समुच्चये, अन्यैरपरैराचार्यैरष्टधाष्टप्रकारेयमेषा निगद्यते कथ्यते इति श्लोकार्थः ॥ १ ॥ अथाष्टविधत्वमेवास्याः सदृष्टांतं श्लोकदशकेनाह—

॥ मूलम् ॥—शुन्नैः सुगंधिनिः पुष्पै—र्यः कुरुते जिनार्चनं ॥ स प्राप्नोति समं कीर्त्या । रत्नचंद्र इव श्रियः ॥ १ ॥ पुटपाकादिनिर्गंधै—र्येऽर्चयंति जिनेश्वरं ॥ लन्नंते तेऽचिरात्सिद्धिं । रत्नसुंदरवज्जनाः ॥ २ ॥ धूपं दहति यः सारं । नावसारं जिनाग्रतः ॥ स याति लब्धसर्वर्द्धि—र्नरकेसरिवद्दिवं ॥ ३ ॥ प्रदीपयति यो नक्त्या । प्रदीपं जिनमंदिरे ॥ स हि स्यादखिलश्रीणां । ना-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नुभग्न इव प्रभुः ॥ ४ ॥ योऽक्षतैरक्षतैः शुभ्रै—रर्हतां कुरुते बलिं ॥ कणसार इवात्यंतं । वर्धतेऽसौ कणश्रिया ॥ ५ ॥ जिनानामग्रतो दद्यात् । सुंदराणि फलानि यः ॥ फलवत्यः क्रियास्तस्य । भवंति फलसारवत् ॥ ६ ॥ सुगंधसर्पिषा यस्तु । करोति जिनमज्जनं ॥ सघृतभृतपात्राणि । स्थापयेद्वा तदग्रतः ॥ ७ ॥ स गोधन इवोदग्रां । भुक्त्वा भोगपरंपरां ॥ क्षीणनिःशेषकर्मांशः । प्रयाति परमां गतिं ॥ ८ ॥ यः स्नापयति बिंबानि । सुगंधवरवारिणा ॥ सदंभःपूर्णकुंभान् वा । ढोकयेद्यस्तदग्रतः ॥ ९ ॥ स प्राप्य सुंदरां लक्ष्मीं । रससार इवेप्सिताः ॥ संपूर्णधर्मसंपत्त्या । ततो याति शिवालयं ॥ १० ॥ व्याख्या—शुभैः प्रशस्तैः सुगंधिभिः सुरभिभिः पुष्पैः कुसुमैर्यः कश्चिदनिर्दिष्टनामा कुरुते विधत्ते जिनार्चनं जिनपूजनं सोऽसौ प्राप्नोति लभते समं सह कीर्त्या ख्यात्या रत्नचंद्र इव रत्नचंद्राभिधानराजपुत्रवत श्रियः, इति प्रथमश्लोकार्थः ॥ १ ॥ पुटपाकादिभिरनेकप्रकारप्रधानसुगंधद्रव्याग्निपाकादिभिर्गंधैर्वासैर्ये केचनार्चयंति पूजयंति जिनेश्वरं, लभंते प्राप्नुवंति तेऽचिरात् स्तोककालेन सिद्धिं मुक्तिं रत्नसुंदरवत रत्नसुंदराख्यराजसूनुरिव जना लोका इति द्वितीयश्लोकार्थः ॥ ॥ २ ॥ धूपं प्रतीतं दहत्युदग्राहयति यः कश्चित्सारं सारद्रव्यनिष्पन्नं प्रधानमित्यर्थः, भावसारमंतःक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रणप्रधानं जिनाग्रतो जिनपुरतः सोऽसौ याति गच्छति लब्धसर्वर्द्धिः प्राप्ताशेषसमृद्धिर्नरकेसरिवत न-
रकेसरिनामनृपनंदन इव शिवं मोक्षमिति तृतीयश्लोकार्थः ॥ ३ ॥ प्रदीपयति प्रज्वालयति यः क-
श्चिद्भक्त्या भावेन दीपं प्रदीपं जिनमंदिरे जिनगृहे सोऽसौ हि पूरणे स्याद्भवेदखिलश्रीणां समस्त-
लक्ष्मीनां भानुप्रभ इव भानुप्रभाभिधाननृपात्मज इव प्रभुर्नायको भवेदिति चतुर्थश्लोकार्थः ॥ ४ ॥
यः कश्चिदक्षतैस्तंदुलैरक्षतैरखंडैः शुभ्रैर्विशदैरर्हतां जिनानां कुरुते विधत्ते बलिमुपहारं कणसार इव
कणसाराख्यश्रेष्ठिपुत्रवदत्यंतमत्यर्थं वर्धते वृद्धिं यात्यसौ स कणश्रिया धान्यलक्ष्म्योपलक्षणत्वाच्छेष-
श्रीभिरपीति पंचमश्लोकार्थः ॥ ५ ॥ जिनानामर्हतामग्रतः पुरतो दद्यात्प्रयच्छेत सुंदराणि प्रधानानि
फलान्याम्रनालिकेरादीनि यः कश्चित, फलवत्यः सफलाः क्रिया वाणिज्यादिकर्माणि तस्य फलपू-
जाकर्तुर्भवंति जायंते फलसारवत् फलसाराभिधानराजपुत्रस्येवेति षष्टश्लोकार्थः ॥ ६ ॥ सुगंधसर्पि-
षा सद्गंधनाशिकापेयघृतेन यः पुनः करोति विधत्ते जिनमज्जनं जिनस्नानं, सद्घृतभृतपात्राणि शो-
भनघृतसंपूर्णस्थालानि स्थापयेद्वा न्यसेद्वा तदग्रतो जिनाग्रत इत्यर्थः, सोऽसौ गोवर्धन इव गोवर्ध-
नाभिधानकुटुंबिक इवोदग्रामुदारां भुक्त्वा भूयोभोगपरंपरां शब्दादिविषयसुखमालिकां क्षीणनिःशे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षकर्मांशः प्रक्षीनाखिलज्ञानावरणीयादिकर्मकलंकांशः प्रयाति गच्छति परमां प्रधानां गतिं सिद्धिगतिमित्यर्थः. इति सप्तमाष्टमश्लोकद्वयार्थः ॥ ७ ॥ ८ ॥ यः कश्चित्स्नापयत्यभिसिंचति बिंबानि प्रतिमाः सुगंधवरवारिणा सुरभिप्रवरनीरेण, सदंभःप्रवरकुंभान् वा प्रवरतरविमलजलभृतकलशान् वा ढौकयेत्स्थापयेत्तदग्रतो जिनबिंबाग्रतः सोऽसौ प्राप्य समासाद्य सुंदराः प्रधाना लक्ष्मीः श्रियो रससार इव रससाराभिधानराजनंदन इवेप्सिताः, संपूर्णधर्मसंपत्त्या परिपूर्णयतिधर्मप्राप्त्येत्यर्थः, ततस्तदनंतरं याति गच्छति शिवालयं निर्वाणनगरमिति नवमदशमश्लोकद्वयार्थः. ॥ ९ ॥ १० ॥ अथ प्रकरणकारसूचितपुष्पाद्यष्टविधपूजाफलप्रतिपादकरत्नचंद्रादिकथानकानि कथ्यंते, तानि पुनरमूनि, तद्यथा—

अस्ति समस्तसुश्रेष्ठ—वस्तुस्तोमविराजितं ॥ जितशत्रुपुरश्रीकं । चारु प्रासादसंपदा ॥ १ ॥ संपदाकुलशालीन—नरलोकसमाकुलं ॥ कुलक्रमागतानेक—सद्व्यवहारसुंदरं ॥ २ ॥ मध्यखंडे क्षितौ ख्यातं । नृभालतिलकोपमं ॥ बंगाजनपदस्यांत—र्धनधान्यसमाकुलं ॥ ३ ॥ समस्तशस्तसंसार—सारभूतं महीतले ॥ अत्रैव भारते क्षेत्रे । पुरं विजयवर्धनं ॥ ४ ॥ चतुर्भिः कलापकं ॥ तत्रास्त्यनेकसंग्राम—शिरोनिर्व्यूढसाहसः ॥ साहसांकसमो राजा । नाम्ना च रत्नशेखरः ॥ ५ ॥ र·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्नावली च तस्याग्र—महिषी विश्वविश्रुता ॥ संसारसुखसर्वस्वं । हरस्य ललिता यथा ॥ ६ ॥ तया सार्धं महीशस्य । कुर्वतः कामसेवनं ॥ संजातस्तनयः सारो । जववृक्षफलोपमः ॥ ७ ॥ समये प्रतिष्टितं नाम । रत्नचंद्र इति स्फुटं ॥ ततोऽसौ वर्धते विश्व—माह्लादयन् यथा शशी ॥ ८ ॥ काले समर्पितो राज्ञा । कलाग्रहणहेतवे ॥ कलाचार्यस्य तेनापि । पाठितः सकलाः कलाः ॥ ९ ॥ ततो यौवनमारूढः । परिणीतनृपांगजः ॥ युवराजपदे पिता । प्रमोदेन प्रतिष्टितः ॥ १० ॥ एकदा चाश्ववाहिन्यां । निर्गतो हयहेषया ॥ पूरयन्नंबरं सर्वं । महाटव्यां विवेश सः ॥ ११ ॥ ततोऽप्यपहृतोऽश्वेन । सुवेलगिरिगह्वरे ॥ नीत्वा मुक्त्वा ततो वाजी । जगामादर्शनं क्षणात् ॥ १२ ॥ कुमारोऽपि पिपासार्त्तः । श्रांतो विस्मितमानसः ॥ पपौ निर्झरनिर्व्यूढं । शीतलं निर्मलं पयः ॥ १३ ॥ कंदमूलकृताहार । इतश्चेतश्च पर्यटन् ॥ ददर्शैकत्र शुभ्रोच्चं । सुंदरं जिनमंदिरं ॥ १४ ॥ प्रविष्टस्तत्र सानंदो । रोमांचांचितविग्रहः ॥ सर्वतोऽपि क्षिपंश्चक्षुः । कौतुकाक्षिप्तमानसः ॥ १५ ॥ शांतं कांतं शिवं सौम्यं । सुरूपं सुमनोहरं ॥ बिंबं युगादिदेवस्य । दृष्ट्वात्यर्थं मुमोद सः ॥ १६ ॥

ततश्च चिंतयामास । विस्मितो हर्षनिर्भरः ॥ यथा कोऽप्येष निःशेष—विश्ववंद्यो जगत्प्रभुः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १७ ॥ जगत्पूज्यो जगज्ज्येष्ठो । देवदेवो जगद्धितः ॥ तदहं पूजयाम्येनं । सत्पुष्पैर्भक्तियोगतः ॥ १८ ॥ विचिंत्यैवं सुगंधानि । गृहीत्वा कुसुमानि सः ॥ भक्त्या युगादितीर्थेशं । सप्रमोदमपूपुजत ॥ १९ ॥ ततः प्रणम्य निःक्रांतो । राजपुत्रो जिनालयात् ॥ बहिर्मंडपमागत्य । वेदिकायां निषण्णवान् ॥ २० ॥ सानंदो जिनबिंबास्य—न्यस्तदृष्टिरचिंतयत् ॥ धन्योऽहं पुण्यवानद्य । कृतार्थः कृतलक्षणः ॥ २१ ॥ येन देवाधिदेवोऽयं । मया दृष्टो महाप्रभुः ॥ पूज्योऽयं सर्वदेवानां । ध्येयोऽयं सर्वयोगिनां ॥ २२ ॥ वंद्योऽयं सर्वसाधूनां । त्रातायं सर्वदेहिनां ॥ हितोऽयं सर्वजीवानां । दातायं सर्वसंपदां ॥ २३ ॥ इत्याद्यनेकधा हृष्टो । यावदास्ते स चिंतयन् ॥ तावदेकः समायातो । वृद्धस्तत्र नरेश्वरः ॥ २४ ॥ ततो वापीजलेनाशु । शुचिर्भूत्वा सितांशुकः ॥ गृहीत्वा शतपत्रादि । सुगंधकुसुमोत्करं ॥ २५ ॥ प्रविश्य जिनवेश्मांतः । पूजयित्वा जिनेश्वरं ॥ विधाय विधिवद्भक्त्या । विशुद्धं चैत्यवंदनं ॥ २६ ॥ दधानः सर्वतो देहे । प्रकटं पुलकोत्करं ॥ ततोऽसौ स्तोतुमारब्धः । संवेगातिशयं वहन् ॥ २७ ॥ तद्यथा—

जय त्वं जगदानंद । जय त्वं जगदीश्वर ॥ जय त्वं त्रिजगद्बंधो । जय त्वं त्रिजगत्प्रभो ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २७ ॥ जय त्वं त्रिजगन्नेत्र । जय त्वं जगदर्चित ॥ जय त्वं त्रिजगन्नाथ । जय त्वं नाभिनंदन ॥ २ए ॥ नमस्ते केवलालोक—लोकालोकविलोकिने ॥ नमस्ते भुवनादित्य । भव्यांभोजविका-सिने ॥ ३० ॥ नमस्ते सर्वतः सर्प—न्मोहध्वांतविनाशिने ॥ नमस्ते विश्वविख्यात—सर्वनीतिप्र-काशिने ॥ ३१ ॥ नमस्ते सर्वकल्याण—कारिणे क्लेशवारिणे ॥ नमस्ते भक्तिमल्लोक—भवसंता-पहारिणे ॥ ३२ ॥ रागो द्वेषश्च मोहश्च । तयोऽपि प्रहतास्त्वया ॥ अहं त्वेभिः सदाकालं । प्रहन्ये संततं प्रभो ॥ ३३ ॥ हन्यमानश्च देवेश । त्वां शरण्यमुपाश्रितः ॥ ततस्तेभ्यो भयोद्भ्रांतं । रक्ष रक्ष मुनीश मां ॥ ३४ ॥ चत्वारोऽपि त्वयात्यर्थं । कषायारातयो हताः ॥ अहं पुनरिमैः पापैः । प्र-भो पीड्ये निरंतरं ॥ ३५ ॥ तदिद्धं मामिमानुच्चै—र्बाध्यमानान्महाप्रभो ॥ अचिंत्यशक्तिसंयुक्त । नाथ वारय वारय ॥ ३६ ॥ कर्माष्टकं त्वयात्यंतं । प्रलयं प्रापि लीलया ॥ नाथेऽपि त्वयि बद्धोऽह —मष्टभिरपि कर्मभिः ॥ ३७ ॥ तदिद्धं बद्धमालोक्य । बद्धानां प्रविमोचक ॥ निःकर्मन् सर्वकर्म-भ्यो । मां विमोचय मोचय ॥ ३७ ॥ लीलयापि त्वया तीर्णो । विस्तीर्णोऽपि महार्णवः ॥ अहं तु तत्र मज्जामि । कर्मसंभारभारितः ॥ ३ए ॥ प्रसीद सांप्रतं स्वामिन् । मज्जंतं मां भवार्णवे ॥ स-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कर्मपोतमारोप्य । देव तारय तारय ॥ ४० ॥ ध्वस्तमिथ्यात्वनिद्रस्त्वं । त्वं निद्रासुप्रबोधक ॥ मिथ्यात्वनिद्रया सुप्तं । मां प्रबोधय बोधय ॥ ४१ ॥ किं बहुनांतरैः सर्वैः । शत्रुभिः सततं सदा ॥ हन्यमानं जगतत्रात—मामपालय पालय ॥ ४२ ॥ अनंतपरमानंद—युक्त मुक्तिसुखालय ॥ सुप्रसन्नं मनः कृत्वा । मां प्रापय शिवालये ॥ ४३ ॥ त्वं स्वामी त्वं च मे बंधु—स्त्वं मित्रं त्वं च मे गुरुः ॥ त्राणं त्वमेव देवेश । भूयाज्जन्मनि जन्मनि ॥ ४४ ॥ आभवं भवसंभ्रांत—जंतुसंतानरक्षक ॥ भूयान्मे भूयसी भक्ति—स्त्वय्येव परमेश्वर ॥ ४५ ॥ तथा प्रसीद मे नाथ । शरणागतवत्सल ॥ यथाज्ञां तावकीं पूर्णा—मासंसारं करोम्यहं ॥ ४६ ॥ एवं स्तुत्वा जिनाधीशं । संवेगभरनिर्भरः ॥ जिनालयाद्विनिःक्रम्य । निषण्णः सोऽपि मंडपे ॥ ४७ ॥ ततो गत्वा कुमारोऽपि । तं ननाम नतांगकः ॥ उपविश्य तदासन्ने । पप्रच्छेदं कृतांजलिः ॥४८॥ केनेदं कारितं तुंगं । सुंदरं जिनमंदिरं ॥ को वा देवाधिदेवोऽयं । कुतो वा त्वं समागतः ॥ ४९ ॥ गंतव्यं वा त्वया कुत्र । कुत्र वावस्थितिस्तव ॥ स प्राह श्रूयतां वत्स । सावधानेन कथ्यते ॥ ५० ॥

वैताढ्यपर्वते रम्ये । पुरे गगनवल्लभे ॥ सूरप्रभाभिधस्तत्रा—भवन्मम पितामहः ॥ ५१ ॥ ते-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नेदं कारितं वत्स । जिनवेश्म मनोहरं ॥ युगादिदेवदेवोऽय—मृषभो जिनपुंगवः ॥ ५२ ॥ आ-
गच्छामि त्वहं तस्मा—त्पुराद्गगनवल्लभात् ॥ गंतव्यं तु न कुत्रापि । मया मर्तव्यमत्र हि ॥ ५३ ॥
यतः कल्ये समायातो । विद्याचारणसन्मुनिः ॥ केवलज्ञानविज्ञात—विश्वव्यापारविस्तरः ॥ ५४ ॥
स वंदित्वा मया पृष्टः । प्रमाणं निजकायुषः ॥ तेनोक्तं दिवसा जद्र । पंचैव तव जीवितं ॥ ५५ ॥
तत्त्यक्त्वा सर्वमारंभ—मुद्यच्छ स्वहितंप्रति ॥ कुरु पारत्रिकं कार्यं । धर्मे चित्तं निवेशय ॥ ५६ ॥
आकर्ण्येदं ततस्तूर्ण—महमत्र समागतः ॥ विधिनानशनं कृत्वा । मरिष्यामि गिराविह ॥ ५७ ॥
तत्त्वापि जिनो देवः । पूजनीयोऽस्तु सर्वदा ॥ धर्मस्तेन प्रणीतोऽस्तु । गुरवस्तु सुसाधवः ॥ ५८ ॥
तथा जो न त्वया जीवा । मारणीया निरागसः ॥ नैवालीकं वचो वाच्यं । नो कार्यान्यधनस्पृहा
॥ ५९ ॥ परदारा न जोक्तव्याः । कार्यो नातिपरिग्रहः ॥ मद्यं मांसं च द्यूतं त्र । दूरतः परिवर्ज-
येः ॥ ६० ॥ पापर्द्धिं मा कृथा वत्स । मा कृथा रात्रिजोजनं ॥ माश्नीयाः फलमज्ञातं । वेश्यासक्तिं
च मा कृथाः ॥ ६१ ॥ त्याज्यो दुर्जनसंसर्गः । कार्या सज्जनसंगतिः ॥ तदेष श्रावको धर्मः । सि-
द्धिसौख्यकरोऽस्तु ते ॥ ६२ ॥ तथैनं जो महासत्व । गृहाण विधिपूर्वकं ॥ मंत्रं पंचनमस्कार—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नामकं भवनाशकं ॥ ६३ ॥ यत्प्रभावेण निःशेषं । वांछितं जायतेंगिनां ॥ नश्यंति व्यापदः सर्वाः । संति सानुग्रहा ग्रहाः ॥ ६४ ॥ यतः—

धन्नाण मणोभवणे । सब्भावबहुमाणवट्टिनेहिल्लो ॥ मिच्छत्ततिमिरहरणो । वियरइ नवकारवरदीवो ॥ ६५ ॥ जाण मणवणनिकुंजे । रमइ नमोक्कारकेसरिकिसोरो ॥ ताणं अणिट्ठदोघुट्ट—थट्टघमणा न नियमावि ॥ ६६ ॥ ता निबिडनिगडघडणा । गुत्ती ता वज्जपंजरनिरोहो ॥ न य जाव खलु जविज्ज । एस नमोक्कारवरमंतो ॥ ६७ ॥ दप्पिट्ठदुट्ठनिट्ठुर—सुरुट्ठदिट्ठीवि ताव होइ परो ॥ नवकारमंतचिंतण—पुव्वं नालाविज्ज जाव ॥ ६८ ॥ मरणरणंगणसंगाम—गामगामनगरमाईणं ॥ एयं सुमरंताणं । ताणं समाणणं च भवे ॥ ६९ ॥ तथा—जलमाणमणिप्पहपुण्ण—फारवरफणिवईफणाहिंतो ॥ पसरंतकिरणभरभग्ग—भीमतिमिरंमि पायाले ॥ ७० ॥ चित्ताणंतरघडमाण—माणसाणंदिइंदियब्भाणं ॥ विलसंति दाणवा किर । तं सुनमोक्कारफुरियलवो ॥ ७१ ॥ जुयलं ॥ जंपि य विसिट्ठपयई—विज्जाविन्नाणविणयनयनिउणं ॥ अक्कलियपसरपसरंत—कंतजसभरियब्भुवणयलं ॥ ७२ ॥ अच्चंतणुरत्तकलत्त—पुत्तपामोक्खसयलसुहिसयणं ॥ आणापडिच्छणुब्भा—

हिहडगिहिकम्मकारिजणं ॥ ७३ ॥ अच्छिन्नलच्छिविच्छड्ड—सामिभोइत्तवियरणपहाणं ॥ रायामच्चाइ·
विसिट्ठ—लोयपयई बहुमयं च ॥ ७४ ॥ जह चिंतियसंपज्जंत—सुंदरं दिन्नदुक्खहचमक्कं ॥ पावि·
ज्जइ मणुयत्तं । तंपि नमोक्कारफललेसो ॥ ७५ ॥ चउहिं कलावयं ॥ जंपि य सव्वंगपहाण—ल·
डहचउसट्ठिसहस्सवणियाणं ॥ बत्तीससहस्समह—प्पभावभासंतसामंतं ॥ ७६ ॥ सुरपुरसरिच्छछन्नव·
इ—गामकोडीकडप्पदुप्पसरं ॥ सुरलोयसरिसपुरवर—बिसत्तरीलक्खसंखालं ॥ ७७ ॥ बहुसंखखेड·
कब्बड—मडंबदोणमुहबहुवसिमं ॥ दीसंतकंतसुंदर—संदणसंदोहदिन्नदिहं ॥ ७८ ॥ परचक्ककंपणा·
णप्प—दप्पपाइक्कचक्कसंकिन्नं ॥ पगलंतगंडमंडल—पयंडदोघुट्टथट्टिल्लं ॥ ७९ ॥ मणपवणजवण·
चंचल—खुरक्खयखोणितलतुरंगालं ॥ सोलसहस्सपरिसंख—रक्खकजक्खपरिक्खित्तं ॥ ८० ॥ नवनि·
हिचोद्दसरयण—प्पहावपाउब्भवंतसयलत्थं ॥ छक्खंडभरहखेत्ता—हिवत्तणं लब्भए भुवणे ॥ ८१ ॥
तंपि हु किर सद्धा-सलिलसेयपरिवड्ढियस्स तस्सेव ॥ पंचनमोक्कारतरुस्स । कोवि फलविलसिय·
वियारो ॥ ८२ ॥ छहिं कुलयं ॥

जंपि य सियदेवंसुय-संतुयसुरसयणसुंदरुच्छंगे ॥ सिप्पिपुडंतो मोत्ता-हलं व उववज्जए तत्तो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ८३ ॥ आजम्मं रम्मतणू । आजम्ममुदग्गजोव्वणावत्थो ॥ आजम्मं रोगजरा—रयसेयविवज्जिय· सरीरो ॥ ८४ ॥ आजम्मं ण्हारुवसट्ठि—मंसरुहिराइणुमलविमुक्को ॥ आजम्मं अमिलायंत—म· ल्लवरदेवदूसवरो ॥ ८५ ॥ उत्ततजच्चकंचण—तरुणदिवायरसमप्पहसरीसे ॥ पंचप्पहरयणाहरण— किरणकब्बुरियदिसियक्को ॥ ८६ ॥ अखंमगंमंमंमल—लुलंतकुंमलपयापयासिल्लो ॥ रमणीयरमण· अमरण—रमणीगणमणहरो किंच ॥ ८७ ॥ गहचक्कमेक्कवेलं । पाडेउं भूयलं भमाडेउं ॥ सय· लकुलाचलचक्कं । चालेउं तह य लीलाए ॥ ८८ ॥ माणसपमुहमहासर—सरियादहसायराणस· लिलाइं ॥ पलयपवणोव्व समकाल—मेव सत्तो विसोसेउं ॥ ८९ ॥ तेलोक्कपूरणत्थं । एक्कखणच्चिय महल्लतररूवो ॥ परमाणुमेत्तरूवोवि । तह य होउं लहु समत्थो ॥ ९० ॥ किं बहुणा संतंपि हु । असंतयं तह असंतमवि संतं ॥ चक्कं एक्कखणच्चि य । दरिसेउमलं करेउं वा ॥ ९१ ॥ नमिर· सुरविसरसिरमणि—महुअरमालाविच्छुरियपाउ ॥ भूभंगाइट्ठपहिट्ठ—सव्वमुट्ठितपरिवारो ॥ ९२ ॥ चिं· ताणंतरसहसत्ति—संपमंताणुकूलविसयगणो ॥ अणवरयरुइरसुकम्म—विलासकरणेक्कदुल्ललिउ ॥ ॥ ९३ ॥ अणिमिसनयणसहस्सा—वलोयसमकाललद्धदव्वो ॥ समकालोदयसमुचिय—सयलसुह·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कम्मपयईस ॥ ७४ ॥ रिद्धिपबंधबंधुर-विमाणमालाहिवत्तणं सुइरं ॥ पालइ अखलियपसरं । सुरलोए किर सुरिंदोवि ॥ ७५ ॥ तंपि असेसं जाणसु । सम्मं सन्नाणगणविहियस्स ॥ पंचनमोक्कारा-हणस्स लीलाइयलवोत्ति ॥ ७६ ॥ इत्यादि. स चायं पंचनमस्कारनामा महामंत्रः ' ॐ नमो अरिहंताणं ' इत्यादि.

ध्यातव्योऽयं त्वया नंद । सन्मंत्रः शुचिना सदा ॥ येनेप्सितार्थसंसिद्धि—र्जायते ते निरंतरं ॥ ७७ ॥ मह्यमपि त्वया भद्र । म्रियमाणाय सादरं ॥ देयोऽयं निकटस्थेन । कर्णाभ्यर्णे स्फुटाक्षरं ॥ ७८ ॥ तथा स्तो मम विद्यते । द्वे विद्ये पाठसिद्धिके ॥ एकाकाशगमा नाम्ना । द्वितीया बहुरूपिणी ॥ ७९ ॥ तदेते द्वे वरे विद्ये । गृहाण मम तुष्टये ॥ स्थातव्यं च ममाभ्यर्णे । दिनानां पंचकं त्वया ॥ १०० ॥ ततस्तथेति तद्वाक्यं । कुमारः प्रतिपन्नवान् ॥ अथ भूयोऽप्युवाचेदं । सूरतेजाः कुमारकं ॥ १ ॥ स्वस्थाने संति मे भूरि-बांधवाः स्नेहनिर्भराः ॥ समायातोऽत्र तेनाह-मेकाक्येव मुमूर्षया ॥ २ ॥ अनाख्यायैव बंधूनां । समाध्यर्थं वराचले ॥ तदहो कुरु साहाय्य-मसहायस्य सांप्रतं ॥ ३ ॥ नमस्कारप्रदानेन । ममोत्पादय निर्वृतिं ॥ कुमारेणापि तद्वाक्यं । तथैव च प्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिश्रुतं ॥ ४ ॥ ततो द्वावपि संविग्नौ । ततः स्थानात्समुत्थितौ ॥ गृहीत्वा चारुपुष्पाणि । पूजयित्वा जिनेश्वरं ॥ ५ ॥ विधाय विधिना सम्य—क्संपूर्णं चैत्यवंदनं ॥ कृत्वा च सुप्रणिधानं । निष्क्रांतौ जिनमंदिरात् ॥ ६ ॥ युग्मं ॥ गतौ दक्षिणदिग्भागे । तस्यैव जिनवेश्मनः ॥ स प्रमृज्य ततस्तत्र । सुविशालं शिलातलं ॥ ७ ॥ सूरतेजास्ततस्तस्मि—न्नुपविश्य सुधीरधीः ॥ विविधानशनं कृत्वा । वक्तुमेवं प्रचक्रमे ॥ ८ ॥ ' नमोत्थुणं अरिहंताणं भगवंताणं ' इत्यादि. ते लोकपूयणिज्जे । जगप्पईवे. जिणे जियारिगणे ॥ वंदामि जे अईए । अणाइकालेण सिद्धिगए ॥ ९ ॥ वंदामि संपयं जे । विहरंति महाविदेहवासम्मि ॥ वंदामि जे भविस्संति । एसु पन्नरसु खेत्तेसु ॥ १० ॥ वंदामि णिट्ठियट्ठे । अणाइकालेण जे गया मोक्खं ॥ तित्थयरसिद्धभेया—इएहिं भेएहिं सव्वेवि ॥ ॥ ११ ॥ वंदामि गणहरिंदे । देविंदनमंसिए महासत्ते ॥ तीयाणागयभेए । संपयकालेवि जे ते उ ॥ १२ ॥ वंदामि बारसंगी—समग्गसुयधारए महासत्ते ॥ तीयाणागयसपइ—भेयगए सव्वभावेण ॥ १३ ॥ वंदामि वंदणिज्जे । सदेवमणुयासुरस्स लोगस्स ॥ दसपुव्विणो अईए । अणागए वट्टमाणे अ ॥ १४ ॥ जे केइ जगप्पहाणे । आयरिए आयरियमहासत्ते ॥ चरणकरणप्पहाणे । अ·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णुउगधरे जहासत्तिं ॥ १५ ॥ तीयाणागयसंपइ—भेएणं जे जयंमि आयरिया ॥ ते सव्वेवि महप्पा । वंदे परमाए भत्तिए ॥ १६ ॥ वंदामि वंदणिज्जे । अवज्जसंजमगुणुज्जुए धीरे ॥ सुयसागरमगिलाए । अज्झाविंते उवज्झाए ॥ १७ ॥ भरहेवयविदेहे । नाणाइ समन्निया महासत्ता ॥ देहेवप्पमिबद्धा । अखंडियवयकलाविल्ला ॥ १८ ॥ अठारससीलंगाण—धारया सयलगुणगणाइन्ना ॥ जे केइ तीयणागय—संपइकालाणुगा मुणिउ ॥ १९ ॥ ते भगवंते तेल्लोक—पूयठाणंगए महासत्ते ॥ मणसा वणसा काए—ण वंदिमो परमविणएणं ॥ २० ॥ तहा—

जिणसिद्धकेवलीणं । मणपज्जवनाणिउहिनाणीणं ॥ गणहरपत्तेयाणं । सयंसबुद्धाणनाणीणं ॥ २१ ॥ चोद्दसपुव्वीण तहा । दसपुव्वीण य तहन्नसूरीणं ॥ आगमववहारीणं । पुरउ भत्तिए विणएणं ॥ २२ ॥ नाणंमि दंसणंमि य । चरणंमि तवंमि जेउ अइयारा ॥ तेहं आलोएमी । मणसा वयसा य काएण ॥ २३ ॥ काले विणए य तहा । बहुमाणुवहाण तह अ निन्हवणे ॥ जंमे वितहमणुचियं । तं निंदे तं च गरिहामि ॥ २४ ॥ वंजणअत्थे तह तदु—भए य तह सुयहराण किइकम्मे ॥ जं किंचि मया एव्वं । वितहायरियं तयं निंदे ॥ २५ ॥ संका कंखा वितिगि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ह्वा । पसंस तह संथवो कुलिंगीण ॥ संमत्तस्सईयारे । जे उ कए निंदिमो ते उ ॥ २६ ॥ उ-
ववूहा जन्न कया । मुणीण तह दुह्वियाण थिरकरणं ॥ जिणधम्मे वच्चल्लं । बालगिलाणाइ विसयं
तु ॥ २७ ॥ ज्ञत्तीए जन्न कया । पज्ञावणा पवयणंमि जइणंमि ॥ तिविहं तिविहेण य । तयं निं-
दामि इमाण पच्चख्कं ॥ २८ ॥ पाणिवहमुसावाए । अदत्तमेहुणपरिग्गहे चेव ॥ विरइए जं वितहं
। कयंति तं निंदिमो इण्हिं ॥ २९ ॥ इंदियकसायजोगे । पडुच्च जं वितहसेवियं किंचि ॥ तं ए-
याणं पुरज्ज । तिविहेणं निंदिमो एस ॥ ३० ॥ बारसभेयंमि तवे । अइयारो बायरो य सुहुमो वा
॥ तं एयाणं पुरज्ज । तिविहं तिविहेण निंदामि ॥ ३१ ॥ खामेमि सव्वे जीवे । सव्वे जीवा खमंतु
मे ॥ मेत्ति मे सव्वज्ञूएसु । वेरं मज्झं न केणइ ॥ ३२ ॥ पेक्खंतु जिणे सव्वे । सिद्धा यवि लोयपूइ-
या सव्वे ॥ पुरज्ज ज्ञगवंताणं । तुम्हाणमिणं तु सव्वंपि ॥ ३३ ॥ पाणवहं सुहुमेयर—तसथावरगो-
यरं तु तिविहेणं ॥ मणसा वयसा तणुणा । कयकारियअणुमइहिं तु ॥ ३४ ॥ पच्चख्कामि इयाणिं
। जावज्जीवाए सवज्ञावेण ॥ तह कोहलोहमायाइ—भेयज्ज अलियवयणंपि ॥ ३५ ॥ सच्चित्तमी-
सअचित्त—गोयरं गामनयररन्नेसु ॥ परकीयादत्तंपि हु । तिविहं तिविहेण वोसरिमो ॥ ३६ ॥ दे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वीहिं माणुसीहिं । तिरिक्खजोणीहिं मेहुणं सव्वं ॥ धम्मोवगरणवज्जं । परिग्गहं वोसिरेऽवज्जं ॥
॥ ३७ ॥ सव्वं असणं पाणं । खाइमं तह साइमं च तिविहेणं ॥ तुम्ह पुरव इयाणिं । वोसिरिमो
जावजीवाए ॥ ३८ ॥

इत्थं विज्ञापयंश्चेतः—संशुद्ध्या शुद्धभावनाः ॥ स्मरन् पंचनमस्कारं । भक्त्या संविग्नमानसः ॥
॥ ३९ ॥ प्रतिजागर्यमाणश्च । रत्नचंद्रेण सादरं ॥ सत्वेषु समतां बिभ्र—ज्जीवित्वा दिनपंचकं ॥
॥ ४० ॥ अंते समाधिना मृत्वा । जातः कल्पे स पंचमे ॥ इंद्रसामानिको देवो । दीर्घायुश्च मह-
र्द्धिकः ॥ ४१ ॥ त्रिभिर्विशेषकं ॥ अथासौ रत्नचंद्रोऽपि । तं निर्याम्य नभश्चरं ॥ उदिचीं दिश-
माश्रित्य । चलितः पर्वतात्ततः ॥ ४२ ॥ गच्छता च कुमारेण । दृष्टमेकत्र सुंदरं ॥ कानन नागव-
ल्ल्यादि—नानामंडपसंकुलं ॥ ४३ ॥ तस्य मध्ये च शुभ्रोच्चः । प्रासादः सुमनोहरः ॥ आरूढः कु-
मरस्तत्र । सानंदो गतसाध्वसः ॥ ४४ ॥ तत्रापश्यत्सुरूपाढ्यं । सुंदरं कन्यकाद्वयं ॥ पृष्टे च ते कु-
मारेण । के युवां किमुनामिके ॥ ४५ ॥ एकाकिन्यौ किमित्यत्र । तिष्टतः कथ्यतां मम ॥ तत्रैका
वक्तुमारब्धा । कंपमानांगयष्टिका ॥ ४६ ॥ श्रूयतां भो महासत्व । संक्षेपात्तव कथ्यते ॥ वैताढ्ये

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दक्षिणश्रेण्यां । पुरे गगनवल्लभे ॥ ४७ ॥ हेमचंद्राभिधानोऽस्ति । विद्याधरमहाप्रभुः ॥ अहं तु पुत्रिका तस्य । नाम्ना मदनसुंदरी ॥ ४८ ॥ मत्पित्रा चान्यदा पृष्टः । सिद्धपुत्रो विचक्षणः ॥ यथास्या मम सत्पुत्र्याः । को भर्ता भविता वद ॥ ४९ ॥ ततस्तेन समादिष्टो । रत्नशेखरनंदनः ॥ रत्नचंद्र इति ख्यातः । कुमारो भूमिगोचरः ॥ ५० ॥ ततोऽहं पुष्णती तत्र । सत्कलाः सकला अपि ॥ संतिष्ठामि निजे गेहे । सखीचक्रसमन्विता ॥ ५१ ॥

अन्यदा भानुवेगस्य । पुत्रेणाहं विलोकिता ॥ भानुप्रभाभिधानेन । कामांधेन दुरात्मना ॥ ॥ ५२ ॥ ततः संहृत्य मामत्र । प्रासादे स विमुक्तवान् ॥ स्वयं पुनर्गतः पापो । विद्यासाधनहेतवे ॥ ५३ ॥ तथेयं या द्वितीयात्र । कन्यका कनकच्छविः ॥ पुत्री चंपाधिराजस्य । नाम्ना तु रत्नमेखला ॥ ५४ ॥ एषापि तेन पापेन । ततो हृत्वा दुरात्मना ॥ मुक्ता ममांतिके कामं । कामपीडितचेतसा ॥ ५५ ॥ तदेष ते मया सर्वः । स्ववृत्तांतो निवेदितः ॥ सांप्रतं श्रोतुमिच्छामि । गोत्रं नाम च तावकं ॥ ५६ ॥ कथयानुग्रहं कृत्वा । कुरुष्व मम निर्वृतिं ॥ कुमारोऽपि स्ववृत्तांतं । तस्यै सर्वं न्यवेदयत् ॥ ५७ ॥ श्रुत्वेदमाहतुः कन्ये । समानंदितमानसे ॥ अहो नौ कीदृशं पश्य । सत्क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्याणमुपस्थितं ॥ ५८ ॥ यस्मादमृतवृष्ट्याभं । संजातं तव दर्शनं ॥ नूनमरण्यवासोऽपि । स्वर्गावाससमोऽजनि ॥ ५९ ॥ तन्नाथालं विलंबेन । शीघ्रं परिणयस्व नौ ॥ यावन्नायाति मूढात्मा । पापोऽसौ खेचरोऽधमः ॥ ६० ॥ कुमारोऽपि हि ते कन्ये । संक्षेपात्परिणीतवान् ॥ ततस्तिष्ठति सानंद—स्तत्र यावत्क्षणांतरं ॥ ६१ ॥ तावद्भानुप्रभो वेगा—दाजगाम तदंतिकं ॥ विलोक्य कुमरं तत्र । कोपाविष्टोऽब्रवीदिदं ॥ ६२ ॥ रे रे शस्त्रं गृहाण त्वं । यद्यस्ति तव पौरुषं ॥ एषोऽहं मारयामि त्वां । रटंतं विस्वरैः स्वरैः ॥ ६३ ॥ एवमाक्रोशयन्नुच्चै—रागतः कुमरांतिकं ॥ मुक्तः खड्गप्रहारश्च । कुमारस्य यथाबलं ॥ ६४ ॥ कुमारेणापि वंचित्वा । खड्गघातं तकं जवात् ॥ प्रहृतः खड्गमादाय । स दुष्टः खेचरोऽधमः ॥ ६५ ॥ प्रापितः पंचतामाशु । रंजितं भार्ययोर्मनः ॥ ततो भार्ये गृहीत्वासौ । ततः स्थानाद्विनिर्गतः ॥ ६६ ॥ स्तोकांतरं गतो याव—त्तावदस्तं गतो रविः ॥ गूढद्वारां गृहाकारां । दृष्ट्वासौ वंशजालिकां ॥ ६७ ॥ प्रिये प्रविशयामास । तत्र सानंदमानसः ॥ स्वयं तु खड्गमादाय । द्वारदेशे व्यवस्थितः ॥ ६८ ॥ गता रात्रिः क्रमेणाथ । यावदालोकते प्रिये ॥ तावत्ते वीक्षते नैव । तस्मिन् वंशकुडंगके ॥ ६९ ॥ ततोऽसौ चिंतयामास । विस्मयाकुलमानसः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्व गते ते कथं चापि । केन नीते मम प्रिये ॥ १० ॥

एवं चिंतातुरो यावत् । स तिष्ठति कुमारकः ॥ तावदेकं सुरं कांतं । संपश्यति पुरः स्थितं ॥ ॥ ११ ॥ देवः प्राह कुमार त्वं । किं जानासि न वेति मां ॥ न वेति कुमरो ब्रूते । सुरः प्राह निशम्यतां ॥ १२ ॥ सोऽहं विद्याधरो भद्र । यस्तु निर्यामितस्त्वया ॥ मृत्वाहं पंचमे कल्पे । शक्रतुल्यः सुरोऽजनि ॥ १३ ॥ तदहो मा कृथाः खेदं । त्वदीये यद्गते प्रिये ॥ अचिरादेव ते ताभ्यां । सार्धं संगो भविष्यति ॥ १४ ॥ चिंतारत्नमिदं सर्वं । चिंतितार्थप्रदायकं ॥ गृहाण कुरु मे तुष्टिं । कुमारोऽपि तथाकरोत ॥ १५ ॥ सुरः प्रोवाच भूयोऽपि । कुमर त्वं व्रजाधुना ॥ वैताढ्यपर्वते रम्ये। पुरे गगनवल्लभे ॥ १६ ॥ स्थातव्यं च त्वया तत्र । हेमचंद्रस्य मंदिरे ॥ तिष्ठतस्तत्र ते सर्वं । संपत्स्यते समीहितं ॥ १७ ॥ तथा भद्र त्वया यत्नः । कार्यो धर्मे जिनोदिते ॥ धर्म एवांगिनां येन । सर्वकल्याणकारकः ॥ १८ ॥ यतः—धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्धनं । धर्मेणैव भवंति निर्मलयशोविद्यार्थसंपत्तयः ॥ कांताराच्च महाभयाच्च सततं धर्मः परित्रायते । धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ १९ ॥ यन्नागा मदभिन्नगंडकरटास्तिष्ठंति निद्रालसा । द्वारे

हेमविभूषिताश्च तुरगा हेषंति यद्दर्पिताः ॥ वीणावेणुमृदंगशंखपणवैः सुप्तश्च यद्बोध्यते । तत्सर्वं सुरलोकसौख्यसदृशं धर्मस्य विस्फुर्जितं ॥ ८० ॥ एवमुक्त्वा गतो देवः । क्षणादेव सुरालये ॥ ततो गतः कुमारोऽपि । पुरे गगनवल्लभे ॥ ८१ ॥ मा मेऽवज्ञा भवेत्तत्र । नूनं श्वशुरमंदिरे ॥ रूपं मदनमंजर्या । विधाय तद्गृहे गतः ॥ ८२ ॥ पिता कंठग्रहं कृत्वा । रुरोद जननी तथा ॥ हा वत्से क्व गतासि त्वं । केनानीतासि सांप्रतं ॥ ८३ ॥ तयापि कथितं सर्वं । येन नीता च यत्र च ॥ आनीता रत्नचंडेण । रत्नशेखरसूनुना ॥ ८४ ॥ कासौ कासौ महाभाग—स्तैः ससंभ्रममूचिरे ॥ तव संकल्पितो भर्ता । जामाता पुनरावयोः ॥ ८५ ॥ कन्यका प्राह मां द्वारि । मुक्त्वा तेन तिरोदधे ॥ यत्संबंधिगृहे संतो । न विशंति यतस्ततः ॥ ८६ ॥

ततश्च हेमचंडेण । वायुवेगास्तुरंगमाः ॥ वरवेगा महाप्राणा । योधाश्चापि समंततः ॥ ८७ ॥ संप्रेषिताः प्रयत्नेन । कुमारान्वेषणाकृते ॥ गत्वागता न तैर्दृष्टो । रत्नशेखरनंदनः ॥ ८८ ॥ सखेदः पार्थिवो जातः । साशंका हेमसुंदरी ॥ अहो गृहागतो दूरी—भूतो जामातृकः कथं ॥ ८९ ॥ यद्यसावुपरोधेन । नागच्छति गृहे स्वयं ॥ किमर्थं च करे कृत्वा । नानीतः पुत्रिके त्वया ॥ ९० ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

त्वं हि तस्य मया दत्ता । विवाहश्चात्र वत्सरे ॥ भविष्यत्यंतरा कर्म । यदि ते नो विबाधकं ॥९१॥
प्रेषितः पुरुषस्तेन । लेखहस्तो महारथः ॥ बंगाजनपदे गत्वा । पुरे विजयवर्धने ॥ ९२ ॥ रत्नशे-
खरनूपाय । गत्वा लेखमथार्पयत् ॥ जणितोऽनेन नूपोऽसौ । विनम्य विधिपूर्वकं ॥ ९३ ॥ हेमचं-
द्रनरेंद्रस्य । सुता मदनमंजरी ॥ रत्नचंडाय सा दत्ता । युष्मभ्यं यदि रोचते ॥ ९४ ॥ श्रुत्वेदं स-
विषादोऽसौ । तस्मै प्रत्युत्तरं ददौ ॥ अश्वारूढश्च पुत्रो मे । नीतः केनापि वैरिणा ॥ ९५ ॥ आ-
श्वीयं पृष्ठतो लग्नं । पादातं च समुद्धतं ॥ तदद्यापि च नायाति । सखेदा वयमास्महे ॥ ९६ ॥ प्र-
तिलेखं समादाय । गच्छ त्वं निजमंदिरे ॥ सति धर्मिणि चिंत्यंते । धर्माः किं कथ्यतेऽधुना ॥९७॥
एतत् श्रुत्वा समायातः । स्वस्थाने लेखवाहकः ॥ मुखेन कथितं किंचि—ल्लेखोऽपि च समर्पितः ॥
॥ ९८ ॥ अहो संसारवैचित्र्य—मुन्नयत्राप्यनिर्वृतिः ॥ हेमचंद्रो विचिंत्यैवं । मनसा मौनमाश्रितः
॥ ९९ ॥ श्यामाकारा कुरूपा च । जाता मदनमंजरी ॥ किमेतदिति सोद्वेगा । संपन्ना हेमसुंदरी
॥ २०० ॥ कदाचन कृशा स्थूला । गौरी तन्वी कदाचन ॥ नानारूपधरा दृष्टा । सिद्धयोगेव यो-
गिनी ॥ १ ॥ विस्मिता जननी तस्या । जनकोऽपि च विस्मितः ॥ एकांते जणिता ताभ्यां । किं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वं मदनमंजरी ॥२॥ तयोक्तं कथयिष्यामि । सर्वं हि समयागतं ॥ या काचिद्येन संजाता । नानारूपविधायिका ॥ ३ ॥ तस्मिन्नेव दिने नक्त—मदृश्यांजनयोगतः ॥ जनोक्तं शृण्वती भ्रांता । प्रतिवेश्म पुरेऽखिले ॥ ४ ॥ एकस्मिंश्च गृहे ब्रूते । वृद्धा विद्याधरी वचः ॥ सुतां संक्षेपतो वत्से । सामग्रीं प्रगुणां कुरु ॥ ५ ॥ प्रज्ञप्ती मम पुत्रेण । मेघनादेन साधिता ॥ यात्रा युगादिदेवस्य । महाटव्यां प्रवर्तिता ॥ ६ ॥ आनिन्ये कन्यके तत्र । खेचरी भूमिगोचरी ॥ गीतनृत्यकलाजाल—कुशला रूपशालिनी ॥ ७ ॥ नेपथ्यं भोजनं भोगा । भव्यास्तेषां कृते मया ॥ नेतव्याः पुत्रसंदेशा—त्त्वद्याने प्रगुणीभव ॥ ८ ॥ ततस्तया यथादिष्टं । समस्तं प्रगुणीकृतं ॥ ततश्चचाल सानंदा—ढीघ्रं गगनवर्त्मना ॥ ९ ॥ तदनु कौतुकाक्षिप्ता । चेले मदनमंजरी ॥ पश्यंती च महीं रम्यां । संप्राप्ता जिनमंदिरे ॥ १० ॥ बहुविद्याधराकीर्णे । नानाविद्याधरीभृते ॥ कर्पूरागुरुसंदोह—गंधद्रव्यैर्मनोहरे ॥ ११ ॥ युग्मं ॥ दृष्टं युगादिदेवस्य । बिंबं जनमनोहरं ॥ विधाय सहजं रूपं । रत्नचंद्रेण तत्क्षणात् ॥ १२ ॥ रोमांचांचितगात्रेण । सुगंधां सुमनोहरां ॥ गृहीत्वा मालतीमालां । पूजितः परमेश्वरः ॥ १३ ॥ परमात्मा जगन्नाथः । पुत्रीयितजगतत्रयः ॥ ऋषभो भवकांतार—सार्थवाहो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निरंजनः ॥ १४ ॥ त्रिभिर्विशेषकं ॥

चिरं चालोकि पूजादि । निर्निमेषेण चक्षुषा ॥ तनूकृतो भवांभोधिः । संजाता चित्तनिर्वृतिः ॥ १५ ॥ भूयोभूयस्ततः पश्यन् । स्निग्धदृष्ट्या जिनाननं ॥ प्रेक्षामंडपमागत्य । निषण्णो वरविष्टरे ॥ १६ ॥ अत्रांतरे सशृंगारा । सर्वलोकमनोहरा ॥ अष्टादशाब्ददेशीया । नर्तिता रत्नमेखला ॥ ॥ १७ ॥ आक्षिप्तश्च जनः सर्वः । शिरांसि च धुनापितः ॥ अहो नृत्यकला काचि—दपूर्वात्र विलोकिता ॥ १८ ॥ ततः प्रनर्तिता हाव—भावसारं ससंभ्रमं ॥ हेमचंद्रनरेंद्रस्य । सुता मदनमंजरी ॥ १९ ॥ तयापि रंजितो लोको । गुणग्राही विनिर्मितः ॥ गता सा नृत्यपर्यंते । तत्रस्थपितुरंतिके ॥ २० ॥ हेमचंद्रनरेंद्रेण । स्नेहसारं ससंभ्रमं ॥ संतोषामृततृप्तेन । पृष्टा मदनमंजरी ॥ २१ ॥ वत्से कथय मे सर्वं । विस्मयो मम वर्तते ॥ क्व नीता केन चानीता । त्वया किं वान्वभूयत ॥ ॥ २२ ॥ तयापि मूलतः सर्वं । यथावृत्तं निवेदितं ॥ मद्गृहे च त्वदाकारा । त्वदाह्वाना च कन्यका ॥ २३ ॥ क्षणे क्षणेऽन्यथाकारा । नटीवाश्चर्यकारिणी ॥ सा का कथय मे पुत्री । यदि त्वं मदनमंजरी ॥ २४ ॥ तयोक्तं न विजानेऽहं । तात तत्वं शरीरिणां ॥ भूरिधूर्तसमाकीर्णा । नाना-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कारा वसुंधरा ॥ २५ ॥ क्षंतव्यं मम तातेन । यदात्मा परिणायितः ॥ गुरूणां हि प्रमोदाय । मि-
ज्जदुश्चेष्टितं मम ॥ २६ ॥ राजाह मर्षितं पुत्रि । ते जर्ता कुत्र सांप्रतं ॥ अत्रांतरे स्वज्ञावस्थो । र-
त्नचंद्रस्तयेक्षितः ॥ २७ ॥ तत्समीपे स्थिता रत्न—मेखला मुदितानना ॥ दृष्टा मदनमंजर्या । त-
तः पित्रे निवेदितं ॥ २८ ॥ तेनापि स समाहूतः । समायातस्तदंतिके ॥ पृष्टश्च जो महासत्व । र-
त्नचंडः कुतो जवान् ॥ २९ ॥ स च प्राह सुवेलाख्य—पर्वतात्तु परिज्रमन् ॥ प्रयोजनवशादत्र ।
संप्राप्तो जिनमंदिरे ॥ ३० ॥ ततो गतस्तमादाय । हेमचंद्रो निजे पुरे ॥ सकलत्रो धृतस्तत्र । गुरु-
गौरवयोगतः ॥ ३१ ॥ हेमचंद्रनरेंडेण । पृष्टा मदनमंजरी ॥ ब्रूहि त्वं यदि जानासि । विस्मयो म-
म वर्तते ॥ ३२ ॥ नानारूपधरः कोऽयं । त्वडूपेण च मद्गृहे ॥ स्थित्वा गतो न वार्तापि । कथि-
ता तेन गछता ॥ ३३ ॥ साचख्यौ ज्ञातवृत्तांता । स्वपित्रे जर्तृचेष्टितं ॥ यथावज्ञाज्ञियानेन । द-
र्शितर्ड्डिर्निजा तव ॥ ३४ ॥ ततो रंजितचित्तेन । हेमचंडेण जल्पितं ॥ अहो वीर्यमहो लब्धि—
र्जूमिगोचरचारिणः ॥ ३५ ॥ जूमिगोचर इत्येषा । अनास्था नैव संगता ॥ विद्याधरोऽयमित्येष ।
बहुमानोऽस्तु संगतः ॥ ३६ ॥ ततोऽसौ द्विगुणस्नेहः । संपश्यति वधूवरं ॥ स्वसुतातो विशेषेण ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वल्लभां रत्नमेखलां ॥ ३७ ॥ मेघनादेन सानंदं । नृत्यंती रत्नमेखला ॥ दृष्टा मनःप्रविष्टा च । हृत्वा नीता च पर्वते ॥ ३८ ॥ वसंतसुंदराह्वाने । ऋरन्निर्झरसंकुले ॥ नानावृक्षसमाकीर्णे । गुहाकूटसमाकुले ॥ ३९ ॥ ततः संजातखेदेन । हेमचंद्रेण सादरं ॥ स्मृता विद्या तया सर्वः । वृत्तांतोऽस्य निवेदितः ॥ ४० ॥ स्थाने स्थाने ततस्तूर्णं । सामर्षो रत्नचंद्रकः ॥ निषेध्य गच्छतः सर्वान् । विद्याधरमहाभटान् ॥ ४१ ॥ एकाकी खड्गमादाय । वार्यमाणोऽपि खेचरैः ॥ चचाल विकटैः पादैः । खड्गसत्वसमन्वितः ॥ ४२ ॥ वसंतसुंदरे प्राप्तो । गिरौ दृष्टश्च खेचरः ॥ मेघनादो रुदंती च । सशोका रत्नमेखला ॥ ४३ ॥ समाकृष्य ततः खड्गं । रे रे भव पुरो मम ॥ प्रजल्पन् मेघनादस्य । तूर्णमभ्यर्णमागतः ॥ ४४ ॥ लग्नं ततस्तयोर्युद्धं । मत्तद्विरदयोरिव ॥ परस्परं महाघोर—मतीवानिष्टचित्तयोः ॥ ४५ ॥ जित्वा क्षणेन तं कृत्वा । प्रहारशतजर्जरं ॥ गृहीतमायुधं तस्य । कुमारेण बलादपि ॥ ४६ ॥ ततः संरोहिणीयोगा—त्प्रहारास्तस्य तत्क्षणं ॥ संरोहिताः कुमारेण । खेचरः प्रगुणोऽभवत ॥ ४७ ॥ ततस्तस्मै स्वसा स्वीया । मेघनादेन सादरं ॥ तत्रैवानीय संक्षेपा—द्दत्ता कनकमंजरी ॥ ४८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कारितं च तया सार्धं । पाणिग्रहणमंगलं ॥ कुमाररत्नचंद्रस्य । खेचरेण प्रमोदतः ॥ ४९ ॥
दत्तं च मेघनादेन । धनदेवेन पुष्कलं ॥ धनं कनकमंजर्या । लक्षशः कोटिशोऽपि वा ॥ ५० ॥
ददौ च रत्नवस्त्रादि । कुमारायापि खेचरः ॥ ततो गतो निजे गेहे । तामादाय कुमारकः ॥ ५१ ॥
सस्नेहं दृश्यमानोऽसौ । हेमचंद्रेण भूभुजा ॥ आस्ते तत्र प्रमोदेन । कांतात्रयसमन्वितः ॥ ५२ ॥
रत्नचंद्रकुमारेण । विनम्य भणितो नृपः ॥ सांप्रतं तात गच्छामि । पश्यामि पितरौ निजौ ॥ ५३ ॥
हेमचंद्रनरेंद्रेण । विमानं प्रगुणीकृतं ॥ भृतं च भूरिरत्नानां । मुक्तानां वरवाससां ॥ ५४ ॥ युष्मा-
भिर्यददत्ता मे । ऊढा मदनमंजरी ॥ तत्तात मर्षणीयं मे । संतो हि नतवत्सलाः ॥ ५५ ॥ कां-
ताभिः सहितस्तत्र । विद्याधरगणान्वितः ॥ रत्नचंद्रः समारूढो । विमानं चलितं ततः ॥ ५६ ॥ क्ष-
णादेव च संप्राप्तं । पुरे विजयवर्धने ॥ रत्नशेखरभूपस्य । तत्रापि वरमंदिरे ॥ ५७ ॥ अवतीर्णः
कृतातिथ्यो । रत्नशेखरभूभुजा ॥ विद्याधरजनः सर्वः । कुमारेण विसर्जितः ॥५८॥ युग्मं पितुः पाद-
ग्रहं कृत्वा । प्रणतो मातृपादयोः ॥ लब्धाशी राजवृद्धानां । यथायोगं ननाम सः ॥ ५९ ॥ वध्वो-
ऽपि च यथाज्येष्ठं । प्रणेमुर्गुरुपादयोः ॥ दत्ताशिषश्च ताः श्वश्र्वा । निषेदुः पादयोः पुरः ॥ ६० ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रत्नचंद्रकुमारेण । मातापित्रोः सविस्तरः ॥ कथितो निजवृत्तांतो । यावदत्र समागतः ॥ ६१ ॥ त-
तो राजाब्रवीदेवं । नास्त्यसाध्यं सुकर्मणां ॥ विपदोऽपि हि पुत्रस्य । संपदो विधिना कृताः ॥६२॥
कालेन गछता जाताः । पुत्रा जनमनोहराः ॥ कुमारस्य कृतार्थोऽस्मि । मुदितो मेदिनीपतिः ॥६३॥
ततो दत्वा निजं राज्यं । रत्नचंद्राय धीरधीः ॥ धर्मस्थाने धनं भूरि । विनियोज्य विधानतः ॥६४॥
दमघोषमुनींद्राणां । समीपे व्रतमुज्ज्वलं ॥ विधाय विधिना धीरो । जगाम त्रिदशालयं ॥ ६५ ॥
युग्मं ॥ रत्नचंद्रनरेंद्रोऽपि । पालयामास हेलया ॥ स्वराज्यं नामिताशेष—भूपालकृतसन्नतिः ॥६६॥
साधिताशेषदुर्दांतं । पालिताखिलधार्मिकं ॥ कोषागारादिसंपूर्णं । सुरंजितजगज्जनं ॥ ६७ ॥ समु-
ल्लसद्यशोराशि—धवलीकृतभूतलं ॥ एकातपत्रमुत्खात—कंटकं मेदिनीतलं ॥ ६८ ॥ त्रिभिर्विशे-
षकं ॥ कांतकांतासुखासक्तो । धर्मार्थकृतसेवनः ॥ सर्वलोककृतानंदो । कालं नयति भूपतिः ॥६९॥
एकदा च समागत्य । पुरुषेण ससंभ्रमं ॥ विज्ञप्तोऽसौ यथा देव । दयासुंदरनामके ॥ ७० ॥ त्व-
दुद्याने समायाता । दमघोषमुनीश्वराः ॥ प्राशुके भूमिभागे च । तस्थुः शिष्यगणान्विताः ॥७१॥
युग्मं ॥ तत् श्रुत्वा रंजितो राजा । दत्वास्मै पारितोषिकं ॥ पुरुषं प्रेषयामास । चतुरंगबलान्वितः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ७२ ॥ स्वयं चचाल जात्याश्व—खुरोत्क्षुण्णमहीतलः ॥ दमघोषमुनींद्राणां । वंदनाय धराधिपः ॥
॥ ७३ ॥ गत्वा प्रदक्षिणापूर्वं । वंदित्वा भक्तियोगतः ॥ नातिदूरे न चासन्ने । स निषण्णः कृतांज-
लिः ॥ ७४ ॥ त्रिभिर्विशेषकं ॥

प्रारब्धा दमघोषेण°। सूरिणा धर्मदेशना ॥ आदौ धर्मस्य सम्यक्त्वं । तस्य शुद्धिविधायकं ॥
॥ ७५ ॥ चैत्यवंदनमाख्यातं । तच्च पूजापुरस्सरं ॥ पूजा च मुखकोषादि—विधानेन महाफला ॥
॥ ७६ ॥ युग्मं ॥ परिणामोऽपि पूजायाः । समीहितफलप्रदः ॥ विधानं विधिना दत्ते । किं किं ना-
त्र शरीरिणां ॥ ७७ ॥ यतः—चैत्यपूजनतः सम्यक् । शुभो भावः प्रजायते ॥ तस्मात्कर्मक्षयः सर्वं
। ततः कल्याणमश्नुते ॥ ७८ ॥ एष एव जगत्सारः । शुभो भावः प्रकीर्तितः ॥ एष एव जगत्त्रा-
ण—मेष एव च बांधवः ॥ ७९ ॥ एष एव भवावर्ते । पततामवलंबनं ॥ एष एव भवाटव्या—म-
टतां मार्गदर्शकः ॥ ८० ॥ एष एव भिषक्कल्पः । सर्वव्याधिनिषूदनः ॥ एष एव गदोच्छेद—करणे
परमौषधं ॥ ८१ ॥ एष एव महामंत्रः । परमानंदकारणं ॥ एष एव परं तत्वं । संमतं तत्ववेदिनां ॥
॥ ८२ ॥ एष एव कुमानुष्य—दुःखविच्छेददायकः ॥ एष एव कुदेवत्व—मनःसंतापनाशकः ॥८३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एष एव महामोह—वृक्षोच्छेदकुठारकः ॥ एष एव महानिद्रा—द्रावणप्रतिबोधकः ॥ ८४ ॥ एष एव गुरुक्रोध—वह्निविध्यापने जलं ॥ एष एव महामान—पर्वतोद्दलने पविः ॥ ८५ ॥ एष मायाकुरंग्याश्च । दहने दवसन्निभः ॥ एष लोभसमुद्रस्य । शोषणे वडवानलः ॥ ८६ ॥ मत्वेदं शुद्धभावेन । कर्तव्यं जिनपूजनं ॥ ततः पूर्णविधानेन । विशुद्धं चैत्यवंदनं ॥ ८७ ॥ परमेष्ठिनमस्कारो । ध्यातव्यस्तदनंतरं ॥ एकसंध्यं द्विसंध्यं वा । त्रिसंध्यं वा विधानतः ॥ ८८ ॥ अष्टावष्टाधिकं वापि । शतं वारान् जपेदमुं ॥ एकचित्तेन भावेन । प्रत्यहं विजनस्थितः ॥ ८९ ॥ ॐनमोऽर्हत इत्यादि । स्वाहांतं पदमुच्चरन् ॥ मुंचन् पदे पदे पुष्पं । सर्वदुःखैर्विमुच्यते ॥ ९० ॥ अंगानंगप्रविष्टं हि । श्रुतं व्याप्य व्यवस्थितः ॥ एष एव महातत्वं । कथितस्तत्ववेदिभिः ॥ ९१ ॥ शेषश्रुतं परित्यज्य । मरणे समुपस्थिते ॥ एष एव बुधैर्ध्येयः । कर्मनिर्मूलनाकृते ॥ ९२ ॥ यदि भक्तिर्नमस्कारे । शक्तिः संसारलंघने ॥ अभक्तिश्चेन्नमस्कारे । न शक्तिर्भवलंघने ॥ ९३ ॥ ऐहिकानि फलान्यस्य । प्रसिद्धानि पदे पदे ॥ कियंति तव कथ्यंते । जानाति यदि केवली ॥ ९४ ॥ किंचात्र ये महापापा । निर्भाग्याः पुरुषाधमाः ॥ न पठंते नमस्कारं । न चापि बहुमन्वते ॥ ९५ ॥ य एव भा-

विकल्याणाः । पुण्यभाजो नरोत्तमाः ॥ त एव हि नमस्कारं । पठंति विहितादरं ॥ ९६ ॥ किं भू-
रिभाषितेनात्र । राजंस्तत्वं निशामय ॥ नमस्कारे मनो यस्य । भवाब्धिस्तस्य गोष्पदं ॥ ९७ ॥
तदेतदस्य सामर्थ्यं । संक्षेपेण निदर्शितं ॥ विशेषेण पुनः कोऽस्य । गुणान् वर्णयितुं क्षमः ॥
॥ ९८ ॥ एतत् श्रुत्वा जनः सर्वो । जिनपूजाकृतादरः ॥ पंचमंगलपाठे च । प्रवृत्तो विधिपूर्वकं ॥
॥ ९९ ॥ अथ स्वकर्द्धितुष्टेन । रत्नचंद्रेण भूभुजा ॥ समयं प्राप्य संपृष्टा । दमघोषमुनीश्वराः ॥
॥ ३०० ॥ भगवन् किं मया पूर्व—जन्मन्यासेवितं शुभं ॥ येनेदृक्षा महाभोगा । भूपत्वे समुप-
स्थिताः ॥ १ ॥ अथोचुरवधिज्ञान—विज्ञातभवविस्तराः ॥ सजलांभोदनादेन । नर्तयंतो मयूरका-
न् ॥ २ ॥ प्रभवो दमघोषाख्याः । सर्वसत्वहितावहाः ॥ पुरे राजगृहे राज—न्नासीस्त्वं पुष्पशेखरः
॥ ३ ॥ मालाकारो महारंभः । स्वभावेनैव भद्रकः ॥ एकदा च समायातः । पुष्पाण्यादाय मंदिरे
॥ ४ ॥ जैने जनसमाकीर्णे । जातस्नात्रमहोत्सवं ॥ दृष्ट्वा जैनेश्वरं बिंबं । भक्तिरुल्लसिता तव ॥
॥५॥ युग्मं ॥ सुगंधपंचवर्णानां । पुष्पाणां भक्तियोगतः ॥ माला स्वयं समादाय । पूजितो जिन-
नायकः ॥ ६ ॥ संजाता परमा श्रद्धा । संसारः प्रतलीकृतः ॥ बद्धं परभवायुष्कं । भोगसारं तदा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वया ॥ ७ ॥ मृत्वा चेह समायातो । रत्नशेखरमंदिरे ॥ यत्पूजोपार्जितं पुण्य—मुदीर्णमिह तेऽधुना ॥ ८ ॥ इतो देवगतिं गत्वा । भूत्वा च नृपनंदनः ॥ विधाय निर्मलां दीक्षां । गंता त्वं शाश्वते पदे ॥ ९ ॥ श्रुत्वेदं रंजितो राजा । धर्मेऽत्यंतं स्थिरोऽभवत ॥ नत्वा सूरिं गतो गेहे । श्रावकत्वमपालयत् ॥ १० ॥ इति पुष्पपूजाकथानकं समाप्तं ॥ श्रीरस्तु ॥

पुष्पपूजाफलं प्रोक्तं । स्वर्गमोक्षप्रसाधकं ॥ सांप्रतं गंधपूजायाः । फलं शृणुत कथ्यते ॥ १ ॥ समस्ति सर्वदेशानां । सारभूतो महीतले ॥ बंगाजनपदो नाम्ना । पदं निःशेषसंपदां ॥ २ ॥ रत्नादिखनिनिर्भिर्यत्र । क्षरंतीभिर्वरं वसु ॥ जनर्द्धिहेतुभूताभि—र्यथार्था सा वसुंधरा ॥ ३ ॥ बंगाजनपदे तस्मिन् । नगरं रत्नसंचयं ॥ निवासः सर्वरत्नानां । रम्यं जनमनोहरं ॥ ४ ॥ रराज यत्सदाकालं । सदंतैर्मत्तवारणैः ॥ सद्गृहैश्च समुत्तुंगैः । सदंतैर्मत्तवारणैः ॥ ५ ॥ द्विरदेषु मदो यत्र । धातूनां सोपसर्गता ॥ निपातनं च शब्देषु । कुचेषु करपीडनं ॥ ६ ॥ द्विजिह्वता भुजंगेषु । परचिंता च योगिनां ॥ वनितोदरेषु तुच्छत्व—मोष्टेष्वधरसंभवः ॥ ७ ॥ बभूव तस्य देशस्य । नगरस्य च शासिता ॥ राजा सर्वजनानंदो । नाम्ना कनकसुंदरः ॥ ८ ॥ अचिंत्यशक्तिसंयुक्तो । गुरुतेजा म-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हात्मजः ॥ विक्रमाक्रांतनिःशेष—महीपालनतक्रमः ॥ ९ ॥ सद्वृत्तेन कुलं यस्य । यशोभिः शीलमुज्ज्वलं ॥ शरदभ्रनिभैः कांतै—र्गुणै रूपं च पप्रथे ॥ १० ॥ तस्याजनि जनी देव—पादपंकजभृंगिका ॥ निर्धौतस्वर्णवर्णाभा । रत्नमालेति विश्रुता ॥ ११ ॥ सर्वातिशायिशब्दादि—विषयास्वादनिष्ठयोः ॥ याति कालः सुखेनैव । निबिडस्नेहयोस्तयोः ॥ १२ ॥ अन्यदा सुंदराकारः । शुभस्वप्नेन सूचितः ॥ जातस्तयोर्जनानंदी । तनयो रत्नसुंदरः ॥ १३ ॥ द्वासप्ततिकलावेदी । संजातः स्वल्पवासरैः ॥ मृता माता कुमारस्य । पिता स्नेहेन पश्यति ॥ १४ ॥ सपत्न्यो मातरः सर्वाः । प्रतिकूलाः समत्सराः ॥ परिवारोऽप्युदासीनः । सर्वोऽपि कुमरंप्रति ॥ १५ ॥

अन्यदा देशपर्यंते । कनककेतुर्नृपिपः ॥ स्वर्णसुंदरनूपस्य । न सेवां प्रतिपद्यते ॥ १६ ॥ आज्ञाभंगे समुत्पन्ने । दूतवचनफूत्कृतः ॥ स्वर्णसुंदरनूपस्य । दिदीपे कोपपावकः ॥ १७ ॥ स चचाल महाद्वेषा—चतुरंगबलान्वितः ॥ गत्वा च तं विनिर्जित्य । वलितः सत्वरैः पदैः ॥ १८ ॥ कुमारोऽपि परानूति—दुःखदुःखितमानसः ॥ निशीथे नक्तमेकाकी । सखड्गोऽलक्षितो जनैः ॥१९॥ उत्तरायणसंक्रांतौ । मंदतेजाः शनैः शनैः ॥ सुवृत्तः कनकच्छायः । सवितेव चचाल सः ॥ २० ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

युग्मं ॥ निद्राभोगी गतस्नानो । रुक्षदेहो महीशयः ॥ यत्याचारधरो धीरः । परं नियमवर्जितः ॥
॥ २१ ॥ विधिरेवोन्नतिं नीत्वा । निपातयति देहिनं ॥ एकजन्मनि जीवानां । दर्शयति द्विजन्मतां
॥ २२ ॥ अन्यस्मिंश्च दिने सुप्तो । दृष्टोऽयं रत्नमालया ॥ वटस्याधो महाटव्या—मेकाकी रत्नसुंद-
रः ॥ २३ ॥ स्पृष्टः पादतले मात्रा । प्रबुद्धश्च ससंभ्रमः ॥ गाढं कंठग्रहं कृत्वा । मुक्तकंठं रुरोद सा
॥ २४ ॥ कथं पुत्र महाटव्या—मेकाकी त्वं समागतः ॥ वृत्तांतः कथितस्तेन । पराभूतिसमुद्भवः
॥ २५ ॥ भोजितो भोजनं भव्यं । पायितो निर्मलं जलं ॥ विलिप्ताशेषगात्रश्च । चंदनेन सुगंधि-
ना ॥ २६ ॥ कर्पूरपूरसन्मिश्रो । दत्तस्तांबूलबीटकः ॥ स्वस्थावस्थः सुखासीनः । कुमारः स्वस्थचेत-
नः ॥ २७ ॥ पप्रच्छ कुशलं मातुः । कुतस्तेऽत्र समागमः ॥ प्रोवाच वत्स जाताहं । मृत्वा नाम्ना सु-
लोचना ॥ २८ ॥ यक्षिणी जगति ख्याता । क्रीडंतीह समागता ॥ भवद्दर्शनसंभ्रांता । संप्राप्ता च
तवांतिकं ॥ २९ ॥ युग्मं ॥ स नीतश्च तया तूर्णं । विधाय करकुड्मत्रे ॥ पुरे पुरिमतालाख्ये ।
उत्तराशाशिरोमणौ ॥ ३० ॥ निधानानि समस्तानि । करस्थानीव पश्यति ॥ अनेनांजितनेत्रो हि
। पुरुषो मेदिनीतले ॥ ३१ ॥ तदिदं दृष्टसामर्थ्यं । करस्थं कुरु पुत्रक ॥ भूयोऽपि व्यसने वत्स ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मर्तव्याहं विशेषतः ॥ ३२ ॥ युग्मं ॥

इत्युक्त्वा सा गता देवी । निजस्थानं सुलोचना ॥ दूरादेव कुमारेण । दृष्टमेकं सरोवरं ॥ ॥ ३३ ॥ गत्वा तत्रांजिते नेत्रे । भ्रांतः पाद्यां समंततः ॥ दृष्टानि च निधानानि । संजातो हृदि निश्चयः ॥ ३४ ॥ ततश्च तत्सरो दृष्टं । पद्मखंमविराजितं ॥ स्फटिकाकाशशुभ्राभिः । शिलाभिर्बद्ध-भित्तिकं ॥ ३५ ॥ नानारत्नशिलासार्थां—चितसोपानपंक्तिकं ॥ कलकूजितविभ्रांत—शकुंतगण-संकुलं ॥ ३६ ॥ शुभ्रादभ्रपयःपूर्णं । कल्लोलालिविराजितं ॥ घनपल्लवसच्छायं । लतामंडपमंभितं ॥ ॥ ३७ ॥ त्रिभिर्विशेषकं ॥ प्रविश्यांतःकृतस्नानो । लोचनक्षालितांजनः ॥ पयः पीत्वा समुत्तीर्णः । स्वर्णसुंदरनंदनः ॥ ३८ ॥ सरोवरसमासन्ने । उद्याने गुणसुंदरे ॥ शिष्यसंघसमायुक्ताः । सूरयो म-तिसागराः ॥ ३९ ॥ सागरादपि गंभीरा । मेरोरपि गरीयसः ॥ पूर्णाः परमरूपेण । द्वेपयंतो रुचा विधुं ॥ ४० ॥ नानातिशयसंपन्नाः । सर्वसत्वहितावहाः ॥ धर्मध्यानसमारूढा । रागद्वेषविवर्जिताः ॥ ॥ ४१ ॥ त्यक्तत्रिदंडसंचाराः । कषायकषणोद्यताः ॥ ज्ञानदर्शनचारित्र—रत्नत्रयविराजिताः ॥४२॥ हृषीकाणां विजेतारो । जीवानां जननीसमाः ॥ भयस्थानैर्विनिर्मुक्ता । मदाष्टकविवर्जिताः ॥ ४३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राशुके विपुले शुद्धे । भूतले जंतुवर्जिते ॥ उपविष्टास्तनुभाया—भासिताखिलदिङ्मुखाः ॥ ४४॥ सितवस्त्राः स्वदंतांशु—शुभ्रिताखिलदिङ्मुखाः ॥ साधुसमूहमध्यस्था । मध्यस्थाः सोममूर्तयः ॥ ॥ ४५ ॥ सजलमेघनादेन । कुर्वाणा धर्मदेशनां ॥ भव्यपद्मप्रबंधानां । बोधने नवभास्कराः ॥ ॥ ४६ ॥ अष्टभिः कुलकं ॥ प्रणिपत्य कुमारेण । पृष्टा धर्मं मुनीश्वराः ॥ ततस्ते वक्तुमारब्धाः । परोपकृतिचंचवः ॥ ४७ ॥ अहिंसैव परो हेतु—र्धर्मस्योक्तो जिनेश्वरैः ॥ शेषस्तु परिवारोऽस्य । सत्यवादादिरिष्यते ॥ ४८ ॥ यां यां जीवाः प्रपद्यंते । गतिं कर्मवशानुगाः ॥ तत्र तत्र प्रकुर्वंति । रतिं हिंसानिबंधने ॥ ४९ ॥ यद्येको वसुधां दद्या—दन्यो दद्याच्च जीवितं ॥ विहाय वसुधां भीतो । जीवो गृह्णाति जीवितं ॥ ५० ॥ किमत्र बहुनोक्तेन । स्वसंवेद्यमिदं नृणां ॥ यथा स्वं जीवितं कांतं । सर्वेषां प्राणिनां तथा ॥ ५१ ॥ तस्मादेवंविधं मूढा । जीवितं ये शरीरिणां ॥ हरंति रौद्रकर्माणः । पापं किं किं न तैः कृतं ॥ ५२ ॥ जीवानां जीवितं हत्वा । कर्मभारगुरूकृताः ॥ पतंति नरके जीवा । अयःपिंडो यथा जले ॥ ५३ ॥ मधु श्रवंति ये वाचा । हृदये विषदारुणाः ॥ कायेन पापकर्माणि । कुर्वते ते नराधमाः ॥ ५४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शिष्टाचारविनिर्मुक्ता । यथाकामविचारिणः ॥ ते भ्रमंति दुरात्मान—स्तिर्यग्गर्भपरंपरां ॥५५॥
विषयेभ्यो जनाः सौख्यं । कीदृशं नाम जायते ॥ यत्र प्रत्युत दुःखाना—मुपर्युपरि संततिः ॥५६॥
किंपाकफलकल्पेभ्यो । विषयेभ्यः पराङ्मुखाः ॥ ये नरास्तान्नमस्यामि । त्रिसंध्यं शुद्धचेतसा ॥
॥ ५७ ॥ हा कष्टं वंचितो लोको । दीर्घकालं विसंस्थुलैः ॥ विषयैर्विषमासंगै—र्विषवन्मारणात्मकैः
॥ ५८ ॥ स्वर्गेऽपि मोहिताः संतो । हिताहितपराङ्मुखाः ॥ च्युत्वा गर्भगृहे भूयो । विण्मूत्रकृत-
लेपने ॥ ५९ ॥ वसंत्यतीवबीभत्से । दुर्गंधेऽत्यंतदुस्सहे ॥ चर्मजालकसंछन्नाः । पित्तश्लेष्मादिमध्य-
गाः ॥ ६० ॥ जनन्याहारनिष्पंदं । लिहंतो नाभिकाच्युतं ॥ पिंडीकृतसमस्तांगा । दुःखसंभारपीडि-
ताः ॥ ६१ ॥ त्रिभिर्विशेषकं ॥ गर्भाद्विनिर्गताः संतो । नियमाचारवर्जिताः ॥ जीवघातरता धर्मे ।
विषीदंति पदे पदे ॥ ६२ ॥ तथा चात्रानृतं वाक्यं । वर्जनीयं प्रयत्नतः ॥ हिंसायाः कारणं तद्धि
। सा च संसारकारणं ॥ ६३ ॥ स्तेयं च दूरतस्त्याज्यं । परस्त्री मातृसन्निभा ॥ इच्छापरिमाणं च
। कर्तव्यं सुविवेकिना ॥ ६४ ॥ उक्तं च भोजनत्यागः । सदाचारप्रवर्तनं ॥ मर्यादावर्तनं चैव । ध-
र्मोऽयं सिद्धिसाधनः ॥ ६५ ॥ श्रुत्वेदं सूरिसद्वाक्यं । संविग्नो रत्नसुंदरः ॥ पप्रछ प्रणतिं कृत्वा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्यतीतं भवमात्मनः ॥ ६६ ॥ चतुर्ज्ञानोपगूढात्मा । विनयेनोपसेदुषे ॥ रत्नसुंदरभूपाय । जगाद मतिसागरः ॥ ६७ ॥ कुमार शृणु संक्षेपा—त्पूर्वजन्मविचेष्टितं ॥ न हि निःकारणं कोऽपि । वेत्ति जंतुः सुखासुखं ॥ ६८ ॥

मगधेषु मागधग्रामे । माधवः कुलपुत्रकः ॥ भवानभवद्भार्या च । माधवी बद्धमुष्टिका ॥६९॥ मधुसूदननामा च । माधवस्य सहोदरः ॥ मधुसूदनी तद्भार्या । धर्मकर्मपरायणा ॥ ७० ॥ पापर्द्धौ च रतः प्रायः । स्वभावेनैव माधवः ॥ माधवी च महालोभा । न दत्ते कस्य किंचन ॥ ७१ ॥ एवं सरति संसारो । जीवघातरतस्य ते ॥ कटुकानि प्रजल्पंत्या । माधव्या भिक्षुकानपि ॥ ७२ ॥ अकुलीनेति वंध्येति । दुर्मुखेति च निंदिता ॥ सर्वभिक्षुकसार्थेन । कालं नयति माधवी ॥ ७३ ॥ अन्यदा च महाटव्यां । माधवो मृगयां गतः ॥ दृष्टैका हरिणी तेन । मृगशावसमन्विता ॥ ७४ ॥ गत्वातिवेगतो हस्ते । गृहीतो हरिणीसुतः ॥ भीतभीता मृगी नष्टा । पश्यंती पुत्रकं निजं ॥७५॥ बध्ध्वा वल्लीवितानेन । शावं तं लोललोचनं ॥ धावितो मृगयूथस्य । वधायाधिज्यकार्मुकः ॥७६॥ अथासौ दैवयोगेन । कंदमूलफलार्थिना ॥ अटवीमटता दृष्ट—स्तापसेन मृगीसुतः ॥ ७७ ॥ मो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चितो बंधनात्तेन । करुणाकृष्टचेतसा ॥ गत्वा च मिलितो मातु—र्मादते कांतकानने ॥ ७८ ॥
दूरं दूरतरं नीतो । मृगयूथेन माधवः ॥ सिंहनादं ततः श्रुत्वा । माधवेन पलायितं ॥ ७९ ॥ न-
श्यता तेन दृष्टा च । मृगी प्रसवधर्मिणी ॥ अपत्यस्नेहसंभार—तंतुसंदृब्धमानसा ॥ ८० ॥ इतश्चे-
तश्च निक्षिप्त—चलच्चकितलोचना ॥ लिहंती जिह्वया पुत्रान् । महामोहपरायणा ॥ ८१ ॥ युग्मं ॥
मृगश्च तत्समीपस्थः । कंडूययन्मृगीतनूं ॥ अहो कामस्य माहात्म्यं । पशूनामपि दुर्जयं ॥ ८२ ॥
वनात्तृणानि भक्ष्याणि । वनाच्च विमलं जलं ॥ मृगमृग्योस्तथाप्युच्चैः । प्रेमाजन्म निरंतरं ॥ ८३ ॥
सिंहनादभयं मुक्त्वा । पुनः संजातपौरुषः ॥ आकृष्टशरस्तरसा । धावितस्तज्जिघांसया ॥ ८४ ॥ ए-
कतो हरिणी नष्टा । ह्यन्यतो मृगपोतकाः ॥ मृगश्चाप्यन्यतो नष्टो । वियुक्तं तत्कुटुंबकं ॥ ८५ ॥
मृगस्य मार्गतो लग्नो । मारयामीति चिंतयन् ॥ धावमानोऽपतद्भूमौ । स्खलितो विषमस्थले ॥८६॥
लब्धांतरं कुरंगोऽपि । नश्यन्नुच्चैर्भयातुरः ॥ वटस्याधो मुनिं दृष्ट्वा । तत्समीपमुपागतः ॥ ८७ ॥
रक्ष रक्ष महाभाग । कुरु त्राणं दयानिधे ॥ इत्युक्त्वा च मृगो नत्वा । साधवे शरणं गतः ॥८८॥
माधवोऽपि समुत्थाय । लग्नः सारंगपृष्ठतः ॥ साधोः पादांतिकं प्राप्तः । साधुनैवं प्रजल्पितः ॥ ८९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परप्राणप्रहाणेन । निजप्राणप्रधारणं ॥ न तत्संतः प्रशंसंति । शरं संहर माधव ॥ ७० ॥ कोदंडं
त्रिगुणं कृत्वा । शरं संहृत्य सत्वरं ॥ नमस्कृत्य मुनेः पादौ । निषण्णः सोऽपि भूतले ॥ ७१ ॥ पृष्ट-
श्च स मुनिस्तेन । भाषते किमयं मृगः ॥ मुंचन्नश्रूणि शोकार्त्तः । साधुः प्राह निशामय ॥ ७२ ॥
त्यक्तं जन्मवनं तृणांकुरवती मातेव मुक्ता स्थली । विश्रंभस्थितिहेतवो न गणिता बंधूपमाः पाद-
पाः ॥ बालापत्यवियोगदुःखविधुरा मुक्ता मृगी वल्लभा । धावंतः पदवीं तथाप्यकरुणा व्याधा न मुं-
चंति मे ॥ ७३ ॥ मामेवं कथयत्येष । स्वदुःखं निजया गिरा ॥ यतो मातृसमः प्रोक्तः । साधुव-
र्गः शरीरिणां ॥ ७४ ॥ तवापि युज्यते नैव । कर्तुं कर्म सुनिर्घृणं ॥ परं मारयता येन । भवत्या-
त्मापि घातितः ॥ ७५ ॥ क्रियंते यानि कर्माणि । रागद्वेषविसंस्थुलैः ॥ तेषां फलविपाकं हि ।
जानाति यदि केवली ॥ ७६ ॥ यतः—हन्मीति जन्मजनितं सुकृतं निहंति । शस्त्रग्रहस्त्रिभवसंभव-
मेव धर्मं ॥ शस्त्राभिघातसमये शतजन्मजातं । सर्वं निहंति सुकृतं सति जीवघाते ॥ ७७ ॥ आ-
त्मैव घातितस्तेन । परं घ्नता न संशयः ॥ यतो हन्यादसौ हंता । लभते शतशो वधं ॥ ७८ ॥
शरासनं शराः सर्वे । माधवेन द्विधा कृताः ॥ श्रुत्वा धर्मं दयासारं । मुनिमुखाद्विनिर्गतं ॥ ७९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संसारांबुधिमग्नेन । यानपात्रसमो मया ॥ संप्राप्तस्त्वं च त्वास्येऽहं । पारं धर्मप्रभावतः ॥ १०० ॥
जीवघातान्निवृत्तोऽहं । यावज्जीवं तवाग्रतः ॥ निशि भक्तं सुरापानं । मांसमद्मि न सर्वदा ॥ १ ॥
भद्रकत्वं समापन्नो । देवभक्तिपरायणः ॥ गुरुपूजारतो नित्यं । कालं नयति माधवः ॥ २ ॥ अ-
न्यदा च समायातः । सुगंधपुटिको नरः ॥ प्रयोजनवशात्कोऽपि । गंधको माधवांतिकं ॥ ३ ॥ प्र-
दत्तो रूपकस्तस्मै । गंधान् जग्राह माधवः ॥ भावसारं स्वहस्तेन । तेन तैरर्चितो जिनः ॥ ४ ॥ पु-
ण्यानुबंधि यत्पुण्यं । गंधपूजां प्रकुर्वता ॥ निर्वर्तितं तदा काले । उदयस्तस्य सांप्रतं ॥ ५ ॥ ततो
दानरतो मृत्वा । मध्यमगुणयोगतः ॥ जातस्त्वं सुंदराकारः । स्वर्णसुंदरनंदनः ॥ ६ ॥ एतत् श्रुत्वा
कुमारोऽपि । रोमांचांचितविग्रहः ॥ सानंदः सूरिपादांते । श्रावकत्वं प्रपन्नवान् ॥ ७ ॥ सर्वज्ञो देव-
ता मह्यं । गुरवस्तु सुसाधवः ॥ सर्वज्ञोक्तो दयासारो । धर्मो धर्मधिया मम ॥ ८ ॥ अस्तं गते दि-
वानाथे । न करोमि भुजिक्रियां ॥ करोमि स्मरणेनापि । त्रिसंध्यं चैत्यवंदनं ॥ ९ ॥ सूरिणा भ-
णितं भद्र । प्रतिपत्तिर्न दुष्करा ॥ गृहीतपालना गुर्वी । सैव सर्वसुखावहा ॥ १० ॥ तत्र यत्ना प-
रा कार्या । सत्यवाचो महाधिया ॥ प्रतिपद्य ये न कुर्वंति । ते नूनमधमाधमाः ॥ ११ ॥ तथा त्वं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतलीभूत—चतुर्गतिगमागमः ॥ सर्वसौख्यखनिर्जातो । गंधपूजाप्रभावतः ॥ १२ ॥

अत्रैव नगरे राज्यं । भोगा जनमनोहराः ॥ पर्यंते निर्मला दीक्षा । ततस्ते सिद्धिसंगमः ॥ ॥ १३ ॥ वियोजितः सवित्र्या य—न्माधवेन सता त्वया ॥ कुरंगीतनयस्तेन । वियुक्तस्त्वं सहांबया ॥ १४ ॥ नित्यं धर्मेण वर्धस्व । किमन्यद् ब्रूमहे वयं ॥ वर्तमानेन योगेन । यास्यामोऽतो वयं प्रगे ॥ १५ ॥ विहृताः सूरयोऽन्यत्र । मुदितो रत्नसुंदरः ॥ सद्धर्मरत्नलाभेन । संतुष्टो निजमानसे ॥ १६ ॥ अन्यस्मिंश्च दिने नक्तं । भिक्षाकार्येण निर्गतः ॥ भ्रमन् गृहाद्गृहं चैष । संप्राप्तश्चैकमंदिरे ॥ १७ ॥ विशाले स्वल्पमानुष्ये । व्याधिगृहीतनायके ॥ पुष्पतांबूलकर्पूर—पूर्णसज्जितभाजने ॥ १८ ॥ युग्मं ॥ निर्गतैकाबला भिक्षा—मादाय करकुड्मले ॥ दत्ता तया गृहीता च । भणिता तेन सा यथा ॥ १९ ॥ करोमि भोजनं भद्रे । नयाम्यत्रैव शर्वरीं ॥ प्रभातेऽहं गमिष्यामि । यदि वः प्रतिभासते ॥ २० ॥ तयापि दर्शितं तस्य । शून्यमेकं कुटीरकं ॥ भुक्तः सुप्तश्च तत्रैव । शृणोत्येवंविधं वचः ॥ २१ ॥ पाहि पाहि पयः पापे । म्रियेऽहं तृषयाधुना ॥ ततस्तया विषं क्षिप्त्वा । स पयः पायितो रुषा ॥ २२ ॥ समागतो विटः कोऽपि । कृता प्रगुणता तया ॥ कियानपि

गतः कालो । विषयासक्तयोस्तयोः ॥ २३ ॥ विटेन भणिता किं न । गृहस्वामी प्रजल्पति ॥ सुखसंवेदनादद्य । लब्धनिद्रो भविष्यति ॥ २४ ॥ तेनोक्तं महतीवारः । पयःपानं न याचते ॥ ध्रुतिनिद्रापितो भद्र । सोऽपि चेतसि शंकितः ॥ २५ ॥ स्वल्पस्नेहो विषमश्च । कामक्रीडापरा मुखः ॥ तांबूलांतर्विषं दत्वा । तया सोऽपि निपातितः ॥ २६ ॥ कुटीरकात्समाहूया—नीतः कार्पटिकस्तया ॥ भणितश्च गृहाणेदं । मुखमूले कलेवरं ॥ २७ ॥ स्वयं च पादयोर्लग्ना । नीतं तद् गृहपृष्ठतः ॥ प्रक्षिप्तं विजले कूपे । व्यतीता जारसंकथा ॥ २८ ॥ कचवरेण चाछाद्य । समागत्य निजे गृहे ॥ सुप्ता निराकुला याव—त्ताम्रचूडेन वासितं ॥ २९ ॥ भूयोऽपि च समुछाय । गता तस्मिन् कुटीरके ॥ स्वप्रपंचाप्रकाशार्थं । सदर्प जल्पितं तया ॥ ३० ॥ मुहूर्तमेकमत्रैव । स्थेयं जिक्षाचर त्वया ॥ विसर्जितेन गंतव्यं । प्रपन्नं तेन तद्वचः ॥ ३१ ॥ मुक्तकेशा निरानंदा । दुःखसंभारभारिता ॥ सशोकेव कृताक्रंदा । सदुःखेव रुरोद सा ॥ ३२ ॥ मिलितो हेलया लोको । दृष्ट्वा तां दुःखदुःखितां ॥ रुदंतीं भर्तृनामानि । समुच्चार्य पुनः पुनः ॥ ३३ ॥ पृष्टा च तेन किं भद्रे । रोदितव्ये निबंधनं ॥ न ददाति वचस्तेषां । रुदत्येव हि केवलं ॥ ३४ ॥ हा नाथ दुःखितां मु·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्त्वा—ऽशरणां मां कृपास्पदां ॥ गछन्नपि न विज्ञातो । हृदयस्थोऽपि सर्वदा ॥ ३५ ॥ हा विधे ते कृपा नास्ति । किं कृतं मूढ वैशसं ॥ यत्प्रियोऽपहृतश्चित्ता—द्दृष्टिनाहं कुतोऽधुना ॥ ३६ ॥ किं गुणान् वर्णयाम्यस्य । किं सौभाग्यं मनोरमं ॥ किं रूपं किं मतिं त्यागं । किं भोगं विस्मयावहं ॥ ॥ ३७ ॥ मांसलौ परिघाकारौ । करौ कनककोमलौ ॥ मदंगसंगमं त्यक्त्वा । कथमेतौ करिष्यतः ॥ ३८ ॥ ज्वलज्ज्वालावलीसंगं । पश्यतां भयकारणं ॥ अहो कर्मवशाज्जीवै—र्जीवद्भिः किं न दृश्यते ॥ ३९ ॥ उद्वसितमिवाभाति । जनलक्षसमाकुलं ॥ कांतारसदृशं कांतं । पुरं नाथ त्वया विना ॥ ४० ॥ त्वया त्यक्तापि नो त्यक्षे । ध्रुवं तं चुंबकोपलं ॥ मम चित्तायसं यस्मा—त्त्वमाकर्षसि दूरतः ॥ ४१ ॥ नीतिरेषा जने रूढा । धर्मोऽयं मनुनेरितः ॥ मृतमप्यनुगछंति । भर्तारं कुलकन्यकाः ॥ ४२ ॥ एवंविधसमुल्लाप—संजातकरुणैर्जनैः ॥ भणितार्त्तिर्न कर्तव्या । यदेषैव भवस्थितिः ॥ ४३ ॥ एतत् श्रुत्वा जनोल्लापं । बहिर्दर्शितशोकया ॥ लोकानां रंजनाहेतो । रुदंत्या भणितं तया ॥ ४४ ॥ यदि मे स्वजना यूयं । सुहृदो वाथ वत्सलाः ॥ संपादयत सर्वेऽपि । मामकीनमिदं वचः ॥ ४५ ॥ कुरुतैकां चितां गुर्वीं । सारकाष्ठविनिर्मितां ॥ निर्वापयामि येनेदं । दुःखद-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ग्धं शरीरकं ॥ ४६ ॥ प्रविक्षामि शिरस्यस्य । दत्वा बाहूपधानकं ॥ परलोकगतस्यापि । जवाम्युत्संगशायिनी ॥ ४७ ॥ श्रुत्वेदं विस्मितो लोकः । शिरोधूननपूर्वकं ॥ अहो महासती धन्या । जगादेदं परस्परं ॥ ४८ ॥ पतिजक्तं गुणे सक्तं । शीलाजरणजूषितं ॥ एवंविधं कलत्रं हि । नाल्पपुण्यैरवाप्यते ॥ ४९ ॥ सा धृता बंधुजिर्गेहे । नीतं जर्तृकलेवरं ॥ विधाय तस्य संस्कारं । यथास्थानं गता जनाः ॥ ५० ॥ शोरेदमपि संदृष्टं । मदीयं वैशसं त्वया ॥ न कार्यः स्त्रीषु विश्वास । उपदेशोऽयमुत्तमः ॥ ५१ ॥ कुमारस्तत्तथा दृष्ट्वा । चिंतयामास मानसे ॥ पुस्तकानि पठंतोऽपि । स्त्रीचरित्रं न जानते ॥ ५२ ॥ प्रथमं मारितो जर्ता । पश्चाज्जारोऽपि घातितः ॥ ततोऽपि रंजितो लोकः । स्वयं जाता महासती ॥ ५३ ॥ अलब्धांतःप्रवेशाय । कूटकपटवेश्मने ॥ संसारतरुबीजाय । स्त्रीवृत्ताय नमोनमः ॥ ५४ ॥ सर्पिण्येव महाजीति—कारिण्या वक्रचर्यया ॥ यज्जीव्यते तदाश्चर्यं । समीपस्थितयानया ॥ ५५ ॥ अयशोजननावासो—ऽपकीर्तेः कुलमंदिरं ॥ दुर्गतौ गछतां पुंसां । समा सोपानपंक्तिका ॥ ५६ ॥ सर्वाभ्याख्यानशस्यानां । क्षेत्रं दुःकर्मणां खनिः ॥ सत्यशौचबहिर्भूता । महासाहसकारिणी ॥ ५७ ॥ युग्मं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लालिताः पालिताः पुत्राः । परपुत्रीप्रतारिताः ॥ तृणायापि न मन्यंते । मातरं पितरं गुरुं ॥
॥ ५८ ॥ बंधुभिश्चित्तविश्लेषं । कुर्वंति कारयंति च ॥ क्लेशं विनापि कार्येण । कष्टंकष्टाः खलु स्त्रियः
॥ ५९ ॥ अकंदराः स्त्रियो व्याघ्र्यो । विना भोज्यं विसूचिकाः ॥ संचरंत्यः स्वपादाभ्यां । नार्यो
ह्यार्यभयंकराः ॥ ६० ॥ श्रृंखलारहितो बंधो । मालिन्यं कर्दमं विना ॥ महासाहसशस्यानां । वनि-
तावनिसन्निभा ॥ ६१ ॥ यथैव राजहंसेन । भ्रमरेण समं तथा ॥ पद्मिनी कुरुते संगं । निर्विवे-
का हि योषितः ॥ ६२ ॥ कुलीनेति विशुद्धेति । स्त्रीविश्रंभो न संगतः ॥ यतोऽमला दीपशिखा ।
कुरुते मलिनं गृहं ॥ ६३ ॥ एवं खेदसमापन्नः । कुमारो रत्नसुंदरः ॥ यक्षागारं समायातो । बहु-
कार्पटिकाकुलं ॥ ६४ ॥ भुक्त्वोदनं पयः पीत्वा । निरारंभो निराकुलः ॥ वेदिकैकां समाक्रम्य । नि-
षण्णः क्षितिपांगजः ॥ ६५ ॥ नानादेशसमायाता । नानानेपथ्यधारिणः ॥ क्रोधिनो बहुरूपाश्च ।
नानाभाषाविचक्षणाः ॥ ६६ ॥ मदीयः सुंदरो देशो । मदीयः सुंदरो नृपः ॥ भव्यो भोज्यविधि-
स्तत्र । देशाचारोऽपि सुंदरः ॥ ६७ ॥ इत्यादि निष्फलं फल्गु । विवदंतः परस्परं ॥ दृष्टाः पृष्टाः कु-
मारेण । कौतुकाकुलचेतसा ॥ ६८ ॥ त्रिभिर्विशेषकं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भो भो भिक्षाचरा नूनं । नानादेशविचारिणः ॥ किं दृष्टं किंचिदाश्चर्यं । कुत्रापि जगतीतले ॥ ६९ ॥ एकेनोक्तं मया दृष्टो । ह्यटता चैकपत्तने ॥ एकाक्ष एकपादश्च । विहस्तो विकृताकृतिः ॥ ॥ ७० ॥ तृणाहारो नरः कोऽपि । स्थानासनविवर्जितः ॥ न पुमान्न पशुः पूर्णो । नृपशुः प्रथितो जने ॥ ७१ ॥ ततो विस्मयमापन्नो । लग्नोऽहं तस्य मार्गतः ॥ कर्तुं तस्योपचारं च । प्रयच्छामि तृणादिकं ॥ ७२ ॥ अन्यदा गतचिंतोऽसौ । नरपशुरभाषत ॥ किमर्थं क्रियते भद्र । मम सेवा त्वया वद ॥ ७३ ॥ विस्मयो मे महाभाग । तव वृत्तांतवेदने ॥ किं त्वमेवंविधो जातः । पश्चाद्वा केनचित्कृतः ॥ ७४ ॥ तेनाभाणि समस्त्यत्र । विप्रो विश्वंभराभिधः ॥ आहिताग्निश्चतुर्वेदी । तत्पुत्रोऽहं जनार्दनः ॥ ७५ ॥ समिधानयनायाथ । पित्राहं प्रेषितो वने ॥ गच्छन् गतो महाटव्यां । दिग्मोहेन च मोहितः ॥ ७६ ॥ तत्राश्रमपदं दृष्टं । नानावृक्षसमाकुलं ॥ विहंगविततारावं । मृगयूथनिषेवितं ॥ ७७ ॥ गतोऽहं तत्र च दृष्टा । सहकारतरोरधः ॥ कुरंगकेसरानाम्नी । तापसी नवयौवना ॥ ७८ ॥ संभ्रमादंसतः स्रस्तं । वल्कलं करपल्लवैः ॥ आनयंती निजस्थाने । मधुरं भणिता मया ॥ ७९ ॥ अहं ब्रह्मसुतो भद्रे । आहिताग्निर्जनार्दनः ॥ दिग्मोहादिहायातः । का त्वं कस्या

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यमाश्रमः ॥ ८० ॥ तस्या रूपं वयो वर्णं । विभ्रमं वीक्ष्य विस्मितः ॥ सर्वसीमंतिनीसीमा । वेधसे-
यं विनिर्मिता ॥ ८१ ॥ एतस्यां मन्मनो याति । धत्ते लज्जां कुलक्रमः ॥ एषापि सानुरागेव । ल-
क्ष्यते किं ममोचितं ॥ ८२ ॥ क्वेदं कर्म द्विजन्मनो मम हहा वैखानसी तापसी । रूपं रंजितलो-
कलोचनमहो चित्तस्य मे विक्रिया ॥ वेदार्थस्मृतिगोचराः क्व च गिरः क्वेयं मनोदुर्लभा । चेत-
श्चिंतनमेव ते यदि परं धन्यः करं धास्यति ॥ ८३ ॥ लज्जे दूरतरं याहि । गच्छ गच्छ कुलक्रम ॥
शौच व्रज त्वमन्यत्र । अकालोऽयं भवादृशां ॥ ८४ ॥ कुरंगकेसरा त्राण—मत्राणस्य ममाधुना ॥
ततो मया समारब्धा । तया सार्धं रतक्रिया ॥ ८५ ॥ अत्रांतरे समायातः । शृंगवैरो वनांतरात् ॥
एतद् दृष्ट्वातिरुष्टेन । शापो दत्तस्तपस्विना ॥ ८६ ॥ हस्तपादशिरोभिश्च । लोष्टकल्पेन हि त्वया ॥
भ्रमितव्यं महाटव्या—मेष ते पापनिग्रहः ॥ ८७ ॥ सादरं पादलग्नेन । क्षामितोऽसौ मया मुनिः ॥
शेषतापसलोकैश्च । दृष्टांतेन प्रबोधितः ॥ ८८ ॥ किं वराकः करोत्येष । सद्विवेकविवर्जितः ॥ श-
क्रादयोऽपि नो शक्ताः । कर्तुमिंद्रियनिग्रहं ॥ ८९ ॥ कार्याकार्यं न जानंति । जीवा मन्मथपीडि-
ताः ॥ अपदेऽपि प्रवर्तंते । यतोऽवाचि विचक्षणैः ॥ ९० ॥ किमु कुवलयनेत्राः संति नो नाक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नार्य—स्त्रिदशपतिरहल्यां तापसीं यत् सिषेवे ॥ हृदयतृणकुटीरे दीप्यमाने स्मराग्ना—वुचितमनु-
चितं वा वेत्ति कः पंडितोऽपि ॥ ७१ ॥ जराजीर्णः कायः श्रुतिविरहितं कर्णयुगलं । बलभ्रष्टा दृ-
ष्टिः पलितकलितं मस्तकमिदं ॥ तथाप्युच्चैर्बाणान् किरति सततं कामहतको । हहा कष्टं कष्टं कथ-
यत कथं मुक्तिरमुतः ॥ ७२ ॥ ततः किंचित्सतोषेण । शृंगवैरतपस्विना ॥ अर्धीकृत्य निजं शाप-
महमेवंविधः कृतः ॥ ७३ ॥ कुरंगकेसरा शप्ता । जाता नारी शिलामयी ॥ गौतमस्य पदे स्पृष्टे ।
पापे पापात्प्रमोक्ष्यसे ॥ ७४ ॥ यद् दृष्टं तन्मयादिष्ट—मन्यो ब्रूते मयापि च ॥ यद् दृष्टं तत शृ-
एवंतु । भवंतो विहितादराः ॥ ७५ ॥

उत्तरस्यां दिशि श्रेष्टं । समस्ति भुवि विश्रुतं ॥ पुरं पंचपुरं नाम । मेदिनीमुखमंमनं ॥७६॥
तत्र राजा महामल्लो । रणनिर्व्यूढसाहसः ॥ संपूर्णो भूरिकोशेन । चतुरंगबलान्वितः ॥ ७७ ॥ ते-
न धन्येन धर्माय । ज्ञानसत्रं प्रवर्तितं ॥ अध्यापको धृतस्तत्र । सविप्रश्छात्रपाठकः ॥ ७८ ॥ श-
तानि पंच छात्राणां । पेठुस्तत्र निरंतरं ॥ भोजनाछादनं तेषां । प्रदत्ते मेदिनीपतिः ॥ ७९ ॥ रा-
जपुत्रोऽपि पाठार्थं । गतस्तत्र सकौतुकः ॥ अध्यापककृतानुज्ञः । प्रारब्धः पठितुं कलाः ॥ २०० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथान्यस्मिन् दिने तस्य । पठतो गुरुसन्निधौ ॥ प्रछन्नैर्ज्ञायते तत्व—मिदं वाक्यमुपागतं ॥ १ ॥
गृहीतं तत्वबुध्ध्या च । तद्वाक्यं नृपसूनुना ॥ अध्यापककरस्तत्र । छात्राणां सर्वदाप्ययं ॥ २ ॥ श-
तानि पंच पूलाना—मानेतव्यानि बाह्यतः ॥ विचारो नैव कर्तव्यो । गुरुवाक्यमिदं यतः ॥ ३ ॥
अध्यापकगृहे नास्ति । छात्राः किंचिच्चतुष्पदं ॥ एतां चरति कश्चारिं । ब्रूत मे कौतुकं महत् ॥४॥
कुमारो भणितश्छात्रै—र्न वयं तद्विकारकाः ॥ त्वमिव परगेहेषु । किंत्वादिष्टविधायकाः ॥ ५ ॥ कु-
मारेणान्यदा रात्रौ । प्रछन्नेन निरीक्षितं ॥ अध्यापकजनी दृष्टा । गछंती गृहपृष्टतः ॥ ६ ॥ विधाय
करजापं सा । कृत्वा प्रश्रवणं भुवि ॥ तस्योपरि लुठित्वा च । जाता सपदि रासभी ॥ ७ ॥ द्रुत-
मेव तया सर्वे । भक्षितास्तृणपूलकाः ॥ भूयोऽपि सहजा जाता । कुमारेण विलोकिता ॥ ८ ॥
कथितं शेषछात्राणां । यथेयं नैव भद्रिका ॥ आत्मा प्रत्यहमेतस्या । रक्षणीयः प्रयत्नतः ॥ ९ ॥
विकाले तृणपूलांश्च । लातुं छात्राः समागताः ॥ अरण्यां लब्धलक्षत्वाद् । गृहीत्वा पुनरागताः ॥
॥ १० ॥ अनभिज्ञः कुमारस्तु । भ्रमन् प्राप्तो महाटवीं ॥ क्षुत्क्षामकुक्षिना दृष्टो । राक्षसेन दुरात्मना
॥ ११ ॥ भणितस्तेन रे पृष्टे । मामारोपय सत्वरं ॥ आरोपितः कुमारेण । पूर्वामनु चचाल सः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १२ ॥ महासरः समायातं । पुरतो गछतोस्तयोः ॥ कुमारः प्राह जो जद्र । सांप्रतं गम्यते कथं
॥ १३ ॥ तेनोक्तं जलमध्येन । गछ त्वं हि निराकुलः ॥ चित्ते जयं न कर्तव्यं । जानुदघ्नं जलं
यतः ॥ १४ ॥ कुमारो गंतुमारब्धः । प्रोवाचेदं निशाचरः ॥ पुरतो दृश्यते गर्ता । वामतो याहि
किंचन ॥ १५ ॥ स्तोकांतरं गते जूयो । जजल्प निशिसंचरः ॥ पंकश्च कंटकाश्चाग्रे । दक्षिणेनाथ
गम्यतां ॥ १६ ॥ शनैः शनैः समुत्तीर्य । सरसः स्थलमागतौ ॥ लग्नश्च हेलया गंतुं । कुमारो जी-
तमानसः ॥ १७ ॥ रक्षःपादतलं दृष्ट्वा । नवनीतादपि कोमलं ॥ पृष्टोऽसौ च कुमारेण । कथं ते
पादयोस्तलं ॥ १८ ॥ सुखस्पर्शं मनोहारि । हृद्यं कमलकोमलं ॥ स प्राह क्षालनं कृत्वा । याव-
न्नोपरतं जलं ॥ १९ ॥ तावद्भूमौ न मुंचामि । ममैष दृढनिश्चयः ॥ पुनः पृष्टः कुमारेण । राक्षसो
हृष्टचेतसा ॥ २० ॥ त्रिजिर्विशेषकं ॥ गर्तादिकं विजानाति । जलमध्ये कथं जवान् ॥ तेनोक्तं
न हि गछामि । भास्कराजिमुखं सदा ॥ २१ ॥ एवं क्रमेण गछंतौ । प्रश्नोत्तरपुरस्सरं ॥ शतशाखं
महाकायं । वटमेकमुपागतौ ॥ २२ ॥ उत्तीर्णः पृष्ठतो रक्षः । कृतं चरणधावनं ॥ प्राचींप्रति कुमा-
रोऽपि । प्रणष्टः सत्वरैः पदैः ॥ २३ ॥ राक्षसः क्रमशः पादौ । क्षालयित्वा जले गते ॥ धावितः प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्चिमैः पादैः—दृष्टिं रक्षन् दिवाकरात् ॥ २४ ॥ कुमारोऽपि गतो दूरं । प्रविष्टः शून्यपत्तने ॥ तत्रापि
च मठे शून्ये । संप्राप्तश्च निशाचरः ॥ २५ ॥ रक्षसोक्तं समागच्छ । नागच्छामि तवांतिकं ॥ यद्यर्थी
च तदागच्छ । त्वमेव हि ममांतिकं ॥ २६ ॥ तेनोक्तं च न शक्नोमि । समागंतुं तवांतिकं ॥ कि-
मर्थं कथितं तेन । रहस्यं रक्षसापि च ॥ २७ ॥ येयं बत्नानके व्यक्ता । करोटी दृश्यते त्वया ॥
योगिनो मंत्रसिद्धस्य । सास्माकं दुरतिक्रमा ॥ २८ ॥ इदं तत्वं परिज्ञाय । गृहीता कुमरेण सा ॥
राक्षसाभिमुखं सोऽथ । गतो नष्टो निशाचरः ॥ २९ ॥ यैः पदैः स समायात—स्तैरेव चलितो
द्रुतं ॥ कृतांजलिर्जगादेदं । राजपुत्रं निशाचरः ॥ ३० ॥

सौभाग्यसुंदरं नाम । रत्नमेतत्करे कुरु ॥ अनेन कंठलग्नेन । स्त्रीप्रियस्त्वं भविष्यसि ॥३१॥
त्रयाणामपि सिंधूनां । सारभूता मनोहरा ॥ मुक्तावली त्वया ग्राह्या । मदनुग्रहकाम्यया ॥ ३२ ॥
प्रयोजने समुत्पन्ने । स्मर्तव्योऽहं सदा त्वया ॥ संकोचो नैव कर्तव्यो । यतोऽहं तव किंकरः ॥३३॥
शृण्वन्नित्यादिवृत्तांतान् । कार्पटिकैः प्रजल्पितान् ॥ नीत्वा रात्रिं मठे तत्र । प्रगेऽसौ रत्नसुंदरः ॥
॥ ३४ ॥ सविस्मयस्ततः स्थानात् । पुरिमतालपुरे गतः ॥ अत्रांतरे मृतस्तत्र । निस्संतानो नरेश्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रः ॥ ३५ ॥ युग्मं ॥ अभिषिक्तानि दिव्यानि । मंत्रिभिर्मंडलेश्वरैः ॥ हयेन हेषितं तत्र । शब्दितं गंधहस्तिना ॥ ३६ ॥ अभिषेकः कृतो लक्ष्म्या । वीजिते चारुचामरे ॥ शिरस्यस्य स्थितं छत्रं । स्वत एव महीयसः ॥ ३७ ॥ युग्मं ॥ गंधवारणमारूढः । प्रविष्टो नगरे नृपः ॥ सिंहासने निषण्णस्य । मंत्रिभिर्मम्लेश्वरैः ॥ ३८ ॥ श्रेष्ठिभिः सार्थवाहैश्च । स्वीकृतं तस्य शासनं ॥ कृतेत्यखिलकर्तव्यो । विज्ञप्तो मंत्रिणा नृपः ॥ ३९ ॥ युग्मं ॥ यथा राज्यं तथा कन्यां । रत्नमालामिमां वरां ॥ स्वीकुरु लक्षणोपेतां । कांतकांचनसन्निभां ॥ ४० ॥ विमृश्य वेधसा चेयं । मन्ये युष्मत्कृते कृता ॥ इत्युक्तो नरनाथोऽसौ । कन्यां तां परिणीतवान् ॥ ४१ ॥ युग्मं ॥ एकातपत्रमत्रस्तः । पालयामास हेलया ॥ गुणानुरक्तनिःशेष—लोकमुध्धृतकंटकं ॥ ४२ ॥ संपूर्णभूरिभांडारं । चतुरंगबलान्वितं ॥ राज्यं भूमिपतिरेष । रत्नसुंदरसंज्ञकः ॥ ४३ ॥ महामल्लनरेंद्रस्य । मुक्तमालाभिधा सुता ॥ स्वयंवरा समायाता । मुदा तेन विवाहिता ॥ ४४ ॥ नानाविधनिधानानि । दूरं पश्यति पार्थिवः ॥ दिव्यांजनप्रभावेण । पूर्वपुण्यानुयोगतः ॥ ४५ ॥ नानापुराकरग्राम—पत्तनेषु समंततः ॥ मंदिरैर्मंदराकारै—र्मंमिता तेन मेदिनी ॥ ४६ ॥ कारिताश्च जिनेंद्राणां । तदंतः प्रतिमाः पराः ॥ तत्प्रयत्नी·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वीद्रव्यार्थं । ग्रामारामादि चिंतितं ॥ ४७ ॥ कल्याणकानि यात्राश्च । रथनिष्क्रमणादिकं ॥ साधु-
साधर्मिकाणां च । सत्कारं कुर्वता सदा ॥ ४८ ॥ प्रभावना कृता गुर्वी । शासनस्याखिले जने ॥
सम्यक्त्वं निर्मलं जातं । सिद्धिः करतले कृता ॥ ४९ ॥ युग्मं ॥ चत्वारोऽस्य सुता जाता । जात-
रूपसमप्रभाः ॥ भुक्ता निरुपमा भोगा । मानुष्यं सफलीकृतं ॥ ५० ॥ विहरंतः समायाताः । सूर-
यः श्रुतसागराः ॥ शांतिसागरसूरीणां । शिष्याः सर्वत्र विश्रुताः ॥ ५१ ॥ लतासुंदरउद्याने । स्थि-
ताः साधुजनोचिते ॥ प्राशुके वसुधादेशे । त्रसजीवविवर्जिते ॥ ५२ ॥ रत्नसुंदरभूपालो । वंदना-
र्थं समागतः ॥ वंदित्वा विधिना सूरिं । निषण्णो धरणीतले ॥ ५३ ॥ गंभीरमेघनादेन । प्रारब्धा
धर्मदेशना ॥ संवेगजननी हृद्या । भवनिर्वेदकारिणी ॥ ५४ ॥ श्रुत्वा च देशनां राजा । ह्यभिषि-
च्य निजे पदे ॥ रत्नशेखरनामानं । रत्नमालातनूद्भवं ॥ ५५ ॥ विस्मापयन् जनं सर्वं । त्यागभो-
गादिभिर्गुणैः ॥ श्रुतसागरसूरीणां । समीपं प्राप्य भूपतिः ॥ ५६ ॥ तृणवच्च परित्यज्य । वस्त्राभर-
णभूषणं ॥ मुदा जग्राह प्रव्रज्यां । सर्वकर्मनिषूदनीं ॥ ५७ ॥ त्रिभिर्विशेषकं ॥ स्वीकृतोऽभिग्रह-
स्तेन । कर्मनिर्मूलनाकृते ॥ आजन्म हि मया षष्ठा—द्भोक्तव्यं कारणं विना ॥ ५८ ॥ तदपि नी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रसं रूक्षं । विरसं स्नेहवर्जितं ॥ एषणादिविशुद्धं च । दोषमुक्तं समंततः ॥ ५९ ॥ युग्मं ॥ तस्थै-
वाथ गुरोः पार्श्वे । सदा संविग्नमानसः ॥ पठिताशेषसूत्रार्थो । गीतार्थो गुरुतालयः ॥ ६० ॥ मो-
क्षमार्गाहितस्वांतः । संप्राप्तपरमोदयः ॥ संयमैकरतो धीरः । सम्यग्दर्शननिर्मलः ॥ ६१ ॥ सम्यग्ज्ञा-
नातियुक्तात्मा । सम्यक्चारित्रतत्परः ॥ अनुप्रेक्षाभिरात्मानं । भावयन्ननिशं मुदा ॥ ६१ ॥ संयम-
स्योपकारासु । धर्मानुगुणभूमिषु ॥ मुनिभिर्विमलाचारैः । सहितासु निरंतरं ॥ ६२ ॥ विहरन् सर्व-
जीवानां । दयावांश्च पिता यथा ॥ बाह्येन च सदांतःस्थं । वर्धयन् संततं तपः ॥ ६३ ॥ आवासतां
महर्द्धीनां । परिप्राप्तः प्रशांतधीः ॥ दमश्रिया परिष्वक्तः । परिशुद्धसुदर्शनः ॥ ६४ ॥ उच्चैरुच्चैर्गु-
णस्थान—सोपानारोहणाहृतः ॥ सबाह्याभ्यंतरोदग्र—ग्रंथग्रंथिविवर्जितः ॥ ६५ ॥ श्रुतेन सकलं
पश्यन् । कृत्याकृत्यं महामुनिः ॥ महासंवरसंपन्नः । सातयन् कर्मसंहतिं ॥ ६६ ॥ प्राणधारणमात्रार्थं
। भुंजानः सूत्रदेशितं ॥ धर्मार्थं धारयन् प्राणान् । धर्मं मोक्षार्थमर्जयन् ॥ ६७ ॥ आनंदं भव्यलो-
कानां । कुर्वन्नुत्तमदर्शनः ॥ चरितेनोपमातीतो । यथोक्तश्च तपस्विनां ॥ ६८ ॥ चिरं विहृत्य मे-
दिन्यां । तपसा क्षीणविग्रहः ॥ गुरुणा समनुज्ञात—श्चकारानशनक्रियां ॥ ६९ ॥ कुलकं ॥ चतु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्धाहारसंहारां । देहसंहारहेतवे ॥ मासमानां महासत्वः । संनिषण्णः शिलातले ॥ ७० ॥ विधाया
राधनां वीरो । निर्धूयौदारिकां तनूं ॥ पंचमीं गतिमापन्नो । यत्र यांति निराश्रवाः ॥ ७१ ॥ मत्वेदं
सर्वदा सद्भिः । कार्यो धर्मे समुद्यमः ॥ सुलभाऽमलभा येन । मुक्तिरामा भवेत्करे ॥ ७२ ॥ यः
करोति जिनेंद्राणां । सद्गंधैः पादपूजनं ॥ लभते सर्वतो लक्ष्मीं । यथासौ रत्नसुंदरः ॥ ३७ ॥ इ-
ति गंधपूजाकथानकं समाप्तं ॥ श्रीरस्तु ॥

गंधपूजाफलं प्रोक्तं । स्वर्गमोक्षफलप्रदं ॥ भावसारस्य धूपस्य । फलं संप्रति भण्यते ॥ १ ॥
समस्ति भारते वर्षे । निवासः सर्वसंपदां ॥ साधुसाधर्मिकाकीर्णो । देशो देशशिरोमणिः ॥ २ ॥
काशीजनपदो नाम । पुरी तत्र मनोरमा ॥ वाणारसी जने रूढा । धनधान्यसमाकुला ॥ ३ ॥ त-
त्रारिमत्तमातंग—कुंभनिर्भेदकेसरी ॥ साहसांकसमः शूरो । नरेंद्रो नरवाहनः ॥ ४ ॥ तत्रास्ति शं-
खचूडाख्यो । विप्रो भार्या च दुर्गिला ॥ दुर्भगा दुर्मुखा दुष्टा । निर्दया बद्धमुष्टिका ॥ ५ ॥ वर्जि-
ता शंखचूडेन । दुर्गदौर्भाग्यपीडिता ॥ कामभोगपरित्यक्ता । कालं नयति दुःखिता ॥ ६ ॥ यु-
ग्मं ॥ शंखचूडलघुभ्राता । मधुसुंदरसंज्ञितः ॥ दानधर्मरता तस्य । गेहिनी मधुसुंदरी ॥ ७ ॥ एवं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरति संसारे । मासक्षपणपारणे ॥ तपस्वी तपसा क्षीणो । दुर्गिलागृहमागतः ॥ ८ ॥ दृष्ट्वा सा-
धुं सदाचार—मसदाचारया तया ॥ प्रयुक्तं कर्कशं वाक्यं । दुष्टं दुर्गतिकारणं ॥ ९ ॥ किं नास्ति
कोऽप्युपायस्ते । मुंड निर्वाहकारणं ॥ सुखाय चाश्रितो येन । ह्युपायः परपीडकः ॥ १० ॥ श्रुत्वै-
तत्साधुदेहस्थो । गुणग्राही महोदरः ॥ यक्षस्तां वक्तुमारेभे । रुष्टः कर्कशया गिरा ॥ ११ ॥ यदि
पापे न ते श्रद्धा । दातव्यं वा न विद्यते ॥ निषेधस्ते तदा श्रेया—न्नो कर्कशप्रजल्पितं ॥ १२ ॥
दौर्भाग्योपरि दौर्भाग्यं । दुर्गिले ते भविष्यति ॥ गंडांतःस्फोटिकातुल्यं । दुर्गतिं च गमिष्यति ॥
॥ १३ ॥ एवमुक्त्वा गतः साधु—र्द्वितीयक्षपणे स्थितः ॥ भिक्षामटति नान्यत्र । विमुच्य प्रथमं गृ-
हं ॥ १४ ॥ साप्युत्कटमहामोह—वेदोदयविवर्तिनी ॥ येन तेन समासक्ता । परं सर्वेण वर्जिता ॥
॥ १५ ॥ न शीलं यमहीनत्वा—न्न कामा दुर्भगत्वतः ॥ न धर्मो वासनासाध्यः । स च तस्या न
विद्यते ॥ १६ ॥ अन्यदा मिलितः कोऽपि । दुर्भगः कुलपुत्रकः ॥ तेनापि दूरतस्त्यक्ता । दौर्भा-
ग्यप्रचुरत्वतः ॥ १७ ॥

अन्यदा च मृतो भर्ता । जाता रंडा निरर्गला ॥ शिक्षिता मधुसुंदर्या । ततो जज्ञे समत्सरा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १८ ॥ रुष्टया च विषं दत्वा । मारिता मधुसुंदरी ॥ जणितश्च सशृंगारं । तद्भर्ता मधुसुंदरः ॥
॥ १९ ॥ अमृतेनेव सिच्येते । नेत्रे दृष्टे त्वयि मम ॥ प्रतिपद्यस्व मां जार्यां । सफलां कुरु याच-
नां ॥ २० ॥ श्रुत्वेदं स्तंजिते तस्य । श्रोतसी कंपितं शिरः ॥ सोऽवग्नूयो न वक्तव्यं । त्वयेदृक् मम
ममाग्रतः ॥ २१ ॥ ततो वैलक्ष्यमापन्ना । विदित्वा तस्य निश्चयं ॥ आत्मानमवटे क्षिप्त्वा । मृता
सा दुर्गतिं गता ॥ २२ ॥ निघ्नंति निजजर्तारं । स्वं पुत्रं मारयंति च ॥ आत्मानमपि निघ्नंति ।
जीवा विरतिवर्जिताः ॥ २३ ॥ शंखचूडस्य जीवोऽपि । मध्यमगुणयोगतः ॥ मृत्वा वणिक्सुतो जा-
तः । शुद्धबुद्धिर्गुणाश्रयः ॥ २४ ॥ रत्नचंद्रकृताजिख्यः । सदाचारपरायणः ॥ सद्बुद्धिश्च गुणाधारो
। धार्मिको धर्मव्रतप्रियः ॥ २५ ॥ दुर्गिलापि शुनीजावा—दुध्धृत्याजनि पुत्रिका ॥ वणिजो वसुद-
त्तस्य । नाम तस्या वसुंधरा ॥ २६ ॥ गृहीता रत्नचंद्रेण । कथंचिद्दैवयोगतः ॥ अहो धातुरकौश-
ल्यं । विषममृते योजितं ॥ २७ ॥ दौर्जाग्यं पृष्टतो लग्नं । समायातं पुराकृतं ॥ अहो पृष्टिं न मुं-
चंति । कृतकर्माणि देहिनां ॥ २८ ॥ दृष्टा दहति नेत्राणि । स्पृष्टा करतलद्वयं ॥ जुक्ता दहति स-
र्वांगं । सुखदा दूरतः स्थिता ॥ २९ ॥ दुर्गृहावासदुःखेन । दग्धदेहस्य सर्वदा ॥ वणिजो रत्नचंद्र-

स्य । वव्रजुर्नूरिवासराः ॥ ३० ॥ गृहाणि कुकलत्रेण । दुःपुत्रेण कुलानि च ॥ धनं कुव्यवहारेण । नूनं नश्यति देहिनां ॥ ३१ ॥ कृणवंचनया वर्षं । दिनं भुक्ते कुभोजने ॥ कुभार्यया हतं जन्म । हतो राजा कुमंत्रिभिः ॥ ३२ ॥ फलपुष्पकृते गेहा—न्निर्गतो नष्टमानसः ॥ दृष्टाश्च पुरलोकानां । कुर्वंतो धर्मदेशनां ॥ ३३ ॥ परोपकरणे निष्ठाः । करुणामृतसागराः ॥ गुणरत्नधरा धीरा । दमसारमुनीश्वराः ॥ ३४ ॥ युग्मं ॥ यथा जीवाः प्रबुध्यंते । विमुच्यंते च कर्मभिः ॥ संक्लिश्यंते यथा चैते । नरकं याति यथा तथा ॥ ३५ ॥ रत्नचंद्रोऽपि वंदित्वा । निषण्णः शुद्धभूतले ॥ धर्मं श्रोतुं समारब्धो । दुःखदुःखितमानसः ॥ ३६ ॥ यथा जिनाग्रतो धूपं । कर्पूरागुरुमिश्रितं ॥ भावतो यो दहत्युच्चै—स्तस्य श्रीः सर्वतोमुखी ॥ ३७ ॥ इत्यादिकथिते धर्मे । सूरिणातिप्रबंधतः ॥ तेनावसरमासाद्य । सूरिं नत्वा च भावतः ॥ ३८ ॥ प्रपन्नो रत्नचंद्रेण । सर्वज्ञो हृदि देवता ॥ सर्वज्ञभणितो धर्मो । गुरवस्तु सुसाधवः ॥ ३९ ॥ विरती रात्रिभोज्यस्य । मधुमद्यनिवर्तनं ॥ नवनीतस्य मांसस्य । मैथुनस्य विवर्जनं ॥ ४० ॥ दमसारं गुरुं नत्वा । रत्नचंद्रो निजे गृहे ॥ गतः करोति यत्नेन । प्रपन्नगुणपालनं ॥ ४१ ॥ ब्रह्मचर्यव्रतं श्रुत्वा । चुकोपास्मै वसुंधरा ॥ निभालयति छिद्रा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णि । पापा मारणहेतवे ॥ ४२ ॥ अन्यदा मिलिता तस्या । वत्साख्या परिव्राजिका ॥ सन्मान्य सा ततोऽयाचि । तथा चूर्णं क्षयंकरं ॥ ४३ ॥ वत्सयापि च तद्दत्त—मुपचारगृहीतया ॥ ततो वत्सा महापापा । साशंका स्वमठे गता ॥ ४४ ॥ वसुंधरापि तन्मिश्र्य । भोजनेन दिने दिने ॥ ददाति रत्नचंद्रस्य । चूर्णं मारणहेतवे ॥ ४५ ॥ कालेन गछता जातः । क्षीणांगश्चूर्णदोषतः ॥ न शक्नोति समुछातुं । तत एवमचिंतयत ॥ ४६ ॥ को गुणोऽनेन देहेन । निर्गुणेनाहतेन मे ॥ चतुर्भेदस्य संहार—माहारस्य करोम्यहं ॥ ४७ ॥ विचिंत्यैवं ततो धर्मे । धनं दत्वा यथोचितं ॥ पूजयित्वा जिनाधीशं । सुगंधकुसुमादिभिः ॥ ४८ ॥ कर्पूरागुरुसन्मिश्रं । धूपं दग्ध्वा तदग्रतः ॥ रोमांचांचितसर्वांगो । बध्ध्वायुष्कं सुरेष्वयं ॥ ४९ ॥ विधायानशनं मृत्वा । देवभूयं गतिं गतः ॥ सौधर्मे देवसौख्यानि । भुक्त्वा चायुःक्षये च्युतः ॥ ५० ॥ त्रिभिर्विशेषकं ॥

बंगाजनपदे रम्य—रंगशालामहापुरि ॥ राजलक्षणसंपन्नो । राजा च रणकेसरी ॥ ५१ ॥ नरकांता प्रिया तस्य । सर्वदापि मनःप्रिया ॥ रणकेसरिभूपस्य । सर्वकार्येषु संमता ॥ ५२ ॥ तस्याः कुक्षौ समुत्पन्नः । शुभस्वप्नेन सूचितः ॥ समये स्थापितं नाम । पुत्रस्य नरकेसरी ॥ ५३ ॥ समये

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

चाप्रयत्नेन । ग्राहितः सकलाः कलाः ॥ यौवने च समारूढो । व्यूढोरस्को महाभुजः ॥ ५४ ॥ प्र-
जाऽवनकृते धात्रा । निर्मितः सारपुद्गलैः ॥ क्षात्रो धर्म इवाभाति । सुंदराकृतिविग्रहः ॥ ५५ ॥ म-
लयसुंदराभिख्यो । वयस्योऽस्य सतां वरः ॥ हृदयमिव कुमारस्य । द्वितीयं वेधसा कृतं ॥ ५६ ॥ हे-
मपुरादथायातो । मेघनादो नृपांगजः ॥ धृतो दिनानि तत्रैव । कियंति नरकांतया ॥ ५७ ॥ प्र-
णम्य भणिता तेन । नरकांता कृतादरं ॥ मातर्मातुलसंदिष्टं । कथयामि तवाग्रतः ॥ ५८ ॥ मातु-
लेन समादिष्टं । कुमारेण ममांतिके ॥ दिनानि कतिचिन्नून—मागंतव्यं यथा तथा ॥ ५९ ॥
अदर्शने दृढं प्रेम । नश्यत्येव शरीरिणां ॥ कालेन गछता वत्स । यथा हस्तपुटाज्जलं ॥ ६० ॥ भ-
णितो मातृपितृभ्यां । भवंतं मातुलो दृढं ॥ समाह्वयति तद्वत्स । विलंबं गछ मा कुरु ॥ ६१ ॥ म-
लयसुंदराढ्येन । मेघनादेन संयुतः ॥ प्रधानं रथमारुह्य । गतो हेमपुरंप्रति ॥ ६२ ॥ कतिभिश्च
दिनैस्तत्र । संप्राप्तो हेमपत्तने ॥ हेमसुंदरभूपेन । सानंदमवलोकितः ॥ ६३ ॥ तत्रैव तिष्टतस्तस्य ।
बहुमानपुरस्सरं ॥ नानाविधविनोदेन । क्रीडतो यांति वासराः ॥ ६४ ॥ अन्यदा च महीपीठे । म-
धुर्मन्मथबांधवः ॥ जनितानेकधानंदो । जजृंभे जगतीतले ॥ ६५ ॥ मधुचंद्रसखः कामः । कदर्थि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तजगतत्रयः ॥ तेजो बहुतरं प्राप । हविषेव हुताशनः ॥ ६६ ॥ केवलोऽपि बली कामो । दुर्जयः सर्वदेहिनां ॥ किं पुनर्जनितोन्मादो । मधुचंद्रकृतसन्निधिः ॥ ६७ ॥ चलद्भिः पल्लवैर्यत्र । मलयानिलकंपितैः ॥ मधुराजागमे तुष्टा । नृत्यंतीव महीरुहाः ॥ ६८ ॥ गंधलुब्धालिशब्देन । वृक्षकक्षेषु सर्पता ॥ संगीतमिव कुर्वंति । तरवो मुदिताशयाः ॥ ६९ ॥ कोकिलानां निनादेन । स्त्रीमानग्रंथिभेदिना ॥ सितकुसुमैर्हसंतीव । वसंते वनराजयः ॥ ७० ॥ पुष्पकालेऽपि वक्रत्वं । श्यामत्वं यत्र का भवेत् ॥ फलाशा किंशुकस्तेन । मुक्तः पत्रैरनागतं ॥ ७१ ॥ पुष्पितान् फलितान् दृष्ट्वा । सर्वतोऽपि वनस्पतीन् ॥ संजाता इति कालास्या । दुर्जना इव किंशुकाः ॥ ७२ ॥ किंशुकं पुष्पितं दृष्ट्वा । देशांतरगतैरपि ॥ स्मर्यंते वल्लभाश्चित्ते । नवरंगविराजिताः ॥ ७३ ॥ निर्झरांजसि मग्नाभिः । शाखाभिर्यत्र शाखिनः ॥ जलांजलिं प्रयच्छंति । पथिकानां गतायुषां ॥ ७४ ॥ किंशुकैर्नवरंगाढ्यै—र्मर्दनफलहस्तका ॥ वसंतललना यत्र । रेजे नववधूरिव ॥ ७५ ॥ कोमलैर्गीतवादित्रै—र्मज्जनैश्च मनोहरैः ॥ स्वच्छचंदनवस्त्रैश्च । शृंगारैर्वरयोषितां ॥ ७६ ॥ कलकोकिलनादेन । दोलांदोलेन लीलया ॥ जलयंत्रैर्विचित्रैश्च । देवालयमहोत्सवैः ॥ ७७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पाम्लागंधमाघ्राय । श्रुत्वा कोकिलकूजितं ॥ कांतैकशरणो यत्र । क्रियते कामिनीजनः ॥ ॥ ७७ ॥ रम्यहर्म्यतलस्थेन । कुमारेण विलोकितः ॥ विनिर्यन्न राजमार्गेण । सुनेपथ्योऽबलाजनः ॥ ७९ ॥ मेघनादः कुमारेण । पृष्टः कोऽयं महोत्सवः ॥ येनैष पिंडितो याति । स्त्रीजनो मम कथ्यतां ॥ ८० ॥ तेनाजाणि कुमाराग्र । कामदेवमहोत्सवः ॥ वर्तते सर्वलोकानां । मनःक्षोभविधायकः ॥ ८१ ॥ तत्रायं स्त्रीजनः सर्वो । वस्त्राभरणभूषितः ॥ गृहीतपुष्पधूपादिः । कामाराधनहेतवे ॥ ८२ ॥ चलितो गम्यते तत्र । यदि तेऽस्ति कुतूहलं ॥ प्रतिपन्नं कुमारेण । गतास्तत्र त्रयोऽपि ते ॥ ८३ ॥ युग्मं ॥ नत्वा ते कामदेवाय । शेषामादाय शीर्षतः ॥ परिभ्रमितुमारब्धा । उद्याने कामसुंदरे ॥ ८४ ॥ नवयौवनमारूढा । सखेदा शून्यमानसा ॥ दृष्टैका कन्यका कांता । सहकारतरोरधः ॥ ८५ ॥ एकाकिनी सशोका च । सर्वावयवसुंदरी ॥ तनूदरी विशालाक्षी । लावण्यामृतदीर्घिका ॥ ८६ ॥ बकुलामोदनिःश्वासा । पक्वबिंबसमाधरा ॥ मुक्तपद्मालया देवी । पद्मेव वनमागता ॥ ८७ ॥ भूरिसंभ्रमसंजात—निःश्वासोत्कंपितस्तनी ॥ लावण्येनैव लिंपंती । समस्तां काननावनिं ॥ ८८ ॥ पुष्पोपहारं कुर्वाणा । दृष्टिक्षेपैर्मुहुर्मुहुः ॥ निःश्वासाकृष्टमत्तालि—कुलव्याकु·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लितानना ॥ ८९ ॥ सौकुमार्यादिवोदारा—च्छ्लाघ्यतां यांती निर्जरं ॥ यौवनेन कृताश्लेषा । सी-
मा निःशेषयोषितां ॥ ९० ॥ गृहीत्वेवाखिलस्त्रीणां । लावण्यं जगदद्भुतं ॥ कृतैषा वेधसा कर्तु-
मद्भुतं सार्वलौकिकं ॥ ९१ ॥ कुलकं ॥

इतश्चोन्मूलितालान—स्तंभो मदजलाविलः ॥ पट्टहस्ती नरेंद्रस्य । क्रोधांधीकृतलोचनः ॥
॥ ९२ ॥ त्रोटयित्वा च वस्त्रादि । विधूयाधोरणं तथा ॥ पातयित्वा महीपीठे । मारयित्वातिरोषतः
॥ ९३ ॥ मत्तो गुलगुलाराव—पूरिताखिलदिङ्मुखः ॥ भंजन्नापणवेश्मानि । समुध्धृतकरः करी ॥
॥ ९४ ॥ विलोक्य जनसंचारं । श्रुत्वा तूर्यस्य निःस्वनं ॥ कामसुंदरमुद्यान—मनुवव्राज वेगतः ॥
॥ ९५ ॥ चतुर्भिः कलापकं ॥ तुरंगमगतैः पुंभि—र्धावद्भिश्च पुरस्थितैः ॥ हस्त्यागच्छति भो लो-
का । यात यात दिशोदिशं ॥ ९६ ॥ एतत् श्रुत्वा जनः सर्वः । प्राणानादाय सत्वरं ॥ कोऽपि क्वा-
पि गतो यस्मा—ज्जीवानां जीवितं प्रियं ॥ ९७ ॥ सापि बाला भयोद्भ्रांता । प्रविष्टा वंशगह्वरे ॥
वेपमानसमस्तांगा । लतेव पवनाहता ॥ ९८ ॥ मेघनादो गतः क्वापि । नष्टो मलयसुंदरः ॥ ए-
काकी पर्यटन् प्राप्तः । कुमारो नरकेसरी ॥ ९९ ॥ यत्र सा भयसंत्रस्ता । हरिणीलोललोचना ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

वंशगह्वरमध्यस्था । संलीनास्ते कुमारिका ॥ १०० ॥ युग्मं ॥ विलोकिता कुमारेण । कुमारोऽपि त-
या दृशा ॥ दृष्टः सानंदया जात—स्तयोर्दृष्टिसमागमः ॥ १ ॥ तद्वचनात्कुमारोऽपि । प्रविष्टो वंश-
गह्वरे ॥ ससंभ्रमा सशृंगारा । संप्रवृत्ता मिथः कथा ॥ २ ॥ क्षणांतरेण विश्वस्ता । धृताभिमुखलो-
चना ॥ आविःकृतानुरागा च । पृष्टा सा तेन भामिनी ॥ ३ ॥ त्वं कस्यासि सुता बाले । सशोका
केन हेतुना ॥ एकाकिनी कथं जाता । यूथभ्रष्टा यथा मृगी ॥४॥ किंवा भजंति ते नाम । वर्णाः
पूर्णमनोरथे ॥ अदृष्टेऽपि सतां प्रीति—र्जायते सज्जने जने ॥ ५ ॥ तस्मै सा कथयामास । सा-
श्रुगद्गदया गिरा ॥ दधत्यात्यंतमाधुर्यं । चेतश्चोरणलक्षया ॥ ६ ॥ उदन्वता परिक्षिप्तः । सारश्री-
खंडमंडितः ॥ मरिचोद्भ्रांतहारीतो । मलयोऽस्ति महीधरः ॥ ७ ॥ पुरं मलयसारं हि । तत्र सुरपुर-
प्रभं ॥ मलयकेतुर्नृपाल—स्तत्पालयति हेलया ॥ ८ ॥ लीलयैव धराभार—धरणोध्धुरकंधरः ॥
सर्वावरोधनारीणां । मुख्या लक्ष्मीरिवोत्तमा ॥ ९ ॥ सर्वांगसुंदराकारा । नाम्ना मलयसुंदरी ॥ प्रति-
बिंबमिव स्त्रीणां । वेधसा सा विनिर्मिता ॥ १० ॥ युग्मं ॥ तदंगतः समुत्पन्ना । नाम्नाहं जयसुंदरी
॥ तत्रैव समये सिद्धाः । पितुर्व्युद्भिन्नपार्थिवाः ॥ ११ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्यदा प्रश्नितस्तेन । मां समुद्दिश्य केवली ॥ भगवन् जयसुंदर्याः । कोऽत्र भर्ता भविष्यति ॥ १२ ॥ स प्राह भुवनानंदी । रणकेसरिनंदनः ॥ उदारचरितो वीरो । नाम्ना च नरकेसरी ॥ ॥ १३ ॥ राकाचंद्र इवाशेष—शुभ्रशुभ्रकलालयः ॥ रूपातिशयसंपन्नः । सोऽस्या भर्ता भविष्यति ॥ ॥ १४ ॥ युग्मं ॥ ततः सुखेन तिष्ठंत्या । गतः कालः कियानपि ॥ अथ हर्म्यतले सुप्ता । योगावर्तकयोगिना ॥ १५ ॥ सहसैव समानीता । मंत्रेणाकृष्य सत्वरं ॥ श्मशानेऽतिमहारौद्रे । भूतप्रेतसमाकुले ॥ १६ ॥ युग्मं ॥ तत्र भूमिगृहे मुक्त्वा । मां गतोऽसौ दुराशयः ॥ योगिन्यपि गता क्वापि । या मुक्ता मम रक्षिका ॥ १७ ॥ विजनं वीक्ष्य नष्टाहं । श्रुत्वा बहुजनारवं ॥ शनैः शनैः समायाता । प्रविष्टा काममंदिरे ॥ १८ ॥ प्रणम्य मदनं द्वारि । निर्गता शून्यमानसा ॥ क्षणमेकं स्थिता याव—त्सहकारतरोरधः ॥ १९ ॥ विषमध्येऽमृताकारं । तावद्दृष्टं तवाननं ॥ ततो हस्तिभयाद्भीता । द्रुतमत्र समागता ॥ २० ॥ कथितो यस्त्वया पृष्टः । स्ववृत्तांतो मयाखिलः ॥ सांप्रतं श्रोतुमिच्छामि । त्वदीयमपि मूलतः ॥ २१ ॥ कुमारेणापि निःशेषो । मातृपितृपुरादिकः ॥ कथितो निजवृत्तांतः । सानंदाजनि कन्यका ॥ २२ ॥ अहोऽनुकूलमाचीर्णं । योगावर्तकयोगिना ॥ कारि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तोऽतर्कितो येन । त्वया सह समागमः ॥ २३ ॥ आपदः संपदश्चैव । समीपस्थाः शरीरिणां ॥ आपदपि च येनैषा । मे जाता संपदुत्तमा ॥ २४ ॥ कुमार कुरु मे पाणि—ग्रहणं कामकानने ॥ इहैव किं विचारेण । दीर्घसूत्री विनश्यति ॥ २५ ॥ हुताशं साक्षिणं कृत्वा । गांधर्वेन विवाहिता ॥ भुक्ता सर्वांगसंस्पर्शं । जाता सर्वांगनिर्वृतिः ॥ २६ ॥ उपहत्य जनं कंचि—त्कंचिद्भंक्त्वा लतागृहान् ॥ इतस्ततः परिभ्रम्य । मोटयित्वाऽवनीरुहः ॥ २७ ॥ तुरंगिभिः समानीतो । वेणुग्राहैः कदर्थितः ॥ आधोरणवशं जातो । यातो पुरवरे गजः ॥ २८ ॥ युग्मं ॥ यथास्थानं गतो लोको । विजनं कामकाननं ॥ सुवसं दुर्वसं धत्ते । दुर्वसं सुवसं सुधीः ॥ २९ ॥ यतः—अघटितघटितानि घटयति । सुघटितघटितानि जर्जरीकुरुते ॥ विधिरेव तानि घटयति । यानि पुमान्नैव चिंतयति ॥ ॥ ३० ॥ द्वीपादन्यस्मादपि । मध्यादपि जलनिधेर्दिशोऽप्यंतात् ॥ आनीय झटिति घटयति । विधिरभिमतमभिमुखीभूतः ॥ ३१ ॥ गह्वराच्च कुमारोऽपि । खड्गहस्तो विनिर्गतः ॥ पश्चान्निर्गता कांता । सत्कांता जयसुंदरी ॥ ३२ ॥ पतिसंपर्कसंजातां । बिभ्राणा वपुषः श्रियं ॥ कंकणं च विवाहाख्यं । दधती वामपाणिना ॥ ३३ ॥ शिरस्याहितसत्पुष्पा । कर्णविन्यस्तपल्लवा ॥ वनश्रीरिव चैतस्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। पृष्टौ लग्ना चक्रास्ति सा ॥ ३४ ॥ अत्रांतरे समायातः । क्रोधांधीकृतलोचनः ॥ कंपयन् कर्त्तिकां रौद्रां । योगावर्तकयोगिकः ॥ ३५ ॥ आः पापे वंचयित्वा मां । कथमत्र समागता ॥ पिबत्वतोऽद्य ते कोष्णं । शोणितं मम कर्त्तिका ॥ ३६ ॥ कुमारेणापि निस्त्रिंशः । कोशादाकृष्य लीलया ॥ कृतः करे कृतज्ञानो—र्दुर्दर्शश्चर्मचक्षुषां ॥ ३७ ॥ एवंविधं न ते युक्तं । वक्तुं च योगिनः सतः ॥ न जल्पंत्यपराधेऽपि । संतश्च कर्कशां गिरं ॥ ३८ ॥ रे पाप प्रथमं तावत् । पिबामि तव शोणितं ॥ पश्चादस्याः करिष्यामि । नवखंडं शरीरकं ॥ ३९ ॥ इत्युक्त्वा धावितो योगी । वेगतः कुमरंप्रति ॥ वाहिता कर्त्तिका तेन । वंचिता कुमरेण सा ॥ ४० ॥ हतश्च दक्षिणे बाहौ । कुमारेणापि योगिकः ॥ दृढमुष्टिप्रहारेण । पतिता कर्त्तिका भुवि ॥ ४१ ॥ भूयोऽपि मुष्टिना पृष्टौ । प्रहतः पतितो भुवि ॥ विलक्षोऽलब्धलक्षश्च । निरूपयन् दिशो दिशः ॥ ४२ ॥ योग्युक्तोऽथ कुमारेण । प्रोत्तिष्ट कुरु पौरुषं ॥ पतिता न विराजंते । रणभूमौ महौजसः ॥ ४३ ॥ भणितश्चलचित्तेन । योगिना नरकेसरी ॥ यदहं वच्मि तत्कार्यं । कृतं पौरुषकर्मणा ॥ ४४ ॥ अस्ति मे गारुडं दिव्यं । त्रसेतरविषापहं ॥ द्वितीयमंजनं श्रेष्टं । तिरोधाननिबंधनं ॥ ४५ ॥ गृहाणैतद् द्वयं येन । जायते मम नि-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

वृतिः ॥ प्रतिपन्नं कुमारेण । गृहीतं विधिपूर्वकं ॥ ४६ ॥ सुता मलयकेतोश्च । लक्षणोपेतविग्रहा ॥ सुप्ताकृष्य मयानीता । चंडिकाबलिहेतवे ॥ ४७ ॥ पूर्वसेवा कृता ताव—दुत्तरा चावतिष्ठते ॥ तत्र कन्याबलिं दत्वा । साधयिष्यामि यक्षिणीं ॥ ४८ ॥ स्थितमेतद्यथा चैषा । प्राप्नोति पितृमंदिरे ॥ तथा त्वया च कर्तव्यं । भूयो भवतु दर्शनं ॥ ४९ ॥ गतो योगी कुमारोऽपि । कामदेवगृहे गतः ॥ दृष्टोऽसौ मेघनादेन । पृष्टश्च कोपितो भवान् ॥ ५० ॥

तेनापि कथितं सर्वं । यथा वृत्तं तथाखिलं ॥ विहस्य भणितं तेन । तुष्टस्ते मित्र मन्मथः ॥ ५१ ॥ मुहूर्तमेकमत्रैव । स्थातव्यं स्थिरबुद्धिना ॥ प्रतिपन्नं कुमारेण । मेघनादो गतो गृहे ॥ ॥ ५२ ॥ प्रोक्तः सर्वोऽपि वृत्तांतः । प्रहृष्टो हेमसुंदरः ॥ चलितः सर्वसामग्र्या । संप्राप्तः काममंदिरे ॥ ५३ ॥ गंधवारणमारोप्य । सशृंगारं वधूवरं ॥ प्रविवेश पुरं राजा । कृतशोभं समंततः ॥ ५४ ॥ संपादितेतिकर्तव्यः । स्वयं राज्ञा च सत्कृतः ॥ वस्त्रैश्च भूषणाद्यैश्च । कालं नयति भूपभूः ॥ ५५ ॥ अन्यदा ज्ञातवृत्तांतो । मलयकेतुर्भूमिपः ॥ तुतोष हृदये बाढं । माता मलयसुंदरी ॥ ५६ ॥ प्रोक्तो मलयसुंदर्या । मलयकेतुर्भूमिपः ॥ शोभनं यदि जामाता । सहायात्यत्र वत्सया ॥ ५७ ॥ प्रिये

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खेदो न कर्त्तव्यः । करोमि तव वांछितं ॥ इत्युक्त्वा प्रेषिता भृत्याः । सोपदा हेमपत्तने ॥ ५८ ॥ तेऽपि हेमपुरं प्राप्य । प्रतीहारनिवेदिताः ॥ सोपायना निरुत्सेकाः । सन्नामंडपमागताः ॥ ५९ ॥ अष्टादशशरं हारं । हरहाससमप्रनं ॥ सारश्रीखंडखंडानि । विमुच्य पुरतो नताः ॥ ६० ॥ युग्मं ॥ निषण्णा दर्शितस्थाने । दृष्टाः सानंदया दृशा ॥ पृष्टाश्च क्षेमं सर्वत्र । मलयकेतुभूभुजः ॥६१॥ क्षेमे च कथिते प्रोक्ताः । किमागमनकारणं ॥ ततस्तैरर्पितो लेखः । संदिष्टं कथितं गिरा ॥ ६२ ॥ मलयकेतुनृपेन । नूयोनूयः कृतादरं ॥ संदिष्टं च तथा कार्यं । कुमारो नरकेसरी ॥ ६३ ॥ यथा शीघ्रं समायाति । मलये सह वत्सया ॥ एष संदेशकः स्वामिन् । लेखार्थोऽप्ययमेव च ॥ ६४ ॥ युग्मं ॥ ततः संभूषिता राज्ञा । वस्त्राजरणनूषणैः ॥ प्रतिप्राभृतहस्ताश्च । ते शुन्नेऽह्नि विसर्जिताः ॥ ६५ ॥ ससहायः कुमारोऽपि । समये सह कांतया ॥ गछंस्तत्र नृपेणोक्तः । पंथानः संतु ते शिवाः ॥ ६६ ॥

द्रोणीभिर्जलमुत्तीर्य । गतास्ते स्तोकवासरैः ॥ समागात्सन्मुखं तव । मलयकेतुर्नूपतिः ॥६७॥ प्रवेशितो मुदा तेन । कृत्वा पुरमहोत्सवं ॥ श्वश्रूश्वशुरमानम्य । कुमारो नरकेसरी ॥ ६८ ॥ निष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सः प्रश्नितो राज्ञा । सर्वत्र कुशलं तव ॥ पृष्टव्यमेतदेवेह । चले यौवनजीविते ॥ ६९ ॥ युग्मं ॥
प्रणम्य पितृपादेभ्यः । सस्नेहं जयसुंदरी ॥ मातुः पादग्रहं कृत्वा । तदंके निषसाद सा ॥ ७० ॥
सानंदा सविषादा च । जगौ मलयसुंदरी ॥ वत्से संक्षेपतः सर्व—मामूलाच्चरितं निजं ॥ ७१ ॥
निवेदय यथा वृत्तं । कौतुकं मम वर्तते ॥ तयापि कथितं सर्वं । यथावृत्तं तथादितः ॥ ७२ ॥ युग्मं ॥ एतत् श्रुत्वा जगादेदं । माता मलयसुंदरी ॥ यन्न दृष्टो विवाहस्ते । सखेदं तेन मानसं ॥
॥ ७३ ॥ सुपात्रवरलाभेन । मुमुदे च मनो मम ॥ इत्युक्त्वा विरता राज्ञी । प्रमोदभरमेदुरा ॥
॥ ७४ ॥ कृताशेषोपचारस्य । राज्ञा मलयकेतुना ॥ पुत्रादभ्यधिकं तत्र । दृश्यमानस्य सर्वदा ॥
॥ ७५ ॥ वव्रजुर्वासरास्तस्य । सुखितस्य प्रमोदतः ॥ मनोवांछितवस्तूनां । तत्क्षणादेव योगतः ॥
॥ ७६ ॥ मृगनाभिसमुत्पन्न—जात्येन मृगनाभिना ॥ वासिताशेषदिक्चक्रः । सत्पुष्पकृतशेखरः
॥ ७७ ॥ कर्पूरपूरसन्मिश्र—सारश्रीखंडचर्चितः ॥ मृगनाभेः कर्दमेन । कपोले कृतमंडनः ॥७८ ॥
आर्द्रकर्पूरहारेण । विराजितशिरोवरः ॥ हारिहीरकसंकीर्ण—श्रवणासक्तकुंडलः ॥ ७९ ॥ निःश्वासोह्यमहामूल्य—सद्वस्त्रावृतविग्रहः ॥ तांबूलबीटकाशून्य—करः कृतकुतूहलः ॥ ८० ॥ ललाटपट्ट-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विन्यस्त—तिलकेन विराजितः ॥ आरामोद्यानरम्येषु । काननेषु वनेषु च ॥ ८१ ॥ सरसीषु तडागेषु । निर्झरेषु नदीषु च ॥ लतामंडपगुल्मेषु । द्राक्षामंडपभूमिषु ॥ ८२ ॥ निकुंजेषु मनोज्ञेषु । नानापुष्पसुगंधिषु ॥ नागवल्लीमनोज्ञेषु । सोऽक्रीडत्सह कांतया ॥ ८३ ॥ कुलकं ॥ अन्यदा प्रसरं तस्य । क्रीडतः काममूमिषु ॥ संपूर्णाशेषकामस्य । मासैरपि दिनायितं ॥ ८४ ॥ प्रिये स्थानं प्रमोदानां । मलयो हि मया श्रुतः ॥ तेनादृष्टेन नो किंचि—न्मया दृष्टं कुतूहलं ॥ ८४ ॥ तयापि कथितं मातु—र्मात्रा नृपे निवेदितं ॥ तेनापि कारिता सर्वा । सामग्री यानहेतवे ॥ ८५ ॥ विशिष्टमद्यभोज्यानि । यदन्यदपि सुंदरं ॥ तदुपयोगि योग्यं च । तत्सर्वं प्रगुणीकृतं ॥ ८६ ॥ सनृपः सकलवश्च । बहुलोकगणान्वितः ॥ कुमारो नगमारूढः । कैलाशमिव शंकरः ॥ ८७ ॥ तत्र तालवने रम्ये । चंदनामोदसुंदरे ॥ एलागंधभृतघ्राणे । झरन्निर्झरहारिणी ॥ ८८ ॥ कृतो वासः कुमारेण । दृष्टैका हारहारिणि ॥ श्रवणासक्तवज्रेंद्र—कुंडलोद्योतिताननाः ॥ ८९ ॥ अष्टादशाब्ददेशीया । कांतकार्तस्वरप्रभा ॥ समुत्तीर्य नभोमार्गा—द्दक्षिणां दिशमाश्रिता ॥ ९० ॥ त्रिभिर्विशेषकं ॥ कैषा कैषेति जल्पंतो । धाविताः पृष्टतो जनाः ॥ सापि दुर्जनमैत्रीव । क्षणादेव न दृश्यते ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ९१ ॥ तथैव वलितो लोको । न च सिद्धं प्रयोजनं ॥ कुमारश्चिंतयामास । नूनमेतत्कुतूहलं ॥
॥ ९२ ॥ भुक्त्वा विश्रम्य सर्वत्र । विलोकितकुतूहलः ॥ भूयोऽप्यावासमागम्य । सुष्वाप नृपनंदनः
॥ ९३ ॥ निशीथे खड्गमादाय । निर्गतोऽलक्षितो जनैः ॥ एकाक्येव महासत्व—श्चचाल नरके·
सरी ॥ ९४ ॥ दक्षिणां दिशमाश्रित्य । परिसर्पन्नितस्ततः ॥ गतो नैरृतकोणस्थां । वनराजिविरा
जितां ॥ ९५ ॥ चंद्रसूर्यकरागम्यां । रौद्रामतिबिभीषणां ॥ कृतांतवदनाकारां । गुहां भीममुखाभिधां
॥ ९६ ॥ मंत्रसाधकसाक्षेप—हुंकारवचनैस्तथा ॥ पुष्पधूपादिगंधैश्च । ससत्वेति विनिश्चितां ॥९७॥
विभिर्विशेषकं ॥ प्रधानपद्मरागेण । तमःस्तोमविघातिना ॥ प्रकाशितगुहाद्वारा । दृष्टो विद्याधरीसु·
तः ॥ ९८ ॥ कुमारेणापि संजात—विस्मयेन विलोकितः ॥ कोऽयं युवा गुहामध्या—त्केसरीव
विनिर्गतः ॥ ९९ ॥ नितांतसुकुमारांगो । महौजा नव्ययौवनः ॥ अत्यंतकृशसर्वांग—स्तपःकारी
सुसाधुवत् ॥ २०० ॥ युग्मं ॥

संभ्रांतं कुमरं दृष्ट्वा । समागत्य कृतादरः ॥ पप्रछ स्वागतं भ्रातः । कुतस्तेऽत्र समागमः ॥ १ ॥
कुमरेण कथितं किंचि—त्किंचित्तेन निवेदितं ॥ एवं परस्परालापै—स्तयोस्तत्रावतिष्ठतोः ॥ २ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कामसंरोहिणी नाम । तरुणी तत्र चागता ॥ दृष्टेति जातसंकेत—कुमारेण निरीक्षिता ॥ ३ ॥
सीमंतके च विन्यस्त—पद्मरागमणित्विषा ॥ सर्वतोऽपि विसारिण्या । नाशयंती निशातमः ॥ ४ ॥
त्रिभिर्विशेषकं ॥ ततो विद्याधरः प्राह । कुमार कुरु मे वचः ॥ पिबेदं सुंदरं दुग्धं । हृद्यं मदुपरो-
धतः ॥ ५ ॥ विद्याकल्पो महाभाग । अर्धरात्रे तृतीयके ॥ पीयतेऽनन्यगम्यस्य । पय संपुटकद्वयं ॥
॥ ६ ॥ अतिथिस्त्वं समुत्तिष्ठ । त्वयेदं सह पीयते ॥ कुमारः प्राह भुंक्ष्व त्वं । रुचिर्मे नास्ति सांप्र-
तं ॥ ७ ॥ गत्वैकांते ततः सोऽपि । पयः पीत्वा समागतः ॥ निषण्णः कुमरस्यांते । बभाणेदं स्फुटा-
क्षरैः ॥ ८ ॥ प्रभाते बिल्वलक्षेण । तर्पणीयो हुताशनः ॥ यदि सत्वं तदा सिद्धि—र्निःसत्वस्य वृ-
था श्रमः ॥ ९ ॥ नररत्नमिवाभाति । भवांश्च परमाकृतिः ॥ समस्ति मे मनोवांछा । परं वक्तुं न
शक्यते ॥ १० ॥ प्रहराष्टं महाभाग । प्रभाते यदि स्थीयते ॥ ममांतिके तदा सर्वं । सिद्धं मन्या-
महे वयं ॥ ११ ॥ किमेभिश्चंचलैः प्राणैः । कर्तव्यं कुरु वांछितं ॥ प्रातरेव भवत्पार्श्वे । मां जानी-
हि समागतं ॥ १२ ॥ इत्युक्त्वाथ कुमारोऽपि । क्षणं सुप्त्वा निजाश्रये ॥ तल्पमुज्झांचकाराशु । मि-
त्रार्थकरणोद्यतः ॥ १३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मलयसुंदरस्याथ । मेघनादस्य च स्वयं ॥ रहस्यं हृदि निक्षिप्य । गतोऽसावसिना सह ॥
॥ १४ ॥ आत्मा संदर्शितस्तेन । खेचरस्य गुहामुखे ॥ निषण्णः कुमरस्तत्र । खेचरार्पितविष्टरे ॥
॥ १५ ॥ यत्कर्तव्यं च तद्ब्रूहि । सर्वत्र प्रगुणा वयं ॥ जुहोमि श्रीफलैरग्निं । मंत्रजापपुरस्सरं ॥१६॥
विघ्नान् सर्वान् निराकुर्व—स्तिष्ठ त्वं सावधानकः ॥ निर्भीतः साहसोपेत—स्त्वदायत्ता हि सिद्धयः
॥ १७ ॥ लिखितं खेचरेणापि । रक्तचंदनमंडलं ॥ तदेकदेशे लिखिता । देवताबहुरूपिणी ॥ १८ ॥
सारकाष्टभृते कुंडे । ज्वलज्ज्वालासमाकुले ॥ होमं कर्तुं समारब्धः । श्रीफलैर्मंत्रपूर्वकं ॥ १९ ॥
अत्रांतरे समाधूत—धूलीतृणमहीरुहः ॥ वातो वातुं समारब्ध—श्चकंपे मेदिनीतलं ॥ २० ॥ घ-
नो गर्जितुमारब्धो । विद्युत्संपातिरुच्छ्रिता ॥ न किंचित्तमसा तत्र । दृश्यते पुरतः स्थितं ॥ २१ ॥
शोणशोणितधारान्नि—र्वर्षत्याशु घनाघनः ॥ उड्डीय जीवितं याति । शिवानां फेत्कृतारवैः ॥२२॥
घूकघूत्कृतशब्देन । गुहासु प्रतिसर्पता ॥ कर्णाभ्यर्णागतं नैव । श्रूयते जनजल्पितं ॥ २३ ॥ मु-
क्तकेशा विवस्त्राश्च । करोल्लालितकर्त्तिकाः ॥ ज्वाला मुखेन मुंचंत्यो । योगिन्योऽनृत्यनंबरे ॥२४॥
स चासनसमासीनो । यावदास्ते नृपांगजः ॥ खेचरोऽपि च निश्शंको—ऽप्रजुहवज्जातवेदसं ॥ २५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तयोः सत्वं समालोक्य । प्रशांता च बिभीषिका ॥ अत्रांतरे समायातः । क्षेत्रपालो महाबलः ॥ ॥ २६ ॥ तयोः सत्वपरीक्षार्थं । मलयागस्य नायकः ॥ क्षेत्रपालो महासत्व—क्षोभितानेकसाधकः ॥ २७ ॥ युग्मं ॥ भो मानव किमर्थं ते । करे खड्गो विलोक्यते ॥ मंत्रजापकरः कोऽयं । देवी का लिखिता भुवि ॥ २८ ॥ मलये मां विमुच्यान्यं । देवं च ध्यायतस्तव ॥ का वैदग्धी कुतः सिद्धिः । कुतस्ते जीवितं वद ॥ २९ ॥ कुमारोऽवग् न ते युक्तं । वक्तुमीदृग्वचः सुर ॥ राकाचंद्रः सुधां सूते । न कदाचिद्दवानलं ॥ ३० ॥ विद्यासाधनकल्पोऽयं । यदन्या देवता कृता ॥ मलयः कस्य संबंधी । वीरभोग्या वसुंधरा ॥ ३१ ॥ श्रुत्वेदं स कुमारस्य । सदर्पं कर्कशं वचः ॥ सावेशो विहितावज्ञो । जगादेदं महाबलः ॥ ३२ ॥ पाप ते नाशयाम्यद्य । पौरुषं पुरुषाधम ॥ न हि साम्येन शाम्यंति । दुर्जना दुष्टचेतसः ॥ ३३ ॥

विधाय विकृताकारं । वेतालाकृतिमात्मनः ॥ ततो वर्धितुमारब्धो । दरकारी तनूभृतां ॥ ३४ ॥ दक्षिणस्यां नरं कंचि—त्खड्गव्यग्रकरं वहन् ॥ कापालिकं तु वामायां । क्रंदंतं करुणैः स्वरैः ॥३५॥ तयोः कर्त्तिकयोत्कृत्य । खादन् मांसानि शोणितं ॥ पिबन् हसंश्च हास्येन । नृत्यन्नुच्चैश्च विस्वरं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ३६ ॥ सौवीरांजनभृंगालि—महिषांगसमप्रभः ॥ कालतुल्योग्रदंष्ट्रालः । क्षामगंडो भयंकरः ॥
॥ ३७ ॥ सूर्पकर्णो विरूपाक्ष—स्तुच्छचिर्पटनासिकः ॥ रक्ताक्षः कपिलकेशो । वृश्चिकैः कृतशेखरः
॥ ३८ ॥ तत्कालोत्कृतरक्तार्द्र—चर्मावृतकटीतटः ॥ कटीभागे वहन् भीमं । महाकायं महोरगं ॥
॥ ३९ ॥ विसर्पत्स्फारफूत्कार—भुजंगकृतकंकणः ॥ कगवाशक्तबीभत्स—नृमुंडकृतकंठिकः ॥ ४० ॥
नररक्तवसापूर्ण—कपालन्यस्तलोचनः ॥ मुखमुक्तज्वलज्ज्वालः । भीमा सर्वभयंकृतां ॥ ४१ ॥ र-
क्ताभ्यस्तां करासक्तां । कृतांतरसनासमां ॥ करालां कर्त्तिकां तीक्ष्णां । संलिहन् लोलजीह्वया ॥
॥ ४२ ॥ सूर्पाकारनखः क्षुद्रः । क्रमेलकशिरोधरः ॥ दीर्घदंतुरदंतश्च । करकंपितकर्त्तिकः ॥ ४३ ॥
विधाय विकृतं रूप—मूर्ध्वं गत्वा नभस्तले ॥ हसन्नट्टट्टहासेन । नृत्यत्युद्धुरकंधरः ॥ ४४ ॥ कुल-
कं ॥ हेलयासौ चचालाथ । मंत्रसाधकसन्मुखं ॥ कुमारः खड्गमादाय । तयोरंतःस्थितोऽवदत् ॥
॥ ४५ ॥ कस्त्वं भो केन कार्येण । गम्यते सत्वरैः पदैः ॥ निर्निमित्तं किमित्येवं । हस्यते विस्वरैः
स्वरैः ॥ ४६ ॥ स प्राह साधकस्यास्य । मांसरक्तपिपासया ॥ गम्यते हस्यते चेष्टा । एतस्यैव दुरा-
त्मनः ॥ ४७ ॥ सुरासुरनराभ्यर्च्यं । विमुच्य मां महाबलं ॥ का चैषा दृश्यते क्षुद्रा । लिखिना भुवि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवता ॥ ४८ ॥ कुमारः प्राह कल्पोऽयं । कोपस्तव निरर्थकः ॥ भिन्नोष्टसंपुटाः संतो । न हसंति महास्वरैः ॥ ४९ ॥ विद्यासाधकपुंसस्तु । दुर्लभे मांसशोणिते ॥ देवयोनेर्दुराशेयं । तव चेतसि वर्तते ॥ ५० ॥ वेतालोऽपि जगादेदं । कुमारं पुरतः स्थितं ॥ मुंच मार्गं व्रज स्थानं । यदि ते जीवनस्पृहा ॥ ५१ ॥ कुमारः प्राह—

अद्य श्वो वा ध्रुवो मृत्यु—र्मितार्थं यद्यसौ भवेत् ॥ तदा मे किं न पर्याप्तं । मरणान्न बिभेम्यहं ॥ ५२ ॥ अर्थाः प्राणाश्च ये यांति । गुरुदेवप्रयोजने ॥ त एवात्र प्रशस्यंते । शेषाः संक्लेशहेतवः ॥ ५३ ॥ कोऽपि केनाप्युपायेन । जीवो जीवति भूतले ॥ देवयोने न युक्तं ते । विघ्नं कर्तुं निरर्थकं ॥ ५४ ॥ मलयेऽस्मिन्नहं स्वामी । गर्वोऽप्येष न संगतः ॥ किं न श्रुतं त्वया वाक्यं । वीरभोग्या वसुंधरा ॥ ५५ ॥ महाबलः प्रोवाच—रे भिन प्रथमं ताव—द्भवतो मांसशोणिते ॥ भक्षयामि पिबाम्युच्चैः । पश्चादस्य दुरात्मनः ॥ ५६ ॥ इत्युक्त्वा धावितो वेगा—द्वेतालः कुमरंप्रति ॥ वाहिता कर्त्तिका तेन । कुमारेणापि वंचिता ॥ ५७ ॥ खड्गमादाय तेनापि । प्रहतो दक्षिणे करे ॥ वेतालः पतिता तस्य । कराद्भुवि च कर्त्तिका ॥ ५८ ॥ विलक्षो वीक्षयामास । दिक्चक्रं शू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्यया दृशा ॥ उक्तो भूयोऽपि भो भद्र । करे कुरु निजायुधं ॥ ५९ ॥ निरायुधेषु दीनेषु । पति-
तेषु नतेषु च ॥ प्रहारं न प्रकुर्वंति । संतः सन्मार्गगामिनः ॥ ६० ॥ तथा भो काविमौ क्षिप्तौ ।
वामदक्षिणकक्षयोः ॥ नरौ निर्घृण यावेवं । पीडयसि निरंतरं ॥ ६१ ॥ भूतो महाबलः प्राह । श्रू-
यतां कथयामि ते ॥ कपालकुंभनामा च । वामतो मंत्रसाधकः ॥ ६२ ॥ यमुनो दक्षिणेनास्य ।
पुमानुत्तरसाधकः ॥ अत्रैवाविधिना विद्यां । साधयंतौ विलोकितौ ॥ ६३ ॥ युग्मं ॥ अवस्थामीदृ-
शीं नीता—वन्येषां शिक्षणाकृते ॥ दुर्मेधसोऽल्पसत्वाश्च । खेद्यंतेऽत्र यतोऽनिशं ॥ ६४ ॥ त्वत्सा-
हससमाकृष्ट—चेता वच्मि वचो हितं ॥ ब्रूहि यत्ते प्रयच्छामि । ह्यमोघं देवदर्शनं ॥ ६५ ॥ कुमा-
रः प्रोवाच—देवयोने न मे कार्यं । केनाप्यस्तीह वस्तुना ॥ कूजंतौ करुणं मुंच । कक्षागतनरा-
विमौ ॥ ६६ ॥ मुक्तावर्धमृतौ तेन । तौ नरौ लोललोचनौ ॥ भणितौ च कुमारेण । यात भद्रौ
युवां गृहं ॥ ६७ ॥ भूयोऽपि निकटीभूय । वेतालेन प्रजल्पितः ॥ यदहं वच्मि तत्कार्यं । भवता
परहितैषिणा ॥ ६८ ॥ नितांतं यद्यपि त्यागी । महाविनयसंगतः ॥ वीर्यवानुत्तमैश्वर्यो । भवान् गु-
णविभूषितः ॥ ६९ ॥ मद्दर्शनं तथाप्येत—त्तत्र मा भूदनर्थकं ॥ याचेऽहं तेन कार्येण । भवंतं प्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हणंप्रति ॥ ७० ॥ युग्मं ॥ एकया दशया कस्य । कालो गच्छति देहिनः ॥ विपदोऽनंतरा संपत् । संपदोऽनंतरा विपत् ॥ ७१ ॥ मुद्रारत्नं गृहाणेदं । वरवज्रैर्विराजितं ॥ एतेन ह्यंगुलिस्थेन । दुर्जयोऽसि महाहवे ॥ ७२ ॥ सुगंधगंधगव्यूत—व्यापी ज्वरहरः पटः ॥ धूपसाराभिधानोऽयं । कुमार क्रियतां करे ॥ ७३ ॥ प्रतिपन्नं कुमारेण । क्षेत्रपालप्रजल्पितं ॥ सिद्धा च कामदेवस्य । विद्याथ बहुरूपिणी ॥ ७४ ॥ कुमारकामदेवाभ्यां । कृतपूजो महाबलः ॥ जगामादर्शनं तुष्टः । कामदेवोऽप्यभाषत ॥ ७५ ॥ तव संपर्कतः सिद्धा । विद्या मे बहुरूपिणी ॥ अथवाचिंत्यमाहात्म्याः । संतः कल्पद्रुमोपमाः ॥ ७६ ॥ कामसंरोहिणी यामी । विद्या चाकाशगामिनी ॥ सोपचारं द्वयं दत्तं । कुमाराय खगामिना ॥ ७७ ॥ कृतस्तत्रैव वीवाहो । धनं चानाय्य कोटिशः ॥ कर्पूरागुरुश्रीखंड—खंभानां राशयः कृताः ॥ ७८ ॥ सप्रणयं पुरोभूय । जगादेदं नभश्चरः ॥ कुमारावितथं विद्धि । वच्म्यहं यत्तवाग्रतः ॥ ७९ ॥ एते वयमिमे चार्था । यदन्यदपि मामकं ॥ प्राणा अपि त्वदीया मे । यथायोगं नियुज्यतां ॥ ८० ॥ विहितं केन सौरभ्यं । पुष्पाणां केन वा कृतं ॥ माधुर्यमीक्षुयष्टीनां । लीला च वरहस्तिनां ॥ ८१ ॥ उपकर्तुं प्रियं वक्तुं । कर्तुं स्नेहमकृत्रिमं ॥ स्वजनानां स्वभावोऽ-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

यं । केनेंदुः शिशिरीकृतः ॥ ८२ ॥ इत्यादिभिर्विरैर्वाक्यैः । श्लाघयित्वा कुमारकं ॥ सानंदेन तत·स्तेन । विमानं प्रविकुर्वितं ॥ ८३ ॥ सकंकणप्रियायुक्तः । कुमारो नवकंकणः ॥ कामदेवविमाने·न । प्रातरेव समागतः ॥ ८४ ॥ स्वावासं सर्वलोकेन । वीक्षितः स्फारचक्षुषा ॥ भृत्यैर्मित्रैः कलत्रै·श्च । सानंदमवलोकितः ॥ ८५ ॥ युग्मं ॥

पुंजीकृत्य धनं धान्यं । कामदेवो विसर्जितः ॥ कांतयोश्च कुमारेण । कृता ज्येष्ठकनिष्ठता ॥ ॥ ८६ ॥ प्रदोषे कृतकर्तव्यः । काले सुप्तो निराकुलः ॥ निशीथे खड्गमादाय । जने सुप्ते विनिर्ग·तः ॥ ८७ ॥ दक्षिणां दिशमाश्रित्य । चलितो नरकेसरी ॥ शनैः शनैरसौ गछन् । गतो दूरतरं भुवं ॥ ८८ ॥ शृणोति मधुरं गीतं । कर्णपीयूषसन्निभं ॥ तरुण्यास्यसमुद्भूतं । सप्ततंत्रीस्वरानुगं ॥ ॥ ८९ ॥ चचाल स्वरमार्गेण । मंदंमंदं नृपांगजः ॥ स्तोकांतरं गतेनाथ । ददृशे देवमंदिरं ॥९०॥ श्रीखंडसारगंधेन । घ्राणाघ्राणकरं परं ॥ जात्यश्रीखंडकाष्टेन । सर्वतोऽपि विनिर्मितं ॥ ९१ ॥ रम्य·स्तंभसमाकीर्णं । शांतिनाथजगद्गुरोः ॥ शांतकांतकृतानंद—बिंबेन तु विराजितं ॥ ९२ ॥ पद्मरा·गमयोत्तुंग—कलशेन नभःस्पृशा ॥ वातोद्धूतध्वजैः शुभ्रैः । समाकारितसज्जनं ॥ ९३ ॥ चतु·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्भिः कलापकं ॥ निरुद्धपदसंचारं । प्रविश्य जिनमंदिरे ॥ दृष्टैका कन्यका तेन । गायंती वीणया जिनं ॥ ९४ ॥ गीतगर्भं जिनं स्तौति । वादयति च वल्लकीं ॥ तंत्रीस्वरस्य गीतस्य । विशेषो नैव लक्ष्यते ॥ ९५ ॥ नमस्ते शांतिनाथाय । जगच्छांतिविधायिने ॥ शांताकाराय शांताय । सुवर्णसदृशद्युते ॥ ९६ ॥ नमस्ते देवदेवाय । लोकालोकविलोकिने ॥ गुणैरतीतलोकाय । दुर्लक्ष्याय महात्मने ॥ ९७ ॥ त्रिलोककृतपूजाय । नष्टमोहमहारये ॥ वाणीगोचरतातीत—गुणसंघातधारिणे ॥ ९८ ॥ शरण्य शरणायातां । पाहि मां परमेश्वर ॥ मनोवांछितसंप्राप्त्या । सफलेयं तव स्तुतिः ॥ ९९ ॥ एवं जिनमभिस्तुत्य । मुक्त्वा कोणे च वल्लकीं ॥ निर्गत्य मंडपद्वारि । वेदिकैकामशिश्रियत् ॥ ३०० ॥ कुमारोऽपि प्रविश्यांतः । प्रणम्य जिननायकं ॥ वेदिकैकां समासीनः । केसरीव शिलातलं ॥ १ ॥ ततः ससंभ्रमा बाला । वेदिकातो भुवि स्थिता ॥ भणिता च कुमारेण । भद्रे का त्वं किमागता ॥ २ ॥ शून्ये जिनगृहे नक्तं । कुतो वा कस्य वा सुता ॥ स्त्रीलक्षणयुक्तापि । सशोका केन हेतुना ॥ ३ ॥ युग्मं ॥ दृष्टपूर्वेव मे भासि । भवती तालवने ध्रुवं ॥ आवासयितुमारब्धे । मया व्याकुलमानसे ॥ ४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तयोक्तं सत्यमेवेदं । नान्यथा तव दर्शनं ॥ भवंतं दूरतो दृष्ट्वा । चलिता दक्षिणामपि ॥५॥
ततः सा रोदितुं लग्ना । कुमारेण निवारिता ॥ स्वस्थीभूय क्षणादेवं । प्रोवाच सरलाशया ॥ ६ ॥
महाभाग महामेघ—विद्याधरतनूद्भवा ॥ सुवदनाकुक्षिजा चाहं । नाम्ना च सुरत्नप्रभा ॥ ७ ॥ म-
त्पित्रा शैशवे पृष्टः । सिद्धपुत्रो यशःप्रभः ॥ को भर्ता भद्र भाव्यस्या—स्तेनापीदं प्रजल्पितं ॥८॥
समस्तविश्वविख्यात—स्त्यागी भोगी महाबलः ॥ रणकेसरिजो भावी । भर्तास्या नरकेसरी ॥९॥
सांप्रतं चाहमन्यत्र । पित्रा दातुं समीहिता ॥ निर्विण्णा जीवितस्याहं । मरणार्थमिहागता ॥ १० ॥
प्रणम्य भक्तितः कांतं । शांतं शांतिकरं जिनं ॥ आरुह्य शिखरे मुक्तो । मयात्मा घातहेतवे ॥११॥
परं पश्यामि तत्पस्थ—मात्मानं पापकारिणी ॥ उद्भिता नभसो वाणी । पुत्रि पूर्णा मनोरथाः ॥
॥ १२ ॥ प्रभाते ह्यर्धरात्रे ते । प्रियेण सह संगमः ॥ संभवी भावि कल्याणे । मागमोऽन्यत्र कुत्र-
चित् ॥ १३ ॥ ततोऽहं जिननाथस्य । शांतिदेवस्य पूजनं ॥ संगीतकं च कुर्वाणा । स्थितात्रैव
जिनालये ॥ १४ ॥ अद्य त्वतर्कितो जात—स्त्वया सह समागमः ॥ अरण्यं वसितं जातं । संजा-
ता चित्तनिर्वृतिः ॥ १५ ॥ कथितं यत्त्वया पृष्टं । रहस्यं सकलं मया ॥ सांप्रतं श्रोतुमिच्छामि । त्व-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दीयमपि मूलतः ॥ १६ ॥ कस्त्वं कस्याथवा पुत्रः । किमेकाकी समागतः ॥ नामाक्षराणि वः कानि । श्रवंति श्रवणामृतं ॥ १७ ॥ कुमारेणापि निःशेषं । मूलतश्चरितं निजं ॥ कथितं नाम पर्यंतं । सानंदा सरलप्रज्ञा ॥ १८ ॥ नाथ त्वां प्रार्थये ह्येवं । पाणिग्रहं कुरुष्व मे ॥ अत्रैव भवने भव्ये । देवतादृष्टिगोचरे ॥ १९ ॥ जीवने मरणे त्राण—मेष मे कुलदेवता ॥ विश्वविश्वंभरो बंधुः । प्रथितामितकीर्तिकः ॥ २० ॥ प्रतिपन्नं कुमारेण । संक्षेपेण विवाहिता ॥ पूजितो वंदितो भक्त्या । श्रीशांतिः षोडशो जिनः ॥ २१ ॥ वेदिकायां निषण्णेन । कुमारेण समंततः ॥ उत्फणा विफणाश्चैव । नानारूपा भुजंगमाः ॥ २२ ॥ विशंतः परितो दृष्टाः । स्वल्पसत्वभयंकराः ॥ फूत्कारस्फारनिर्घोष—भृतावनिनभस्तलाः ॥ २३ ॥ परितः स्तंभमूलानि । स्तंभाग्राणि समंततः ॥ वेष्टयित्वा स्थिता रात्रौ । गंधलुब्धाः सरीसृपाः ॥ २४ ॥ त्रिभिर्विशेषकं ॥ वेदिकासु विशालासु । चित्रपुत्तलिकासु च ॥ सिंहशार्दूलमातंग—पुत्तलेषु ललंबिरे ॥ २५ ॥ बहिरंतश्च सर्वत्र । विसर्पद्भिर्भुजंगमैः ॥ भवनं शांतिनाथस्य । भुजंगैरिव निर्मितं ॥ २६ ॥ नरकेसरिणा पृष्टा । कौतुकाकृष्टचेतसा ॥ प्रिये किमिदमाभाति । यदि जानासि तद्वद ॥ २७ ॥ सा प्राह गंधलोभेन । दिवारात्रौ निरंतरं ॥ न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च मुंचंत्यमी प्रायो । जैनसद्म निरंतरं ॥ २८ ॥
अन्यदा क्षेत्रपालेन । दुर्मुखो नाम सेवकः ॥ महाबलेन संदिष्टो । रे दुर्मुख त्वया सदा ॥ ॥ २९ ॥ दिवा देयो न सर्पाणां । प्रवेशो जैनमंदिरे ॥ रात्रौ च निर्विषाः कार्याः । प्रविशंतु यद्दच्छया ॥ ३० ॥ एवं तस्याः प्रजल्पंत्या । मातापितरावागतौ ॥ प्रणतौ देवदेवस्य । दृष्टं द्वंद्वं तयोस्तथा ॥ ३१ ॥ निविष्टौ वेदिकापृष्टे । कुमारेण नमस्कृतौ ॥ सकंकणपरा पित्रोः । प्रणता सरत्नप्रभा ॥ ३२ ॥ कुमाराकृतिमालोक्य । विलोक्य दुहितुर्मुखं ॥ समसंयोगसंतुष्टो । पितरौ रंजितौतरां ॥ ३३ ॥ दुर्नयोऽप्येष ते वत्से । सुनयोऽजनि वेधसा ॥ न गंगा सागरं मुक्त्वा । पतत्यल्पजलाशये ॥ ३४ ॥ कृत्वा विवाहकार्याणि । स्वहस्तेन समर्पिता ॥ भवत्वाजन्म संयोगो । गंगासागरयोरिव ॥ ३५ ॥ इत्यभिधाय वेगेन । गतोऽसौ सत्वरं गृहे ॥ प्रातरेव कुमारोऽपि । समेतो नवकांतया ॥ ३६ ॥ नवकंकणकः प्राप्तः । स्वावासं सारसाहसः ॥ भृत्यमित्रकलत्राणां । कथिताखिलसंकथः ॥ ३७ ॥ सावशेषां निशां नीत्वा । नानालापैर्नृपांगजः ॥ कृतप्रत्यूषकर्तव्यो । रेमे मलयत्रमिषु ॥ ३८ ॥ पंचषानि दिनान्यत्र । नीत्वा विगतकौतुकः ॥ उत्ततार गिरेस्तूर्णं । तत्कूटाद्दिव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

केसरी ॥ ३७ ॥ मलयकेतुभूपस्य । पुरं प्राप्तो मनोहरं ॥ भूभुजा कृतसन्मानो । श्वश्वा च कृतसत्कृतिः ॥ ४० ॥ अहानि कतिचित्स्थित्वा । युक्तो मलयकेतुना ॥ वरं विमानमारुह्य । नभसा सपरिछदः ॥ ४१ ॥ संप्राप्तश्च क्षणादेव । कुमारो हेमपत्तने ॥ अतर्कितः समुत्तीर्णो । हेमसुंदरमंदिरे ॥ ४२ ॥ युग्मं ॥ किमेतदिति लोकेन । विस्मितेन विलोकितः ॥ सस्नेहं सादरं स्निग्धं । गौरवेण कुमारकः ॥ ४३ ॥ समासन्नोपविष्टश्च । पृष्टो राज्ञा सकौतुकं ॥ कथं भूमिचरो भूत्वा । भवांश्चाजनि खेचरः ॥ ४४ ॥ लक्ष्मीसरस्वतीकल्पे । के इमे वरबालिके ॥ परस्परविरुद्धे च । भवतोंतिकमाश्रिते ॥ ४५ ॥ कथितं मेघनादेन । नरकेसरिचेष्टितं ॥ राज्ञाचिंति यतो नास्ति । दुर्लभं शुभकर्मणां ॥ ४६ ॥

अत्रांतरे समायातं । प्रधानपुरुषद्वयं ॥ प्रविष्टं च सभामध्ये । प्रतिहारनिवेदितं ॥ ४७ ॥ हेमसुंदरराजेंद्रं । नत्वा तेन समर्पितः ॥ पितृलेखः कुमारस्य । स्वयं तेनापि वाचितः ॥ ४८ ॥ यथा—स्वस्तिश्रीरंगशालापुरीतो राजा रणकेसरी नरकांतादेवीसमन्वितस्तत्रस्थं वत्सं नरकेसरिणं सस्नेहं सादरं समाश्लिष्य भुजाभ्यां समादिशति, यत्किं विस्मृता वयं कुमारस्य? येनाद्यापि विलंब्य-

ते, कतिपयदिनमध्ये शीघ्रमागंतव्यमिति. कुमारेण जणितमवगतो लेखार्थः. अथ किं कुशली मे तातः? निर्व्याकुला च पुत्रवत्सलांबा? तावूचतु:—मातुर्व्यामिलिते दृष्टी। रुदंत्याः प्रतिवासरं॥ तवादर्शनदुःखार्त्तः। पिता कष्टेन जीवति॥ ४९॥ जवद्दर्शनलिप्सूनां। गुरूणां काप्यनिर्वृतिः॥ युक्तायुक्तविचारे च। जवानेवात्र पंडितः॥ ५०॥ प्रयाणेच्छुकुमारेण। मातुलास्यं निरीक्षितं॥ तेनापि जणितं वत्स। गम्यते न विलंब्यते॥ ५१॥ चतुरंगबलोपेतः। कुमारमनु मातुलः॥ निजपुत्रीं समादाय। कुमारार्थं सुदर्शनां॥ ५२॥ चलितस्तरसा रम्यां। रंगशालां महापुरीं॥ प्राप्तः कतिपयैरेव। वासरैर्हेमसुंदरः॥ ५३॥ युग्मं॥ बहिरेव कृतावासो। विवेशांतः स्वयं नृपः॥ निवेदितं विशांपत्यु—र्देव्या च सह मंत्रिजिः॥ ५४॥ अस्ति मे दुहिता कांता। वरप्राप्ता सुदर्शना॥ अत्रैव सा समानीता। प्रीत्या कुमरहेतवे॥ ५५॥ यदि वः संमतं चेदं। तदा लग्नं निरूप्यतां॥ अत्रांतरे समायातो। गणकः स्वत एव हि॥ ५६॥ स्वप्रयोजनमुद्दिश्य। सुप्रसन्नः सुवेषभृत्॥ कृतानुज्ञो नरेंद्रेण। निषण्णो दर्शितासने॥ ५७॥ युग्मं॥ रिक्ते रिक्तं विजानीयात्। पूर्णे पूर्णं समादिशेत्॥ तांबूलफलपुष्पादि—कृतपूजो महीभुजा॥ ५८॥ पृष्टो लग्नं विवाहस्य।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेन शीघ्रं निवेदितं ॥ अथवा कृतपुण्यानां । चिंतितं निकटस्थितं ॥ ५९ ॥ युग्मं ॥ प्रारब्धा सर्व-सामग्री । संप्राप्तो लग्नवासरः ॥ वृत्तं महाप्रमोदेन । पाणिग्रहणमंगलं ॥ ६० ॥ सामंतामात्यपौरादि—पर्यालोचपुरस्सरं ॥ निवेशितो निजे राज्ये । कुमारो नरकेसरी ॥ ६१ ॥ प्रशस्तेऽह्नि शुभे चंद्रे । मुहूर्ते कार्यसाधके ॥ मंदंमंदं सुखस्पर्शे । पृष्ठगो वाति मारुते ॥ ६२ ॥ कृतहट्टशोभां सर्वत्र । तोरणध्वजराजितां ॥ वरमंचसमाकीर्णां । नृत्यत्पण्यांगनाकुलां ॥ ६३ ॥ शुभ्रादभ्रमनोहारि—चित्रप्रासादतोरणां ॥ विद्वज्जनसमाकीर्णां । द्विपवाजिरथाकुलां ॥ ६४ ॥ नानासंख्यवहाराजि—रापणालीभिराकुलां ॥ विवेश रंगशालां सो—ऽलकामिव धनेश्वरः ॥ ६५ ॥ चतुर्भिः कलापकं ॥ सभासन्ननिषण्णस्य । जनैः परिवृतस्य च ॥ सुप्रसन्नदृशा लोकं । पश्यतो मेदिनीपतेः ॥ ६६ ॥ तदा कुलक्रमायात—नाथदर्शनलालसाः ॥ गृहीत्वार्घं फलैः पुष्पैः । पत्रैरन्यैश्च कल्पितं ॥ ६७ ॥ वीणा-वेणुविमिश्रेण । शंखनादानुगामिना ॥ महता तूर्यनादेन । पूरिताखिलदिङ्मुखाः ॥ ६८ ॥ सर्वे पौराः समागत्य । आशीर्वादपुरस्सरं ॥ यथाविध्यर्चयामासु—स्तस्य पादौ मुदाकुलाः ॥ ६९ ॥ चतुर्भिः कलापकं ॥ विसर्जिता नरेंद्रेण । ते सन्मानपुरस्सरं ॥ स्वं स्वं च निलयं जग्मु—स्तद्गुणौ-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

क्तिभृताननाः ॥ १० ॥

अथ तद्भवनं स्त्रीभिः । कौतुकाकुलबुद्धिभिः ॥ कृतनानाविभूषाभिः । परितः परिपूरितं ॥ ॥ ११ ॥ गवाक्षाभिमुखाः काश्चि—त्त्वराविस्रस्तवाससः ॥ अन्योन्यघट्टनोच्छिन्न—मुक्ताहारादिभूषणाः ॥ १२ ॥ पीनस्तनकृतान्योन्य—पीडनाश्चलकुंडलाः ॥ मंजुमंजीरशब्देन । वाचालचरणद्वयाः ॥ १३ ॥ किं न तृप्तासि दुस्तृप्ते । पार्श्वतो भव दुर्भगे ॥ विवदंत्यश्चेत्यादीनि । वचांस्यंबुरुहाननाः ॥ १४ ॥ मुक्त्वा व्यापारजातानि । तमैक्षंत पुरांगनाः ॥ स्वरूपमेतन्नारीणां । यतस्ताः कौतुकाकुलाः ॥ १५ ॥ चतुर्भिः कलापकं ॥ एका ब्रूते वरो भर्ता । परा ब्रूते वरांगना ॥ अन्योन्ययमपि श्रेष्ठं । वदतीह मुहुर्मुहुः ॥ १६ ॥ प्रतिहारनरेणाथ । मंदंमंदं विसर्जितः ॥ पुरनारीजनः सर्वो । गतो निजनिजालयं ॥ १७ ॥ संतोषामृतमग्नाना—मन्योन्यं प्रीतियोगतः ॥ ददतां भुंजतां चैव । गतः कालः कियानपि ॥ १८ ॥ रणकेसरिणा दीक्षा । प्रपन्ना जिनशासने ॥ संतोषसारसूरीणां । समीपे भक्तियोगतः ॥ १९ ॥ सर्वजीवाभयं दत्वा । शीलमासेव्य निर्मलं ॥ तपश्च दुश्चरं तप्त्वा । विभाव्य वरभावनाः ॥ ८० ॥ अंते चाराधनां कृत्वा । मृत्वानशनपूर्वकं ॥ औदारिकीं तनुं त्यक्त्वा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वर्गे जग्राह वैक्रियां ॥ ७१ ॥ युग्मं ॥ देवलोकात्समागत्य । भूत्वा च नृपनंदनः ॥ विधाय निर्मलां दीक्षां । संप्राप्य वरकेवलं ॥ ७२ ॥ त्यक्त्वा सर्वशरीराणि । अनंतज्ञानदर्शनः ॥ अनंतवीर्यसंपन्नः । सिद्धौ सिद्धो भविष्यति ॥ ७३ ॥ युग्मं ॥ हेमसुंदरभूपोऽपि । नरकेसरिभूभुजा ॥ सादरं ध्रियमाणोऽपि । जगाम निजपत्तने ॥ ७४ ॥ रणकेसरिणः पुत्रो—ऽप्युत्खातप्रतिरोपितान् ॥ मुद्रारत्नप्रभावेण । कुर्वन् सर्वमहीभुजः ॥ ७५ ॥ प्रधानधूपगंधेन । वासिताखिलदिङ्मुखः ॥ बंभ्रमीति गजारूढो । धूपसारपटावृतः ॥ ७६ ॥ युग्मं ॥ जन्मांतरसमाचीर्ण—पूर्णपुण्यानुभावतः ॥ सर्वं संपद्यते पुंसां । देवानामिव चिंतितं ॥ ७७ ॥

इत्येवं सर्वलोकस्य । कृतचित्तचमत्कृतिः ॥ बुभुजे राज्यसौख्यानि । स्वेछया वनितासखः ॥ ॥ ७८ ॥ क्वचिद्विमानयानेन । क्वचिन्मत्तगजं गतः ॥ क्वचिज्जात्याश्वमारूढः । क्वचित्स्यंदनवाहनः ॥ ७९ ॥ नंदनादिषु रम्येषु । काननेषु वनेषु च ॥ रमते रम्यकांताभिः । सहितो नरकेसरी ॥ ॥ ८० ॥ युग्मं ॥ क्वचिददृश्यरूपेण । क्वचिद् दृश्येन संचरन् ॥ विज्ञातजनसंलापः । साहसांकइवापरः ॥ ८१ ॥ पटहारवतो नित्यं । ज्वरं तुदन् शरीरिणां ॥ प्रजा रक्षन् विपक्षेभ्यो । यथार्थः क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रियोऽभवत् ॥ ७२ ॥ युग्मं ॥ संपन्नोचितसंतानः । सर्वलोकमनःप्रियः ॥ एकातपत्रमत्रस्तो । रा-
ज्यं भुंक्ते निराकुलः ॥ ७३ ॥ अन्यदा च समासीनः । सभामंडपविस्तरे ॥ अमात्यमंत्रिसामंत—
भटव्रजसमाकुले ॥ ७४ ॥ काननाच्च समागत्य । नरेण भणितो नृपः ॥ दिष्ट्या त्वं वर्धसे देव ।
तवोद्याने मनोरमे ॥ ७५ ॥ संतोषसागरा नाम । सूरयः श्रुतसागराः ॥ नानातिशयसंपन्ना । बहु-
शिष्याः समागताः ॥ ७६ ॥ त्रिभिर्विशेषकं ॥ तत् श्रुत्वा रंजितो राजा । दत्वास्मै पारितोषिकं ॥
चचाल पादचारेण । वंदनार्थं बलान्वितः ॥ ७७ ॥ गत्वा प्रदक्षिणीकृत्य । वंदित्वा भक्तियोगतः ॥
उचितासनमासीनो । धर्मं शुश्राव पार्थिवः ॥ ७८ ॥ संप्राप्यावसरं राजा । पप्रछ निजसंशयं ॥ क-
थं मे वर्धते लक्ष्मीः । कथमाज्ञाकरो जनः ॥ ७९ ॥ निजगृहोपविष्टस्या—कृतदंभस्य मे सदा ॥
समानीतोपदश्चापि । कथं नेमुर्धराधिपाः ॥ ४०० ॥ कथं मे वल्लभोऽत्यंतं । सुहृन्मलयसुंदरः ॥ स-
विशेषमभीष्टा मे । केन वा जयसुंदरी ॥ १ ॥ अवधिज्ञानविज्ञात—पूर्वजन्मपरंपरः ॥ राजानं प्र-
त्युवाचेदं । सूरिः संतोषसागरः ॥ २ ॥ इतस्तृतीयपर्याये । वाराणस्यां द्विजात्मजः ॥ शंखचूमाभि-
धो भव्यो—ऽभवद्भार्या च दुर्गिला ॥ ३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मधुसुंदरनामा ते । भ्राता भक्तिपरायणः ॥ मधुसुंदरी तद्भार्या । धर्मकर्मपरायणा ॥ ४ ॥ शं-
खचूडो द्विजो मृत्वा । जातो वणिक्सुतस्ततः ॥ भार्याकार्मणदोषेण । धर्मकर्मपरायणः ॥ ५ ॥ स-
र्वज्ञपुरतः शुद्ध—भावसारं पुनः पुनः ॥ कर्पूरागुरुसन्मिश्र—सारश्रीखंडसंयुतः ॥ ६ ॥ धूपो द-
ग्धो विधानेन । मृत्वा देवगतिं गतः ॥ ततश्च्युत्वेह संजातो । नरकांतोदरे सुतः ॥ ७ ॥ तेन पु-
ण्येन ते सर्व—मनुकूलं धनादिकं ॥ भ्राता भ्रांत्वेह संसारे । जातो मलयसुंदरः ॥ ८ ॥ मधुसुंद-
री तद्भार्या । जाता च जयसुंदरी ॥ द्वयोरपि परा प्रीति—स्त्वांप्रति प्रतिवासरं ॥ ९ ॥ एतावत्तु त-
वाप्युच्चै—रासीत्प्रेम निरंतरं ॥ पूर्वजन्मानुभावेन । स्नेहाधिक्यं महीपते ॥ १० ॥ भूयोऽप्युवाच भू-
पोऽथ । पर्यंतो मम कीदृशः ॥ पुण्यानुबंधिपुण्येन । राजन् समवलोकितः ॥ ११ ॥ आदौ मध्येऽ-
वसाने च । शुभं विद्धि त्वमात्मनः ॥ जातिस्मरणविज्ञात—निजपूर्वभवो नृपः ॥ १२ ॥ गृहे ग-
त्वा समालोच्या—मात्यमंत्रिपुरस्तदा ॥ जयसुंदरीसुतं राज्ये—ऽभिषिच्य जयशेखरं ॥ १३ ॥ स-
प्तक्षेत्र्यां धनं दत्वा । कृत्वा यात्रामहोत्सवं ॥ दीनानाथांधपंगुभ्यो । दत्वा दानं यदृच्छया ॥ १४ ॥
सहस्रवाहिशिबिकां । समारुह्य विनिर्गतः ॥ संतोषसामराचार्य—समीपे निर्मलं व्रतं ॥ १५ ॥ ज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ग्राह्य तृणवत्त्यक्त्वा । स्वं राज्यं मेदिनीपतिः ॥ शिक्षाद्वयानुसारेण । कृत्वानुष्ठानमुत्तमं ॥ १६ ॥ केवलं शीलमासेव्य । समभावव्यवस्थितः ॥ कृतसंलेखनो धीरो । धर्मारामरतः सदा ॥ १७ ॥ संप्राप्य केवलं ज्ञानं । लोकालोकप्रकाशकं ॥ सर्वाहारनिरोधेन । विधायानशनक्रियां ॥ १८ ॥ शुक्लध्यानेन निर्दग्ध—सर्वकर्मेंधनो मुनिः ॥ चतुर्गतिविनिर्मुक्तः । पंचमीं गतिमाश्रितः ॥ १९ ॥ कुलकं ॥ इति धूपपूजाकथानकं परिसमाप्तं ॥

धूपपूजाफलं प्रोक्तं । दृष्टांतेन सविस्तरं ॥ दीपपूजाफलं वच्मि । संप्रत्यवसरागतं ॥ १ ॥ समस्ति सकलद्वीप—मध्यस्थश्च स्वशोभया ॥ द्वीपानामुपरीवोच्चै—र्जंबूद्वीपो व्यवस्थितः ॥ २ ॥ तत्रापि भारते क्षेत्रे । षड्भिः खंडैर्विराजिते ॥ समस्ति मध्यमं खंडं । धर्मधाम गुणाश्रयं ॥ ३ ॥ मगधाजनपदस्तत्र । जिनमंदिरराजितः ॥ गुणग्राही गुणाधारो । धर्मवान् धार्मिकप्रियः ॥ ४ ॥ परदोषग्रहे मूको । जात्यंधो दोषदर्शने ॥ सुशीलो वृद्धसेवी च । नरवर्गो विराजते ॥ ५ ॥ युग्मं ॥ नार्यो यत्र स्वसौंदर्यै—र्हेपयंति सुरस्त्रियः ॥ पुष्पेषोः साधनीभूतै—र्विभ्रमैरपि केवलैः ॥ ६ ॥ विकाररहिता लक्ष्मी—र्यौवनं विनयान्वितं ॥ श्रुतं प्रशमसंयुक्तं । शौर्यं क्षांत्या विभूषितं ॥ ७ ॥ य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्थः परोपकाराय । दक्षता धर्मकर्मणि ॥ प्रयत्नपरता नित्यं । व्रतशीलादिरक्षणे ॥ ८ ॥ स्वगुणाविःकृतौ लज्जा । सौहार्दं कारणं विना ॥ एते गुणा विलोक्यंते । यस्मिन्निवसतां सतां ॥ ९ ॥ त्रिभिर्विशेषकं ॥ अस्त्यैश्वर्यवतां धाम । तत्र भानुमती पुरी ॥ ज्ञानबोधा प्रजा यत्र । पताकाभिर्निषिध्यते ॥ १० ॥ रत्नभित्तिषु संक्रांत—संचरज्जनमूर्तिभिः ॥ सजीवानीव लक्ष्यंते । चित्राणि गृहभित्तिषु ॥ ११ ॥ प्रसर्पत्तारतेजोभि—र्हाटकामलसारकैः । राजमार्गा विराजंते । यत्र सर्वज्ञमंदिरैः ॥ १२ ॥ संचारदीपिका यस्यां । भवंत्याभरणप्रभाः ॥ प्रियवेश्मप्रयातीनां । रजन्यां रम्ययोषितां ॥ १३ ॥ तस्यामजनि राजेंद्रो । भानुमान् भुवनप्रियः ॥ यस्य वक्त्रे स्थिता वाणी । लक्ष्मीः खड्गे व्यवस्थिता ॥ १४ ॥ सन्नप्यन्यायशब्दो यो । लुप्तो येन बलात् क्षितौ ॥ इतीव नैव यत्रासीदन्यायो न्यायशालिनि ॥ १५ ॥

अथ तस्य प्रजेशस्य । प्रजाक्षेमविधायिनः ॥ बभूव भूरिशृंगारा । भानुश्रीरिति गेहिनी ॥ ॥ १६ ॥ नीत्या लक्ष्म्या च भूपालो । नैवारमत केवलं ॥ भानुश्रियापि सार्धं स । रेमे राजा यथाक्षणं ॥ १७ ॥ अजायत महादेव्याः । पुत्रो भानुप्रभाभिधः ॥ निजतेजःश्रिया येन । भानुमा

नपि निर्जितः ॥ १८ ॥ दुःसहेन प्रतापेन । रूपेण यशसा श्रिया ॥ शेषैरपि गुणैः सर्वै—स्तेना-
तिशयितः पिता ॥ १९ ॥ द्वासप्ततिकलानां यः । परं पारमुपागतः ॥ धामामलगुणानां च । र-
त्नानामिव सागरः ॥ २० ॥ चलत्वाज्जीवितव्यस्य । तथा सोपक्रमत्वतः ॥ भानुश्रीः सर्पसंदष्टा ।
जगामान्यद्भवांतरं ॥ २१ ॥ तत्पदे स्थापिता चान्या । देवी हारप्रभाभिधा ॥ तद्गुणैर्विस्मृता तस्य
। भानुश्रीः सा हृदि स्थिता ॥ २२ ॥ यद्ब्रूते तत्करोत्येव । यत्कृतं तत्कृतं तया ॥ अविचारो नृप-
स्तत्र । यथा गरुडिको नरः ॥ २३ ॥ यौवनं पल्लवस्तस्याः । सौभाग्यं कुसुमोद्गमः ॥ सूरनामा गु
णाधारः । सत्पुत्रः फलसन्निभः ॥ २४ ॥ भानुप्रभं विलोक्यासौ । विधत्ते हृदि मत्सरं ॥ यावदेष
कुतस्ताव—द्राज्यं तत्तस्य जायते ॥ २५ ॥ अवज्ञादुःखदावाग्नि—दग्धदेहापमानतः ॥ यदेष दूर-
तो याति । म्रियते वा तदा सुखं ॥ २६ ॥ अन्यदा भणितो वत्स । हिताहं तव सर्वदा ॥ भानु-
श्रीरिव द्रष्टव्या । कथनीयं प्रयोजनं ॥ २७ ॥ वस्त्राभरणतांबूल—भक्ष्यभोज्यविलेपनं ॥ पुष्पाणि
च विचित्राणि । संपादयति कस्तव ॥ २८ ॥ कर्म संपादयत्यंब । नान्यः कोऽपि मतिर्मम ॥ किं न
दत्ते पिता पुत्र । नेति तेन प्रजल्पितं ॥ २९ ॥ प्रोक्तं चतुर्गुणं कृत्वा । चित्तोत्तारकृते तथा ॥ रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ङ्गस्तेनापि रुष्टेन । सर्वं चेतसि धारितं ॥ ३० ॥ द्वितीयेऽह्नि प्रजातेऽपि । सवयस्यः समागतः ॥ सभासिंहासनारूढे । राज्ञि राजसुतस्ततः ॥ ३१ ॥ प्रणतः पादयोर्भक्त्या । रूक्षदृष्ट्यावलोकितः ॥ निषसादोचितस्थाने । भणितश्च महीभुजा ॥ ३२ ॥ केन जीवसि रे डिंभ । स प्राह निजकर्मणा ॥ राजाह मुंच मे गेहं । फलं भुंक्ष्व स्वकर्मणां ॥ ३३ ॥ श्रुत्वेदं कर्कशं वाक्यं । सभामध्येऽपमानितः ॥ प्रणम्य च पितुः पादौ । सभामध्याद्विनिर्गतः ॥ ३४ ॥ द्वे वाससी च मुद्रां च । गृहीत्वा निर्गतो गृहात् ॥ गत्वाभिमानतो भुंक्ते । योजनानां चतुष्टयं ॥ ३५ ॥ निजाश्रुस्नेहसन्मिश्रं । मानव्यंजनसंयुतं ॥ भुक्तं नदीतटे तेन । भिक्षयाहृतभोजनं ॥ ३६ ॥ वज्रेणेवापमानेना—मानेन व्याहतो हृदि ॥ पपात श्रांतसर्वांगः । सहकारतरोरधः ॥ ३७ ॥

अत्रांतरे समायाता । स्त्री भानुश्रीसमप्रभा ॥ भानुप्रभस्य सुप्तस्य । पादप्रक्षालनोद्यता ॥३८॥ प्रबुद्धोऽसौ करस्पर्शा—द्रुबितश्च ससंभ्रमः ॥ मातरं च पुरो भूत्वा । प्रोवाच विहितांजलिः ॥३९॥ मातः कुतः समायाता । देवभूयं गतिं गता ॥ अतर्कितसुधासार—समानप्रियदर्शने ॥ ४० ॥ ततः शोकभराक्रांत—कंठयोत्कंठया तया ॥ कृत्वा कुमारमुत्संगे । सदुःखं रुदितं तदा ॥ ४१ ॥ कथं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राणप्रियो भूत्वा । निजपितुस्त्वमीदृशीं ॥ अवस्थां प्रापितो धात्रा । धिग्विमातृविचेष्टितं ॥ ४२ ॥
कुमारेणापि निःशेषो । वृत्तांतः कथितो निजः ॥ तयोक्तं नैव ते खेदः । कर्तुं युक्तो मनागपि ॥
॥ ४३ ॥ आपदः संपदश्चैव । समीपस्थाः शरीरिणां ॥ अस्तोदयौ दिनस्यांतः । सूर्यचंद्रमसोरिव ॥
॥ ४४ ॥ अस्ति भानुमती नाम । मे भगिनी सहोदरी ॥ कलिंगविषये पुर्यां । नगर्यां जनवत्स-
ला ॥ ४५ ॥ तत्रस्थेन त्वया वत्स । नेतव्या विषमा दशा ॥ पश्चादहं करिष्यामि । सर्वं यदुचितं
तव ॥ ४६ ॥ इत्युक्त्वा तत्क्षणादेव । पुर्यां नीतो निजांगजः ॥ नीत्वा समर्पितो नक्तं । भानुमत्या
विशेषतः ॥ ४७ ॥ चिंतामणिमणिं दत्वा । समाघ्राय च मूर्धनि ॥ ध्यातव्या व्यसने वत्से—त्येव-
मुक्त्वा तिरोदधे ॥ ४८ ॥ भानुमत्यपि सत्प्रीत्या । पश्यंती कुमरंप्रति ॥ करोति शेषकार्याणि । स-
तां स्नेहः सदा समः ॥ ४९ ॥ अथ विज्ञाय तत्रस्थं । भानुप्रभकुमारकं ॥ हारप्रभा दृढं चित्ते । दू-
ना चैवं व्यचिंतयत ॥ ५० ॥ अहो पुण्यैः स्वकैरेव । जीवत्येष कुमारकः ॥ निखातं हृदि मे शल्यं
। नितरां न समुध्धृतं ॥ ५१ ॥ यदा तदापकाराय । जीवन्नेष न सुंदरः ॥ सर्वदापि भयस्थानं । व-
र्धमानः सुनिश्चितं ॥ ५२ ॥ प्रेषिता घातकास्तत्र । विषदा गूढचारिणः ॥ चूर्णयोगकराश्चान्ये । यो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गिकापालिकादयः ॥ ५३ ॥ भानुप्रभकुमारस्य । मरणं यः कुरुते नरः ॥ तस्य लक्षं पुनर्लक्षं । द-
दामीत्यभिधाय च ॥ ५४ ॥ समायाताः पुरि सर्वे । मारणोपायतत्पराः ॥ अलक्षिताश्च लोकेन ।
पापा भ्रेमुरितस्ततः ॥ ५५ ॥ भानुश्रीः पुनरायाता । कुशलान्वेषणाय च ॥ कृता रक्षा शरीरस्य ।
निहता दुष्टचेतसः ॥ ५६ ॥ गता भूयोऽपि भानुश्रीः । स्वस्थानं हृष्टमानसा ॥ नानाक्रीडनकैः क्री-
डन् । कुमारस्तत्र तिष्ठति ॥ ५७ ॥

अथैकदा कुमारौ तौ । भानुप्रभमणिप्रभौ ॥ जात्याश्वयोः समारूढौ । चलितौ बलवेष्टितौ ॥
॥ ५८ ॥ दूरं गत्वा निवृत्तेषु । शेषवाजिषु सत्वरं ॥ सुदूरं गंतुमारब्धो । भानुप्रभतुरंगमः ॥ ५९ ॥
वल्गां करद्वयेनोच्चै—राकर्षति यथा यथा ॥ तथा तथा च गृह्णाति । वेगं दुष्टतुरंगमः ॥ ६० ॥
प्रवेशितो महाटव्यां । मुक्ता वल्गा स्थितो हयः ॥ समुत्तीर्णः कुमारोऽपि । वाजी पंचत्वमागतः ॥
॥ ६१ ॥ बुभुक्षितस्तृषार्त्तश्च । परिभ्राम्यन्नितस्ततः ॥ कंदमूलकृताहारः । पीत्वा च समलं जलं ॥
॥ ६२ ॥ सखेदः श्रांतसर्वांगो । विश्राम्य च तरोरधः ॥ शृणोत्यतीवदीनानि । वचांसि रुदितानि
च ॥ ६३ ॥ युग्मं ॥ भानुश्रीकुक्षिसंभूत । भानुप्रभ महाप्रभो ॥ मुंच मे मंदभाग्यायाः । हृदयं मा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मरिष्यसि ॥ ६४ ॥ त्वं जर्त्ता मे समादिष्टो । मुनिना दिव्यचक्षुषा ॥ यशःप्रभेण तस्यापि । वचनं किं वृथा जवेत् ॥ ६५ ॥ अहो निर्मानुषा पृथ्वी । नूनं वीरविवर्जिता ॥ अन्यथा पापपाखंमी । कथं मां मारयत्ययं ॥ ६६ ॥ एवमुक्त्वा जयभ्रांता । मुक्तकंठं रुरोद सा ॥ हृदयान्यपि दीर्यंते । यत् श्रुत्वानार्द्रचेतसां ॥ ६७ ॥ जो जो जीरु न जेतव्यं । मा रोदी लोललोचने ॥ यमजिह्वासमो यावत् । खड्गो मे दक्षिणे करे ॥ ६८ ॥ इति जल्पंस्तदंतेऽसौ । खड्गव्यग्रकरो गतः ॥ इदं निशम्य कोपांधः । कापाली जैरवाजिधः ॥ ६९ ॥ धावितः खड्गमादाय । रुष्टो जानुप्रजंप्रति ॥ पर्यंतो जीवितव्यस्य । स्मर रे पितरौ निजौ ॥ ७० ॥ रे पाप पापबुद्धिस्ते । केन दत्तेयमीदृशी ॥ इत्युक्त्वा वाहितः खड्गो । भैरवेण जयंकरः ॥ ७१ ॥ त्रिभिर्विशेषकं ॥ लब्धलक्षेण दक्षेण । कुमारेणापि वंचितः ॥ गृहीत्वा पादयोस्तूर्णं । मस्तकोपरि धूनितः ॥ ७२ ॥ जैरवेण जयादूचे । तुष्टोऽहं त्वं च मुंच मां ॥ गृहाणेमां महाविद्यां । शक्रसंमोहकारिणीं ॥ ७३ ॥ इमां चानेकरूपाणां । तत्क्षणं करणक्षमां ॥ विद्यां गृहाण येनाहं । कृतकृत्यो जवाम्यलं ॥ ७४ ॥ मुक्तो जूमौ कुमारेण । क्षामितोऽविनयं निजं ॥ जणितश्चेदृशं कर्म । कर्तुं तव न संगतं ॥ ७५ ॥ स प्राहानुग्रहं कृत्वा । वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्याद्वंद्वं गृहाण मे ॥ दत्वा यद्गुरुदक्षिणां । योगशुद्धिं करोम्यहं ॥ ७६ ॥ अकार्ये च प्रवृत्तोऽहं । त्वया नूनं निवारितः ॥ तेन त्वं मे गुरुर्जातः । प्रार्थनां मावजीगण ॥ ७७ ॥ उपरोधगृहीतेन । गृहीतं तेन तद् द्वयं ॥ गतो भैरवकापाली । पृष्टा तेनाथ कन्यका ॥ ७८ ॥ का त्वं वा तनया कस्य । संप्राप्ता व्यसनं कथं ॥ भानुप्रभकुमारस्य । नाम किं वा स्मृतं त्वया ॥ ७९ ॥ तयोक्तं पुत्रिका श्रीम—त्सिंहलाधिपभूपतेः ॥ संजाता कनकश्रीतो । नाम्ना कनकसुंदरी ॥ ८० ॥ गीतनृत्यविनोदेन । रजन्याः प्रहरे गते ॥ रम्ये हर्म्यतले सुप्ता—त्रानीताहं कपालिना ॥ ८१ ॥ विद्यासिद्धिकृते पापो । मां मारयितुमुद्यतः ॥ भानुप्रभश्च मे भर्ता । कथितो मुनिना पुरा ॥ ८२ ॥ कुमारेणापि तुष्टेन । तया पृष्टेन मूलतः ॥ नामांतो निजवृत्तांतः । संक्षेपेण निवेदितः ॥ ८३ ॥ एहि सुंदरि कांतारा—त्तारयामि महाभयात् ॥ इत्युक्त्वा चलितः पूर्वां । सापि तत्पृष्टतः स्थिता ॥ ॥ ८४ ॥ क्षणांतरेण सा ब्रूते । प्रियात्यंतं पिपासिता ॥ व्यक्तं वक्तु न शक्नोमि । तृषा शुष्यति तालुकं ॥ ८५ ॥ आमलकफलं दत्वा । समाश्वास्य पुनः पुनः ॥ नीता स्तोकांतरं तेन । बुभुक्षिता पिपासिता ॥ ८६ ॥ अत्रांतरे महाभोगं । सीतवातेन सूचितं ॥ हंससारसचक्रादि—कूजितेन

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

प्रकाशितं ॥ ८७ ॥ अखंडवनखंडेन । शश्वच्छ्यामायमानया ॥ अदभ्रशुभ्रया पाल्या । परितः परि·
वेष्टितं ॥ ८८ ॥ लावण्यजलसंपूर्णं । भूरमण्या मनोहरं ॥ नाभिहृदमिवाभाति । वृत्तं गंभीरमुज्ज्व·
लं ॥ ८९ ॥ दिशावधूकुमारीणां । मुखालोकनहेतवे ॥ वेधसा निर्मितं मन्ये । विशालमिव दर्पणं
॥ ९० ॥ देवनद्याः पयःपूर—रसातलप्रवेशने ॥ द्वारमिव शशांकस्य । ज्योत्स्नेव भुवमागता ॥९१॥
ग्रहनक्षत्रयुक्तेन । नक्तमंतः प्रसर्पता ॥ स्वच्छताप्रार्थनाहेतो—र्व्योम्नेव कृतसेवनं ॥ ९२ ॥ रक्ताशो·
कसमुद्भूत—पल्लवैः प्रतिबिंबितैः ॥ मांसखंडधिया धाव—न्मुग्धमीनैर्विराजितं ॥ ९३ ॥ तटस्थज·
लसंक्रांत—पूगीफलमहीरुहैः ॥ चलद्भिर्वातसंपर्का—त्सर्पैरिव भयंकरं ॥ ९४ ॥ स्फाटिकाभिरदभ्रा·
भि—र्निश्छिद्राभिः समंततः ॥ निर्मलाभिर्विशालाभिः । शिलाभिर्बद्धभित्तिकं ॥ ९५ ॥ भित्तिरु·
परि दुर्लक्ष—संधिबंधैः सुनिर्मलैः ॥ निबद्धवेदिकं शुभ्र—चंद्रकांतशिलातलैः ॥ ९६ ॥ वेदिका·
लग्नखर्जूर—नालिकेराम्रकेतकैः ॥ पुंनागहिंगुहिंताल—तालपूगैर्विराजितं ॥ ९७ ॥ सुगंधगंधि·
भिः सार्द्रै—र्बकुलै राजचंपकैः ॥ धूलीधाराकदंबैश्च । सर्वतः परिवेष्टितं ॥ ९८ ॥ प्रधाननागवल्ली·
नां । द्राक्षाणां च मनोहरैः ॥ आर्द्रैश्च सरसैः पत्रै—र्मंडितं वरमंडपैः ॥ ९९ ॥ नानानारंगजंबी·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र—दाडिमैर्बीजपूरकैः ॥ वेदिकासन्नसद्वृक्ष—कक्षेण कृतवेष्टनं ॥ १०० ॥ तरंगभंगरंगद्भिः । पयोभिः कृतविस्मयं ॥ तारासरःसमाख्यातं । तारया येन कारितं ॥ १ ॥ तरंगबाहुभिर्दूरा—त्पक्षिणां विरुतेन च ॥ शब्दयंतमिवानेकान् । स्नानपानकृते जनान् ॥ २ ॥ कुलकं ॥

अवगाह्य तत्सरस्तान्यां । स्वशीलमिव निर्मलं ॥ पयः पीतं कृतं स्नान—मुत्तीर्य सरसस्ततः ॥ ॥ ३ ॥ कंदमूलैः फलैश्चैव । द्राक्षाद्यैः सुमनोहरैः ॥ स्मृत्वांतर्गुरुदेवांश्च । विहिता भोजनक्रिया ॥ ॥ ४ ॥ श्रांता लतागृहस्यांतः । स्थिता कनकसुंदरी ॥ कुमारः खड्गमादाय । दुष्टसंरक्षणाकृते ॥५॥ निषण्णो द्वारि निक्षिप्त—लोचनो दिक्षु पश्यति ॥ सरःपालीसमासन्नं । नागवल्लीविराजितं ॥ ६ ॥ वृंदारकैः समाकीर्ण—मुद्यानं नंदनोपमं ॥ आलवालपयःपान—प्रहृष्टमृगयूथकं ॥ ७ ॥ त्रिभिर्विशेषकं ॥ तस्यांतर्वरपुष्पाणि । चिन्वती कोमलैः करैः ॥ दृष्टैका कन्यका तेन । पारिजाततरोरधः ॥ ८ ॥ सारंगयूथमध्यस्था । चंद्रवक्त्रा मृगेक्षणा ॥ उत्तप्तस्वर्णवर्णाङ्गा । यौवनारंभवर्तिनी ॥ ९ ॥ सर्वसीमंतिनीसीमा । शशांकस्येव कौमुदी ॥ शर्वाणी शंकरस्येव । शंकरा प्रियदर्शना ॥ १० ॥ त्रिभिर्विशेषकं ॥ ग्रामं पुरं दिशं स्थानं । यावदेषा प्रबुध्यते ॥ प्रश्नयामि पुरो भूय । तावदेनां मृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गेक्षणां ॥ ११ ॥ चलितः खड्गमादाय । भ्रानुप्रज्ञः सकौतुकः ॥ समीपमागते तस्मिन् । मृगयूथं पलायितं ॥ १२ ॥ सांगभंगं सनिःश्वासं । संभ्रमभ्रांतलोचनं ॥ सापि कंपितुमारब्धा । लतेव पवनाहता ॥ १३ ॥ भ्रानुमतो नरेंद्रस्य । पुत्रोऽहं भूमिगोचरः ॥ दिङ्मोहमोहितो मूढो । बंभ्रमीति मृगेक्षणे ॥ १४ ॥ का त्वं कस्याथवा पुत्री । कानि नामाक्षराणि ते ॥ एकाकिन्या कथं सुभ्रु । शून्यारण्यमलंकृतं ॥ १५ ॥ मनःप्रमोदकारीदं । सरः केनेह खानितं ॥ केन वा कारितं चेद—मुद्यानं नंदनोपमं ॥ १६ ॥ उद्यानांतर्महानेष । प्रासादः केन कारितः ॥ समस्ति निकटे किंचि—द्गोकुलं ग्राम एव वा ॥ १७ ॥ अदत्त्वैवोत्तरं बाला । मार्गतो वलितेक्षणा ॥ जृंभारंभं प्रकुर्वाणा । गता प्रासादसन्मुखी ॥ १८ ॥ स विलक्षः कुमारोऽपि । चिंतयामास मानसे ॥ अहो अलौकिकी कन्या । लोकाचारविवर्जिता ॥ १९ ॥ स्वयमेव समागत्य । पुरतो भूय प्रश्निता ॥ अदर्शितार्थिभावेन । सान्वयाख्यानपूर्वकं ॥ २० ॥ तथापि कथितं नैव । किंचिदप्यनया मम ॥ अहो मयार्थिना नून—मात्मायं मे लघूकृतः ॥ २१ ॥ सखेदश्च निरुत्साह—स्तैरेव चलितः पदैः ॥ लतागृहेऽथ नो सापि । दृष्टा कनकसुंदरी ॥ २२ ॥ निभालयितुमारब्धः । स विलक्ष इतस्ततः ॥ विलो·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किता नदीतीरे । तरुण्याः पदपद्धतिः ॥ २३ ॥ गतः स्तोकांतरं याव—त्पदलग्नो नृपांगजः ॥ दृष्टा लतागृहस्यांत—श्चतस्रो राजकन्यकाः ॥ २४ ॥ द्वारस्थारक्षिका चैका । खड्गहस्ता निरीक्षिता ॥ विकोशासिकरा कांता । मृगाक्षी नवयौवना ॥ २५ ॥ नन्वेका सैव लोलाक्षी । यदर्थं बंभ्रमीम्यहं ॥ पृछामि किं विकल्पेन । प्रविष्टश्च लतागृहे ॥ २६ ॥ ज्ञानुप्रज्ञेण सा पृष्टा । किं त्वं कनकसुंदरी ॥ सापि तां रक्षिकां दृष्ट्वा । रुदत्येव न जल्पति ॥ २७ ॥ रक्षिकापि विमुच्यासिं । समारूढमनोज्ज्वा ॥ प्रोवाच कुमरं वाक्यं । वेपमानांगयष्टिका ॥ २८ ॥ संकाससिंहसूराणां । पुत्रिका धरणीभुजां ॥ सुंदरी मदना तारा । तिस्रस्तरललोचनाः ॥ २९ ॥ एषा च पुनरत्रैव । सुखमुप्ता लतागृहे ॥ रतिग्रहाभिधानेन । भ्रात्रा मेऽक्षत्रकारिणा ॥ ३० ॥ आनीतास्ता गतः सोऽपि । वैताढ्ये निजकार्यतः ॥ इमां विवाहसामग्रीं । संपूर्णां किं न पश्यसि ॥ ३१ ॥ युग्मं ॥ करग्रहं कुमारीणां । कुरु त्वमग्निसाक्षिकं ॥ विधेहि धीर विश्रब्धं । पंचमीं मां चतसृणां ॥ ३२ ॥ सर्वासां संमतं ज्ञात्वा । कुमारेण विवाहिताः ॥ संक्षेपेण कृतं सर्वं । पाणिग्रहणमंगलं ॥ ३३ ॥

अत्रांतरे समायात—स्तत्र वेगान्नभश्चरः ॥ लतागृहाद्विनिर्गच्छ—न्निबद्धनवकंकणः ॥ ३४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नव्यविवाहवेषश्च । सरोषं तेन वीक्षितः ॥ प्रश्निता भगिनी कोऽयं । निर्गतः पुरुषाधमः ॥ ३५ ॥
युग्मं ॥ हे भ्रातरार्यपुत्रोऽयं । भानुमन्नृपनंदनः ॥ विश्वविश्वंभराभार—धरणोध्धुरकंधरः ॥ ३६ ॥
रे पापे केन ते दत्तो । येनाजन्यार्यपुत्रकः ॥ अथैनं प्रथमं ताव—न्मारयामि नराधमं ॥ ३७ ॥
पश्चादेनां महापापां । भगिनीरूपवैरिणीं ॥ यया कामांधया सत्या । वंचितः स्वसहोदरः ॥ ३८ ॥
रे पाप जार दुर्जात । दुराचार नराधम ॥ केनैताः कन्यका दत्ता—स्त्वया येन विवाहिताः ॥३९॥
एताः स्वार्थं मयानीताः । सामग्री सकला कृता ॥ त्वया तु दुर्जनेनैवं । भिडं लब्ध्वा विवाहिताः
॥ ४० ॥ शस्त्रं गृहाण कालस्ते । क्रुद्धो मूढाधुना ध्रुवं ॥ अद्यैव पाप ते मूर्ध्नि । सद्यः पततु पा-
तकं ॥ ४१ ॥ भानुप्रभकुमारोऽपि । दुर्वचःशरशल्यितः ॥ केसरीव निराशंको । दुढौके तस्य सन्मु-
खः ॥ ४२ ॥ खेचरेणापि निस्त्रिंशो । वाहितः कुमरंप्रति ॥ मुहूर्तं मूर्छितस्तेन । स्थितो भूपाल-
नंदनः ॥ ४३ ॥ भूयोऽपि लब्धचैतन्यः । खड्गमादाय धावितः ॥ तीक्ष्णखड्गप्रहारेण । प्रहतो द-
क्षिणे करे ॥ ४४ ॥ मुमोच दक्षिणं बाहुं । खड्गेन सह खेचरः ॥ स्मृता विलक्षवक्त्रेण । तेन वि-
द्या समागता ॥ ४५ ॥ वद वत्स च मे कार्यं । चिंतिताहं समागता ॥ दुराचारं दुराशं मे । मात-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मारय वैरिणं ॥ ४६ ॥ विधाय विकृतं रूपं । संवर्ध्य च नभस्तले ॥ भुजपंजरमध्यस्थं । कृत्वा च नृपनंदनं ॥ ४७ ॥ गत्वोर्ध्वं नभसा सापि । चलिता दक्षिणां दिशं ॥ समुद्रे प्रक्षिपाम्येन—मिति बुध्या कदाशया ॥ ४८ ॥ हता खड्गप्रहारेण । मूर्ध्नि भानुप्रभेण सा ॥ मुक्त्वा खिन्ना कुमारं च । गता विद्या यथागतं ॥ ४९ ॥ कुमारोऽपि नभोमार्गा—त्पतितो निम्नगाजले ॥ ततार तारबाहुभ्यां । नदीमदीनमानसः ॥ ५० ॥ विश्रम्य च नदीतीरे । कंदमूलकृताशनः ॥ अजानानो दिशां भागं । स चचालैकया दिशा ॥ ५१ ॥

स्तोकांतरं गतेनाथ । ददृशे वंशजालिका ॥ द्वारदेशसमासीना । स्त्री दृष्टा गतयौवना ॥ ॥ ५२ ॥ निरुद्धपदसंचारा । त्रस्तमुग्धमृगेक्षणा ॥ दृष्टैका कन्यका मध्ये । लावण्यामृतसारणी ॥ ॥ ५३ ॥ उपसृत्य कुमारेण । प्रणम्येदं प्रजल्पितं ॥ का त्वं च केन कार्येण । दृश्यसे भयविह्वला ॥ ५४ ॥ केयं मध्यस्थिता कन्या । कः प्रदेशोऽयमुच्यतां ॥ न जानेऽहं महाभागे । तेन पृछामि कथ्यतां ॥ ५५ ॥ अथ वृद्धा प्राह—इतो योजनमात्रेण । वत्साविषयभूषणा ॥ सुवत्सास्ति पुरी तत्र । नरेंद्रश्चंद्रशेखरः ॥ ५६ ॥ चंद्रलेखा महादेवी । रूपसौभाग्यभाजनं ॥ सर्वाणी शंकरस्येव ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शशांकस्येव कौमुदी ॥ ५७ ॥ उपयाचितशतैस्तस्या । एकैवाजनि कन्यका ॥ सम्मता मातृपित्रोः सा । भ्रातॄणां नेत्रकौमुदी ॥ ५८ ॥ दानसन्मानसत्कारैः । पूजयित्वा महाजनं ॥ सूरश्रीरिति नामास्याः । समये संप्रतिष्ठितं ॥ ५९ ॥ पित्रा पृष्टः प्रहृष्टेन । समाहूय सगौरवं ॥ नैमित्तिकः शुभारंभः । ख्यातः सत्यप्रभावकः ॥ ६० ॥ नैमित्तिक शरीरेऽस्या । लक्षणानि निवेदय ॥ निरूप्य भणितं तेन । राजपुत्रीशरीरकं ॥ ६१ ॥ राजन् कल्याणमालेयं । चतूराज्यनिबंधना ॥ जन्मग्रहबलं श्रेष्टं । लक्षणानि शुभानि च ॥ ६२ ॥ कल्याणभाजनं भव्यः । शुभग्रहनिरीक्षितः ॥ धन्यः कोऽपि युवा योऽस्याः । करिष्यति करग्रहं ॥ ६३ ॥ विसर्जितः शुभारंभ—श्चंद्रशेखरभूभुजा ॥ चंद्रलेखा समाहूता । तस्याः सर्वं निवेदितं ॥ ६४ ॥ विस्तृतं सर्वराज्येषु । शुभारंभप्रजल्पितं ॥ देशे देशे पुरे ग्रामे । तैलबिंदुर्यथा जले ॥ ६५ ॥ विषयराज्यलोभेन । राजानस्तां ययाचिरे ॥ न निषेधं न वा दानं । कुरुते चंडशेखरः ॥ ६६ ॥ केरलाधिपसूरस्य । राज्ञो दूतः समागतः ॥ नृपं प्रणम्य दूतेन । सदर्पं जल्पितं वचः ॥ ६७ ॥

सूराय तनुजां दत्वा । सुखं भुंक्ष्व महीपते ॥ कृतं कालविलंबेन । युद्धसज्जो भवाथवा ॥६८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अज्ञस्तव नृपो दूत । जानानपि न कोविदः ॥ न्यायेन लभ्यते कन्या । तत्रापि गुणसंपदा ॥६९॥
अर्धचंद्रं गले दत्वा । दूतो निष्काशितो पुरात् ॥ गत्वा तेनापि सूराय । सविशेषं निवेदितं ॥
॥ ७० ॥ श्रुत्वा दूतवचः सूरो । दिदीपे क्रोधवह्निना ॥ विधाय सर्वसामग्रीं । चचालोध्धुरकंधरः ॥
॥ ७१ ॥ अचिरादेव संप्राप्तः । सुवत्सां सूरपार्थिवः ॥ चंद्रशेखरभूपोऽपि । नोपसर्पति मानतः ॥
॥ ७२ ॥ बहिः स्थातुं न शक्नोति । योध्धुमल्पबलो यतः ॥ दग्धतृणेंधनो मानी । विनाशितज-
लाशयः ॥ ७३ ॥ जलेंधनतृणादीनां । प्रभूतकृतसंग्रहः ॥ पूर्वव्युच्छिन्नभूपाल—संधानकरणोद्यतः
॥ ७४ ॥ मध्यस्थकूपवाप्यादि—संशोधितजलाशयः ॥ शूरसामंतमंत्र्यादि—सार्धं रक्षितगोपुरः ॥
॥ ७५ ॥ प्राकारशिखरासक्त—शिलाशतसमाकुलां ॥ यंत्रस्थटोलपाषाण—पातभीतारिपौरुषां ॥
॥ ७६ ॥ प्राकारासन्नविस्तीर्ण—खातिकांभःसमाकुलां ॥ जात्याश्वहेषितारव—भृतांबररसातलां ॥
॥ ७७ ॥ निरुद्धजनसंचारां । दुःप्रवेशविनिर्गमां ॥ सुवत्सां नगरीं कृत्वा । प्रतस्थे चंद्रशेखरः ॥७८॥
कुलकं ॥ सूरोऽपि पर्वताकारै—र्मदमत्तमतंगजैः ॥ प्राकारपातनायाथ । सन्नद्धः सपरिच्छदः ॥७९॥
सुवत्सा वेष्टिता तेन । परितो मत्तवारणैः ॥ वाजिभिः स्यंदनैः सौरैः । पादातैर्गुरुविक्रमैः ॥ ८० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सूरश्रियं समादाय । दासदासीसमन्विता ॥ उपयाचितदानार्थं । पूर्वमेव त्वहं गता ॥ ८१ ॥ दूर- स्थभैरवीगेहे । कृतस्तत्रैव जागरः ॥ प्रभाते चलिता यावद् । दृश्यते नार्कमंमलं ॥ ८२ ॥ हृदया- न्यपि दीर्यंते । शिवानां फारफेत्कृतैः ॥ वचो न श्रूयते तत्र । घूकानां घोरघूत्कृतैः ॥ ८३ ॥ न प्राकारो न वेश्मानि । न च देवकुलानि च ॥ दृश्यंते हेतुना केन । किं वा मे मतिविभ्रमः ॥ ॥ ८४ ॥ चिरं निरीक्ष्य सत्रासं । कुंतलेन प्रजल्पितं ॥ भद्रे नगररोधोऽयं । लक्ष्यते शत्रुणा कृतः ॥ ८५ ॥ सूरश्रियं समादाय । गम्यते न विलंब्यते ॥ तथैव कृतमस्माभि—रहमत्र समागता ॥ ॥ ८६ ॥ शेषः परिजनः सर्वः । कोऽपि क्वापि विसर्जितः ॥ कंचुकी कुंतलो वृद्धो । जटाभारधरः कृतः ॥ ८७ ॥ दासीकुब्जीसमुद्भूतौ । दासौ कपिलकेरलौ ॥ अव्यक्तलिंगिनौ जातौ । परानीके विचेरतुः ॥ ८८ ॥ सर्वत्र तत्र तौ भ्रांत्वा । ज्ञात्वा वार्तां च शात्रवीं ॥ दिने दिने समागत्य । क- थयामासतुर्मम ॥ ८९ ॥

एवं करोति सा याव—त्स्ववृत्तांतनिवेदनं ॥ भानुप्रभकुमारस्य । पुरतः प्रीतमानसा ॥ ९० ॥ तावत्तूर्णपदैर्धावन् । श्वाससंपूरिताननः ॥ वृद्धांतिके समायातः । कंचुकी कुंतलाभिधः ॥ ९१ ॥ यु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ग्मं ॥ व्याकुलौ दृश्यसे भद्र । केन कार्येण कथ्यतां ॥ तेनापि भणितं भद्रे । संक्षेपेण निशम्यतां ॥ ७२ ॥ अद्य दासीसुतौ दृष्टौ । केरलाधिपमंत्रिणा ॥ पृष्टौ च कौ भवंतौ च । कस्यादेशादिहागतौ ॥ ७३ ॥ अशक्तावुत्तरं दातुं । क्षोभितौ लोललोचनौ ॥ नियम्य सुदृढं रज्ज्वा । कशादंडैः समाहतौ ॥ ७४ ॥ समर्पितौ नरेंद्रस्य । तेनापि च कदर्थितौ ॥ पृष्टौ रे कथ्यतां कुत्र । चंद्रशेखरकन्यका ॥ ७५ ॥ तच्छुद्धिं यदि जानीथः । स्वर्णकोटिं ददाम्यहं ॥ अन्यथा मारयाम्येव । युवामत्र न संशयः ॥ ७६ ॥ विस्मृतस्वामिसन्मानै—र्जीवितार्थोपलोभितैः ॥ कुमारी कथिता तस्मै । स्वाभिज्ञानपुरस्सरं ॥ ७७ ॥ इत एति महीनाथः । सूरः सबलवाहनः ॥ श्रुत्वेदं मूर्छिता वृद्धा । पतिता मेदिनीतले ॥ ७८ ॥ क्रंदंती निर्गता मध्या—त्सूरश्रीः संभ्रमाकुला ॥ माभैषीरंब निस्त्रिंशो । यावन्मे दक्षिणे करे ॥ ७९ ॥ इत्युक्त्वा पतितः शक्र—सैन्ये कुमरकेसरी ॥ पराजितं च तत्तेन । सूरः स्वयमुपागतः ॥ २०० ॥ युग्मं ॥ सोऽपि खड्गप्रहारेण । प्रहतः पतितो भुवि ॥ वलितं च भयाक्रांतं । कृतकोलाहलं बलं ॥ १ ॥ कुमारेण स्मृता विद्या । शत्रुसंमोहकारिणी ॥ कापालिकेन या दत्ता । सुप्तं तयाखिलं बलं ॥ २ ॥ कुमारस्योपचारेण । सूरः स्वास्थ्यमुपागतः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतिविद्याप्रदानेन । बलं च प्रगुणीकृतं ॥ ३ ॥ चंद्रशेखरनृपोऽपि । बहिरेव समागतः ॥ कृता परस्परं मैत्री । सहैव पुरमागताः ॥ ४ ॥ चंद्रशेखरभूपेन । सूरश्री राज्यसंपदा ॥ भानुप्रभकुमाराय । दत्ता प्रीतिपुरस्सरं ॥ ५ ॥ सूरेणापि कुमारस्य । दुहिता केरलाभिधा ॥ प्रार्थनापूर्वकं दत्वा । विस्तरेण विवाहिता ॥ ६ ॥

अत्रांतरे समायाता । विद्युत्सेना नभश्चरी ॥ चतस्रोऽपि समादाय । पंचमी मुक्तकंचुका ॥ ॥ ७ ॥ भणितं च कुमारेण । युष्माकं क्षेम वर्तते ॥ विद्युत्सेनाह सोद्वेगं । क्षेमाक्षेमं च वर्तते ॥ ॥ ८ ॥ मनःसमुद्रशकेंदु—रद्य त्वं येन वीक्षितः ॥ महोदयसमारूढ—स्तेन नः क्षेम वर्तते ॥९॥ विद्यामुक्तश्च भ्राता स । कन्यकानां वधोद्यतः ॥ यन्मारितो मयाऽक्षेम । तेन नाथ निगद्यते ॥ ॥ १० ॥ प्रयोजनप्रियः प्रायो । जनोऽयं न जनप्रियः ॥ पत्युः प्रयोजने येन । भगिन्या भ्राता निपातितः ॥ ११ ॥ भानुप्रभवचो लब्ध्वा । तया दत्तो जलांजलिः ॥ गृहीतः कंचुकः पृष्टौ । पतितश्च सहोदरः ॥ १२ ॥ लतागृहे समूढानां । कन्यकानां चतसृणां ॥ पितरो मिलितास्तत्र । सूरेण सममागताः ॥ १३ ॥ दृष्ट्वा दुहितरस्ताभि—र्वृत्तांतः कथितो निजः ॥ तेन सत्पात्रयोगेन । ननं·

दुः सुतरां नृपाः ॥ १४ ॥ सूरेणापि निजं राज्य—मपुत्रेण समर्पितं ॥ भानुप्रभकुमारस्य । चतु-
रंगबलान्वितं ॥ १५ ॥ निःसंतानो गतानंदः । सूरः संहृतविस्तरः ॥ न केवलं तपस्तेपे । शिश्रिये
च तपोवनं ॥ १६ ॥ गीतनृत्यविनोदेन । रजन्याः प्रहरे गते ॥ सुप्तो हर्म्यतले रम्ये । तल्पे स-
र्वांगकोमले ॥ १७ ॥ प्रभाते च प्रबुद्धोऽसौ । प्रासादशिखरस्थितं ॥ पश्यत्यात्मानमत्रस्तः । किमे-
तदिति विस्मितः ॥ १८ ॥ न तत्सौधतलं रम्यं । न तल्पं तूलकोमलं ॥ सुवत्सा नगरी नैषा । न
कांताः कमलेक्षणाः ॥ १९ ॥ एवं तर्कपरो याव—दास्ते भानुमदंगजः ॥ तावत्तारा समायाता ।
देवता तत्र वासिनी ॥ २० ॥ मातः का त्वं वने शून्ये । प्रासादः केन कारितः ॥ उद्यानं च कृतं
केन । कस्य कीर्तिसरोवरं ॥ २१ ॥ केनेदं कारितं रम्यं । मंदिरं मदनद्विषः ॥ चराचरजगद्बंधो—
र्नाभेयस्य महात्मनः ॥ २२ ॥ सापि वक्तुं समारेभे । बाष्पांभोभृतलोचना ॥ ताराहं वनदेवीह ।
प्रासादोऽयं मया कृतः ॥ २३ ॥ सरश्च जलसंपूर्णं । कल्लोलालिविराजितं ॥ युगादिजिननाथस्य ।
मंदिरं च मया कृतं ॥ २४ ॥ आरामोऽपि मयाकारि । नानावनविराजितः ॥ पूजार्थं पूजनीयस्य ।
वृषभस्य जगद्गुरोः ॥ २५ ॥ भणितं च कुमारेण । यतस्त्वं वनदेवता ॥ स्वछंदचारिणां कार्यं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किमेतैर्विस्मयो मम ॥ २६ ॥ तयाभाणि महाभाग । संक्षेपात् शृणु कारणं ॥ अंगाजनपदस्यांतः । श्रीविलासपुरं पुरं ॥ २७ ॥ श्रीविलासो नृपस्तत्र । मंदिरं सर्वसंपदां ॥ कामश्रीर्गेहिनी तस्य । रूपलावण्यशालिनी ॥ २८ ॥ शतोपयाचितैर्जाता । अहमेकैव कन्यका ॥ तस्याः प्रतिष्टितं नाम । जयश्रीरिति सुंदरं ॥ २९ ॥ अवंतिवर्धनेनाहं । कलिंगाधिपसूनुना ॥ परिणीता प्रमोदेन । व्रजंति मम वासराः ॥ ३० ॥ संभूतो मेऽन्यदा गर्भो । मृतश्चावंतिवर्धनः ॥ कीर्तिधर्माभिधस्तस्य । भागिनेयः प्रतिष्टितः ॥ ३१ ॥

अन्यदा च सशंकेन । पृष्टो नैमित्तिकः स्वयं ॥ स्थिरं मे भद्र किं राज्यं । चलं वेति निगद्यतां ॥ ३२ ॥ जयश्रीकुक्षिसंभूतां । कन्यां यः परिणेष्यति ॥ स एतद्भोक्ष्यते राज्यं । निश्चयं यदि जल्प्यते ॥ ३३ ॥ नैमित्तिक गृहं याहि । हृदि धार्यमिदं त्वया ॥ एकांते भणितस्तेन । दृढधर्मा स्वमातुलः ॥ ३४ ॥ जयश्रियं गृहीत्वा त्वं । नयामि त्वां पितुर्गृहे ॥ इत्युक्त्वा गच्छ कांतारे । व्यापाद्यागच्छ सत्वरं ॥ ३५ ॥ प्रतिपद्य वचस्तस्य । एकाकी च मया समं ॥ रथमारुह्य वेगेन । कांतारमिदमागतः ॥ ३६ ॥ ततो रथात्समुत्तीर्य । निवेद्य नृपशासनं ॥ कटीतटात्समाकृष्टा । तेन ती-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दग्धासिधेनुका ॥ ३७ ॥ तीव्रार्ककरसंपर्क—दुर्दर्शामसिपुत्रिकां ॥ दृष्ट्वाहं कंपितुं लग्ना । लतेव प-
वनाहता ॥ ३८ ॥ भीतायाः पतितो गर्भो । भूतलेऽजनि पुत्रिका ॥ हताहं च मृतात्रैव । संजाता
वनदेवता ॥ ३९ ॥ दारिकां मारयन् सोऽपि । वनदेव्या निपातितः ॥ पापानां निपतत्येव । पाप-
मत्रैव जन्मनि ॥ ४० ॥ स्त्रीहत्यां भ्रूणहत्यां च । कृत्वासौ जावतोऽधमः ॥ महापापभराक्रांतो । मृ-
त्वा च दुर्गतिं गतः ॥ ४१ ॥ स्त्रीहत्यां हि महापाप—महानर्थनिबंधनं ॥ महापापाः प्रकुर्वंति । दु-
र्गदुर्गतिगामिनः ॥ ४२ ॥ अनाचारे मतिर्यस्य । जन्मद्वयं निहंति सः ॥ दुर्गतिः परलोकेऽस्य ।
लोके चेह विडंबना ॥ ४३ ॥ पुत्रिकापि मया पुत्र । महामोहेन पालिता ॥ सांप्रतं च वरप्राप्तौ ।
चिंता मे हृदये स्थिता ॥ ४४ ॥ मानुषी तु न देवेषु । मनुष्येषु न रूपवान् ॥ वरोऽस्या विद्यते
योग्यः । सचिंतं तेन मे मनः ॥ ४५ ॥ वरचिंताकुला याव—त्तिष्ठामि प्रतिवासरं ॥ तावदन्यदिने
दृष्टा । तत्पासीनातिदुःखिता ॥ ४६ ॥ एकाकिन्येव जल्पंती । रुदंती च पुनः पुनः ॥ शून्यचित्ता
ह्यधोवक्त्रा । भ्रष्टमंत्रेव योगिनी ॥ ४७ ॥ युग्मं ॥ अहो मे निर्घृणं कर्म । कृतमज्ञानदोषतः ॥ न
दत्तमुत्तरं तस्य । सस्नेहं पृच्छ्यमानया ॥ ४८ ॥ लज्जानुरोधतो नैष । युवा संभाषितो मया ॥ दू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रस्था सांप्रतं लज्जा । दुःखं निपतितं मम ॥ ४९ ॥ क यामि कुत्र तिष्ठामि । परित्राणं कुतो भ-
वेत् ॥ मनो मेऽपहृतं तेन । कायस्तिष्ठति केवलः ॥ ५० ॥ वने जाता वने भुक्ता । वने वृद्धिमु-
पागता ॥ कुतोऽस्या ईदृशो भावः । प्रादुर्भूतो ह्यशिक्षितः ॥ ५१ ॥ ससंभ्रमं समागत्य । मया पृ-
ष्टा पुनः पुनः ॥ बाधते किं शरीरे ते । रुद्यते किं पुनः पुनः ॥ ५२ ॥ एवमापृच्छ्यमानापि । रु-
दत्येव हि केवलं ॥ नाचष्टे कारणं किंचि—त्ततोऽहं मौनमाश्रिता ॥ ५३ ॥ सामान्येन मया ज्ञा-
तं । दृष्टः कोऽपि युवानया ॥ निर्निमित्ता न जायंते । भावाः कामसमुद्भवाः ॥ ५४ ॥ वत्से चिं-
ता न कर्तव्या । चिंतेयं मम सांप्रतं ॥ तथा तथा करिष्यामि । सुखितासि यथा यथा ॥ ५५ ॥
ततश्चेदं समाकर्ण्य । निपत्य मम पादयोः ॥ स्नाता भुक्ता प्रतीता च । रेमे च हरिणैः सह ॥५६॥
इतश्चेतो गवेषंत्या । ग्रामेऽरण्ये जले स्थले ॥ न दृष्टो न श्रुतः क्वापि । विफलो मे परिश्रमः ॥
॥ ५७ ॥ अद्य सुप्तो मया दृष्टो । वत्सायां पुरि मंदिरे ॥ चंद्रशेखरराजस्य । तद्रूपेऽस्याश्च मनो-
हरः ॥ ५८ ॥ गते यामे च यामिन्याः । सुप्ते परिजनेऽखिले ॥ दत्वापस्वापिनीं विद्या—मानीतो-
ऽसि मयाधुना ॥ ५९ ॥ वत्स खेदो न कर्तव्यो । ह्यवज्ञातोऽहमेतया ॥ अज्ञानमथवा लज्जा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हयमत्रापराध्यति ॥ ६० ॥ सर्वं दैव सलज्जोयं । दोषादोषं गुणागुणं ॥ नैव जानात्यतस्तुभ्यं । नानया दत्तमुत्तरं ॥ ६१ ॥ शरदभ्रसमानानि । मनांसीह मनस्विनां ॥ बहिरुष्णानि कार्येण । मध्ये शीतानि सर्वदा ॥ ६२ ॥ कन्यकैणामुखी नाम । प्राणेभ्योऽपि मम प्रिया ॥ सा तुभ्यं दीयते वत्स । वाक्यं मे मा वृथा कृथाः ॥ ६३ ॥ अत्रांतरे समायाता । सुतारा नाम देवता ॥ दृष्ट्वा भानुप्रभं पुत्रं । रुद्धकंठं रुरोद सा ॥ ६४ ॥ कृत्वोत्संगे समाघ्राय । पुत्रं मूर्ध्नि मुहुर्मुहुः ॥ सुतारोवाच हे वत्स । कुशलं ते शरीरके ॥ ६५ ॥ सर्वत्र कुशलं मात—र्मा कार्षीर्दुःखितं मनः ॥ सुखदुःखानि सर्वेषां । समीपस्थानि देहिनां ॥ ६६ ॥ आतिथेयं समासाद्य । तारातो ह्युचितं ततः ॥ सौजन्यवर्धितानंदा । सुतारा मुमुदेतरां ॥ ६७ ॥ परस्परं समालापो । जातस्तारासुतारयोः ॥ कृता विवाहसामग्री । मिलिता वनदेवताः ॥ ६८ ॥ भानुप्रभकुमारेण । प्रशस्ते तिथिवासरे ॥ एणामुखी विधानेन । परिणीता मुदा तदा ॥ ६९ ॥ कोटिशः स्वर्णरत्नानि । वरवस्त्राणि कोटिशः ॥ दत्तानि वनदेवीभिः । सर्वं हि महतां महत् ॥ ७० ॥ ततो गताश्च सर्वे ते । मिलित्वा जिनमंदिरे ॥ पूजा कृता विधानेन । विधाय जिनवंदनं ॥ ७१ ॥ भानुप्रभः पुरोभूय । प्रमोदभरनिर्भरः ॥ युगा-

दिधर्मकर्तारं । तुष्टुवे तुष्टमानसः ॥ ७२ ॥

युगादिजिन योगीश । योगिगम्य निरंजन ॥ रागद्वेषमहामोह—मुक्तमूर्ते नमोऽस्तु ते ॥ ॥ ७३ ॥ अद्यैव सफलं जन्म । यौवनं जीवितं च मे ॥ शांता कांता शिवा सौम्या । यन्मूर्तिस्ते· ऽवलोकिता ॥ ७४ ॥ एवं देवं नमस्कृत्य । युगादिजिननायकं ॥ मंमपस्थे ततस्तस्मिन् । देव्यः प्रे· क्षां प्रचक्रिरे ॥ ७५ ॥ प्रगीतं किन्नरैर्गीतं । वादितं व्यंतरैः सुरैः ॥ प्रनृत्तं वनदेवीभि—र्हावभाव· पुरस्सरं ॥ ७६ ॥ प्रणम्य परमात्मानं । दत्वा नीवीं द्विलक्षिकां ॥ स्वस्थानं च गताः सर्वे । प्रमोद· भरनिर्भराः ॥ ७७ ॥ माता विसर्जिता स्थाने । वनदेव्योऽपि तथैव च ॥ स्वयं तारानिरोधेन । त· त्रैवासांचकार सः ॥ ७८ ॥ तारासरःसमुद्भूत—पयःपालीष्वनारतं ॥ वनेषु वनखंडेषु । ह्युद्याना· रामभूमिषु ॥ ७९ ॥ तारा जिनगृहे भक्त्या । नृत्यत्येणामुखी सदा ॥ वीणां च वादयत्येष । सु· ग्रामस्वरमूर्छनं ॥ ८० ॥ एणामुख्या समं तस्य । क्रीडतो यांति वासराः ॥ क्षणात्सौख्यं क्षणादुःखं । करोति विधिरंगिनां ॥ ८१ ॥ नक्तं स्वकांतया सार्धं । सुप्तः शुश्राव सुस्वरं ॥ वीणावेणुमृदंगानां । गीतं च श्रुतिकोमलं ॥ ८२ ॥ कांते कोऽयं जनो धन्यो । जिनस्याग्रे मनोरमां ॥ प्रेक्षां क·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रोति पुण्यात्मा । सावोचत् श्रूयतां प्रिय ॥ ८३ ॥ सरःपाचीनिकुंजेषु । सिद्धविद्या नभश्चराः ॥ अ-
ष्टाह्निकां महापूजां । चक्रुरत्र कृतादराः ॥ ८४ ॥ गम्यते दृश्यते पूजा । कीदृग्विद्याधरो जनः ॥
कीदृशं वादितं तस्य । गीतं नृत्यं च कीदृशं ॥ ८५ ॥ तयोक्तं कांतकायस्त्वं । एकाकी भूमिगो-
चरः ॥ मानर्थः कोऽपि जायेत । तेन यानं न संगतं ॥ ८६ ॥ हितेयं संगतं ब्रूते । संत्रस्तमृग-
लोचना ॥ न जगाम स्थितोऽत्रैव । नीतिमान् कमलाशयः ॥ ८७ ॥

इतश्च कीर्तिधर्मेण । नक्तं स्वप्नोऽवलोकितः ॥ सिंहासनादहं भ्रष्टः । पतितो मेदिनीतले ॥
॥ ८८ ॥ स्वयं शंकितचित्तेन । गणकाय निवेदितं ॥ तेनापि भणितं शीघ्रं । बलभंगो भविष्य-
ति ॥ ८९ ॥ स्वप्नो न संगतो भाति । न स्यादस्यानृतं वचः ॥ दृढधर्मोऽपि नायाति । नेदं क-
ल्याणकारणं ॥ ९० ॥ आप्तनराः समाहूताः । शिक्षयित्वा विसर्जिताः ॥ शालाटव्यां द्रुतं यात ।
दृढधर्मगवेषणां ॥ ९१ ॥ कृत्वा सर्वत्र भूयोऽपि । समागच्छत सत्वरं ॥ न जाने तस्य किं वृत्तं ।
साशंकं मम मानसं ॥ ९२ ॥ युग्मं ॥ गतास्ते तत्र सर्वत्र । कृता तस्य गवेषणा ॥ न दृष्टो दृष्ट-
मेकत्र । निर्मांसमस्थिपंजरं ॥ ९३ ॥ तारासरःसमासन्ने । कांतकांतासमन्वितः ॥ दृष्टश्चैको युवा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कोऽपि । कामदेव इवापरः ॥ ९४ ॥ निषेदुषः पतत्यस्य । नजसः सिंहविष्टरं ॥ शिरोपरि धृतं याति । छत्रमस्य नरं विना ॥ ९५ ॥ सव्येतरविभागे च । लुलतो वरचामरे ॥ नरं विनापि तस्यैते । जीवद्भिः किं न दृश्यते ॥ ९६ ॥ अत्रांतरे समायाता । योषैका कांतदर्शना ॥ कृतानि मंगलान्यस्य । सर्वाण्यपि तयांजसा ॥ ९७ ॥ प्रणम्य नणिता तेन । मुंच मामंब सांप्रतं ॥ तयोक्तं कीर्तिधर्मस्य । राज्ये त्वमनिषिष्च्यसे ॥ ९८ ॥ इतश्च पंचमेऽह्नि त्वं । निश्चलीकुरु मानसं ॥ मात्वरिष्या गरिष्टत्व—मित्युक्त्वा सा तिरोदधे ॥ ९९ ॥ युग्मं ॥ वयमप्येतदाकर्ण्य । भीतनीता डुतं डुतं ॥ युष्मत्समीपमायाता । पानजोजनवर्जिताः ॥ २०० ॥ कथितं स्वामिने सर्वं । यथा दृष्टं यथा श्रुतं ॥ आसन्नं व्यसनं देव । ह्युपायः कोऽपि चिंत्यतां ॥ १ ॥ कीर्तिधर्मोऽपि तत् श्रुत्वा । चतुरंगबलान्वितः ॥ नगरान्निर्गतः क्रोधा—क्रुतः शालाटवींप्रति ॥ २ ॥ दिवा रात्रौ च वेगेन । ह्यखंमितप्रयाणकैः ॥ तारासरःसमासन्ने । ताराराме कृतस्थितिः ॥ ३ ॥ आरामे च कृतावासं । कीर्तिधर्मं विलोक्य सः ॥ चचाल समरापेक्षी । सिंहो गजघटां यथा ॥ ४ ॥ रे रे गृह्णीत शस्त्राणि । प्रगुणीनव सांप्रतं ॥ सुप्तमत्तप्रमत्तेषु । न प्रहारं करोम्यहं ॥ ५ ॥ एकाकिनं तकं दृष्ट्वा । निर्जीकाः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थिरमानसाः ॥ शरं कृत्वा समायाताः । प्रवृत्तो दारुणो रणः ॥ ६ ॥ रथस्थेषु गजस्थेषु । वाजि-
स्थेषु पदातिषु ॥ पतत्सु सत्सु सर्वत्र । संकीर्णाजनि मेदिनी ॥ ७ ॥ गजस्कंधात्समाकृष्टो । गृध्रे-
णेव भुजंगमः ॥ न ज्ञायते गतः क्वापि । कीर्तिधर्मो नराधिपः ॥ ८ ॥ दत्वावस्वापिनीं निद्रां ।
शायितं सकलं बलं ॥ अस्तं गते रवौ रात्रौ । यथा पद्मवनं तथा ॥ ९ ॥ तारा समागता दृष्टं ।
भानुप्रभविचेष्टितं ॥ प्रतिविद्याविधानेन । नष्टनिद्रं समुत्थितं ॥ १० ॥ कीर्तिधर्मं न पश्यंति । येन
सार्धं समागताः ॥ तारया कथितं सर्वं । तेभ्यस्तस्य च चेष्टितं ॥ ११ ॥

ततो विरक्तचित्तैस्तैः । प्रधानैः प्रतिपादितं ॥ भानुप्रभकुमारोऽयं । तस्य स्थाने निवेश्यतां ॥
॥ १२ ॥ तारया भणितं भद्राः । कुरुध्वं स्वसमीहितं ॥ कृतस्य करणं नास्ति । कालक्षेपो न सं-
गतः ॥ १३ ॥ श्रीविलासपुरे नीतो । राजामात्यपुरस्सरैः ॥ कीर्तिधर्मपदे राज्ये । स्थापितो वरमंग-
लैः ॥ १३ ॥ राज्ये स्वचिंतका मुक्ता—श्चंद्रशेखरसूरयोः ॥ सर्वाः कन्याः परिणीताः । समानीता
निजांतिके ॥ १४ ॥ त्रिराज्याधिपतिर्जात । उत्खातप्रतिरोपितान् ॥ कुर्वन्नशेषभूपालान् । गमया-
मास वासरान् ॥ १५ ॥ पितृसत्काः समायाता । एकदा पुरुषा वराः ॥ मंत्रिभिः प्रेषिताः संतो ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भानुप्रभनृपांतिके ॥ १६ ॥ कुशलं तस्य तातस्य । चारुकीर्तेर्महौजसः ॥ कुशलं यशसा ताव—न्न
प्राणैः क्षणभंगुरैः ॥ १७ ॥ श्रुत्वेदं शोकसंभार—भ्रांतचेता महीपतिः ॥ न विवेद सुखं दुःखं ।
जीवितं मरणं तथा ॥ १८ ॥ मूर्छांते लब्धचैतन्यः । प्रश्नयामास सादरं ॥ सुखमास्ते सदाकालं ।
कालश्रीः श्रीखिापरा ॥ १९ ॥ पुरे राज्ये धने धान्ये । भांडागारे च रोधने ॥ सिंहविक्रमराजस्य
। वर्तते कुशलं ननु ॥ २० ॥ पुरुषाः प्राहुः—नानुकूलाः प्रजास्तस्य । नृपा न वशवर्तिनः ॥ प्रता-
पः सुसहस्तस्य । घनच्छन्नरवेरिव ॥ २१ ॥ तस्करास्तरलायंते । हन्यंते प्रांतभूमयः ॥ किं बहुना वि-
चारेण । सर्वं राज्यं विसंस्थुलं ॥ २२ ॥ तदधिष्ठीयतां शीघ्र—मागत्य पैतृकं पदं ॥ प्रजाश्चिरंतनं
पाहि । मूलनाशो न संगत ॥ २३ ॥ श्रियोऽपि ता न शस्यंते । दृश्यंते या न सज्जनैः ॥ तत्
श्रुत्वामर्षितश्चित्ते । शरविद्धोव केसरी ॥ २४ ॥ जघान भूतलं मुष्ट्या । खड्गे दृष्टिं ददौ च सः ॥
देवो वा दानवो वापि । खेचरो भूमिगोचरः ॥ २५ ॥ यः करोति पराभूतिं । सिंहविक्रमभूभुजः ॥
किं तस्य विस्मृतो मृत्युः । कुबुद्धिर्वा विजृंभिता ॥ २६ ॥ युग्मं ॥

दूरस्थोऽपि समासन्नः । किं नाहमवलोकितः ॥ निश्चक्राम धराधीशो । लग्ने गणकसूचिते ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २७ ॥ प्रतापः पप्रथे तस्य । मेघमुक्तरवेरिव ॥ चचाल चतुरंगेण । बलेन भृतभूतलः ॥ २८ ॥
स्वत एव समागत्य । राजभिः परिवारितः ॥ शालाटव्यां समागत्य । तारया कृतगौरवः ॥ २९ ॥
तारासरःसमासन्ने । आवासं कृतवान् स च ॥ चतुर्वर्णसमाकीर्णं । नानावेश्मसमाकुलं ॥ ३० ॥
विशालशालसंछन्नं । खातिकापरिवेष्टितं ॥ विचित्रचित्रसंपन्न—चतुर्गोपुरराजितं ॥ ३१ ॥ पुरं ता-
रापुरं नाम । स्वल्पकालेन कारितं ॥ दत्तं युगादिदेवस्य । सारामं पुण्यहेतवे ॥ ३२ ॥ चतुर्भिः क-
लापकं ॥ भानुप्रभनरेंद्रेण । ताम्रशासनलेखितं ॥ समर्पितं च संघाय । जिनपूजनकृते पुरं ॥३३॥
अन्यदा भणिता तारा । मातर्गच्छामि सांप्रतं ॥ करसंपुटमादाय । तयापीदं प्रजल्पितं ॥ ३४ ॥ स-
म्यगेणामुखी राजन् । दृष्टव्या स्निग्धया दृशा ॥ त्वमस्याः सर्वकार्येषु । हर्ता कर्ता च संपदं ॥३५॥
चचाल स्वप्रतापेन । समाक्रांतमहीतलः ॥ पश्चिमां दिशमाश्रित्य । प्रभाते सविता यथा ॥ ३६ ॥
आगच्छंतं समाकर्ण्य । भानुप्रभनराधिपं ॥ सिंहविक्रमराजेन । मत्सरेण पलायितं ॥ ३७ ॥ बहिरा-
वासितो राजा । समये च प्रवेशितः ॥ कृतर्द्धिशोभं नगरं । मंचमालाविराजितं ॥ ३८॥ सोत्कंठा-
श्च प्रजाः सर्वा । दर्शनार्थं समागताः ॥ अहो रूपमहो रूप—महो कांतिर्मनोहरा ॥ ३९ ॥ सक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लानि कलत्राणि । अहो तुल्यः समागमः ॥ अनुकूलो विधिः पुंसां । किं किं यन्न करोत्यहो ॥
॥ ४० ॥ इत्येवं सर्वलोकेन । श्लाघ्यमानः पदे पदे ॥ विवेश मंदिरं पैत्र्यं । राजमानो नृपश्रिया
॥ ४१ ॥ पूजयित्वा यथायोग्यं । लोकः सर्वो विसर्जितः ॥ स्थितः सिंहासने राजा । प्रधानपरिवा-
रितः ॥ ४२ ॥ यदर्थं वयमायाता । यश्च मे हृदि वर्तते ॥ शूरो विक्रमभूपालः । स किं नो नात्र
दृश्यते ॥ ४३ ॥ मंत्रिणोक्तं च किं तेन । मत्सरच्छन्नबुद्धिना ॥ नाऽधन्यश्च जनो येन । देवदर्श-
नमर्हति ॥ ४४ ॥ महेंद्रमातुलेनापि । राज्यश्रीरिव दुर्लभा ॥ राज्यश्रीकन्यका दत्ता । विस्तरेण
विवाहिता ॥ ४५ ॥ गुणानुरक्तनिःशेष—लोकमुध्धृतकंटकं ॥ प्रणताशेषसामंतं । विनमन्मंत्रिमंडलं
॥ ४६ ॥ पालयतोऽप्रयासेन । रम्यं राज्यचतुष्टयं ॥ कामभोगान् यथाकामं । भुंजानस्यानुवासरं ॥
॥ ४७ ॥ संसारसुखसंदोह—मग्नमूर्तेर्महात्मनः ॥ संजातयोग्यपुत्रस्य । गतः कालः कियानपि ॥
॥ ४८ ॥ त्रिभिर्विशेषकं ॥

अन्यदा भुवनालोक—केवल्यत्र समागतः ॥ वंदनार्थं गतो राजा । प्रभूतैर्नागरैः सह ॥४९॥
केवली कथयामास । धर्मं दुर्गतिनाशनं ॥ हितश्च सर्वजीवानां । सर्वजंतुसुखावहं ॥ ५० ॥ अथ

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

प्रस्तावमासाद्य । भानुप्रभनृपोऽवदत् ॥ पूर्वजन्मनि लोकेश । किं मया सुकृतं कृतं ॥ ५१ ॥ येने-
दृशा महाभोगा । रम्यं राज्यचतुष्टयं ॥ कांताः कांताः सुपुत्राश्च । श्रियः सर्वमनोहराः ॥ ५२ ॥
युग्मं ॥ केवल्युवाच भो राजन् । संक्षेपात् शृणु कारणं ॥ शुभाशुभपदार्थानां । पुण्यपापे निबंध-
नं ॥ ५३ ॥ समस्तीह कलिंगेषु । सुखावासं महापुरं ॥ धाराख्या निर्धना नारी । तत्रोवास निर-
न्वया ॥ ५४ ॥ नानाकोलसमाकीर्ण—कुटीरकनिवासिनी ॥ कुग्रासाछादना नित्यं । कुकर्मशतका-
रिणी ॥ ५५ ॥ युग्मं ॥ तैलकर्षं समादाय । सापणाद्वलिता सती ॥ विवेश मंदिरं जैनं । राजह-
स्तिभयाकुला ॥ ५६ ॥ अहो महति संसारे । जीवद्भिः किं न दृश्यते ॥ यद् दृष्टोऽदृष्टपूर्वोऽयं ।
देवदेवो जिनेश्वरः ॥ ५७ ॥ शांतः सौम्यः सदाकारः । प्रदीपोद्योतिताननः ॥ गतरागो गतद्वेषो ।
गतमोहो निरंजनः ॥ ५८ ॥ युग्मं ॥ अस्यैव पुरतो भाति । प्रदीप इति मे मतिः ॥ इत्यालोच्य
तया दत्तः । प्रदीपः स्नेहपूरितः ॥ ५९ ॥ अन्वमोदि चिरं कालं । रोमांचांचितगात्रया ॥ बद्धं प-
रभवायुष्कं । भोगसारं तदा तया ॥ ६० ॥ युग्मं ॥ मृत्वा कालेन संजातो । भानुश्रीपरमोदरे ॥
भानुप्रभ इति ख्यातः । स च त्वं मेदिनीपते ॥ ६१ ॥ श्रुत्वेदं भुवनालोक—भाषितं मेदिनीप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिः ॥ सद्यः संजातवैराग्यो । निजजातिस्मरोऽभवत् ॥ ६२ ॥ ततश्च भणितस्तेन । भुवनालोक-केवली ॥ यद्यस्ति योग्यता स्वामिं–स्तदा दीक्षा प्रदीयतां ॥ ६३ ॥ केवल्युवाच भूपेश । महदेत-त्प्रयोजनं ॥ संगतं सर्वजीवानां । विशेषेण भवादृशां ॥ ६४ ॥ व्रतमेतन्महापुण्यै—स्तीर्थनाथैः स्वयं कृतं ॥ चक्रवर्तिभिराचीर्णं । बलदेवैर्निषेवितं ॥ ६५ ॥ परं सम्यक्समालोच्य । ह्यंगीकारोऽस्य संगतः ॥ सुकुमारशरीरस्त्वं । कष्टमत्र पदे पदे ॥ ६६ ॥ तथाहि—

यदिदं प्रव्रजनं नाम साक्षाद्बाहुभ्यां तरणमेतत्स्वयंभूरमणस्य, प्रतिश्रोतोगमनमेतद्गंगायाः, चर्वणमेतल्लोहमययवानां, भरणमेतत्सूक्ष्मपवनेन कंबलमुत्कोथ्याः, भेदनमेतच्छिरसा सुरगिरेः, मानग्रहणमेतत्कुशाग्रेण नीरधेः, नयनमेतदबिंदुपातं धावतो योजनशतं तैलपूर्णपात्र्याः, ताडनमेतत्सव्यापसव्यभ्रमणशीलाष्टचक्रवर्तिविवरणगामिना शिलीमुखेन वामलोचने पुत्रिकायाः, भ्रमणमेतदनपेक्षितपादपातं निशातकरवालधारायामिति, यतोऽत्र परिषोढव्याः परीषहाः, निराकर्तव्या दैत्याद्युपसर्गाः, विधातव्या समस्तपापयोगनिर्वृत्तिः, वोढव्यो यावत्कथं सुरगिरिगुरुरष्टादशशीलांगसहस्रभारः, वर्तितव्यः सकलकालमात्मा माधुकर्या वर्तनया, निष्टप्तव्यो विकृष्टतपोभिर्देहः, सात्मीभावतां ने-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तव्यः सप्तदशभेदभिन्नः संयमः, समुन्मूलयितव्या रागादयः, निरोधव्यो हार्दतमःप्रसरः, किं बहुना?
निहंतव्योऽप्रमत्तचित्तैर्मोहमहावेताल इति, मृदुशयनाहारलालितं पालितं तावकं शरीरकं, अपर्या-
लोचितकारितकारिता हि महतेऽनर्थायेति. राजाह—भगवन्नंगीकृतं सर्वं । कष्टजातं मयाधुना ॥
विधायानुग्रहं देहि । शीघ्रं भागवतं व्रतं ॥ ६६ ॥ वंदित्वा भुवनालोकं । ततः स्वगृहमागतः ॥
प्रोक्तः सर्वोऽपि वृत्तांतः । प्रधानानां महीभुजां ॥ ६७ ॥ राजश्रीसंभवं पुत्रं । विजयं विश्वविश्रुतं ॥
स्वराज्ये स्थापयामास । भानुप्रभनरेश्वरः ॥ ६८ ॥ सूरश्रीसंभवं सूरं । केरलाकुक्षिसंभवं ॥ सूरसे-
नाभिधं पुत्रं । कलाकौशलशालिनं ॥ ६९ ॥ एणाचंद्राभिधं पुत्र—मेणामुख्याः समुद्भवं ॥ तयो
मातामहे राज्ये । ह्यभिषिच्य विसर्जिताः ॥ ७० ॥ अन्यदपि यथायोग्यं । धर्मकर्म विधाय सः ॥
निष्क्रांतो भुवनालोक—केवलिनः पदांतिके ॥ ७१ ॥ त्रिभिर्विशेषकं ॥ आगमाधिगमाज्जातो ।
गीतार्थो गतमत्सरः ॥ विजहार महीपीठे । भानुप्रभमहामुनिः ॥ ७२ ॥ प्रशमामृततृप्तात्मा । क्ष
मालंकृतविग्रहः ॥ निर्ममो निरहंकारो । गतरागो जितेंद्रियः ॥ ७३ ॥ सर्वजीवाभयं दत्वा । तपस्त-
प्त्वा सुदुस्तरं ॥ परिपाल्यामलं शीलं । विभाव्य वरभावनाः ॥ ७४ ॥ विशुद्धसंयमस्थानो । हत्वा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

घातिचतुष्टयं ॥ उत्पाद्य केवलज्ञानं । जगाम परमं पदं ॥ ७५ ॥ युग्मं ॥ सर्वज्ञपुरतो दत्तो । दीपो भावपुरस्सरं ॥ लोकद्वयेऽपि संसूते । सत्कल्याणपरंपरां ॥ ७६ ॥ इति दीपपूजाफलं समाप्तं ॥

दीपपूजाफलं प्रोक्तं । लोकद्वयसुखावहं ॥ संप्रत्यक्षतपूजायाः । श्रूयतां कथ्यते फलं ॥ १ ॥ पंचालविषयस्यांतः । पुरं कांपिल्यसंज्ञितं ॥ तत्रासीन्निषधो नाम । राजा सर्वजनप्रियः ॥ २ ॥ तारप्रभाभिधः श्रेष्टी । पुरकार्यविचिंतकः ॥ समग्रनैगमग्राम—ग्रामणी राजसंमतः ॥ ३ ॥ तारप्रभा प्रिया तस्य । शशांकस्येव रोहिणी ॥ स्त्रीजनोचितनिःशेष—कलाकौशलशालिनी ॥ ४ ॥ तारप्रभस्तया सार्धं । भुंक्ते विषयजं सुखं ॥ चिंतानंतरनिःशेष—पूर्यमाणमनोरथः ॥ ५ ॥ अन्यदा पश्चिमे यामे । यामिन्यास्तल्पशायिनी ॥ स्वप्ने शुभमिदं स्वप्नं । तारप्रभा समैक्षत ॥ ६ ॥ यथा मे सर्वतो गेह—माकीर्णं कणराशिभिः ॥ कोष्टागाराणि सर्वाणि । कणैः पूर्णानि भांत्यलं ॥ ७ ॥ प्रबुद्धा च समुत्थाय । गत्वा भर्तृसमीपके ॥ यथा दृष्टं तथा सर्वं । तुष्टा तस्मै न्यवेदयत् ॥ ८ ॥ तेनाभाणि प्रिये श्रेष्टः । पुत्रस्तव भविष्यति ॥ सर्वलक्षणसंपूर्णो । वृद्धिकृत्सर्वसंपदां ॥ ९ ॥ सत्यं भवतु ते वाक्य—मित्युक्त्वा हृष्टमानसा ॥ जगाम निजकस्थाने । दधौ गर्भं यथासुखं ॥ १० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गतेषु त्रिषु मासेषु । तस्याजनि च दोहदः ॥ यथा तंदुलदानेन । लोकं सुस्थीकरोम्यहं ॥ ११ ॥
पृष्टया च तयाचष्ट । श्रेष्ठिनः स विशेषतः ॥ तेनापि पूरितस्तूर्णं । तुष्टा तारप्रजाजनि ॥ १२ ॥ ग-
र्भाधानत आरभ्यः । श्रेष्ठिनः संपदा सह ॥ सर्वतोऽपि प्रवर्धते । कणा गर्भानुभावतः ॥ १३ ॥
चिंतानंतरनिःशेष—पूर्यमाणसुदोहदा ॥ सुखं सुखेन सा गर्भ—मुवाह मुदितानना ॥ १४ ॥
मासानां नवकेऽतीते । सार्धं सप्तदशाधिके ॥ सासूत सुंदरं पुत्रं । सर्वलक्षणसंयुतं ॥ १५ ॥ का-
रितं च ततः पित्रा । महर्घ्या बंधुभिः सह ॥ सर्वलोककृतानंदं । वर्धापनकमुच्चकैः ॥ १६ ॥ समये
च कृतं तस्य । नाम स्वप्नानुसारतः ॥ कणसार इति ख्यातं । महामहपुरस्सरं ॥ १७ ॥ अथासौ व-
र्धते बालो । धात्रीपंचकलालितः ॥ सार्धं कलाकलापेन । पुष्णानो वपुषः श्रियं ॥ १८ ॥ कालेन
न यौवनं प्राप्तः । कामिनीजनमोदकं ॥ श्रेष्ठिपुत्रीं सुताराख्यां । परिणिन्ये च कन्यकां ॥ १९ ॥
भुंजानस्य यथाकामं । कामभोगांस्तया सह ॥ गछंति प्रीतचित्तस्य । कणसारस्य वासराः ॥ २० ॥
अथान्यदा समं मित्रै—र्नानाक्रीडापरायणः ॥ कणसारो ललन् वीथ्यां । ददृशे राजकन्यया ॥
॥ २१ ॥ कामवेश्मनि गछंत्या । सुदर्शनाख्यया तदा ॥ आलोकितश्च सस्नेहं । सादरं स्निग्धचक्षु

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षा ॥ २२ ॥ युग्मं ॥ विद्धा च कामदेवेन । ततः सा निशितैः शरैः ॥ संततं तं प्रपश्यंती । चिंतयंती च तद्गुणान् ॥ २३ ॥ कायेनैव न चित्तेन । गता सा काममंदिरं ॥ संपूज्य कामदेवस्य । प्रतिमामद्भुताकृतिं ॥ २४ ॥ कणसारस्य रूपेण । मोहिता वलिता क्षणात् ॥ कामग्रहगृहीतासा —वगहन्राजमंदिरे ॥ २५ ॥ त्रिभिर्विशेषकं ॥

सुप्ता सुंदरपर्यंके । न च प्राप सुखासिकं ॥ ददृशे च तथावस्था । धात्र्या पृष्टा च सा यथा ॥ २६ ॥ बाधते किमु ते वत्से । सदुःखा येन दृश्यसे ॥ वारंवारं तयाप्येवं । सादरं पृच्छ्यमानया ॥ २७ ॥ प्रोक्तः सर्वोऽपि वृत्तांतः । कणसारेक्षणादिकः ॥ तदंब त्वं कुरु यत्नं । यथा मे स्यादभीप्सितं ॥ २८ ॥ युग्मं ॥ धात्र्या च तत्क्षणादेव । तस्या मातुर्निवेदितं ॥ तयापि नरनाथस्य । तेनोचे नातिचार्विदं ॥ २९ ॥ यद्राजपुत्रिकायास्तु । संबंधो वणिजा सह ॥ तथाप्येवं करिष्यामि । मत्सुता लभतां धृतिं ॥ ३० ॥ ततस्तारप्रभश्रेष्ठी । समाहूतो महीभुजा ॥ वृत्तांतं सर्वमाख्याय । सादरं भणितो यथा ॥ ३१ ॥ दत्तेयं कणसारस्य । मया पुत्री सुदर्शना ॥ निर्विचारमिदं कार्यं । कालक्षेपं विना कुरु ॥ ३२ ॥ देव एव विजानाति । किमत्र ब्रूमहे वयं ॥ इत्युक्त्वा नृपतेर्वाक्यं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रेष्ठिना प्रत्यपद्यत ॥ ३३ ॥ शोभने तिथिनक्षत्रे । महर्ध्या विहितोत्सवं ॥ वृत्तं तयोः प्रमोदेन । पाणिग्रहणमंगलं ॥ ३४ ॥ दत्ताश्च भूभुजा तस्मै । वाजिनः स्यंदना गजाः ॥ कोशश्च द्रव्यसंपूर्णः । प्रासादाश्च मनोहराः ॥ ३५ ॥

अथासौ कणसारोऽपि । विलसन् राजलीलया ॥ सुदर्शनासुताराख्या—संयुक्तो युक्तकारकः ॥ ३६ ॥ राज्ञा च राजलोकैश्च । दृश्यमानः सगौरवं ॥ कुर्वन् वंधुजनानंदं । कालं नयति नीतिमान् ॥ ३७ ॥ युग्मं ॥ अन्यदा च निजे राज्ये । नृपतिस्तन्निकारकं ॥ कणसारं व्यवस्थाप्य । ययौ विजययात्रया ॥ ३८ ॥ कणसारोऽपि तद्राज्यं । संपालयति नीतितः ॥ दुष्टानां निग्रहं कुर्वन् । शिष्टानां पालनं तथा ॥ ३९ ॥ एवं च राजलोकानां । संमतो रंजितप्रजः ॥ सर्वाण्यपि निरुत्सेको । राज्यकार्याणि चिंतयन् ॥ ४० ॥ राज्ञोऽस्य वल्लभादेव्या । चंद्रकांताभिधानया ॥ गवाक्षगतया दृष्टो । नेत्रानंदविधायकः ॥ ४१ ॥ युग्मं ॥ ततः सा चिंतयामास । तद्गुणाक्षिप्तमानसा ॥ अहो रूपमहो रूप—महो कांतिरहो गतिः ॥ ४२ ॥ अहो देहस्य लावण्य—महो मधुरता गिरां ॥ वार्तायां श्रूयते कामो । मन्ये कामोऽयमेव हि ॥ ४३ ॥ तदत्र यद्ययं कामी । गत्वा कामं न काम्य-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

ते ॥ तदेदं यौवनं रूपं । नरजन्म च निष्फलं ॥ ४४ ॥ विचिंत्यैवं तया दासी । प्रेषिता तस्य सन्निधौ ॥ पृष्टा तेन यथा जडे । निवेदय प्रयोजनं ॥ ४५ ॥ तयोक्तं चंद्रकांताया । देव्याः शरीरकारणं ॥ तदेहि सत्वरं देवी । प्रतिजागर्यतामिति ॥ ४६ ॥ श्रुत्वेदं कणसारोऽपि । चंद्रकांतांतिकं गतः ॥ प्रणम्य भणितं तेन । किमंब बाधते तव ॥ ४७ ॥ तयापि प्रकटं चैव । हावभावपुरस्सरं ॥ उक्तः समंथरैर्नेत्रैः । सर्वांगं वीक्ष्य लीलया ॥ ४८ ॥ यथेदं मामकं देहं । संतप्तं कामवह्निना ॥ स्वांगसंगजलप्लावै—स्त्वं निर्वापय सांप्रतं ॥ ४९ ॥ मदीयां प्रार्थनामेनां । सर्वथा माकृथा वृथा ॥ म्रियेऽहमन्यथा नाथ । त्वद्विरहाग्निपीडिता ॥ ५० ॥ श्रुत्वेदं कणसारोऽपि । ब्रूते खेदवशं गतः ॥ मामाज्ञाणि च यन्निंद्यं । मातरेवंविधं वचः ॥ ५१ ॥ यन्मनसापि नो चिंत्यं । लोकद्वयविरोधकं ॥ तत्कथं त्वयका पापं । वचसा प्रकटीकृतं ॥ ५२ ॥ प्राणत्यागेऽपि नो कर्म । करिष्याम्यहमीदृशं ॥ तदंब मुंच गच्छामि । किं वृथा बहुजल्पितैः ॥ ५३ ॥ एवमुक्त्वा गतस्तूर्णं । कणसारो निजाश्रयं ॥ सापि तंप्रति सावेशा । जाता मत्सरिणी दृढं ॥ ५४ ॥

अथ कालेन दिग्यात्रां । कृत्वायातो नराधिपः ॥ प्रविष्टश्च पुरे तुष्टः । क्रमाच्च निजमंदिरे ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

॥ ५५ ॥ ततो राज्ञे प्रणामार्थं । पौरलोकः समागतः ॥ तेनापि च यथायोगं । स सन्मान्य वि-
सर्जितः ॥ ५६ ॥ पृष्टाश्च निजका लोका । अमात्याद्या नियोगिकाः ॥ यथा भो अत्र सर्वत्र ।
युष्माकं क्षेम वर्त्तते ॥ ५७ ॥ कणसारकुमारो वा । युष्मानाश्रित्य कीदृशः ॥ प्रजासु वापि कीदृ-
क्षः । श्रुत्वेदं तैः प्रजल्पितं ॥ ५८ ॥ देव देवप्रसादेन । क्षेमः सर्वत्र वर्त्तते ॥ कणसारस्तु निः-
शेष—गुणरत्नमहोदधिः ॥ ५९ ॥ येन चिंतयता राज्यं । दुष्टलोकं निगृह्णता ॥ रक्षता शिष्टलोकं
च । गुणग्राही जनः कृतः ॥ ६० ॥ एवं पृष्ट्वा च दृष्ट्वा च । कृत्वापि च यथोचितं ॥ विसर्ज्य च
निजं लोकं । राजेंद्रोंतःपुरं ययौ ॥ ६१ ॥ यावच्च पश्यति तत्र । चंद्रकांतावलोकिता ॥ विमनस्का
विदीर्णांगी । भूमौ विन्यस्तदृष्टिका ॥ ६२ ॥ महामन्युभराक्रांता । सखेदा दुःखनिर्भरा ॥ ध्यायं-
ती किंचिदव्यक्तं । भ्रष्टमंत्रेव योगिनी ॥ ६३ ॥ युग्मं ॥ ततः सा प्रश्निता राज्ञा । किमर्थं दुःखि-
ता प्रिये ॥ तवाज्ञा खंडिता केन । सखेदा केन दृश्यसे ॥ ६४ ॥ सा प्राह किमहं राजन् । कथ-
यामि तवाग्रतः ॥ कथितं यत्तु नो कोऽपि । श्रद्धातुमपि शक्यति ॥ ६५ ॥ राजाह किं तवानेन ।
यदि कथ्यं भणस्व मे ॥ तथा तथा करिष्यामि । यथा ते जायते धृतिः ॥ ६६ ॥ सा प्राह देव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

योऽयं ते । जामाता राज्यचिंतकः ॥ तेनाहं प्रार्थिता बाढं । विषयासेवनंप्रति ॥ ६७ ॥ विदारिता च पापेन । दारुणं नखकोटिभिः ॥ कष्टेन रक्षितं शीलं । ब्रवीमि किमतःपरं ॥ ६८ ॥ श्रुत्वेदं तत्क्षणादेव । निष्क्रांतोंतःपुरान्नृपः ॥ कणसारं समाहूय । तेन निर्भर्त्सितो यथा ॥ ६९ ॥ रेरे दुष्ट दुराचार । महापापाधमाधम ॥ किमन्या निष्टिता मूढ । रूपवत्यः कुलस्त्रियः ॥ ७० ॥ महारानपि येन त्वं । नैवं त्यजसि मूढधीः ॥ तच्छ गच्छ मे दृष्टि—मार्गादपि पुरादपि ॥ ७१ ॥ देशोऽपि मामकस्त्याज्यः । को द्रक्ष्यति मुखं तव ॥ नामापि श्रूयते नैव । यत्र तत्र व्रजाधुना ॥ ७२ ॥ प्रसाद इति संजल्प्य । कणसारोऽपि सत्वरं ॥ प्रणम्य भूभुजः पादा—वपमानभरेरितः ॥ ७३ ॥ समुत्थाय ततः स्थाना—देकाक्येव विषादवान् ॥ अनाख्यायैव बंधूना—मुत्तराभिमुखं ययौ ॥ ७४ ॥ युग्मं ॥ पूर्वं मित्रसमो भूत्वा । पश्चाच्छत्रुसमोऽजनि ॥ नरेंद्रः कणसारस्य । राज्ञां मैत्री स्थिरा न हि ॥ ॥ ७५ ॥ यतः—काके शौचं द्यूतकारे च सत्यं । सर्पे क्षांतिः स्त्रीषु कामोपशांतिः ॥ क्लीवे धैर्यं मद्यपे तत्वचिंता । राज्ञां मैत्री केन दृष्टा श्रुता वा ॥ ७६ ॥ नानानगनदीकीर्णं । नानाग्रामपुराकुलं ॥ परिभ्राम्यन्महीपीठं । स संप्रापोत्तरापथं ॥ ७७ ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

तत्रास्ति शालिपुराख्यो । ग्रामो भूरिजिनालयः ॥ बहिस्तस्य वटस्याधः । श्रांतत्वान्निषसाद सः ॥ ७८ ॥ दृष्टश्च तत्र वास्तव्य—धान्यसारकुटुंबिना ॥ पृष्टश्च सादरं गत्वा । यथा कस्मादिहागतः ॥ ७९ ॥ गंतव्यं भवता कुत्र । किंवा नाम कुलं च ते ॥ तेनाभाणि महाभाग । बृहतीयं कथा मम ॥ ८० ॥ युग्मं ॥ कथं वा कथ्यते भद्र । स्वयमेव जनाग्रतः ॥ स्थानभ्रष्टेन सत्पुंसा । कुलशीलादिकं निजं ॥ ८१ ॥ किंच—लहुइंति लहुं पुरिसं । मेरुसमाणंपि दो अकज्जाइं ॥ अप्पपसंसा परनिंद—णा य पयमंपि किज्जंता ॥ ८२ ॥ श्रुत्वेदं धान्यसारोऽपि । मनस्येवं व्यचिंतयत् ॥ अहो वरकुलोत्पन्नः । कोऽप्ययं सुपुमानिति ॥ ८३ ॥ तेनायं पृच्छ्यमानोऽपि । नाख्याति निजकां कथां ॥ आकृत्यैवास्य मन्येऽयं । भूतपूर्वमहोदयः ॥ ८४ ॥ यतः—यत्राकृतिर्गुणास्तत्र । गुणिनः संपदो ध्रुवं ॥ श्रीमत्याज्ञां परां प्राहु—स्ततो राज्यं महोदयः ॥ ८५ ॥ लक्षणानि च दृश्यंते । यादृशान्यस्य विग्रहे ॥ तैरस्य निश्चितं भावि । भूरिवैभवमुत्तमं ॥ ८६ ॥ विचिंत्यैवं करे कृत्वा—नीतस्तेन निजे गृहे ॥ कृत्वा स्नानादिकं सर्वं । भोजितश्च सगौरवं ॥ ८७ ॥ दत्ता शालिप्रभा कन्या । शुभेऽह्नि परिणायितः ॥ समर्पितं गृहं चैकं । चारुकुप्येन संयुतं ॥ ८८ ॥ दत्तं तस्मै तथा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चैकं । शालिक्षेत्रं मनोहरं ॥ रोपिताः शालयस्तत्र । जाता भूरिफलप्रदाः ॥ ८९ ॥ लघुक्षेत्रेऽपि भूयांसो । जायंते तस्य शालयः ॥ पुण्यानि फलदानीह । व्यवसायो न देहिनां ॥ ९० ॥ एवं च सर्वधान्यानि । जायंते तस्य कर्षणे ॥ सर्वलोकातिशायीनि । प्रतिवर्षं यथोत्तरं ॥ ९१ ॥ नानाधान्यभृताः पाल्याः । प्रभूतास्तेन कारिताः ॥ धान्यविक्रयतो जातं । द्रविणं चातिपुष्कलं ॥९२॥ तथा गावो महिष्यश्च । बलीबर्दास्तुरंगमाः ॥ उष्ट्रा गंत्रीविशेषाश्च । प्रभूतास्तस्य जज्ञिरे ॥९३॥ द्रव्यं कलांतरेणैष । धान्यं वृद्ध्या ददात्यलं ॥ यथेष्टं सर्वलोकेभ्यो । ग्रामे ग्रामे पुरे पुरे ॥ ९४ ॥ स्तोकेनापि च कालेन । विस्तृतो भूरिसंपदा ॥ औदार्यादिगुणग्रामैः । परां ख्यातिमवाप च ॥ ॥ ९५ ॥ देशे च तत्र सर्वत्र । ग्रामे ग्रामे पुरे पुरे ॥ तेनानेके महापल्या । धान्यपूर्णा निवेशिताः ॥ ९६ ॥ एवं च तत्र सर्वत्र । देशे ग्रामपुरादिषु ॥ राजभिः सर्वलोकैश्च । मान्यमानस्य सादरं ॥ ९७ ॥ शालिप्रज्ञासमेतस्य । भुंजानस्यार्थसंपदः ॥ श्रीमतः कणसारस्य । गतः कालः कियानपि ॥ ९८ ॥

अथान्यदा च पांचाल—देशेऽजनि सुदारुणं ॥ दुर्भिक्षं बहुकालीनं । जातोऽत्यंतकणक्षयः

॥ ९९ ॥ मूल्येनापि यदा धान्यं । लोकैस्तत्र न लभ्यते ॥ ततोऽसौ निषधो राजा । सचिंतोऽज-
नि मानसे ॥ १०० ॥ अहो भूरिधनोपेतः । कोषोऽयं मेऽस्ति पुष्कलः ॥ परं धान्यं ममापीह ।
कोष्ठागारेषु निष्ठितं ॥ १ ॥ ततः सर्वे समाहूता । नागरा मंत्रिणस्तथा ॥ उक्ताश्च ते यथा भो
भो । सांप्रतं किमु कुर्महे ॥ २ ॥ मूल्यमस्ति न धान्यानि । क्षुधया म्रियते जनः ॥ तदत्र चिंत्य-
तां कश्चि—दुपायो येन जीव्यते ॥ ३ ॥ अत्रांतरे गुणश्रेष्ठः । श्रेष्ठी तारभद्रोऽवदत ॥ अहो रा-
जन्नहं किंचि—दाख्यामि यन्मया श्रुतं ॥ ४ ॥ श्रूयते कणसाराख्य । उत्तरापथमंडले ॥ ग्रामे च
धान्यपूराख्ये । प्रभूतकणसंग्रही ॥ ५ ॥ यद्यसौ मामकः पुत्र—स्तत्कणा अपि मामकाः ॥ अथा-
न्यः कोऽपि तन्नामा । तदा तत्रात्रसंशयः ॥ ६ ॥ राजाह यदि ते पुत्रो । नासावत्र समेष्यति ॥
यतो निष्कासितो देशा—न्निर्भर्त्स्य स मया पुरा ॥ ७ ॥ श्रेष्ठ्याह सत्यमेवेदं । यद्देवेन प्रभाषि-
तं ॥ तथापि प्रेष्यते कश्चि—ल्लेखहस्तो निजो भटः ॥ ८ ॥ श्राव्यते च स वृत्तांतः । सर्वकणक्ष-
यादिकः ॥ आकर्ण्य श्रेष्ठिनो वाक्यं । भूभुजापि तथा कृतं ॥ ९ ॥ गतश्च स पुमांस्तत्र । लेखस्त-
स्मै समर्पितः ॥ उत्थोप्य वाचितो लेख—स्तदर्थश्चावधारितः ॥ १० ॥ लिखित्वा कणसारोऽपि । प्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिलेखं सविस्तरं ॥ समर्प्य प्रेषयामास । तं भटं त्वरितैः पदैः ॥ ११ ॥ तेनापि शीघ्रमागत्य । रा-
ज्ञो लेखः समर्पितः ॥ वाचयामास लेखं तं । स्वयमेवाथ भूपतिः ॥ १२ ॥ यथा देशांतरस्थोऽपि ।
तातायं तावको जनः ॥ कणा अपि मदीया ये । ते सर्वेऽपि च तावकाः ॥ १३ ॥ गृह्यंतां च य-
थाकामं । निस्तार्यतां जनोऽखिलः ॥ ततस्तारप्रभादीनां । संमतेन महीभुजा ॥ १४ ॥ बहवः प्रे-
षिता उष्ट्रा । धान्यानयनहेतवे ॥ ते पत्तनं गतास्तत्र । कणसारस्य सन्निधौ ॥ १५ ॥ युग्मं ॥
भृत्वा तेनापि धान्येन । प्रेषिताः शीघ्रमेव हि ॥ तथान्ये उष्ट्रसंघाता । बहुधान्यभृता निजाः ॥
॥ १६ ॥ भूयोभूयोऽपि भूयांसः । प्रेषितास्तेन भूभुजे ॥ पांचालेषु ततः सौस्थ्यं । कणसारकणैर-
भूत् ॥ १७ ॥ युग्मं ॥ जीविताशा च संजाता । लोकानां तदनंतरं ॥ ततस्तुष्टेन भूपेन । पौरलो-
कैः समन्विताः ॥ १८ ॥ प्रेषिता मंत्रिसामंता—स्तस्यानयनहेतवे ॥ प्राप्तास्ते कणसारोऽपि । तान्
सन्मान्य यथोचितं ॥ १९ ॥ स्वकीयं सर्वमादाय । कांपिल्यपुरमागतः ॥ भूभुजापि महर्ध्यासौ ।
पुरमध्ये प्रवेशितः ॥ २० ॥ त्रिभिर्विशेषकं ॥

दत्ता पूर्वस्थितिः सर्वा । साधिका क्षामितस्तथा ॥ श्रेष्टितारप्रभाद्यांश्च । बंधून् पुरजनांस्तथा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २१ ॥ प्रणनाम यथायोगं । सन्मानं च चकार सः ॥ मिलिता च सुताराख्या । सुदर्शना च सत्प्रिया ॥ २२ ॥ युग्मं ॥ ततः शालिभद्रो चक्रे । प्रणामं सादरं तयोः ॥ ततो भार्यात्रयोपेतो । भुंजानो भोगसंपदं ॥ २३ ॥ वल्लभो भूभुजोऽत्यर्थं । लोकानां च विशेषतः ॥ शशीव बंधुर्लोकानां । कुर्वाणो नयनोत्सवं ॥ २४ ॥ महासौख्यार्णवे मग्नो । गमयतिस्म वासरान् ॥ भुक्त्वा भोगांश्चिरं तेन । जाताः पुत्रा मनोहराः ॥ २५ ॥ त्रिभिर्विशेषकं ॥ ततश्च भुक्तभोगत्वा—द्धर्मे चित्तं ददात्यसौ ॥ अन्यदा मेघनादाख्या । मेघनादसमप्रभाः ॥ २६ ॥ संसारसागरोत्तार—सेतवो भव्यदेहिनां ॥ चतुर्ज्ञानसुविज्ञात—समस्तभवविस्तराः ॥ २७ ॥ भवकांतारनिस्तार—सार्थवाहसमा नृणां ॥ लतागुल्ममहोद्याने । स्थाने मुनिजनोचिते ॥ २८ ॥ समागत्य स्थितास्तत्र । सूरयो धर्मदेशकाः ॥ वंदनार्थं गतो राजा । लोकाश्च बहवस्तथा ॥ २९ ॥ चतुर्भिः कलापकं ॥ प्रारब्धा देशना रम्या । भव्यबोधप्रदायिनी ॥ मेघनादध्वनिनोच्चै—र्मेघनादमुनीश्वरैः ॥ ३० ॥ भो भो भव्याः शृणुत विशदं मामकं वाक्यमेतत् । कर्णं दत्वा विगतविकथं द्वेषरागव्यपेतं ॥ संसाराब्धेस्तरणतरिकाकल्पमाप्तोपदिष्टं । यत्कल्याणं त्विह परभवे तिष्ठतां गच्छतां च ॥ ३१ ॥ नास्तिकैर्नैव भाव्यं च।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवद्भीर्भवभीरुभिः ॥ नास्तिक्यं परमो दोष । आस्तिक्यं परमो गुणः ॥ ३२ ॥ तथाहि—अनेकभवपरंपराकोटाकोटीभिः कथंचिन्मानुष्यं जन्म लब्ध्वापि नास्तिकदोषदूषितो नास्तिको युक्त्यागमबाधितमेवं वक्ति, नास्ति परलोकः, न विद्यते कुशलाकुशलकर्मणः फलं, न संभवति खल्वयमात्मा, नोपपद्यते सर्वज्ञः, न घटते तदुपदिष्टो मोक्षमार्गः, ततोऽसावतत्वाभिनिविष्टचित्तो हिनस्ति प्राणिनः, भाषतेऽलीकं, समादत्ते परधनं, रमते परदारेषु, गृह्णात्यपरिमितपरिग्रहं, भुंक्ते रजन्यां, खादति मांसं, पिबति सुरां, न गृह्णाति सदुपदेशं, प्रकाशयति कुमार्गं, निंदति वंदनीयान्, वदति परावर्तवादं, आचरति समस्तपातकानि. ततो बध्ध्वा निबिडं कर्मजालं पतत्येष जीवो नरकेषु, तत्र च पतितः पच्यते कुंभीपाकेन, छिद्यते क्रकचपाटनेन, आरोह्यते वज्रकंटकाकुलासु शाल्मलीषु, पाय्यते संदंशकैर्मुखं विधृत्य कलकलायमानं तप्तं त्रपु, भक्ष्यते निजमांसानि, भ्रुज्यतेऽत्यंततप्तभ्राष्ट्रेषु, तार्यते पूयवसारुधिरक्लेदमूत्रांत्रकलुषां वैतरिणीं नदीं, भिद्यतेऽसिपत्रवनेषु स्वपापभरप्रेरितैः परमाधार्मिकासुरैः, तथा समस्ताशुभपुद्गलराशिभक्षणेऽपि नोपशाम्यति बुभुक्षा, निःशेषजलधिपानेऽपि नापगच्छति पिपासा, अभिभूयते सीतवेदनया, कदर्थ्यते तापातिरेकेण. ततश्चायं जीवो गाढतापा·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नुगतो हा तात! हा मातः! हा भ्रातः! इत्यादि विरसमाक्रंदति, न चास्य तत्र गात्रत्रायकः कश्चि- द्विद्यते. कथंचिदुत्तीर्णोऽपि नरकाद्बाध्यते तिर्यक्षु वर्तमानः, कथं? वाह्यते भारं, कुट्यते लकुटादि- भिः, छिद्यंते कर्णपुछादयः, खाद्यते कृमिजालकैः, सहते बुभुक्षां, म्रियते पिपासया, तुद्यते नाना- कारयातनाभिरिति. ततः कथंचिदवाप्तमनुष्यभावोऽप्येष जीवः पीड्यत एव दुःखैः, कथं? तदुच्यते— क्लेशयंत्येनं रोगव्रताः, जर्जरयति जरा, दोदूयंते इष्टवियोगानिष्टसंप्रयोगाः, विसंस्थुलयंति धनहर- णानि, आकुलयंति स्वजनमरणानि, विधुरयंति व्यसनानि. तथा कथंचिल्लब्धविबुधजन्माप्येष जी- वो ग्रस्यत एव नानाविधदुःखवेदनाभिः, तथाहि—आज्ञाप्यते विवशः शक्रादिभिः, खिद्यते परो- त्कर्षदर्शनेन, जीर्यते प्राग्भवकृतप्रमादफलदर्शनेन, दंदह्यतेऽस्वाधीनामरसुंदरीप्रार्थनेन, शल्यते त- न्निदानचिंतनेन, निंद्यते महर्द्धिकदेववृंदेन, विलपत्यात्मनश्च्यवनदर्शनेन, आक्रंदति गाढं प्रत्यास- न्नमरणदर्शनेन, पतति समस्ताशुचिनिधाने स्त्रीतिरश्चीगर्भकलिमले इति.

चातुर्गतिकसंसारे। नास्ति सौख्यं शरीरिणां॥ कर्मक्लेशप्रहाणोत्थां। विमुच्य पंचमीं गतिं॥ ॥ ३३ ॥ सा च विशुद्धधर्मेण। स च सर्वज्ञभाषितः॥ पूर्वापराविसंवादी। दयासारः क्षमान्वितः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ३४ ॥ स च विधूननं धत्ते । दत्ते च प्रशमं परं ॥ पुष्णाति च परं श्रेयः । मुष्णाति कुमतेर्मतिं ॥ ३५ ॥ स्वर्गापवर्गसंसर्ग—साधकः पापबाधकः ॥ सर्वसौख्यकरः सत्यो । धर्मः सर्वज्ञभाषितः ॥ ॥ ३६ ॥ द्वात्रिंशता सहस्राणां । महाबलमहीभृतां ॥ षोडशयक्षसहस्रैः । सर्वदा कृतसन्निधिः ॥३७॥ चतुःषष्ट्या सहस्राणां । कांताकांतकुचोष्मणा ॥ शीतकालेऽपि निःशीतः । शेते चक्री निराकुलः ॥ ३८ ॥ युग्मं ॥ यद्भुंक्ते भारतं वर्ष—मुध्धृताखिलकंटकं ॥ विचचार गजारूढ—श्छत्रछन्नदिगंतरः ॥ ३९ ॥ जीव नंद चिरं देव । देहि दृष्टिं मदानने ॥ इत्यादिमागधोद्गीत—गीर्भिर्गीतगुणांतरः ॥ ४० ॥ भोगाभोगान् यथा शक्र—श्चक्री भुंक्ते निराकुलः ॥ तदेतदर्हदुक्तस्य । दयाधर्मस्य जृंभितं ॥ ४१ ॥ किंबहुनात्र संसारे । यदन्यदपि सुंदरं ॥ दृश्यते वस्तु तत्सर्वं । दयाधर्मस्य सत्फलं ॥ ४२ ॥ तदस्य श्रवणे यत्नो । नित्यं कार्यो हितैषिणा ॥ शृण्वन्नेव हि जानाति । पुण्यापुण्यं हिताहितं ॥ ४३ ॥ श्रुत्वेदं रंजितो राजा । सम्यक्त्वं प्रतिपन्नवान् ॥ लोकोऽपि च यथायोग्यं । प्रपन्नो धर्ममार्हतं ॥ ४४ ॥ अथ कणसारः प्राह—

किमकारि मया पुण्यं । भगवन् पूर्वजन्मनि ॥ अद्भुता अद्भुता येन । संजाता मम मंदिरे ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४५ ॥ कणसारवचः श्रुत्वा । मेघनादैः प्रजल्पितं ॥ जो श्रेष्ठिन् शृणु संक्षेपा—दद्भताद्भतकारणं
॥ ४६ ॥ पांचालेषु महाग्रामो । पामरैश्च कृतास्पदः ॥ सुखनिः सर्वशस्यानां । सुसीमो जनविश्रुतः
॥ ४७ ॥ तस्मिन्नाजन्मदारिद्र्यो । निस्सहायो निरन्वयः ॥ पामरः पिंगलो नाम । कुटीरककृताश्रयः
॥ ४८ ॥ कुकर्मकरणासक्तः । कुचेलः कष्टजोजनः ॥ नित्यं परमुखप्रेक्षी । मुनिवत्कुक्षिसंबलः ॥
॥ ४९ ॥ अन्यदा वेतने लब्ध्वा । शालितंडुलसेतिकां ॥ आनीय च घटे क्षिप्त्वा । घटद्वारं नि-
यंत्रितं ॥ ५० ॥ विक्रणीया मयाप्येषा । सविशेषप्रयोजने ॥ गतोऽसौ जिनदत्तस्य । गृहे कर्मचि-
कीर्षया ॥ ५१ ॥ अग्रे कूरं समर्प्यायं । प्रेषितो जिनमंदिरे ॥ सत्पुष्पपूजितं शांतं । सदाभरणजू-
षितं ॥ ५२ ॥ दृष्टं श्रीशांतिनाथस्य । बिंबं जनमनोहरं ॥ तदग्रे विलिखन् दृष्टो । मंगलान्यष्ट तं-
डुलैः ॥ ५३ ॥ अखंडास्फुटितैः सार—जक्तितो जिनदत्तकः ॥ पृष्टश्च पिंगलेनैष । किमेतदिति
कथ्यतां ॥ ५४ ॥ त्रिर्विशेषकं ॥ कथितं ज्ञाततत्वोऽसौ । गृहादानीय तंडुलान् ॥ लिलेख मंग-
लान्यष्टौ । जूरिजावसमन्वितः ॥ ५५ ॥ अहो मे तंडुला धन्या । यैरयं पूजितो जिनः ॥ एवं वि-
शुद्धजावेन । जावतश्चानुमोदिताः ॥ ५६ ॥ बद्धं परजवायुष्कं । जोगसारं ततो गृहे ॥ कदन्नाहा-

स्योगेन । जाता गाढविसूचिका ॥ ५७ ॥ ततो मृत्वा समुत्पन्न—स्त्वं तारभ्रनंदनः ॥ महर्ध्या ते कृतं नाम । कणसार इति स्फुटं ॥ ५८ ॥ जिनाग्रे तंदुला दत्ता । भावतश्चानुमोदिताः ॥ कणसार कणास्तेन । तव वृद्धिमुपागताः ॥ ५९ ॥ श्रुत्वेदं कणसारेण । स्मृता जातिश्चिरंतनी ॥ भगवन्न-पारसंसार—भयभीतस्त्वदंतिके ॥ ६० ॥ व्रतं च लातुमिच्छामि । यद्यस्ति मम योग्यता ॥ व्रतादा-नमयोग्यानां । यतोऽनर्थाय वर्तते ॥ ६१ ॥ सूरिणाभाणि भो श्रेष्टिन् । योग्यस्त्वं धर्मकर्मणां ॥ अविघ्नं भवतो भूयात् । संयमाध्वनि गच्छतः ॥ ६२ ॥ सप्तक्षेत्र्यां धनं दत्वा । कृत्वा पूजां जिनाल-ये ॥ महीनाथमनुज्ञाप्य । बंदिमोक्षं विधाय च ॥ ६३ ॥ धनसारं पदे कृत्वा । सुताराकुक्षिसंभवं ॥ इष्टमित्रजनं सर्वं । संभाष्यादरपूर्वकं ॥ ६४ ॥ दीनानाथजनं सर्व—मर्थिनं दुःस्थमानसं ॥ सुस्थं कृत्वा यथाशक्त्या । आहारादिप्रदानतः ॥ ६५ ॥ तृणवत्सर्वं परित्यज्य । बहिरंतः परिग्रहं ॥ मेघ-नादांतिके श्रेष्टी । प्रपेदे सर्वसंयमं ॥ ६६ ॥ चतुर्भिः कलापकं ॥

श्रेष्टिनः कणसारस्य । काप्यपूर्वा महार्थता ॥ स्ववित्तं कोटिशो दत्तं । स्फटाटोपो न दर्शितः ॥ ६७ ॥ गर्जित्वा बहुदूरमुन्नतिभृतो मुंचंति वार्यंबुदा । भद्रस्यापि गजस्य दानसमये संभाव्यते दु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मंदः ॥ पुष्पाम्बरदर्शनेन ददति प्रायः फलानि द्रुमा । नोत्सेको न मदो न कालहरणं दानप्रवृत्तौ सतां ॥ ६८ ॥ सम्यग्ज्ञानविवेकनिर्मलधियः कुर्वंत्यहो दुष्करं । यन्मुंचंत्युपभोगभांज्यपि धनान्येकांततो निःस्पृहाः ॥ न प्राप्तानि पुरा न संप्रति पुनः प्राप्तुं दृढः प्रत्ययो । वांछामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥ ६९ ॥ मासकल्पावसाने तु । जग्मुरन्यत्र सूरयः ॥ कणसारानगारोऽपि । जगाम गुरुभिः सह ॥ ७० ॥ क्षमादिब्रह्मपर्यंतं । विधाय वरसंयमं ॥ षष्टाष्टमतपः कृत्वा । पठित्वा च बहु श्रुतं ॥ ७१ ॥ संसारक्लेशनाशाय । विधायानशनं तथा ॥ वैजयंते सुरो जात । एकजन्मा महामुनिः ॥ ७२ ॥ युग्मं ॥ तस्मो अक्षतपूजाया—मक्षताक्षतवांछया ॥ यत्नः सदैव कर्तव्यो । लोकद्वयहितैषिणा ॥ ७३ ॥ इत्यक्षतपूजाकथानकं परिसमाप्तं ॥

सांप्रतं फलपूजाया । दृष्टांतोऽयं प्रदर्श्यते ॥ श्रूयतां सावधानेन । चेतसा पुण्यहेतवे ॥ १ ॥ अस्तीह लोकविख्यातं । सोपाराभिधपत्तनं ॥ नानावृक्षसमाकीर्णं । रम्यारामविराजितं ॥ २ ॥ बभूवारामिकस्तत्र । फलसाराभिधानकः ॥ सदापि सफलारंभ—प्रभूतारामनायकः ॥ ३ ॥ अन्यदा च तदारामाः । सर्वे दुर्वातदोषतः ॥ शुष्का अकांड एवाशु । न यच्छंतीप्सितं फलं ॥ ४ ॥ फलाभावे-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

न तस्यासी—द्दारिद्यमतिदारुणं ॥ ततोऽसौ सर्वलोकानां । जातः परिभवास्पदं ॥ ५ ॥ यतः—
दौर्गत्यं देहिनां दुःखं । किमन्यैः कीर्तितैः पुनः ॥ इहैव येन जायंते । जीवंतोऽपि मृता इव ॥
॥ ६ ॥ दैन्यस्य पात्रतामेति । पराभूतेः परं पदं ॥ विपदामाश्रयः शश्वद् । दौर्गत्यकलुषीकृतः ॥७॥
नीचानपि हि सेवंते । पालयंति पशूनपि ॥ समुद्रमपि लंघंते । दारिद्र्योपहता नराः ॥ ८ ॥ मूर्त्त
लाघवमेवैत—दपायानामिदं गृहं ॥ पर्यायो मरणस्यैष । दारिद्र्यं नाम यज्जनाः ॥ ९ ॥ लज्जं-
ते बांधवास्तेन । संबंधं गोपयंति च ॥ न गजंते यथा पूर्वं । यस्य स्तोकाः कपर्दिकाः ॥ १० ॥
परगेहे कदन्नानि । दत्तान्युच्चैरवज्ञया ॥ प्रभुंक्ते चाश्रुमिश्राणि । दौर्गत्यात्किमतः परं ॥ ११ ॥ धा-
र्मिकोऽपि विनीतोऽपि । वृद्धो वा पूजितोऽपि वा ॥ जनैर्दरिद्रः सावज्ञं । चांडाल इव दृश्यते ॥
॥ १२ ॥ शौचार्थं शिष्टयाप्यस्ति । किंचित्कार्यं क्वचिन्मृदा ॥ निर्धनेन नरेणेह । तावन्मात्रं न वि-
द्यते ॥ १३ ॥ दुरुत्तारो महापंकः । शल्यं दुःखदमुच्यते ॥ दुर्लंघ्यमेतत्कांतारं । यद्दरिद्रस्य जीवि-
तं ॥ १४ ॥ स एव नरको घोर—स्तदेतद्व्यसनं महत् ॥ सेयं कष्टा दशा पुंसां । दारिद्र्यं नाम य-
ज्जनाः ॥ १५ ॥ स्पष्टेऽपि वासरे सत्यं । दौर्गत्यतमसावृतः ॥ अग्रतोऽपि स्थितो यत्ना—न्न केना-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पीह दृश्यते ॥ १६ ॥ अतिसंतिष्ठमानोऽपि । प्रमोदादीश्वरे जने ॥ कार्याय कल्प्यते क्षुद्रै—र्धिग्दौर्गत्यमसंगतं ॥ १७ ॥ अन्यस्य विनयेनापि । दरिद्रो यदि तिष्ठति ॥ अर्थित्वपक्षे तदपि । क्षिप्यते निखिलं खलैः ॥ १८ ॥ एवं च फलसारोऽसौ । दुर्गदारिद्र्यखेदितः ॥ कष्टां दशां समापन्नः । कष्टं नयति वासरान् ॥ १९ ॥

अन्यदा गृहिणी तस्य । पुष्पश्रीनामिका किल ॥ रजन्यां पश्चिमे यामे । शयाना शयनीयके ॥ २० ॥ स्वप्ने पश्य निजारामान् । पल्लवितान् समंततः ॥ चारुपुष्पफलोपेतान् । नयनानंददायकान् ॥ २१ ॥ शिष्टः स्वप्नतया भर्तु—स्तेनाभाणि तव प्रिये ॥ भविता सुंदरः पुत्रः । समीहितफलप्रदः ॥ २२ ॥ प्रतीच्छ्य वचनं भर्तु—र्निजस्थानं जगाम सा ॥ गमितो रात्रिशेषश्च । धर्म्यया कथया तया ॥ २३ ॥ फलसारोऽपि सानंदो । दृष्टः स्वप्नो वरोऽनया ॥ जल्पन्नेवं गतः प्रात—र्निजारामेषु सत्वरं ॥ २४ ॥ यावदालोकते सर्वान् । पुष्पितान् फलितांस्तथा ॥ सर्वतः शाद्वलानुच्चैः । सिक्तानिवामृतप्लवैः ॥ २५ ॥ ततोऽसौ चिंतयामास । विस्मयाकुलचेतसा ॥ अहो मे पुण्यविस्फूर्ति—रहो मे चलिता दशा ॥ २६ ॥ येनैते सर्वतो रम्याः । पुष्पिताः फलिता द्रुमाः ॥ मन्ये

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जातं ममैश्वर्यं । दूरं नष्टा दरिद्रता ॥ २७ ॥ ततस्तेन समाकार्य । शीघ्रं कर्मकरान् बहून् ॥ नालि-
केरादिवृक्षेभ्यो । जग्रहे तत्फलोत्कराः ॥ २८ ॥ ततस्तानपि विक्रीय । लब्धं द्रव्यं यथेप्सितं ॥ क्र-
मेण जातमैश्वर्यं । लोकमध्ये च गौरवं ॥ २९ ॥ यतः—मंदरतुल्लावि नरा । अत्थविहूणा हवंति
तिणतुल्ला ॥ तिणतुल्लावि हु अत्थेण । परिगया मंदरसमाणा ॥ ३० ॥ यस्यार्थास्तस्य मित्राणि ।
यस्यार्थास्तस्य बांधवाः ॥ यस्यार्थाः स पुमान् लोके । यस्यार्थाः स च पंडितः ॥ ३१ ॥ जातिर्यातु
रसातलं गुणगणस्तस्याप्यधो गच्छतां । शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ॥ शौर्ये वैरि-
णि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलो । येनैकेन विना गुणास्तृणलवप्रायाः समस्ता अमी ॥
॥ ३२ ॥ एवं चैश्वर्ययुक्तोऽसौ । फलसारः फलैः कृतः ॥ मान्यते सर्वलोकेन । सर्वकार्येषु सादरं ॥
॥ ३३ ॥ अथान्यदास्य गेहिन्याः । कुक्षौ पुष्पश्रियोऽजनि ॥ गर्भस्ततश्च सा तुष्टा । तमुवाह यथा-
सुखं ॥ ३४ ॥ भर्त्रा संपूरिताशेष—दोहदा समये च सा ॥ प्रसूता सुंदरं पुत्रं । सर्वलक्षणसंयुतं
॥ ३५ ॥ कारितं च ततः पित्रा । महोत्सवपुरस्सरं ॥ कृतबंधुजनानंदं । वर्धापनकमंजसा ॥ ३६ ॥
स्वप्नानुसारतस्तस्य । पित्रा नाम प्रतिष्टितं ॥ फलदेव इति ख्यातं । विभूत्या बंधुभिः सह ॥ ३७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यथा यथा गृहे तत्र । बालोऽसौ परिवर्धते ॥ तथा तथा तदारामे । फलवृद्धिरपीष्टदा ॥ ३८ ॥ एवं च वर्धमानोऽसौ । वयसाप्तमनोरथः ॥ स्वीकृताशेषविद्यश्च । संप्राप्तो वरयौवनं ॥ ३९ ॥ ततश्च जनकेनैष । महर्द्ध्या परिणायितः ॥ कन्यकां वसुदत्तस्य । वसुश्रीरितिनामिकां ॥ ४० ॥ एवं च पूर्णसर्वांगो । भुंक्ते भोगांस्तया सह ॥ प्रावीण्यं च परं बिभ्र—त्कलासु सकलास्वपि ॥ ४१ ॥ अथान्यदा हृतस्तस्य । पिता हतकमृत्युना ॥ कृतानि मृतकृत्यानि । विशोकश्चाजनि क्रमात् ॥ ४२ ॥ बंधुभिः स्थापितः प्रीत्या । फलदेवः पितुः पदे ॥ सर्वं सर्वजनानिंद्यं । व्यवहारं चकार सः ॥ ४३ ॥ कीर्त्या रूपेण लक्ष्म्या च । सौजन्यादिगुणैस्तथा ॥ शेषलोकैः समं तेन । व्यतिक्रांतो निजः पिता ॥ ४४ ॥ अन्यदा कारितास्तेन । पोताः पंच महालयाः ॥ कृत्वा समग्रसामग्रीं । क्रमेण प्रगुणीकृताः ॥ ४५ ॥ प्रधानभूरिभांडैश्च । पोताः पंचापि ते भृताः ॥ प्रभूतदिनयोग्यं च । संगृहीतं जलेंधनं ॥ ४६ ॥ शोभने तिथिनक्षत्रे । समारूढस्ततः स्वयं ॥ दुर्योधयोधसंघातैः । सार्धं वणिक्सुतैश्च सः ॥ ४७ ॥ ततश्च प्रेरिताः पोताः । सिंहलद्वीपसन्मुखं ॥ तूर्णं गंतुं समारब्धा—स्तूर्यध्वाननभृतांबराः ॥ ४८ ॥ उल्लंघ्य भूयसीं भूमिं । स्तोकैरपि दिनैर्जवात् ॥ प्राप्ता मलयदेशस्य । तटं चं-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दनशोभितं ॥ ४७ ॥ दृशदेव ततो दृष्ट्वा । शोभितानि वनश्रिया ॥ मलयाचलशृंगाणि । फलदे·
वोऽब्रवीदिदं ॥ ५० ॥ कोऽयं नो दृश्यते शैल—स्तैरूचे मलयाभिधः ॥ गच्छतामु प्रपश्याम । ए·
वमस्त्विति ते जगुः ॥ ५१ ॥

ततश्चोत्तीर्य पोतेभ्यो । गतस्तत्र सकौतुकः ॥ युक्तः शौर्ययुतैर्योधैः । कैश्चिद्वणिक्सुतैस्तथा ॥
॥ ५२ ॥ आलोक्य सर्वतः शैल—मुत्तीर्णाश्च ततो भुवि ॥ ते सर्वे हर्षिता बाढं । पश्यंतिस्माभि·
तस्ततः ॥ ५३ ॥ यावदेकत्र पश्यंति । वरारामद्वयं महत् ॥ शुष्कमेकं तयोर्बाढ—मेकमत्यंतशाद्·
वलं ॥ ५४ ॥ तयोर्मध्ये पुनर्दृष्टं । जीर्णं देवकुलद्वयं ॥ ततस्तत्रापि ते जग्मु—र्भ्राम्यंतिस्म समं·
ततः ॥ ५५ ॥ जिनालये जिनेंद्रस्य । बिंबं सर्वांगसुंदरं ॥ विलोक्य च प्रहृष्टोऽसौ । मनस्येवं व्य·
चिंतयत् ॥ ५६ ॥ अहो देवाधिदेवोऽयं । पूज्योऽयं सर्वदेहिनां ॥ तदेनमहमप्यद्य । पूजयामीति
तर्कयन् ॥ ५७ ॥ बहिर्देवकुलाद्याव—न्निष्क्रांतः पुष्पहेतवे ॥ तावद् दृष्टः स आरामः । सद्यः पल्ल·
वितद्रुमः ॥ ५८ ॥ युग्मं ॥ ततश्चादाय पुष्पाणि । पूजितः परमेश्वरः ॥ गृहीत्वा फलपूगं च । त·
त्पुरो रचितो बलिः ॥ ५९ ॥ ततः प्रणम्य तं देवं । भक्त्या चिरं विलोक्य च ॥ संप्राप्ताशेषकृत्या·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ए—मात्मानमिति कल्पयन् ॥ ६० ॥ विनिर्गत्य स तत्स्थानाद् । द्वितीयाराममागतः ॥ देवकुलं च तत्रस्थं । प्रविवेश स कौतुकी ॥ ६१ ॥ युग्मं ॥ दृष्टा च तत्र यक्षस्य । प्रतिमातिमहोदरा ॥ सुभोगाशुभसगंध—पुष्पमालाभिरर्चिता ॥ ६२ ॥ ततोऽसौ चिंतयामास । साश्चर्यो निजमानसे ॥ अहो एकप्रदेशेऽपि । तथैकस्मिन्नृतावपि ॥ ६३ ॥ एकोऽयं शुष्ककारामो । द्वितीयस्त्वभिशाद्वलः ॥ एको देवाधिदेवोऽयं । केनापीह न पूज्यते ॥ ६४ ॥ पूज्यतेऽसौ तथा नित्यं । तेनोच्चैर्विस्मयो मम ॥ कारणेनात्र भो भाव्यं । ज्ञातव्यं तत्कथं मया ॥ ६५ ॥ यावदेवं स तत्रास्ते । विकल्पाकुलमानसः ॥ तावत्पुरः स्थितामेकां । ददर्शासौ वरस्त्रियं ॥ ६६ ॥ पृष्टा च सा यथा का त्वं । कुतो वा कुत्र तिष्ठसि ॥ सा प्राह देवतात्राहं । वसामि वरकानने ॥ ६७ ॥ यक्षमेनं सदाकालं । सपूजं कुर्वती सती ॥ रक्षंती च निजोद्यानं । नानावृक्षसमाकुलं ॥ ६८ ॥ स प्राह शुष्ककारामे । योऽयं देवोऽवतिष्टते ॥ तं सपूजं किमत्यत्र । न करोषि निवेदय ॥ ६९ ॥ तथा शुष्कः स आरामो । भद्रे चायं तु शाद्वलः ॥ ममैतत्कौतुकं भाति । यदि वेत्सि तदा वद ॥ ७० ॥ तयोक्तं श्रूयतां भद्र । सावधानेन चेतसा ॥ आसीदत्र पुरं रम्यं । शंखावर्ताभिधं महत् ॥ ७१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बभूव तत्र विख्यातः । शंखचूडाभिधो नृपः ॥ तद्भार्या वनमालाख्या । रूपसौभाग्यशालिनी ॥ ७२ ॥ पुत्रश्च वनमालायाः । शंखनामा तथाजनि ॥ स पित्रा यौवनं प्राप्तो । यौवराजपदे कृतः ॥ ७३ ॥ छत्रचामरहस्त्याद्यं । तस्मै दत्तं महीभुजा ॥ ततोऽसौ भुज्यते भोगान् । विलसन् राजलीलया ॥ ७४ ॥ इतश्च दक्षिणश्रेण्यां । वैताढ्येऽस्ति महापुरं ॥ रथावर्तं प्रभुस्तत्र । विद्याधरो मणिप्रभः ॥ ७५ ॥ तद्भार्या रत्नरेखाख्या । रत्नमाला च तत्सुता ॥ सान्यदा शंखचूडेन । मद्भर्त्रा पर्यणीयत ॥ ७६ ॥ कालेन गछता जाता । सा राज्ञोऽतीववल्लभा ॥ अहं पुनरनिष्टेति । दुर्गदौर्भाग्ययोगतः ॥ ७७ ॥ किंबहुना तयाकारि । वशवर्ती नराधिपः ॥ युक्तमयुक्तकं वापि । करोत्येव स तद्वचः ॥ ७८ ॥ अन्यदा च सुतस्तस्या । जातो रत्नप्रभाभिधः ॥ क्रमेण यौवनं प्राप्तः । नारीजनमनोहरं ॥ ७९ ॥ प्रधानराजपुत्रीश्च । महर्ध्या परिणीतवान् ॥ बुभुजे कामजं सौख्यं । ताभिः सार्धं स संततं ॥ ८० ॥ अन्यदा भणितो राजा । सादरं रत्नमालया ॥ यथामुं मामकं पुत्रं । यौवराजपदे कुरु ॥ ८१ ॥ तेनापि तत्तथाचक्रे । सर्वं तद्वशवर्तिना ॥ अतीव च पराभूतः । शंखनामा महीभुजा ॥ ८२ ॥ ततोऽसौ वनमालाया । अनाख्यायैव निर्गतः ॥ दूरं देशांतरं प्राप्तो । बंभ्रमी·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिस्म न्नूतले ॥ ८३ ॥ तथेदं मंदिरं जैनं । कारितं रत्नमालया ॥ आरामश्चाभिरामोऽयं । नाना-वृक्षसमाकुलः ॥ ८४ ॥ वनमाला पुनश्चेदं । सुंदरारामराजितं ॥ प्राकारवेष्टितं तुंगं । यक्षालयमचीकरत् ॥ ८५ ॥ वहंती रत्नमालासौ । वनमालां च मत्सरं ॥ व्याघातं यक्षपूजायाः । प्रचक्रे राजवर्चसा ॥ ८६ ॥ आदाय सर्वपुष्पाणि । सर्वारामोद्भवानि सा ॥ कारयति सदा पूजां । स्वकीये जिनमंदिरे ॥ ८७ ॥ तयाभिन्नूयते बाढं । वनमाला पदे पदे ॥ दूयते च दृढं चित्ते । ततः सैवमचिंतयत् ॥ ८८ ॥ राजा च रत्नमाला च । कुर्वते मे पराभवं ॥ न शक्ताहममुं सोढुं । तस्मादग्नौ विशाम्यहं ॥ ८९ ॥ वहंती मत्सरं घोरं । ततः सा दंपतींप्रति ॥ अवज्ञाता च सा राज्ञा । प्रविवेश हुताशने ॥ ९० ॥

मृत्वा च व्यंतरी जाता । विज्ञाय ज्ञानतस्ततः ॥ आगत्य रुष्टया तूर्णं । शंखचूमो निपातितः ॥ ९१ ॥ ससुता रत्नमाला च । शेषलोको बहुस्तथा ॥ शंखावर्तं पुरं दग्धं । धनधान्यसमाकुलं ॥ ॥ ९२ ॥ तथा सर्वोऽपि देशोऽयं । निर्दह्योद्वासितस्तया ॥ शोषितश्चायमारामः । प्राकारश्चास्य पातितः ॥ ९३ ॥ देवकुलानि सर्वाणि । संन्नमान्यत्र कानने ॥ अथेदं न्नंक्तुमारब्धा । मौलं देवकु-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

त्वं च सा ॥ ९४ ॥ न शशाक परं भंक्तुं । प्रतिष्ठागुणगौरवात् ॥ सा चाहं वनमालेति । व्यंतरी त्वमुपागता ॥ ९५ ॥ श्रुत्वेदं फलदेवेन । जजल्पेऽमलया गिरा ॥ यदहं वच्मि हे भद्रे । त्वं कोपं तत्र माकृथाः ॥ ९६ ॥ नेदं मे संगतं भाति । भद्रे यच्चेष्टितं त्वया ॥ निरागसोऽपि यल्लोकाः एतावंतो निपातिताः ॥ ९७ ॥ इदं च पुनरत्यंत—मसंगततरंतरं ॥ यदेव देवदेवोऽय—मपूज्यस्त्वयका कृतः ॥ ९८ ॥ धर्मार्थमेव यद्कोऽपि । पूज्यते च भवादृशैः ॥ धर्मार्थिना च पूज्योऽसौ । यो देवस्त्रिजगत्प्रभुः ॥ ९९ ॥ त्रैलोक्यप्रभुता ताव—द्यक्षस्यास्य न विद्यते ॥ तत्संसूचकलिंगानां । यच्छरीरेऽप्यदर्शनात ॥ १०० ॥ अस्य तु देवदेवस्य । त्रैलोक्यप्रभुतां स्फुटं ॥ छत्रत्रयादिचिह्नानि । व्यंजयंति न संशयः ॥ १ ॥ तथाहि—श्वेतछत्रत्रयं प्रेख—न्नानारत्नविराजितं ॥ शंसत् त्रैलोक्यनाथत्व—मस्योपरि विराजते ॥ २ ॥ उभयपार्श्वयोश्चेमौ । सुरौ चामरधारिणौ ॥ व्यक्तं देवाधिदेवत्वं । व्यंजयंतौ विराजितः ॥ ३ ॥ सिंहासनं च सौवर्णं । भास्वद्रत्नौघमंडितं ॥ अस्येह ख्यापयत्येव । त्रैलोक्यमहनीयतां ॥ ४ ॥ तद्भद्रे देवदेवोऽयं । सर्वामरनरार्चितः ॥ पूजनीयो विशेषेण । किं शेषैः पूजितैः सुरैः ॥ ५ ॥ तदत्र मत्सरं मुक्त्वा । मुक्त्वा मिथ्याभिमानितां ॥ जगद्धितमिमं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवं । सपूजं कुरु सर्वदा ॥ ६ ॥ सा प्राह सर्वमेवेदं । करिष्याम्येवमेव हि ॥ नान्यथा जायते तत्तु । यच्चित्ते चिंतितं त्वया ॥ ७ ॥ चिंतानंतरमेवाशु । येनारामः स शुष्ककः ॥ त्वत्प्रभावेण संजातः । सद्यः पुष्पफलाकुलः ॥ ८ ॥ तदिदं सर्वथा मुक्तं । वैरं पूर्वभवानुगं ॥ प्रतिपन्नश्च देवोऽयं । देवत्वेन मयाधुना ॥ ९ ॥ अतस्त्वं मेऽधुना बंधु—र्गौरव्यो गुरुसन्निभः ॥ इदं गृहाण मत्तुष्टि—हेतवे रत्नपंचकं ॥ १० ॥ तत्र यद्गृहस्याग्रे । सद्वृक्षो यः प्रदृश्यते ॥ सर्वरोगहरश्चायं । नामतः कर्मतस्तथा ॥ ११ ॥ द्वितीयश्च तदासन्ने । दृश्यते यो महाद्रुमः ॥ सर्वविषापहो नाम्ना । ख्यातोऽयं क्रियया तथा ॥ १२ ॥

एतयोः पुष्पपत्राणि । फलानि च गृहाण भोः ॥ येन मे जायते तुष्टि—र्मा मोघां प्रार्थनां कृथाः ॥ १३ ॥ तथेदं भो गृहाण त्व—मौषधीद्वयमुत्तमं ॥ एका संरोहिणीनाम्नी । शल्योद्धारकरा परा ॥ १४ ॥ अयं च गृह्यतां बंधो । हारः सौभाग्यसुंदरः ॥ दुर्भगस्यापि सौभाग्य—कारको मम तुष्टये ॥ १५ ॥ ततश्च फलदेवोऽपि । लात्वा तद्रत्नपंचकं ॥ वनमालोपरोधेन । पूजयंस्तत्र तं जिनं ॥ १६ ॥ दिनानां पंचकं स्थित्वा । वनमालाविसर्जितः ॥ अचलद्यानपात्रस्थः । स्वाभिप्रेतदि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शंप्रति ॥ १७ ॥ युग्मं ॥ समुल्लंघ्य ततस्तूर्ण—मंभोधेर्भूयसीं भुवं ॥ सुवर्णवालुकाख्याया । नद्या
मुखमुपागतः ॥ १८ ॥ ततो जलेंधनाद्यर्थं । प्रेषिताः पुरुषा निजाः ॥ गत्वा तेऽपि समायाता ।
जलाद्यादाय सत्वरं ॥ १९ ॥ प्रोक्तं च फलदेवाय । यद् दृष्टं कौतुकं तकैः ॥ यथास्माभिर्गतैस्तीरं
। दृष्टैका वरकन्यका ॥ २० ॥ वंशकुभंगमध्यस्था । यौवनारंभवर्तिनी ॥ सविषादा रुदंती च । भय-
संभ्रांतलोचना ॥ २१ ॥ युग्मं ॥ कुभंगान्नातिदूरेण । ददृशे पुरुषद्वयं ॥ पतितं भूतले शस्त्र—प्र-
हारशतसंकुलं ॥ २२ ॥ अंतःशल्यं समासन्न—मरणादतिदुःखितं ॥ श्रुत्वेदं फलदेवोऽपि । समु-
त्तीर्य द्रुतं ततः ॥ २३ ॥ युग्मं ॥ आरुह्य डोणिकां लघ्वीं । कियद्भिः सुभटैः सह ॥ गतस्तत्र क्ष-
णादेव । दृष्टौ च पुरुषौ तकौ ॥ २४ ॥ शल्योद्धरणिकानाम्नी । कृष्टा सा चौषधी ततः ॥ दत्ता व्र-
णमुखेष्वाशु । ततः शल्यानि निर्ययुः ॥ २५ ॥ संरोहिणीप्रयोगेण । व्रणाः संरोहिताः क्षणात् ॥
स्वस्थावस्थौ च तौ जातौ । पुमांसावौषधीगुणात् ॥ २६ ॥ पृष्टौ च फलदेवेन । यथा भोः किमु
कारणं ॥ युवां यदत्र शस्त्रौघ—प्रहारशतजर्जरौ ॥ २७ ॥ गतौ च मरणावस्थां । पतितावत्र भूतले
॥ ताभ्यामुक्तं महाभाग । श्रूयतां तव कथ्यते ॥ २८ ॥ युग्मं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आवां हि भ्रातरौ विद्धि । द्वावपि च सहोदरौ ॥ पुत्रौ च चंद्रचूडस्य । चंद्रश्रीकुक्षिसंभवौ ॥ २९ ॥ सुचंद्रपूर्णचंद्राख्यौ । बंधूनामतिवल्लभौ ॥ विद्याधरौ सदा प्रीत्या । वर्तावहे परस्परं ॥ ॥ ३० ॥ अन्यदा पूर्णचंद्रेण । भ्राम्यता धरणीतलं ॥ सिंहलद्वीपमध्यस्थे । पुरे सिंहपुराभिधे ॥ ॥ ३१ ॥ सिंहविक्रमभूपस्य । दुहिता रत्नसुंदरी ॥ दृष्टा ततश्च सर्वांगं । विद्धः कामशिलीमुखैः ॥ ॥ ३२ ॥ युग्मं ॥ समाख्यातं ममागत्य । द्वावप्यावां ततो द्रुतं ॥ गत्वा सिंहपुरे तूर्णं । गृहीत्वा रत्नसुंदरीं ॥ ३३ ॥ गगनवर्त्मना याव—दागच्छावस्ततो मम ॥ नितांतं रत्नसुंदर्याः । सौंदर्येण हृतं मनः ॥ ३४ ॥ युग्मं ॥ उक्तो मया लघुभ्राता । बालेयं मे भविष्यति ॥ स प्राह न ददे तुभ्य—महमिमां विना म्रिये ॥ ३५ ॥ ततः सा लातुमारब्धा । तस्य हस्तान्मया बलात् ॥ केशाकेशिं च कुर्वंता—ववतीर्णौ महीतले ॥ ३६ ॥ मुक्त्वा वंशकुडंगांतः । कन्यकां रत्नसुंदरीं ॥ गजाविव मदोन्मत्तौ । लग्नौ योद्धुं परस्परं ॥ ३७ ॥ युद्ध्वा च विविधैः शस्त्रै—श्चिरमाबद्धमत्सरौ ॥ ततो गाढप्रहारैश्च । पतितावत्र भूतले ॥ ३८ ॥ प्राप्तौ च मरणावस्थां । त्वयोज्जीवापितौ पुनः ॥ तस्मादत्रावयोः श्रीमं—स्त्वदन्यो नोपकारकः ॥ ३९ ॥ त्वं पिता त्वं परं मित्रं । त्वं चात्यंतिकबांधवः ॥ अस्याश्च

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

रत्नसुंदर्याः । कारणेनावयोरिमा ॥ ४० ॥ संजाता दारुणा व्याप—दन्योन्यं मरणांतिका ॥ तदेष स्वीयवृत्तांत । आवाभ्यां कथितस्तव ॥ ४१ ॥ युग्मं ॥ सांप्रतं त्वं स्वकीयं नौ । संक्षेपेण निवेदय ॥ स प्राह वयमायाताः । सोपाराभिधपत्तनात् ॥ ४२ ॥ गंतारः सिंहलद्वीपं । वाणिज्येन धनेछया ॥ ततः प्रोक्तं सुचंडेण । यद्येवं गृह्यतामियं ॥ ४३ ॥ कन्या सिंहपुरे गत्वा । जनकस्य समर्पयेः ॥ तथा गृहाण भो विद्या—मिमामाकाशगामिनीं ॥ ४४ ॥ युग्मं ॥ येन नौ जायते तुष्टि—स्ते-नापि च तथा कृतं ॥ अथ प्रणम्य तौ भक्त्या । विद्याधरौ गतौ ततः ॥ ४५ ॥ फलदेवोऽपि सानं-दो । गृहीत्वा रत्नसुंदरीं ॥ आयातस्तेषु पोतेषु । प्रवृत्तो गंतुमुच्चकैः ॥ ४६ ॥

अथ गछद्भिरेकत्र । वंशाग्रे ददृशे ध्वजः ॥ किमेतदिति पप्रछ । फलदेवो निजान् जनान् ॥ ॥ ४७ ॥ तैरवाचीदमत्रास्ते । भिन्नवाहनिको नरः ॥ कश्चित्तेनेह बध्धोऽयं । वंशाग्रे दृश्यते ध्वजः ॥ ४८ ॥ आत्मनो ज्ञापनाहेतो—रेवं संज्ञावयामहे ॥ श्रुत्वेदं प्रेषिता द्रोणी । स पुमानानीतः क्ष-णात् ॥ ४९ ॥ युग्मं ॥ आरोपितः स्वबोहित्थे । दृष्टो रोगैरपि द्रुतः ॥ तथाहि तत्तनौ दृष्टो । दा-घज्वरो हि दारुणः ॥ ५० ॥ श्वासः कासो गलत्कुष्टः । शुष्ककंडू शिरोव्यथा ॥ अक्षिकुक्षिव्यथा

तीव्रा । दंतपीमा जलोदरं ॥ ५१ ॥ ततश्च फलदेवेन । परोपकृतिबंधुना ॥ तस्य रोगहरस्याशु । पूर्वोद्दिष्टस्य शाखिनः ॥ ५२ ॥ पूर्वोक्तपुष्पपत्राणि । तस्मै दत्तानि सादरं ॥ ततोऽसौ प्रगुणो जातो । नीरोगः कनकछविः ॥ ५३ ॥ पृष्टश्च फलदेवेन । कुतस्त्वं कुत्र यास्यसि ॥ किमर्थं वा किमेकाकी । कथं वाजनि रोगवान् ॥ ५४ ॥ किं कुलं किं च ते नाम । स प्राह श्रूयतामिति ॥ कथामाश्चर्यसंपूर्णां । मामकीनां नरोत्तम ॥ ५५ ॥ सिंधुसौवीरदेशस्था—दहं वीतभयात्पुरः ॥ अगछं कटाहद्वीपं । यानस्थितो धनेछया ॥ ५६ ॥ राशिं महांतमादाय । तथा स्वस्य सहायकं ॥ कृत्वा च शुभदत्താख्यं । वणिक्पुत्रं च दुर्जनं ॥ ५७ ॥ युग्मं ॥ विक्रीतानि च भांडानि । भूरिद्रव्यमुपार्जितं ॥ ततो भृत्वा निजं पोतं । चलिताः स्वं पुरंप्रति ॥ ५८ ॥ अर्धमार्गे समायाताः । स्तोकैरपि च वासरैः ॥ चिंतितं शुभदत्तेन । गृह्णाम्यस्याखिलं धनं ॥ ५८ ॥ अथाहं शुभदत्तेन । द्रव्यसंलुब्धचेतसा ॥ क्षिप्तश्छलेन बोहित्था—त्पतितोऽगाधवारिणि ॥ ५९ ॥ उच्छलितः क्षणादेव । लब्धं फलकखंडकं ॥ लग्नस्तत्र जले भ्राम्यन् । दैवयोगादिहागतः ॥ ६० ॥ अत्रत्यांबुफलाहार—दोषाद्रोगैरभिद्रुतः ॥ नाम्ना च शुभचंद्रोऽहं । जिनचंद्रश्च मत्पिता ॥ ६१ ॥ सुश्रावकसमाचार—कारको ध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्मकारकः ।। तदहो यत्त्वया पृष्टं । तदादिष्टं मयाखिलं ।। ६२ ।। अथोक्तं फलदेवेन । श्री शुभचंद्र कीदृशः ।। सुश्रावकसमाचारः । संक्षेपान्मम कथ्यतां ।। ६३ ।। स प्राह श्रूयतां श्रेष्टिन् । कर्णं दत्वा क्षणांतरं ।। श्रावको नात्ति मांसानि । न मद्यानि पिबत्यसौ ।। ६४ ।। न च भुंक्ते रजन्यां तु । नाश्नाति मधुभक्षणे ।। एषां हि भक्षणे दोषा । भूयांसः कथिता जिनैः ।। ६५ ।। धिग्मांसं यत्परप्राण—प्रणाशेन प्रजायते ।। को भक्षयेदिदं प्राज्ञो । यद्भुक्तं पातयेदधः ।। ६६ ।। अहिंसा धर्मसर्वस्वं । कुतः सा मांसभक्षणे ।। अतः श्रावकलोकेन । मांसमाजन्मवर्जितं ।। ६७ ।। मद्यं सर्वप्रमादानां । प्रमादः प्रथमो मतः ।। प्रथमत्वे च को हेतु—र्ज्येष्टं यत्पापकारणं ।। ६८ ।। किंच—वैरूप्यं व्याधिपिंडः स्वजनपरिभवः कार्यकालातिपातो । विद्वेषो ज्ञाननाशः स्मृतिमतिहरणं विप्रयोगश्च सद्भिः ।। पारुष्यं नीचसेवा कुलबलतुलना धर्मकामार्थहानिः । कष्टं वो षोमशैते निरुपचयकरा मद्यपानस्य दोषाः ।। ६९ ।। मूलं सर्वविकाराणां । कारणं पापकर्मणां ।। हेतुर्वैरानुबंधस्य । निवासो निखिलापदां ।। ७० ।। रागद्वेषादिदोषाणां । पोषणं गुणमोषणं ।। शिष्टैर्निंद्यं कथं नाम । मद्यं सुश्रावकः पिबेत् ।। ७१ ।। युग्मं ।। आयुर्वर्षशतं लोके । तदर्धं स उपोषितः ।। करोति विरतिं धन्यो । यः

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

सदा निशि जोजने ॥ ७२ ॥ यतः—मालिंति मह्यिलं जामि—णीए रयणीयरासयं तेणं ॥ ते विट्टालंति फुमं । रयणीए जुंजमाणे ज ॥ ७३ ॥ मेहं पिपीलियाज । हणंति वमणं च मछिया कुणइ ॥ जुया जलोयरत्तं । कोलिज ज कोढरोगं च ॥ ७४ ॥ वालो सरस्स भंगं । कंटो लग्गइ गलंमि दारुं च ॥ तालुंमि विंधइ अली । वंजणमश्लंमि जुंजंतो ॥ ७५ ॥ जीवाणं कुंथुमाइणं । घायणं जायणधोयणाइसु ॥ एमाई रयणिजोयण—दोसा को साहिलं तरइ ॥ ७६ ॥ तद्वर्णास्त्रसा जीवाः । संजवंति यतः किल ॥ सर्वज्ञशासने तेन । दूषिते मधुमृद्गणे ॥ ७७ ॥ यत उक्तमागमे—मज्जे महुंमि मंसे य । नवणीयंमि चउह्वए ॥ उप्पज्जंति असंखात—तवन्ना तब जंतुणो ॥ ७८ ॥

तथा श्रावकलोकस्य । देवः सर्वज्ञ एव हि ॥ धर्मस्तु तत्प्रणीतो यः । स त्वहिंसादिलक्षणः ॥ ७ए ॥ श्रुतशीलतपोयुक्ता । गुरवस्तु सुसाधवः ॥ तथा सुश्रावका नैव । हिंसति स्थूलदेहिनः ॥ ८० ॥ स्थूलालीकं न जल्पंति । स्थूलादत्तं न गृह्णते ॥ परदारान्न गछंति । परिगृह्णंति नामितं ॥ ८१ ॥ कुर्वंति दिक्षु सर्वासु । प्रमाणं गमनाश्रितं ॥ कुर्वंति शक्तितो मान—मपि जोगोपजोग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

योः ॥ ८२ ॥ त्यजंत्यनर्थदंडं च । मनोवाक्कायजं सदा ॥ समस्तव्रतसंक्षेपं । कुर्वंति प्रतिवासरं ॥
॥ ८३ ॥ सावद्येतरयोगानां । त्यागसेवनरूपकं ॥ सामायिकव्रतं चैव । यथाशक्त्या प्रकुर्वते ॥८४॥
आहारदेहसत्कार—ब्रह्मव्यापारवर्जनात् ॥ कुर्वंति पौषधं चैव । विशुद्धं धर्मपोषकं ॥ ८५ ॥ वरा·
हारादिदानं च । निजन्यायार्जितं तथा ॥ यच्छंति साधुलोकाय । कर्मक्षयार्थमंजसा ॥ ८६ ॥ जैने
गृहे च बिंबे च । सिद्धांते संघ एव च ॥ व्ययंति च यथाशक्त्या । न्यायोपात्तं निजं धनं ॥८७॥
तथा साधर्मिलोकानां । वात्सल्यं भक्तियोगतः ॥ प्रकुर्वंति यथायोगं । यथाकालं यथाबलं ॥८८॥
क्रियते च सदा श्राद्धै—स्त्रिसंध्यं जिनपूजनं ॥ सदा सद्गुरुसेवा च । भक्त्या जैनवचःश्रुतिः ॥
॥ ८९ ॥ दानं दीनादिलोकेभ्यो । विधिवद्गुरुपूजनं ॥ लोकागमविरुद्धानां । दूरतः परिवर्जनं ॥
॥ ९० ॥ अशिष्टसंगतित्यागः । शिष्टैश्च सह संगतिः ॥ मोक्षसौख्याभिलाषश्च । संसारभयभीरुता
॥ ९१ ॥ इंद्रियाणां जयः शक्त्या । कषायाणां च निग्रहः ॥ सत्यं शीलं च शौचं च । दाक्षिण्यं
च दयालुता ॥ ९२ ॥ तथैंगालवनादीनां । बहुसावद्यकर्मणां ॥ बहुलोकविरुद्धानां । शक्तितः प·
रिवर्जनं ॥ ९३ ॥ परपीडापरित्यागः । परावर्णाप्रभाषणं ॥ परोपकारकारित्वं । परद्रव्येष्वलोभता ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ९४ ॥ मैत्री सर्वेषु सत्वेषु । माध्यस्थ्यं निर्गुणे जने ॥ कृपा संक्लिश्यमानेषु । तुष्टिः सद्गुणधा-
रिषु ॥ ९५ ॥ माननं मान्यलोकस्य । पूज्यलोकस्य पूजनं ॥ सर्वशिष्टजनानिंद्य—व्यवहारेषु व-
र्तनं ॥ ९६ ॥ इत्यनेकगुणग्रामः । सुश्रावकजनोचितः ॥ नाख्यातुं शक्यते सर्वो । जो श्रेष्टिन्
मादृशैर्जनैः ॥ ९७ ॥ लेशतश्च मयाख्यातो । यथामति तवाग्रतः ॥ विस्तरेण समाख्यांति । साध-
वो हि बहुश्रुताः ॥ ९८ ॥ तदेष श्रावको धर्मः । सर्वः सर्वज्ञभाषितः ॥ शुद्धसम्यक्त्वसंयुक्तः । पं-
चाणुव्रतसंयुतः ॥ ९९ ॥ सप्तशिक्षापदोपेतो । नानाभिग्रहशोभितः ॥ सद्गतिपूरसन्मार्गो । दुर्ग-
तिद्वाररोधकः ॥ २०० ॥ पारंपर्येण जीवानां । मोक्षस्यापि हि साधकः ॥ मयापि श्राद्धधर्मोऽयं ।
सर्वकल्याणकारकः ॥ १ ॥ सद्भावतो विधानेन । गृहीतो गुरुसन्निधौ ॥ अथानंदितचित्तेन । फल्ग-
देवेन जल्पितं ॥ २ ॥ सुंदरः सुंदरो धर्मः । साधु साधूदितं त्वया ॥ ममापि त्वं ह्यमुं धर्मं । देहि
त्वमेव मे गुरुः ॥ ३ ॥ आख्याय देवतत्वादि । तेनापि च तथा कृतं ॥ ततश्च फल्गदेवस्य । धर्म-
प्राप्तिवशादलं ॥ ४ ॥ संजातः परमानंद—स्ततश्चिंतितवानिदं ॥ धन्योऽहं कृतपुण्योऽहं । दृष्टोऽहं
त्रिजगच्छ्रिया ॥ ५ ॥ युग्मं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यतोऽयं सुंदरो धर्मो । लब्धो लब्धिमता मया ॥ स एष शुभचंद्रो मे । सद्बंधुर्बंधुरो गुरुः ॥ ॥ ६ ॥ यत्संगेनाद्य जातोऽहं । सर्वकल्याणभाजनं ॥ अथोक्तं शुभचंद्रेण । फलदेवाधुना भवान् ॥ ७ ॥ आख्यातु निजवृत्तांतं । येन मे जायते धृतिः ॥ मूलदेव समाख्यात—स्तस्मै तेनापि सोऽखिलः ॥ ८ ॥ युग्मं ॥ सोऽपि तस्य समाकर्ण्य । मुमुदे निजमानसे ॥ एवं च धर्मसंबंधं । विचारं कुर्वतोस्तयोः ॥ ९ ॥ वहंतस्ते महापोताः । समुल्लंघ्य पयोनिधिं ॥ संप्राप्ता रत्नगंभीरं । पुरं पौरजनाकुलं ॥ १० ॥ युग्मं ॥ ततो नंगरितास्तत्र । वेलाकुले जनाकुले ॥ ततोऽवतीर्य पोतेभ्यः । फलदेवो नयान्वितः ॥ ११ ॥ प्रधानवणिग्भिः सार्धं । गृहीत्वा प्राभृतं महत् ॥ गतो राजकुले शीघ्रं । दृष्टो राजा ननाम तं ॥ १२ ॥ युग्मं ॥ अर्पितं प्राभृतं पश्चा—न्निषण्णो दर्शितासने ॥ पृष्टा वार्ता नरेंद्रेण । प्रोक्ता तेनापि मूलतः ॥ १३ ॥ ततस्तद्दर्शनेनैव । राज्ञा रंजितचेतसा ॥ सन्मानं सादरं तस्य । प्रासादा दर्शिता वराः ॥ १४ ॥ ततश्च पातितं शुल्कं । विक्रीतं च क्रयाणकं ॥ आसादितो महान् लाभो । जाता चित्तस्य निर्वृतिः ॥ १५ ॥ गृहीतं प्रतिभांडं च । सर्वं च प्रगुणीकृतं ॥ अन्यदा फलदेवस्तां । गृहीत्वा रत्नसुंदरीं ॥ १६ ॥ कृत्वा प्रधानसामग्रीं । चेले सिंहपुरं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रति ॥ प्रेरितो वर्यशकुनैः । परिवारसमन्वितः ॥ १७ ॥ युग्मं ॥ गच्छता च पुमानेकः । परं खेद-
मुपेयिवान् ॥ दृष्टः प्रदेश एकस्मिन् । महादारिद्र्यपीडितः ॥ १८ ॥ पृष्टश्च फलदेवेन । गत्वा को-
मलया गिरा ॥ किमित्येवं महासत्व । सखेद इव लक्ष्यसे ॥ १९ ॥ स प्राह नोचितं वक्तुं
। निजखेदस्य कारणं ॥ तथापि तव मूर्त्यैव । रंजितः कथयाम्यहं ॥ २० ॥ इदं हि वसुधासारं ।
महाभाग महापुरं ॥ अत्राभून्मे सुचित्ताख्यः । पितामहपिता मम ॥ २१ ॥ तेनार्जिता महारंभैः ।
सप्त स्वर्णस्य कोटयः ॥ निखाताश्च महालोभा—देकांते निजवेश्मनि ॥ २२ ॥

अन्यदा मूर्छितस्तत्र । मृतोऽसौ दैवयोगतः ॥ तत्पदे च कृतो लोकै—स्तत्पुत्रः सुधनाभिधः
॥ २३ ॥ अन्यदा सीदता तेन । समुत्खातुं प्रचक्रमे ॥ निधानं तदहो पैत्र्यं । यावत्तस्माद्विनिर्गतः
॥ २४ ॥ दुष्टो दृष्टिविषः सर्प—स्तेनालोकि महारुषा ॥ सुधनो भस्मतां नीत—स्तत्पदेऽजनि त-
त्सुतः ॥ २५ ॥ युग्मं ॥ सुचित्तो नाम सोऽप्येवं । प्रापितो भस्मपुंजतां ॥ पदे तस्यानुजातोऽहं ।
दूरं दारिद्र्यपीडितः ॥ २६ ॥ निधानस्थं च नूनं त—द्दारिद्र्यविनिवारकं ॥ द्रव्यं लातुं न शक्नोमि
। तेनाहं खेदवानिति ॥ २७ ॥ श्रुत्वेदं फलदेवेन । निजचित्ते विचिंतितं ॥ मन्ये सुचित्त एवायं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। मृत्वाजनि भुजंगमः ॥ २८ ॥ तेनेदं मूर्छितेनोच्चै—र्निधानकमधिष्ठितं ॥ तदिदं रक्षता तेन ।
प्रत्यक्षेणेव मृत्युना ॥ २९ ॥ स्वपुत्रः पुत्रपुत्रश्च । नीतौ द्वावपि पंचतां ॥ विचिंत्यैवं ततस्तेन । स
पुमान् भणितो यथा ॥ २९ ॥ युग्मं ॥ दर्शयस्व निधानं मे । येनोत्खात्य तवार्पये ॥ स प्राह म-
म नो कार्यं । तेन भो मूर्तमृत्युना ॥ ३० ॥ जीव नंद चिरं कालं । भुंक्ष्वेमां निजसंपदं ॥ स
प्रोक्तः फलदेवेन । मा भैषीर्दर्शयस्व मे ॥ ३१ ॥ उत्तिष्ठ येन तद्द्रव्य—मुत्खात्याहं ददामि ते ॥
प्रतिपन्नं च तत्तेन । नीतश्च निजमंदिरे ॥ ३२ ॥ दर्शितं च तकं तस्मै । तेनापि च ततो द्रुतं ॥
गृहीत्वा फलपत्राणि । तस्य विषघ्नशाखिनः ॥ ३३ ॥ कृत्वा चूर्णमतिश्लक्ष्णं । बद्धो मुष्टिस्ततो ज-
वात ॥ उद्घाटितं निधानं त—न्निष्क्रांतः स भुजंगमः ॥ ३४ ॥ आत्रोटितश्च चूर्णेन । भुजंगोऽ-
ऽजनि निर्विषः ॥ उक्तश्च फलदेवेन । मुंच मुंचाधुना रुषं ॥ ३५ ॥ मा कार्षीर्निजगोत्रस्य । क्षयं
भो भो महोरग ॥ तवैवेदं गृहं भोगिं—स्तवैते पुत्रपौत्रकाः ॥ ३६ ॥ तवैवायं निजो लोकः ।
किमेवं खिद्यते भवान् ॥ आकर्ण्येदं भुजंगोऽपि । जातो जातिस्मरः क्षणात् ॥ ३७ ॥ तस्यैव पाद-
मूलांतः । संलीनः संवृतेक्षणः ॥ ततस्तस्मै पयो दत्तं । न चासौ पातुमिछति ॥ ३८ ॥ शुभचंद्रस्त-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तः प्राह । सर्पोऽयं नोद्गते न हि ॥ मन्ये जातिस्मरो जातो । गृहीतानशनस्तथा ॥ ३९ ॥ तद्वो
पंचनमस्कारो । दीयतेऽस्मै महाहये ॥ तथैव दातुमारब्धो । नमस्कारं स्फुटाक्षरं ॥ ४० ॥ सर्वज्ञ-
भाषितो धर्मः । प्रोक्तस्तस्य सविस्तरः ॥ ततः शृण्वन्नमस्कारं । जीवित्वा दिनपंचकं ॥ ४१ ॥ मृत्वा
समाधिना जातो । दिवि देवो महर्द्धिकः ॥ नमस्कारप्रभावेण । धर्मध्यानपरायणः ॥ ४२ ॥ युग्मं
॥ ततः सुचित्तपुत्रेण । तकं स्वर्णनिधानकं ॥ उत्खन्य पुंजितं सर्वं । जनाध्यक्षं गृहांगणे ॥ ४३ ॥
फलदेवस्ततः प्रोक्त—स्ते नैवं हृष्टचेतसा ॥ गृह्यतां गृह्यतां स्वामिं—स्तवैवैतत्सुवर्णकं ॥ ४४ ॥ त-
था नो भगिनी येयं । मामकी धनसुंदरी ॥ श्रेष्ठिन् परिणयस्वेमां । मत्तुष्टिं कुरु सर्वथा ॥ ४५ ॥
फलदेवस्ततः स्माह । स्थाने कुरु सुवर्णकं ॥ तवैवेदं महाभाग । संवृणु वृणु सत्वरं ॥ ४६ ॥ मा
कार्षीरुपरोधं नः । सर्वथा कुरु मे वचः ॥ ततस्तत्संवृतं तेन । यथायोगं निजोचितं ॥ ४७ ॥ ल-
ब्धश्च फलदेवेन । साधुवादो जनेऽधिकः ॥ श्लाघितोऽस्य गुणग्रामो । लोकै रंजितमानसैः ॥ ४८ ॥
श्रेष्ठिना बंधुयुक्तेन । भण्यमानश्च सादरं ॥ परिणिन्ये परर्ध्यासौ । कन्यां तां धनसुंदरीं ॥ ४९ ॥
कतिचिद्दिनानि तत्रैव । तया सार्धं प्रमोदतः ॥ स्थित्वा संप्रस्थितो भूयः । पुरं सिंहपुरंप्रति ॥ ५० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्रमशस्तत्र संप्राप्तो । गृहीत्वा रत्नसुंदरीं ॥ प्राभृतं च वरं लात्वा । गतोऽसौ राजमंदिरे ॥ ५१ ॥ दृष्टो राजा ततस्तस्मै । चार्पिता रत्नसुंदरी ॥ वरप्राभृतसंयुक्ता । ततस्तुष्टेन नृभुजा ॥ ५२ ॥ पृष्टश्च कुत्र नो लब्धा । मत्पुत्री रत्नसुंदरी ॥ तेनाप्यामूलतः सर्वो । वृत्तांतोऽस्मै निवेदितः ॥ ५३ ॥ युग्मं ॥ ततश्च सादरं राज्ञा । स्नापितो नोजितस्तथा ॥ सन्मानितश्च वस्त्राद्यैः । फलदेवः सगौरवं ॥ ५४ ॥ तद्रूपादिगुणग्रामै । राजा रंजितमानसः ॥ तस्मा एव ददौ प्रीत्या । कन्यां तां रत्नसुंदरीं ॥ ५५ ॥ शुभे च तिथिनक्षत्रे । महामहपुरस्सरं ॥ वृत्तं चातिप्रमोदेन । पाणिग्रहणमंगलं ॥५६॥ दत्तं च नृभुजा तस्मै । वरप्रासादसंयुतं ॥ हस्त्यश्वस्वर्णरत्नादि—नूरिदानमनेकधा ॥ ५७ ॥ एवं नार्याद्वयोपेतो । नुंजानः कामजं सुखं ॥ मासमेकं स्थितस्तत्र । श्लाघ्यमानो जनैरलं ॥ ५८ ॥ ततो मुत्कलितः कष्टा—द्राज्ञा सन्मानपूर्वकं ॥ हस्त्यश्वरथपादाति—सत्सामग्र्या चचाल सः ॥५९॥ आगच्च सुधासारे । नगरे दिनपंचकं ॥ स्थित्वा कृत्वा महानंदं । श्वशुरस्य ततोऽपि च ॥ ६० ॥ संप्रस्थितः स्वसामग्र्या । रत्नगंनीरमागतः ॥ सिंहविक्रमसंबंधि—हस्त्याद्यं विससर्ज सः ॥ ६१ ॥ युग्मं ॥ आरोप्य निजपोतेषु । स्वर्णरत्नादिकं धनं ॥ ततः स्वयं समारूढो । हेलया सपरिच्छदः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६२ ॥ ततश्च प्रेरिताः पोताः । प्रवृत्ता गंतुमुच्चकैः ॥ प्राप्ता मलयदेशांतं । तत्र स्थाने धृतास्ततः ॥ ६३ ॥ फलदेवः समुत्तीर्णः । सत्वरं सपरिच्छदः ॥ गत्वा तत्र पुरा दृष्ट—काननस्थजिनालये ॥ ॥ ६४ ॥ दृष्टः श्रीमज्जिनाधीशः । पूजितो वंदितस्तथा ॥ कारिता च वरा यात्रा । प्रबंधेन दिनाष्टकं ॥ ६५ ॥ तृतीये च दिने तत्र । वनमाला समागता ॥ पृष्टा च फलदेवेन । किं चिरादत्र दृश्यसे ॥ ६६ ॥ तयाऽऽप्राणि गताहं भो । द्वीपे नंदीश्वराभिधे ॥ तत्र संति समुत्तुंगा । द्वापंचाशज्जिनालयाः ॥ ६७ ॥ तत्राशेषसुराधीशै—रष्टाह्निकामहोत्सवः ॥ चक्रे जैनेंद्रबिंबानां । गताहं तद्दिदृक्षया ॥ ६८ ॥ युष्मानिह समायातान् । विलोक्येह समागता ॥ फलदेवस्ततः प्राह । कौतुकाकुलमानसः ॥ ६९ ॥ यदि भो गम्यते तत्र । दृश्यंते ते जिनालयाः ॥ वंद्यंते जिनबिंबानि । सुंदरं जायते तदा ॥ ७० ॥ वनमाला ततः प्राह । गम्यतां भो नयाम्यहं ॥ पूरयामि तवाभीष्टं । धर्मबंधो यथा तथा ॥ ७१ ॥ स प्राह स्वयमेवाहं । गगने गंतुमीश्वरः ॥ अयं तु त्वयका नेयः । शुभचंद्रः सुहृन्मम ॥ ७२ ॥

अथोक्तं रत्नसुंदर्या । नयस्व प्रिय मामपि ॥ कथं नयामि तत्रेमां । यावच्चिंतापरोऽभवत् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ७३ ॥ तावत्पश्यति तं सर्प—जीवदेवं पुरः स्थितं ॥ देवः प्राह भवानद्य । परिजानाति मां न वा ॥ ७४ ॥ तेनोक्तं परिजानामि । सामान्येनामरो भवान् ॥ नो विशेषेण स प्राह । तर्हि ते कथयाम्यहं ॥ ७५ ॥ स एव सर्पजीवोऽहं । यस्त्वया प्रतिबोधितः ॥ मृत्वा जातः सुरः कल्पे । ब्रह्मलोकाभिधानके ॥ ७६ ॥ अवधिज्ञानतो ज्ञात्वा । समायातस्त्वांतिके ॥ तद्ब्रूहि यत्तवाभीष्टं । येन संपादयाम्यहं ॥ ७७ ॥ फलदेवस्ततः प्राह । द्वीपे नंदीश्वराभिधे ॥ चैत्यानां वंदनार्थं तु । गंतुमिच्छामि सांप्रतं ॥ ७८ ॥ तेनापि सुंदरं चैत—देवमुक्त्वा विकुर्वितं ॥ विमानं सुंदराकारं । विस्तीर्णं सुमनोहरं ॥ ७९ ॥ फलदेवस्ततस्तस्मि—न्नारोप्य सपरिछदः ॥ नीतो नंदीश्वरे द्वीपे । दर्शिताश्च जिनालयाः ॥ ८० ॥ ततश्च तेन चैत्यानि । वंदितान्यखिलान्यपि ॥ जातश्चित्ते महानंदः । कृतार्थं स्वं ह्यमन्यत ॥ ८१ ॥ आनीतश्च ततः शीघ्रं । तस्मिन्नेव जिनालये ॥ तत्रापि च कृता पूजा । सर्वैरपि विशेषतः ॥ ८२ ॥ भूयोऽप्यवाचि देवेन । फलदेवः कृतादरं ॥ सांप्रतं किमु ते कार्यं । ब्रूहि येन प्रसाध्यते ॥ ८३ ॥ स प्राह नास्ति मे कार्यं । कार्यं किंचिदतःपरं ॥ पूरितं मे मनोऽभीष्टं । निजस्थानमलंकुरु ॥ ८४ ॥ गतो देवस्ततस्तेन । वनमाला प्रजल्पिता ॥ त्वया भद्रे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथा कार्यं । यथैतज्जिनमंदिरं ॥ ८५ ॥ विशेषतः सदाकालं । सपूजं जायतेतरां ॥ तथापि तद्व-चस्तोषा—त्तथेति प्रत्यपद्यत ॥ ८६ ॥ युग्मं ॥ एवं च तत्र चैत्यानि । द्वीपे नंदीश्वरे तथा ॥ वं-दित्वा पूजयित्वा च । प्रमोदातिशयं दधन् ॥ ८७ ॥ आगत्य च निजान् पोता—नारूढः सपरिच्छदः ॥ ततस्ते प्रेरिताः पोताः । प्रवृत्ता गंतुमंजसा ॥ ८८ ॥ युग्मं ॥ लंघयित्वा नदीनाथं । स्तोककैरेव वासरैः ॥ संप्राप्तश्च निजे स्थाने । सोपाराभिधपत्तने ॥ ८९ ॥ नंगरिताश्च ते शीघ्रं । तीरमानीय धीवरैः ॥ वर्धापितो जनै राजा । पोतागमनिवेदनात् ॥ ९० ॥ तत्रैवासौ समायातो । भूरिपौरज-नैः सह ॥ परिवारयुतो वेगा—दतीवप्रमदाकुलः ॥ ९१ ॥

ततश्च फलदेवोऽपि । पोतादुत्तीर्य सत्वरं ॥ प्रतिपत्तिं यथायोगं । राजादीनां चकार सः ।९१। ततः समं नरेंद्रेण । पौरैर्बंधुजनैस्तथा ॥ गीयमानगुणग्रामो । बंदिवृंदैर्मुहुर्मुहुः ॥ ९२ ॥ दीनाना-थादिलोकेभ्यो । ददद्दानं यथेप्सितं ॥ वाद्यमानैर्वरैस्तूर्यै—र्नृत्यद्भिः स्त्रीजनोत्करैः ॥ ९३ ॥ एव-मादिप्रमोदेन । निजमंदिरमागतः ॥ सन्मान्य च यथायोगं । पौरलोको विसर्जितः ॥ ९४ ॥ नि-र्विशेषकं ॥ उत्तारितं च पोतेभ्यो । भांडं शुल्कं च पातितं ॥ विक्रीतं च यथामूल्यं । लब्धो ला-

भो यथेप्सितः ॥ ७५ ॥ संतोषितो निजो लोको । दत्वा वित्तं यथोचितं ॥ सन्मानितो बृहल्लोकः । सद्वस्त्रादिप्रदानतः ॥ ७६ ॥ यथालाभं निजं वित्तं । धर्मस्थाने नियोजितं ॥ यदन्यदपि कर्तव्यं । तत्कृतं सर्वमंजसा ॥ ७७ ॥ भुंजानश्च सपत्नीको । कामभोगाननुत्तरान् ॥ विदधद्धर्मकार्याणि । कालं नयति नीतिमान् ॥ ७८ ॥ तथास्य संपदं दृष्ट्वा । रंजिताः सज्जना जनाः ॥ दूनाश्च दुर्जना लोकाः । स्वभावोऽयं भुवि स्थितः ॥ ७९ ॥ अन्यदा शुभचंद्रोऽसौ । फलदेवं प्रभाषते ॥ भो भ्रातर्गंतुमिच्छामि । सांप्रतं स्वपुरंप्रति ॥ ३०० ॥ किंचात्र साधवः श्रेष्ठि—न्न संत्यागमवेदिनः ॥ न च साधर्मिका लोका । नापि तादृग्जिनालयाः ॥ १ ॥ तद्भो मदुपरोधेन । तत्रायातु भवानपि ॥ वीक्षतां जिनवेश्मानि । वंदतां मुनिपुंगवान् ॥ २ ॥ शृणोतु शुद्धसिद्धांतं । सिद्धिसंबंधसाधकं ॥ वीक्षतां धर्मसन्निष्ठं । जनं साधर्मिकं तथा ॥ ३ ॥ एवमस्त्विति संजल्प्य । फलदेवेन सत्वरं ॥ भूरिद्रविणसंपूर्णो । बोहित्थः प्रगुणीकृतः ॥ ४ ॥ ततस्तत्र सपत्नीकः । शुभचंद्रसमन्वितः ॥ समारुह्य गतः शीघ्रं । पुरे वीतभयाभिधे ॥ ५ ॥ ततश्च शुभचंद्रस्य । बंधुवर्गोऽखिलोऽपि हि ॥ तस्य सन्मुखमायातो । बहुः पौरजनस्तथा ॥ ६ ॥ महर्द्धिपूर्वकं प्रीत्या । पुरमध्ये प्रवेशितः ॥ नीतश्च तै-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजे गेहे । कृतं कृत्यं यथोचितं ॥ ७ ॥ ततश्च कृतशृंगारः । सह साधर्मिकैर्जनैः ॥ पूजोपकरणं लात्वा । जगाम जिनमंदिरे ॥ ८ ॥ दृष्टानि जिनबिंबानि । पूजितानि विधानतः ॥ वंदितानि स्तुतिस्तोत्रै—स्ततः स्वावासमागतः ॥ ९ ॥ पित्रा च शुभचंद्रस्य । भोजितश्च सगौरवं ॥ सन्मानितश्च वस्त्राद्यैः । सानंदं सपरिछदः ॥ १० ॥

एवं च शुभचंद्रस्य । समग्रैरपि बंधुभिः ॥ सन्मानितो यथाशक्त्या । फलदेवः कृतादरः ॥ ॥ ११ ॥ ततश्च शुभचंद्रेण । बंधूनामग्रतो मुदा ॥ मूलादारभ्य सर्वोऽपि । वृत्तांतः कथितो निजः ॥ १२ ॥ ततस्तैर्नृपतेः सर्वं । प्रोक्तं तेनापि सत्वरं ॥ स आहूतो वणिक्पुत्रो । दूरमारुष्टचेतसा ॥ ॥ १३ ॥ शुभचंद्रो जले तेन । क्षिप्तो द्रव्याभिलाषिणा ॥ शुभचंद्राय तद्द्रव्यं । तन्निगृह्य प्रदापितं ॥ १४ ॥ ततश्च फलदेवेन । सानंदं तत्र तिष्टता ॥ वंदितानि समग्राणि । चैत्यानि विधिपूर्वकं ॥ ॥ १५ ॥ कारिताश्च महायात्राः । सर्वेषु जिनवेश्मसु ॥ सद्वस्त्रपात्रभक्ताद्यैः । साधवः प्रतिलाभिताः ॥ १६ ॥ पूजितश्च सुवस्त्राद्यैः । सर्वः साधर्मिको जनः ॥ दीनानाथादिलोकेभ्यो । दत्तं दानं यथेछया ॥ १७ ॥ एवं च कुर्वता तेन । कृता तीर्थप्रभावना ॥ तत्रत्यसर्वलोकस्य । रंजितं नितरां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मनः ॥ १७ ॥ एवं तिष्ठन्नसौ तत्र । स्वकीयगुणसंपदा ॥ सर्वस्यापि हि लोकस्य । प्रमोदमकरोदिति ॥ १ए ॥ स्थित्वा च तत्र सानंदः । कतिपयान्यहान्यसौ ॥ शुभचंद्रं समापृच्छ्य । स्वकीयं पुरमागतः ॥ २० ॥ तत्र संपादयन् प्रीतिं । लोकानां निजकैर्गुणैः ॥ भुंक्ते भोगान् सपत्नीकः । पूर्णाखिलमनोरथः ॥ २१ ॥ कालेन गछता तस्य । जाताः पुत्रा मनोरमाः ॥ सर्वलक्षणसंपूर्णाः । कलाकौशलशालिनः ॥ २२ ॥ अन्यदा फलदेवस्तं । हारं सौभाग्यसुंदरं ॥ परिधाय निजे कंठे । एकाक्येव सकौतुकः ॥ २३ ॥ निष्क्रांतश्च ततः स्थाना—द्भूमंमलदिदृक्षया ॥ बभ्राम व्योममार्गेण । ग्रामे ग्रामे पुरे पुरे ॥ २४ ॥ युग्मं ॥ हारानुभावजोदग्र—सौभाग्यगुणयोगतः ॥ सर्वत्र सर्वलोकस्य । प्रीतिस्थानमभूदसौ ॥ २५ ॥ यत्र यत्र पुरे ग्रामे । यात्यसौ तत्र तत्र हि ॥ जायते तन्मना लोकः । स्त्रीलोकस्तु विशेषतः ॥ २६ ॥ भ्राम्यन्नेवं महीपीठे । वीक्षमाणो जिनालयान् ॥ पूजयन् वंदमानश्च । जिनबिंबानि भावतः ॥ २७ ॥

अन्यदा च जगामैष । पुरं भोगपुराभिधं ॥ तस्मिन्नालोकयामास । सूरिं सूरप्रभाभिधं ॥२७॥ कानने सुंदरामोदे । बहुशिष्यसमन्वितं ॥ आचक्षाणं जिनप्रोक्तं । धर्मं संविग्नपर्षदि ॥ २ए ॥ त्रि·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निर्विशेषकं ॥ ततोऽतिभक्तिसंयुक्तः । समायातस्तदंतिकं ॥ वंदित्वा विधिवत्सूरिं । निषण्णः शुद्धभू-
तले ॥ ३० ॥ ततस्तं सूरिभिः किंचि—त्संभाष्य च यथोचितं ॥ भूयोऽपि च समारब्धा । देशना
भवनाशिनी ॥ ३१ ॥ यथा जीवाः प्रबध्यंते । मुच्यंते कर्मभिस्तथा ॥ संक्लिश्यंते यथा चैते । यां-
ति ते नरकं तथा ॥ ३२ ॥ रागद्वेषप्रबद्धानां । विपाकोऽतीवदारुणः ॥ कष्टेन वेद्यते जीवै—र्दुर्ग-
तौ दुष्टकर्मणां ॥ ३३ ॥ गम्यंते कर्मणा येन । नरके तत्र वेदनाः ॥ तादृश्यस्तद्विपाकेन । वेद्यंते
पापकर्मभिः ॥ ३४ ॥ छेदनभेदनकुंभी—पाचनबहुशीतवातजनितानि ॥ शाल्मलीवृक्षारोपण—वै-
तरणीतारणादीनि ॥ ३५ ॥ तप्तत्रपुपानात्पुन—र्दह्यमानसर्वांगविह्वलाः संतः ॥ असिपत्रवनछायां
। गतास्तैरेव तत्र पाट्यंते ॥ ३६ ॥ उत्कृत्योत्कृत्य खंडानि । मांसास्यास्ये तदीयके ॥ प्रचिक्षिपुः प्र-
जल्पंतो । मांसमासीत्तव प्रियं ॥ ३७ ॥ अंबादिजनितास्तीव्राः । परस्परसमुद्भवाः ॥ क्षेत्रानुभाविता-
श्चान्या । वेद्यंते तीव्रवेदनाः ॥ ३८ ॥ उक्तं च—अच्छिनिमीलियमित्तं । नत्थि सुहं दुक्खमेव अ-
णुबद्धं ॥ नरए नेरइयाणं । अहोनिसं पच्चमाणाणं ॥ ३९ ॥ इदमाख्याति सर्वज्ञः । सर्वदर्शी जि-
नोत्तमः ॥ केवलज्ञानसद्दृष्ट्या । लोकालोकं विलोकयन् ॥ ४० ॥ असत्यवादिनो जीवाः । कृत्वो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्कोचनबंधने ॥ कूटमानेन जायंते । तिर्यंचस्तीव्रवेदनाः ॥ ४१ ॥ शारीरमानसानेक—दुःखव्रातै·
रुपद्रुताः ॥ परवाह्याः परायत्ताः । प्रायः सीदंति दुःखिताः ॥ ४२ ॥ कशाघातैस्तथा तीव्रै—रंकुशै·
र्वधबंधनैः ॥ शीतवातातपैर्दंशै—र्मशकैश्चापि पीडिताः ॥ ४३ ॥ सर्वलोकेन वाह्यंते । बुभुक्षितपि·
पासिताः ॥ त्राणकारी न कोऽप्येषां । प्रायशः प्रविलोक्यते ॥ ४४ ॥ इदमाख्याति सर्वज्ञः । सर्व·
जीवदयापरः ॥ सर्वदोषविनिर्मुक्तः । परमात्मा निरंजनः ॥ ४५ ॥ प्रकृत्यैव प्रशांतात्मा । दानदाता
दयापरः ॥ शीलसंयमहीनोऽपि । मानुष्यं लभते नरः ॥ ४६ ॥ अनित्यं मानुषं जन्म । जरामृत्यु·
भयद्रुतं ॥ दारिद्र्योपद्रुतं प्रायः । क्षणध्वंसि रुगाकुलं ॥ ४७ ॥ अष्टोत्तरशतव्याधि—व्रातेन विधु·
रीकृतं ॥ सर्वदाऽप्रियसंयोग —प्रियायोगविसंस्थुलं ॥ ४८ ॥ इदमाख्याति योगीशो । योगिगम्यो
जिनोत्तमः ॥ त्रिकालवेदी भगवान् । देवदेवो जिनेश्वरः ॥ ४९ ॥ सरागसंयमाद्देवा । देशसंयम·
तोऽपि वा ॥ अकामनिर्जरा देवा । अज्ञानतपसोऽपि वा ॥ ५० ॥ ईर्ष्याविषादसंताप—मानमा·
यातिलोभतः ॥ देवेष्वपि वसंत्येते । दोषास्तेषां कुतः सुखं ॥ ५१ ॥ एवमाह जिनाधीशो । दे·
वदेवो दयानिधिः ॥ क्लिष्टकर्मा भवातीतः । परं पदमुपागतः ॥ ५२ ॥ चतुर्विधेऽपि संसारे । सौख्यं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वल्पं शरीरिणां ॥ सकृत्सौख्यानि जायंते । दुःखानि च पदे पदे ॥ ५३ ॥ सिद्धौ च सर्वजीवानां । संपूर्णा सुखसंकथा ॥ निःशेषकर्मविछेदा—त्स च चारित्रयोगतः ॥ ५४ ॥ सर्वोपाधिविमुक्तं च । चारित्रं प्राप्य सुंदरं ॥ क्रमेण केवलज्ञानं । लोकालोकप्रकाशकं ॥ ५५ ॥ शैलेशीं च समासाद्य । समस्तोपरतक्रियं ॥ भवोपग्रहकारि च । हत्वा कर्मचतुष्टयं ॥ ५६ ॥ सर्वद्वंद्वविनिर्मुक्ता । अष्टकर्मविवर्जिताः ॥ भवांभोधिं समुल्लंघ्य । गछंति परमं पदं ॥ ५७ ॥ इदमाख्याति सर्वज्ञः । सनरामरपर्षदि ॥ सुरासुरनराधीश—मौलिमालार्चितक्रमः ॥ ५८ ॥ भवाटव्यामटाट्यंते । बहुदुःखप्रपीडिताः ॥ अधर्मसंबला जीवा । यत्र तत्रैव दुःखिताः ॥ ५९ ॥ तद्भो भव्या भवाटव्यां । परिभ्रमणभीरवः ॥ यदि यूयं तदा लात । धर्मसंबलमुत्तमं ॥ ६० ॥ वंदित्वा च सभा सर्वा । विधाय करकुड्मलं ॥ अवादीच्च गणाधीशं । सत्यमेव त्वयोदितं ॥ ६१ ॥ तथैवैतन्न संदेहो । तथैवैतन्न संशयः ॥ अहो निदर्शितो मार्गः । सिद्धिपुर्यास्त्वया प्रभो ॥ ६२ ॥ श्रमणो ब्राह्मणो वापि । पाखंडी वा गृहाश्रमी ॥ ईदृक् धर्ममाख्यातुं । न शक्तः कोऽपि भूतले ॥ ६३ ॥ यथायोगं परिज्ञाय । स्वत एव च योग्यतां ॥ परलोकहितं पथ्यं । दद्ध्वं धर्मसंबलं ॥ ६४ ॥ व्रतिनः केऽपि संजाताः । श्राव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

का जज्ञिरे परे ॥ प्रत्याख्यानबहिर्भूताः । केचिद्विरतदृष्टयः ॥ ६५ ॥

अत्र च फलदेवेन । सूरयः प्रश्निताः स्वयं ॥ अन्यजन्मकृतं पुण्यं । मम किं कथ्यतां प्रभो ॥ ६६ ॥ मित्रपुत्रकलत्राणि । राजानः सेवकाः श्रियः ॥ वर्तंतेऽनुकूलाः केन । कर्मणेदं निवेद्यतां ॥ ६७ ॥ सूरिः प्राहाभवस्त्वं तु । पुरे कुंभपुराभिधे ॥ मालिकः पुष्पकुंभाख्यो । भद्रको मलयप्रभुः ॥ ६८ ॥ बंधूनां सर्वपुष्पाणि । फलानि स ददौ सदा ॥ एवं व्यवस्थया कालो । याति तेषां परस्परं ॥ ६९ ॥ अन्यदाष्टाह्निकापूजा । प्रारब्धा जिनमंदिरे ॥ पुष्पकुंभः समादाय । फलान्यत्र समागतः ॥ ७० ॥ गृहीतानि च सर्वाणि । दत्तमुचितवेतनं ॥ तांबूलादिप्रदानेन । संभूष्य च विसर्जितः ॥ ७१ ॥ अहो नीतिरहो धर्मो । ह्यहो एकार्थचित्तता ॥ अहो दया अहो दान—महो चित्तविशालता ॥ ७२ ॥ अन्यत्रापि च दृश्यंते । यात्रा नैवंविधो विधिः ॥ एवं चिंतयतस्तस्य । जातं दर्शनकारणं ॥ ७३ ॥ अष्टमेऽह्नि समायाते । भणितास्तेन गोष्टिकाः ॥ वेतनेन न मे कार्यं । पुण्यमेवात्र वेतनं ॥ ७४ ॥ प्रतिपन्नमिदं तेन । समानीय कृतो बलिः ॥ फलान्यनेकभेदानि । सांद्रान्यार्द्रांतरात्मना ॥ ७५ ॥ कृतार्थमद्य मे जन्म । जीवितं यौवनं तथा ॥ फलान्यपि कृता·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्थानि । यैरेवं विहितो बलिः ॥ ७६ ॥ बहुं परजवायुष्कं । जोगसारं जवांतरे ॥ ततो मृत्वात्र सं-
जातः । फलसारस्य नंदनः ॥ ७७ ॥ मासांते विहितं नाम । पित्रा स्वप्नानुसारतः ॥ फलदेव इति
ख्यातं । महामहपुरस्सरं ॥ ७८ ॥ आकर्ण्यैदं स्मृता जातिः । संवेगश्च समागतः ॥ संजातो जव
निर्वेदः । शुद्धे धर्मे गतं मनः ॥ ७९ ॥ श्रुत्वेदं फलदेवस्य । फलपूजाफलं महत् ॥ सर्वज्ञफलपू-
जायां । नृखिलोको ददौ मनः ॥ ८० ॥ अथोक्तं फलदेवेन । जगवन् भवतारक ॥ निर्विसोऽहं
जवावासाद् । दूरं दुःखनिबंधनात् ॥ ८१ ॥ अतोऽहं स्वकुटुंबस्य । कृत्वा सौस्थ्यं यथोचितं ॥ संसा-
रोत्तारिणीं दीक्षां । गृहीष्ये युष्मदंतिके ॥ ८२ ॥ सूरिजिर्जल्पितं जद्र । माव कार्षीर्विलंबनं ॥ स्वा-
मिन्नेवं करिष्येऽह—मेवमुक्त्वा समुत्थितः ॥ ८३ ॥ जगाम निजकस्थाने । रंजितो निजको जनः
॥ ततश्च सर्वबंधूनां । स्वाजिप्रायो निवेदितः ॥ ८४ ॥ धर्मस्थाने निजं द्रव्यं । प्रभूतं विनियोजितं
॥ पुत्रश्च रत्नसुंदर्याः । फलचंद्राजिधानकः ॥ ८५ ॥ संमतेन स्वबंधूनां । स्थापितो निजके पदे ॥
कृतं सौस्थ्यं कुटुंबस्य । यथौचित्यविधानतः ॥ ८६ ॥ संजाष्य क्षामयित्वा च । पौरलोकं यथाक्रमं
॥ इत्याद्यखिलं कृत्वा च । कृत्यं कृत्यविदां वरः ॥ ८७ ॥ नजसैव समायातः । सूरीणां संनिधौ त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तः ॥ सूत्रोक्तेन विधानेन । दीक्षितः सूरिणाप्यसौ ॥ ८८ ॥ युग्मं ॥ अनुशिष्टश्च गंभीर—वाक्यैः संवेगसुंदरैः ॥ यथा ज्ञो ज्ञो महासत्व । यावज्जीवमपि त्वया ॥ ८९ ॥ अष्टावीर्यासमित्याद्या । मातर इव मातरः ॥ क्षणमपि न मोक्तव्याः । स्वस्य कल्याणमिछता ॥ ९० ॥ युग्मं ॥ इत्याद्यनिग्रहाश्चित्रा । ग्राह्याश्चाखिलपुष्टये ॥ प्राशुकमेषणीयं च । ग्राह्यं ज्ञक्तादि सर्वदा ॥ ९१ ॥ उपसर्गाश्च सोढव्या । दिव्याद्या जद्र षोडश ॥ विषह्याश्च सदाकालं । द्वाविंशतिपरीषहाः ॥ ९२ ॥ तपसि द्वादशांशेऽपि । यतितव्यं यथाबलं ॥ उद्यतव्यं च सर्वेषु । वैयावृत्त्यादिकर्मसु ॥ ९३ ॥ किंचेमां मानुषत्वादि—सामग्रीं प्राप्य दुर्लज्ञां ॥ तथा यत्नस्त्वया कार्यो । दुःखोछेदो ज्ञवेद्यथा ॥ ९४ ॥ इत्याद्यनेकधाचार्यै—श्चक्रे तस्यानुशासनं ॥ इछाम्यहमनुशास्ति—मित्येवं सोऽप्यज्ञाषत ॥ ९५ ॥ ततस्तेनाप्रमत्तेन । स्वगुरूणां पदांतिके ॥ ग्रहणासेवनाशिक्षा । शिक्षिता शीघ्रमेव हि ॥ ९६ ॥ चिरं तेपे तपश्चित्रं । पालितः संयमस्तथा ॥ आलोचितः प्रतिक्रांतः । संलिख्य च निजां तनुं ॥ ॥ ९७ ॥ पर्यंतेऽनशनं कृत्वा । मृत्वा बाढं समाधिना ॥ अच्युते द्वादशे कल्पे । जातो देवो महर्द्धिकः ॥ ९८ ॥ एवं प्रवर्धमानोरु—सत्कल्याणपरंपरां ॥ प्राप्नुवन् क्षीणकर्मांशो । सिद्धोऽसौ पं·

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

चमे जवे ॥ ए९ ॥ तदहो फलदेवस्य । फलपूजाफलं महत् ॥ श्रुत्वा जिनेंद्रपूजायां । जो जव्याः कुरुतादरं ॥ ४०० ॥ इति फलपूजाकथानकं समाप्तं ॥

फलपूजाफलं प्रोक्तं । दृष्टांतेन सविस्तरं ॥ सांप्रतं घृतपूजायाः । फलं तेनैव कथ्यते ॥ १ ॥
अस्तीह जारते क्षेत्रे । काशीदेशः सुविश्रुतः ॥ तत्राजूद्गोधनो नाम । गोकुलिको महर्द्धिकः ॥२॥
प्रजूतानां गवां स्वामी । प्रकृत्यैवातिजद्रकः ॥ दानश्रद्धाबुरत्यंतं । धर्मलिप्सुः प्रशांतधीः ॥ ३ ॥
अन्यदा ददृशे तेन । भ्राम्यता मेदिनीतलं ॥ एकत्रोद्वसितप्राये । पुरे जीर्णजिनालयः ॥ ४ ॥
तस्मिंश्च सुंदरं बिंबं । जैनेंड्मुतरां महत् ॥ तद् दृष्ट्वा रंजितश्चित्ते । ततश्चैवं व्यचिंतयत् ॥ ५ ॥
अहो देवाधिदेवोऽयं । सुरूपः प्रीतिदायकः ॥ तदहं स्नपयाम्येनं । सद्गंधोध्धुरसर्पिषा ॥ ६ ॥ विचिंत्यैवं ततः सर्पि—रानीयातिमनोहरं ॥ स्नापितः श्रीजिनाधीशः । पूजितश्चाक्षतादिजिः ॥ ७ ॥
एवं च प्रत्यहं तस्य । कुर्वतो भक्तिनिर्भरं ॥ कालो जूयानतिक्रांतः । शुभं भावमुपेयुषः ॥ ८ ॥
कालक्रमात्ततो मृत्वा । जातो नंदिपुरे पुरे ॥ जयवर्धननृपस्य । पुत्रो विजयवर्धनः ॥ ए ॥ कलाजिः स सर्वाजि—र्वर्धमानो दिने दिने ॥ क्रमेण यौवनं प्राप्तः । कंदर्पकुलकेतनं ॥ १० ॥ प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिणिन्ये च रूपादि—गुणाढ्या राजकन्यकाः ॥ स्थापितश्च निजे राज्ये । पित्रा धर्मं चिकीर्षुणा॥ ॥ ११ ॥ ततश्च स्वप्रतापेन । समाक्रांतमहीतलः ॥ कुर्वन् शेषमहीनाथा—नुत्खातप्रतिरोपितान् ॥ ॥ १२ ॥ हस्तिभिर्वाजिभिर्भृत्यैः । पुरैरंतःपुरैस्तथा ॥ कोष्ठागारैश्च कोशैश्च । वर्धमानो यथोत्तरं ॥ ॥ १३ ॥ स्वकांत्या कामिनीर्बाढं । सन्नीत्या निखिलाः प्रजाः ॥ रंजयन् स्नेहतो बंधून् । सज्जनान् गुणसंपदा ॥ १४ ॥ शौर्येण सर्वशत्रूणां । ददन्नित्यं महाभयं ॥ सौजन्यादिगुणग्रामैः । स्वकीर्तिं बत वर्धयन् ॥ १५ ॥ दुष्टानां निग्रहं कुर्वन् । शिष्टानां परिपालनं ॥ औचित्येन करं गृह्ण—न्नौचित्येन च दंडयन् ॥ १६ ॥ नातिशीतो न चाप्युष्णो । न मृदुर्न च कर्कशः ॥ न क्रोधी नातिशांतश्च । नातिदाता न संचकः ॥ १७ ॥ चिंतानंतरनिःशेष—पूर्यमाणमनोरथः ॥ स्वराज्यं पालयामास । राजा विजयवर्धनः ॥ १८ ॥ कुलकं ॥

विस्मारिताः सुपुत्रेण । पितुः संबंधिनो गुणाः ॥ फलेन सहकारस्य । पुष्पसंबंधिनो यथा ॥ ॥ १९ ॥ त्रिवर्गं सेवमानस्य । परस्परमबाधया ॥ व्रजंति वासरास्तस्य । सुखवृंदमया इव ॥ २० ॥ अन्यदा च शुभे लग्ने । राज्ञी मदनकंदली ॥ दृष्टं शुभग्रहैः सर्वैः । पुत्ररत्नमजीजनत् ॥ २१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मासांते विहितं नाम । महोत्सवपुरस्सरं ॥ यथार्थं जातसंतोषैः । पुत्रो मदनसुंदरः ॥ २२ ॥ अ-
न्यदा च समायाता । बहुशिष्यसमन्विताः ॥ तपःसंयमसंयुक्ताः । सूरयोऽमरसुंदराः ॥ २३ ॥ स्थि-
ताश्च नंदनोद्याने । भूभागे जंतुवर्जिते ॥ अवग्रहमनुज्ञाप्य । ज्ञानत्रयसमन्विताः ॥ २४ ॥ वंद-
नार्थं समायातो । राजाऽन्येऽपि च नागराः ॥ प्रारब्धा देशना चैवं । सूरिभिः समशालिभिः ॥
॥ २५ ॥ सुखैषिणो जनाः सर्वे । सुखं धर्मनिबंधनं ॥ धर्मः सदागमादेव । ज्ञायते क्रियते तथा
॥ २६ ॥ एष एव हि जीवानां । सुखदाता जिनागमः ॥ हस्तालंबसमो ह्येष । भवकूपे निमज्जतां
॥ २७ ॥ एष एव जगन्नाथो । वत्सलः परमार्थतः ॥ एष एव जगत्त्राण—मेष एव सुबांधवः ॥
॥ २८ ॥ एष एव विपद्गर्ते । पततामवलंबनं ॥ एष एव भवाटव्या—मटतां मार्गदर्शकः ॥ २९ ॥
एष एव महावैद्यः । कर्मव्याधेर्निबर्हणः ॥ एष एव परानंद—कारणं परमौषधं ॥ ३० ॥ एष एव
जगद्दीपः । सर्ववस्तुप्रकाशकः ॥ प्रमादराक्षसाच्चूर्ण—मेष एव विमोचकः ॥ ३१ ॥ एषोऽविरतिजं-
बाल—कल्मषक्षालनक्षमः ॥ एष एव हि योगानां । दुष्टानां विनिवर्तकः ॥ ३२ ॥ शब्दवेधिशरव्रा-
तै—र्जीवानामिह निःकृपं ॥ सततं पीड्यमानाना—मेष एव हि रक्षकः ॥ ३३ ॥ एष एव हि नि-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

व्यांजं । नरकद्वाररोधकः ॥ एष एव हि तैरश्च—दुःखवह्निघनाघनः ॥ ३४ ॥ एष एव कुमानुष्य—दुःखविच्छेदकारणं ॥ एष एव कुदेवत्व—मनःसंतापनाशकः ॥ ३५ ॥ अज्ञानतरुविच्छेदे । एष एव कुठारकः ॥ एष एव महानिद्रा—द्रावणः प्रतिबोधकः ॥ ३६ ॥ एष स्वाभाविकानंद—कारणं बत गीयते ॥ अनंतभवसंवार्धि—मिथ्याबुद्धिविधूनकः ॥ ३७ ॥ एष एव गुरुक्रोध—वह्निविध्यापने जलं ॥ एष एव महामान—पर्वतोद्दलने पविः ॥ ३८ ॥ एष मायामहाव्याघ्री—पातने सरभायते ॥ एष एव महालोभ—नीरधेः शोषणेऽनलः ॥ ३९ ॥ एष हास्यविकारस्य । गाढं प्रशमनक्षमः ॥ एष मोहोदयोत्पन्ना—रतिं निर्नाशयत्यलं ॥ ४० ॥ एष एवारतिग्रस्ते । जनेऽस्मिन्नमृतायते ॥ एष एव भयोद्भ्रांत—सत्वसंरक्षणक्षमः ॥ ४१ ॥ एष शोकभराक्रांतं । संधीरयति देहिनं ॥ एष एव जुगुप्सादि—विकारं शमयत्यलं ॥ ४२ ॥ एष कामपिशाचस्य । दृढमुच्चाटने पटुः ॥ एष एव च मार्तंडो । मिथ्यात्वध्वांतसूदनः ॥ ४३ ॥ एष एव च दानादि—शक्तिसंदोहकारणं ॥ एष एव महावीर्य—योगहेतुरुदाहृतः ॥ ४४ ॥ यस्माद्भागवतं वाक्यं । श्रुतं ज्ञातं परिस्फुटं ॥ अक्षाणां निग्रहं धत्ते । धत्ते जीवं शिवालये ॥ ४५ ॥ राजाह किमु सर्वेऽपि । न कुर्वंतीह सर्वदा ॥ धर्मं सर्वज्ञनि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दिष्टं । सर्वकल्याणकारणं ॥ ४६ ॥ सूरिराह—

सुखाभिलाषः सुकरो । दुःकरोऽसौ नृपोत्तम ॥ यतो जितेंद्रियग्राम—स्तं साधयति मानवः ॥ ॥ ४७ ॥ अनादिभवकांतारे । प्राशानि परमं बलं ॥ दुर्बुद्धिभिर्न शक्यंते । जेतुं तानींद्रियाणि वै ॥ ४८ ॥ ते नैते जंतवो मूढाः । सुखमिच्छंति केवलं ॥ धर्मं पुनः सुदूरेण । त्यजंति सुखकारणं ॥ ॥ ४९ ॥ इंद्रियाणां जयं नृप । कर्तुं नो पारयंत्यमी ॥ धर्मतः प्रपलायंते । ततो जीवाः सुखैषिणः ॥ ५० ॥ नरसुंदरभूपेना—भाणि भगवन्निवेद्यतां ॥ कानि तानींद्रियाणीह । किंस्वरूपाणि वा मुने ॥ ५१ ॥ कथं वा दुर्जयानीति । श्रोतुमिच्छामि तत्वतः ॥ यत्कुतूहलमत्रार्थे । गुरुकं मम वर्तते ॥ ५२ ॥ सूरिः प्राह—स्पर्शनं रसनं घ्राणं । चक्षुः श्रोत्रं च पंचमं ॥ एतानि तानि राजेंद्र । हृषीकाणि प्रचक्षते ॥ ५३ ॥ इष्टैः स्पर्शादिभिस्तोषो । द्वेषबुद्धिस्तथेतरैः ॥ एतत्स्वरूपमेतेषा—मिंद्रियाणां नृपोत्तम ॥ ५४ ॥ दुर्जयाणि तथा कानि । कथ्यमानं तथाधुना ॥ दत्तावधानस्तत्सर्व—मनुश्रुत्यावधारय ॥ ५५ ॥ अनेकभटसंकीर्णे । समरे योधयंति ये ॥ मत्तमातंगसंघात—मेतैस्तेऽपि विनिर्जिताः ॥ ५६ ॥ अंगुल्यग्रे विधायेदं । भुवनं नाटयंति ये ॥ स्वशक्त्या बलगर्विष्ठा—स्ते-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽप्यमीभिर्वशीकृताः ॥ ५७ ॥ हिरण्यगर्भवैकुंठ—महेश्वरपुरस्सराः ॥ एतैर्वशीकृताः संत—स्तेऽपि किंकरतां गताः ॥ ५८ ॥ अधीत्य सर्वशास्त्राणि । परमार्थविदो जनाः ॥ एभिर्विधुरिताः संत—श्चेष्टंते बालिशा इव ॥ ५९ ॥ एतानि हि स्ववीर्येण । ससुरासुरमानुषं ॥ वराकमिव मन्यंते । सकलं भुवनत्रयं ॥ ६० ॥ दुर्जयानि ततोऽमूनि । हृषीकाणि नराधिप ॥ एवं सामान्यतः प्रोक्तं । हृषीकगुणवर्णनं ॥ ६१ ॥ तिष्ठंतु तावच्छेषाणि । हृषीकाणि नराधिप ॥ स्पर्शनेंद्रियमेवैकं । समर्थं बत वर्तते ॥ ६२ ॥ यतो न शक्यते लोकै—र्जेतुमेकैकमप्यदः ॥ यतो विज्ञातवृत्तांता । इदमूचुर्विचक्षणाः ॥ ६३ ॥ सक्तः शब्दे हरिणः । स्पर्शे नागो रसे च वारिचरः ॥ नेत्रे कृपणपतंगो । भ्रमरो गंधे विनष्टश्च ॥ ६४ ॥ नृपः प्राह—

स्वामिन्निंद्रियजेतारो । नराः किं संति कुत्रचित् ॥ आहोस्विन्नैव विद्यंते । भुवनेऽपि तथाविधाः ॥ ६५ ॥ सूरिराह—राजन्न हि न विद्यंते । केवलं विरला जनाः ॥ ये तेषां विनिहंतार—स्तवाकर्णय कारणं ॥ ६६ ॥ जघन्यमध्यमोत्कृष्टा—स्तथोत्कृष्टतमा गुणैः ॥ चतुर्विधा भवंतीह । पुरुषा भुवनोदरे ॥ ६७ ॥ तत्रोत्कृष्टतमास्ताव—द्वैरिहेंद्रियपंचकं ॥ अनादिभवसंबंधा—त्पालितं लालि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं प्रियं ॥ ६८ ॥ जैनेंद्रागमसंपर्का—द्विज्ञाय बहुदूषणं ॥ ततः संतोषमादाय । महासत्वैर्निराकृतं ॥ ६९ ॥ गृहस्था अपि ते संतो । ज्ञाततत्वा जिनागमे ॥ हृषीकपंचलौल्येन । नाचरंति कुचेष्टितं ॥ ७० ॥ यदा पुनर्विशेषेण । तिष्टत्येष जिनागमः ॥ हृषीकपंचसंबंधं । त्रोटयंति सदाखिलं ॥ ॥ ७१ ॥ यतो दीक्षां समादाय । निर्मलीकृतमानसाः ॥ संतोषभावतो धन्या । जायंतेऽत्यंतनिस्पृहाः ॥ ७२ ॥ ततस्ते भवकांतार—निर्विण्णा वीतकल्मषाः ॥ इंद्रियप्रतिकूलानि । सेवंते वीरमानसाः ॥ ७३ ॥ भूमीशयनलोचादि—कायक्लेशविधानतः ॥ ततः सुखस्पृहां हित्वा । जायंतेऽतिनिराकुलाः ॥ ७४ ॥ ततः सकलकर्मांश—क्लेशविच्छेदभाजनं ॥ भूत्वा ते निर्वृतिं यांति । निर्जितेंद्रियपंचकं ॥ ७५ ॥ तेनोत्कृष्टतमा राज—न्निर्दिष्टास्ते विचक्षणैः ॥ ये चैवमनुतिष्टंति । विरलास्ते जगतत्रये ॥ ७६ ॥ सांप्रतं च तथोत्कृष्ट—नराणां शुद्धचेतसां ॥ स्वरूपं श्रूयतां राजन् । कथ्यमानं मयाधुना ॥ ७७ ॥ उत्कृष्टास्ते नरा ज्ञेया । यैश्च पंचेंद्रियं जितं ॥ अवाप्य मानुषं जन्म । शत्रुबुद्ध्यावधारितं ॥ ७८ ॥ नाविनद्रतया तेषां । परिस्फुरति मानसे ॥ नैवैतत्सुंदरं हंत । पापमिंद्रियपंचकं ॥ ७९ ॥ ततो विज्ञाय ते तेषां । लोकवंचनतां नराः ॥ सर्वत्र चकिता नैव । विश्वसंति क-

दाचन ॥ ८० ॥ न चानुकूलं चारित्रं । भजंते विजितस्पृहाः ॥ ततस्तज्जनितैर्दोषै—र्न युज्यंते विचक्षणाः ॥ ८१ ॥ शरीरस्थितिमात्रार्थ—माचरंतोऽपि तत्प्रियं ॥ तत्र गृद्धेरभावेन । भवंति सुखभाजनं ॥ ८२ ॥ प्राप्नुवंति यशः शुभ्र—मिह लोकेऽपि ते नराः ॥ स्वर्गापवर्गमार्गस्य । निकटे तादृशाः सदा ॥ ८३ ॥ गुरवः केवलं तेषां । नाममात्रेण कारणं ॥ मोक्षमार्गे प्रवर्तंते । स्वत एव हि ते नराः ॥ ८४ ॥ अन्येषामपि कुर्वंति । शुद्धमार्गावतारणं ॥ तद्वाक्यं ये प्रपद्यंते । विज्ञाय गुणकारणं ॥ ८५ ॥ ये पुनर्न प्रपद्यंते । तद्वाक्यं बालिशा जनाः ॥ तेषामनादरं कृत्वा । ते तिष्टंति निराकुलाः ॥ ८६ ॥ प्रकृत्यैव भवंत्येते । देवाचार्यतपस्विनां ॥ पूजासत्कारकरणे । रक्तचित्ता महाधियः ॥ ८७ ॥ इदमेवमुत्कृष्टानां । साधितं चरितं नृणां ॥ सांप्रतं मध्यबुद्धीनां । कथ्यमानं निशम्यतां ॥ ८८ ॥

मध्यमास्ते नरा ज्ञेया । यैर्हृषीककदंबकं ॥ अवाप्य मानुषं जन्म । मध्यबुद्ध्यावधारितं ॥८९॥ इंद्रियग्रामसंपाद्ये । सुखे ये गृद्धमानसाः ॥ पंडितैरनुशिष्टाश्च । दोलायंते स्वचेतसा ॥ ९० ॥ चिंतयंति निजे चित्ते । ते दोलायतबुद्धयः ॥ विचित्ररूपसंसारे । किमत्र बत कुर्महे ॥ ९१ ॥ भो·

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

गानेके प्रशंसंति । रमंते सुखनिर्भराः ॥ अन्ये शांतांतरात्मानो । निंदंति विगतस्पृहाः ॥ ७२ ॥ तदत्र कतरो मार्गो । मादृशामिह युज्यते ॥ न लक्ष्यामस्तच्चित्तं । संदेहमवगाहते ॥ ७३ ॥ तस्मात्कालविलंबोऽत्र । युक्तोऽस्माकं प्रयोजने ॥ नैवैकपक्षनिक्षेपो । विधातुमिह बुध्यते ॥ ७४ ॥ मध्यमानां भवेद्बुद्धि—र्यादृशी कर्मपद्धतिः ॥ यस्मादाचक्षते संतो । बुद्धिः कर्मानुसारिणी ॥ ॥ ७५ ॥ तत इंद्रियवर्गं ते । मन्यंते सुखहेतुना ॥ अनुकूले च वर्तते । किंतु नात्यंतलोलुपाः ॥ ॥ ७६ ॥ ततो लोकविरुद्धानि । नाचरंति कदाचन ॥ पंचेंद्रियवशं प्राप्ता । नापायान् प्राप्नुवंत्यतः ॥ ७७ ॥ हितेनोक्ताः प्रबुध्यंते । विशेषवचनस्य ते ॥ अदृष्टदोषास्तद्वाक्यं । केवलं नाचरंति ते ॥ ७८ ॥ मैत्रीं बालिशलोकेन । कुर्वंति स्नेहनिर्भरां ॥ लभंते तद्विपाकेन । रौद्रां दुःखपरंपरां ॥ ॥ ७९ ॥ अवर्णवादं लोके च । प्राप्नुवंति न संशयः ॥ संसर्गः पापलोकेन । सर्वानर्थपरो यतः ॥ १०० ॥ यदा पुनः प्रपद्यंते । विदुषां वचनानि ते ॥ आचरंति च विज्ञाय । तदीयां हितरूपतां ॥ १ ॥ तदा ते विगताबाधा । भवंति सुखिनो नराः ॥ महापुरुषसंपर्का—ल्लभंते मार्गमुत्तमं ॥२॥ पंडिता इव ते नित्यं । गुरुदेवतपस्विनां ॥ बहुमानपराः संतः । कुर्वंत्यर्चनवंदनं ॥ ३ ॥ तदेवं भ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णितास्ताव—न्मध्यमानां गुणागुणाः ॥ जघन्यनरसंबंधे । स्वरूपमधुनोच्यते ॥ ४ ॥ जघन्यास्ते नरा ज्ञेया । ये हृषीकवशं गताः ॥ संप्राप्य मानुषं जन्म । करणैर्यै विनिर्जिताः ॥ ५ ॥ पराश्रिरूपतां तेषां । न जानंति यतः स्वयं ॥ परेषामपि रुष्यंति । विदुषां हितभाषिणां ॥ ६ ॥ हृषीकवर्गसंपाद्ये । पामाकंडूयनोपमे ॥ परार्थेऽपि च दुःखेऽपि । सुखक्लेशेऽतिगृध्नयः ॥ ७ ॥ स्वर्गोऽयं परमार्थोऽयं । लब्धोऽयं सुखसागरः ॥ अस्माभिरिति मन्यंते । विपर्यासवशं गताः ॥ ८ ॥ ततो हार्दं तमस्तेषां । प्रतिसर्पति सर्वतः ॥ विवेकशेषकाश्चित्ते । वर्धते रागरश्मयः ॥ ९ ॥ प्रणष्टसत्यसद्भावा । अंधीभूतस्वबुद्धयः ॥ कुर्वतोऽनार्यकार्याणि । वार्यते केन ते ततः ॥ १० ॥ धर्मलोकविरुद्धानि । निंदितानि पृथग्जनैः ॥ कार्याणि कुर्वतां लोकः । शत्रुभावं प्रपद्यते ॥ ११ ॥ कुलं चंद्रांशुविशदं । ते कुर्वंति मलीमसं ॥ आत्मीयचरितैः पापाः । प्रयांति जनहास्यतां ॥ १२ ॥ अगम्यगमनासक्ता । निर्मर्यादा नराधमाः ॥ अर्कतूलादपि परं । ते जने यांति लाघवं ॥ १३ ॥ दुर्लभा हि मनोऽभीष्टा । विषयाः स्त्र्यादिगोचराः ॥ प्राणिनां हृदि वर्तंते । न लभ्यंते यथेप्सिताः ॥ १४ ॥ तदा ते यानि दुःखानि । याश्च लोके विडंबनाः ॥ प्राप्नुवंति न शक्यंते । ता व्यावर्णयितुं गिरा ॥ १५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

केवलं गदितुं शक्य—मिदमेव समासतः ॥ लभंते ते नराः सर्वा । लोके दुःखविडंबनाः ॥१६॥
प्रकृत्यैव भवंत्येते । गुरुदेवतपस्विनां ॥ प्रत्यनीका महापापा । निर्भाग्या गुणदूषकाः ॥ १७ ॥ स-
न्मार्गपतितं वाक्य—मुपदिष्टं हितैषिणा ॥ केनचिन्न प्रपद्यंते । महामोहेन दूषिताः ॥ १८ ॥ त-
तश्चेदं मुनेर्वाक्यं । विनिश्चित्य महीभृता ॥ विचिंतितं निजे चित्ते । अहो सद्धर्मदेशकाः ॥१९॥
रंजितो हृदये राजा । सभा संतोषमागता ॥ यथायोगं गुणस्थानं । प्रतिपद्य गृहं गता ॥ २० ॥
उत्तमोत्तमनरैर्भाव्यं । नियम्येंद्रियपंचकं ॥ नृजन्म सफलं कार्यं । विजयवर्धन त्वया ॥ २१ ॥

इत्येवं सूरिभिः शिष्टे । धर्मे सर्वज्ञभाषिते ॥ राजाह रंजितश्चांतः । संवेगातिशयं वहन् ॥
॥ २२ ॥ भगवन्निर्जितास्ताव—देते बाह्या मया द्विषः ॥ आंतरानपि निःशेषान् । जेतुमिच्छामि
सांप्रतं ॥ २३ ॥ एते च सर्वदा पूज्य—पादसेवनतत्परैः ॥ शक्यंते हि निराकर्तुं । मादृशैरत्र ना-
न्यथा ॥२४॥ तथाहं निजराज्यस्य । सौस्थ्यं कृत्वा यथोचितं ॥ अथो दीक्षां गृहीष्यामि । पूज्या-
नामंतिके प्रभो ॥ २५ ॥ मा प्रमादं कृथा भद्र । सर्वथात्र प्रयोजने ॥ एवं सूरिभिरादिष्टे । ततो
राजा समुत्थितः ॥ २६ ॥ गतो गेहे ततः प्रोक्तः । स्वाभिप्रायः स्वमंत्रिणां ॥ ततश्च स्थापितो रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ये । पुत्रो मदनसुंदरः ॥ २७ ॥ दत्ता शिक्षा ततस्तस्य । मंत्रिणां च यथोचितं ॥ यदन्यदपि क-
र्तव्यं । तत्कृतं स्वयमेव हि ॥ २८ ॥ ततोऽसौ नंदनोद्याने । गत्वा सूरिपदांतिके ॥ जग्राह विधि-
ना दीक्षां । सर्वकर्मक्षयंकरीं ॥ २९ ॥ शिक्षिता द्विविधा शिक्षा । पठितं च बहु श्रुतं ॥ पालित-
श्च चिरं चारुः । संयमस्तपसा सह ॥ ३० ॥ आगमोक्तविधानेन । विधायानशनं ततः ॥ मृत्वा च
द्वादशे कल्पे । जातो देवो महर्द्धिकः ॥ ३१ ॥ ततश्च्युत्वा महाराज—वंशे भूत्वा महानृपः ॥ सं-
प्राप्य शुद्धचारित्रं । निष्कलंकं प्रपाल्य च ॥ ३२ ॥ आरुह्य क्षपकश्रेण्यां । हत्वा घातिचतुष्टयं ॥
उत्पाद्य केवलज्ञानं । कृत्वा भव्यप्रबोधनं ॥ ३३ ॥ भवोपग्राहिकर्माणि । शुक्लध्यानकृशानुना ॥
निर्दह्य निर्वृतौ प्राप्तो । जातः सिद्धः सुखालयः ॥ ३४ ॥ त्रिभिर्विशेषकं ॥ इति घृतपूजाकथानकं.

घृतपूजाफलं प्रोक्तं । स्वर्गमोक्षप्रसाधकं ॥ सांप्रतं जलपूजायाः । फलं शृणुत कथ्यते ॥ १ ॥
बभूव भुवने ख्यातो । ग्रामाकरपुराकुलः ॥ बंगाजनपदस्तत्र । पुरं विश्वपुराभिधं ॥ २ ॥ गुणसारो
नृपस्तत्र । प्रजापालो महाबलः ॥ तद्भार्या रूपसौभाग्य—संपन्ना बंधुसुंदरी ॥ ३ ॥ अन्यदा च त-
या स्वप्ने । दृष्टा मेघाः समुन्नताः ॥ सर्वतोऽपि जलप्लावैः । प्लावयंतो महीतलं ॥ ४ ॥ ततः प्रोक्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तया स्वप्नः । समानंदितचित्तया ॥ सादरं नरनाथाय । सुष्टु कोमलया गिरा ॥ ५ ॥ तेनाभाणि प्रिये श्रेष्टः । पुत्रस्तव भविष्यति ॥ सर्वेषामपि लोकानां । मनोवांछितपूरकः ॥ ६ ॥ प्रादुर्भूतस्ततो गर्भ—स्तस्याः कुक्षौ सुखप्रदः ॥ अथ सोवाह तं गर्भं । संपूर्णाखिलदोहदा ॥ ७ ॥ तस्मिन् गर्भस्थिते वृष्टाः । सर्वत्रापि घनं घनाः ॥ पूरिता च जलप्लावैः । सर्वतोऽपि हि मेदिनी ॥ ८ ॥ सर्वेषामपि संजाता । रसानां वृद्धिरुच्चकैः ॥ धान्यानि च समर्घाणि । सर्वदेशेषु जज्ञिरे ॥ ९ ॥ वासरेषु च पूर्वेषु । पुत्रं सासूत सुंदरं ॥ कारितं च ततः पित्रा । वर्धापनकमंगलं ॥ १० ॥ स्वप्नानुसारतस्तस्य । महामहपुरस्सरं ॥ रससार इति ख्यातं । कृतं नाम यथार्थकं ॥ ११ ॥ अथासौ वर्धते बालः । कलाभिर्वपुषापि च ॥ क्रमेण यौवनं प्राप्तो । धर्मकामार्थसाधकं ॥ १२ ॥ परिणीतास्ततस्तेन । रूपयौवनगर्विताः ॥ विशालकुलसंभूता । अनेके राजकन्यकाः ॥ १३ ॥ पूर्णाशेषमनोवांछ—स्ताभिः सार्धमखंडितं ॥ शब्दादिविषयांस्तुष्टो । भुंक्ते पंचविधानपि ॥ १४ ॥ अथ सोऽद्भुतशौर्येण । चक्रे क्षोभं हृदि द्विषां ॥ चेतांसि चोरयामास । कामिनीनां सुलीलया ॥ १५ ॥ सन्मानेन स्वमंत्रिणां । परां तुष्टिं चकार सः ॥ विदुषां विनयादेव । हृद्यानंदं ददाविति ॥ १६ ॥ इ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्यादिभिर्गुणग्रामैः । सर्वलोकातिशायिभिः ॥ शत्रवोऽपि हि तेनोच्चैः । शिरःकंपं विधापिताः ॥१७॥
अन्यदा तत्र वर्षासु । धान्यपूर्णेषु भूतले ॥ उद्गतेषु च नो मेघः । कथंचिदपि वर्षति ॥ १८ ॥
ततः शुष्यंति धान्यानि । वांति वाताः सुदारुणाः ॥ तपत्यर्को धरापीठं । द्वादशार्कसमर्गलं ॥१९॥
जलाशयेषु सर्वेषु । त्रुट्यंति च पयांस्यलं ॥ गोरूपाणि च सीदंति । विना वारि गृहे गृहे ॥२०॥
बुभुक्षाक्रांतदेहानि । म्रियंते तानि कानिचित् ॥ आसते च गृहद्वारे । पतितानि च कानिचित ॥
॥ २१ ॥ सानंदा मानसे जाता । धान्यसंग्रहकारिणः ॥ विषण्णा दुर्गता लोका । जाताश्चिंतातुरा
हृदि ॥ २२ ॥ बहुर्भिक्षाचरो लोको । वर्धते च दिने दिने ॥ श्रीमंतोऽपि हि नेच्छंति । भिक्षां दा-
तुं तदर्थिनां ॥ २३ ॥ त्यागिनोऽपि हि ये लोकाः । सुप्रसिद्धा मनस्विनः ॥ तैरपि चेतसा सार्धं ।
हस्तः संकोचितो दृढं ॥ २४ ॥ मूल्यं चटितुमारब्धं । धान्यानां प्रतिवासरं ॥ तानि दातुं न वांछंति
। धान्यसंग्रहकारिणः ॥ २५ ॥ यथा यथा न तादृक्षा । भिक्षा गेहेषु लभ्यते ॥ तथा तथा मनः-
क्षोभो । जातः पार्श्वस्थिनामपि ॥ २६ ॥ एवं हल्लोहले जाते । लोकानां दौःस्थ्यदायिनि ॥ सुभि-
क्षं देशमाश्रित्य । लोकेषु च यियासुषु ॥ २७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततश्च नृपतेश्चिंता । जाता संभ्रांतचेतसः ॥ कथं नु मामके देशे । वर्षिष्यति घनाघनः ॥ ॥ २८ ॥ शुष्यंति तावदेतानि । शस्यानीह विना जलं ॥ विना धान्यं न जीवंति । मामकीना इमाः प्रजाः ॥ २९ ॥ विना लोकं न जायंते । ममापि द्रव्यसंपदः ॥ विना द्रव्यमिमे भृत्या । न स्थास्यंति ममांतिके ॥ ३० ॥ विना भृत्यैर्न मे राज्यं । स्थिरं संभाव्यते चिरं ॥ विना राज्यं भविष्यामि । लघूनामप्यहं लघुः ॥ ३१ ॥ एवं विचिंत्य नृपेन । समाहूताः स्वमंत्रिणः ॥ प्रधानपौरलोकाश्च । ततश्चैवं प्रजल्पितं ॥ ३२ ॥ भो भो मे मंत्रिणः प्राज्ञा । भो भो पौराः सुबुद्धयः ॥ दुर्भिक्षं जायते बाढं । कथ्यतां किमु कुर्महे ॥ ३३ ॥ चिंत्यतां कोऽप्युपायोऽत्र । येन मेघः प्रवर्षति ॥ श्रुत्वेदं नृपतेर्वाक्यं । तत्रैवं कैश्चिदूचिरे ॥ ३४ ॥ ईज्यंतां विविधा यज्ञाः । पूज्यंतां ब्राह्मणास्तथा ॥ हूयंतां भूरिसर्पींषि । ज्वलज्ज्वालाकुलेऽनले ॥ ३५ ॥ अन्ये पुनरिदं प्राहु—र्वक्रस्थानं गता ग्रहाः ॥ तैश्च विष्कंभितं तोयं । मेघस्तेन न वर्षति ॥ ३६ ॥ ततश्च क्रियतां पूजा । ग्रहाणामत्र सादरं ॥ येन ते प्रीणिताः संत—स्तोयं कुर्वंति मुत्कलं ॥ ३७ ॥ अन्यैरभाणि भो राजन् । संति पाखंडिनोऽत्र ये ॥ ते समाहूय पृच्छ्यंतां । जलविष्कंभकारणं ॥ ३८ ॥ अन्ये प्रोचुः प्रजाभाग्यं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यद्यस्तीह तदा ध्रुवं ॥ पतिष्यंत्येव तोयानि । नान्यथेति किमाकुलाः ॥ ३९ ॥ अन्यैः पुनरिदं प्रोक्तं । कूर्चामर्षणपूर्वकं ॥ भो राजन् यद्वयं ब्रूम—स्तदाकर्णय सांप्रतं ॥ ४० ॥ यः कश्चिदत्र सत्पुण्यो । महासत्वो नरोत्तमः ॥ यद्यसौ सत्वमालंब्य । निश्चयं कुरुते नृप ॥ ४१ ॥ जलं वा पातयाम्यद्य । वह्नौ वा प्रविशाम्यहं ॥ यद्येवं कुरुते कोऽपि । तदा वर्षति माधवः ॥ ४२ ॥ श्रुत्वेदं नरनाथेन । मंत्रिलोकप्रजल्पितं ॥ तथैवाकारि यज्ञाद्यं । सर्वं नो पतितं जलं ॥ ४३ ॥ ततो ज्योतिष्ककाः केचि—न्महासत्वाश्च केचन ॥ निश्चयं कर्तुमारब्धाः । स्पर्धमानाः परस्परं ॥ ४४ ॥ तत्र ज्योतिष्ककाः प्राहु—र्यद्यहो पंचमे दिने ॥ पातयामो न तोयानि । मुंचामो खटिकां ततः ॥४५॥ एवं कैश्चिद्दिनं षष्टं । सप्तमं चाष्टमं तथा ॥ प्रतिज्ञातं न चांभांसि । निपतंति कथंचन ॥ ४६ ॥ ततश्च ये महासत्वाः । महासत्यश्च तत्र याः ॥ स्थितास्ते ताश्च निश्चित्य । न च मेघः प्रवर्षति ॥ ॥ ४७ ॥ श्रुत्वेदमथ वृत्तांतं । रससारः कुमारकः ॥ समागत्य सभास्थानं । प्रणम्य च नराधिपं ॥ ॥ ४८ ॥ एवं ब्रूते यथा देव । मेघं प्रवर्षयाम्यहं ॥ अद्यैव निश्चितं नो चेत् । प्रविशामि हुताशनं ॥ ४९ ॥ युग्मं ॥ आकर्ण्येदं ततो राजा । ब्रूते लोकाः समंत्रिणः ॥ हाहा मा मा महाभागा—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भाणीरेवंविधं वचः ॥ ५० ॥ जीव नंद चिरं कालं । पालयस्व निजाः प्रजाः ॥ भुंक्ष्व त्वं भो महाभोगान् । प्रजाभाग्यैः सुरक्षितः ॥ ५१ ॥

श्रुत्वेदं कुमरः प्राह । राजन् मामा भयं कृथाः ॥ एषोऽहं वर्षयाम्यद्य । मेघं पश्य क्षणांतरं ॥ ॥ ५२ ॥ वारंवारं कृतारावं । जनेषु वारयत्स्वपि ॥ दुर्निर्वाह्यां महासत्वः । प्रतिज्ञां कृतवानिमां ॥ ॥ ५३ ॥ विशाम्यग्नौ प्रदीप्तेऽहं । यदि नाद्य धराधरं ॥ वर्षयामि यथावांछं । युष्माकं पश्यतामहो ॥ ॥ ५४ ॥ यतः—आरंभो चिय न फुरइ । अहव समत्ताण फुरइ आरंभो ॥ आरंभो य समप्पइ । अहव समत्ता समप्पंति ॥ ५५ ॥ एवं च निश्चयं कृत्वा । यावदास्ते कुमारकः ॥ तावत्क्षणांतरात्प्रोच्चै—रभ्रैराछादितं नभः ॥ ५६ ॥ झंपाभिरुछ्रिता विद्यु—ज्जजृंभे गर्जिरंजसा ॥ दृश्यंते पंचवर्णानि । पुरंदरधनूंषि च ॥ ५७ ॥ अतीवस्थूलधाराभिः । प्रवृत्ता वर्षितुं घनाः ॥ आधारिता दिशः सर्वा । अभ्रवातैर्विसर्पिभिः ॥ ५८ ॥ केकिनश्च प्रमोदेन । केकायंते दिशोदिशं ॥ पूत्कुर्वंति च सानंदाः । सर्वतोऽपि कृषीवलाः ॥ ५९ ॥ मालिता भूर्जलप्लावै—र्विसर्पद्भिरितस्ततः ॥ पूरितानि पयःपूरैः । सरांसि सुमहांत्यपि ॥ ६० ॥ प्रवहंत्यो महारावैः । श्रूयते नैव जल्पितं ॥ पीडयंत्यस्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

टान्युच्चै—र्वहंते सरितस्तरां ॥ ६१ ॥ स्वस्थीभूतानि चेतांसि । सर्वेषामपि देहिनां ॥ सप्रमोदा विशेषेण । जाता निशाचरा नराः ॥ ६२ ॥ समंताडुत्थितः प्रोच्चै—र्दर्दुराणां महारवः ॥ शब्दमयमिदं सर्वं । कुर्वन्निव महीतलं ॥ ६३ ॥ धान्यानि च समर्घाणि । संजातानि क्रमिष्यपि ॥ जाता च जीवितव्याशा । नृणां दारिद्रिणां दृढं ॥ ६४ ॥ एवं सर्वप्रजानंदे । चिरवृष्ट्या घने स्थिते ॥ स्वस्थीभूते जने सर्वे । सानंदे च धराधिपे ॥ ६५ ॥ निर्व्यूढस्वप्रतिज्ञोऽसौ । रससारकुमारकः ॥ समुत्थाय ततः स्थाना—दायातः पितुरंतिकं ॥ ६६ ॥ ततः प्रणम्य राजानं । तदासन्ने निषण्णवान् ॥ श्लाघितं च जनैः सर्वै—स्तस्य सत्वं मुहुर्मुहुः ॥ ६७ ॥ आस्तां तावन्निजो लोकः । संतो वा गुणरंजिताः ॥ तस्य सत्वं दुराराध्यै—र्दुर्जनैरपि वर्णितं ॥ ६८ ॥ एवं च सर्वदेशेषु । ग्रामे ग्रामे पुरे पुरे ॥ वर्ण्यंते सद्गुणास्तस्य । सर्वलोकैः सविस्मयं ॥ ६९ ॥ तत्रैके तस्य पुण्यानि । वर्णयंति महौजसः ॥ अन्ये पुनर्महासत्व—मन्ये पुनः पराक्रमं ॥ ७० ॥ अन्ये वचनचातुर्य—मन्ये सद्रूपसंपदं ॥ अन्ये सत्वप्रतिष्टत्व—मौदार्यमपरे तथा ॥ ७१ ॥ अन्ये कलासु कौशल्यं । सौशील्यमपरे पुनः ॥ अन्ये परोपकारित्वं । दाक्षिण्यं त्वपरे जनाः ॥ ७२ ॥ तस्यैवमासमुद्रांतं । कुमारस्य म·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हात्मनः ॥ क्रमेणोल्लसिता कीर्तिः । शंखकुंदेंदुनिर्मला ॥ ७३ ॥ एवं च श्लाघ्यमानोऽसौ । मान्यमानो महाजनैः ॥ वल्लभो नृपतेर्बाढं । भुंक्ते विषयजं सुखं ॥ ७४ ॥ अन्यदा स महीनाथो । गुणसारश्चिरं महीं ॥ पालयित्वा निजे राज्ये । निजं पुत्रं न्यवेशयत् ॥ ७५ ॥ रससारं गुणाधारं । सदाचारं सतां समं ॥ सम्मतं राजलोकानां । सर्वसामंतमंत्रिणां ॥ ७६ ॥ युग्मं ॥ स्वयं पुनर्विनिर्गत्य । पुरादापृच्छ्य पौरवान् ॥ कुलक्रमसमायातं । वनवासमशिश्रियत ॥ ७७ ॥ रससारस्ततो राजा । संजातश्चंडशासनः ॥ सूर्य इव प्रतापेन । समाक्रांतरसातलः ॥ ७८ ॥ अन्यदा च महादेवी । नाम्ना सौभाग्यसुंदरी ॥ सर्वलक्षणसंपूर्णं । पुत्ररत्नमजीजनत् ॥ ७९ ॥ कारितश्च ततः पित्रा । पुत्रजन्ममहोत्सवः ॥ कृतसर्वजनानंदः । पूरितार्थिमनोरथः ॥ ८० ॥ द्वादशाहे च संवृत्ते । महर्ध्योत्सवपूर्वकं ॥ जयसार इति ख्यातं । तस्य नाम प्रतिष्ठितं ॥ ८१ ॥ अथासौ ववृधे बालो । धात्रीपंचकलालितः ॥ शशीव प्रत्यहं लोक—लोचनानंददायकः ॥ ८२ ॥ क्रमेण यौवनस्थेन । तेनोढा राजकन्यका ॥ दत्वा छत्राद्यलंकारान् । पित्रा स युवराट् कृतः ॥ ८३ ॥ अन्यदा बहिरुद्याने । वनसुंदरनामनि ॥ विहरंतः समायाताः । सूरयः श्रुतसुंदराः ॥ ८४ ॥ अवग्रहमनुज्ञाप्य । स्थाने

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

साधूचिते स्थिताः ॥ निर्गता वंदनाद्यर्थं । नगरान्नागरा जनाः ॥ ८५ ॥
अथैवं हेलया लोकं । निर्गछंतं पुराद्वहिः ॥ दृष्ट्वा पप्रछ नूपालः । स्वं पुमांसं सकौतुकः ॥ ॥ ८६ ॥ स प्राह मयका राजन् । जल्पन्नेवं जनः श्रुतः ॥ यथेह सूरयः केचि—दुद्याने बहिराग-ताः ॥ ८७ ॥ तेषामेष जनः सर्वो । वंदनार्थं विनिर्गतः ॥ श्रुत्वेदं रससारोऽपि । कृत्वा सामग्रिकां क्षणात ॥ ८८ ॥ जगाम सिंधुरारूढः । कानने सूरिसन्निधौ ॥ नत्त्याभिवंद्य तं सूरिं । नातिदूरे निषण्णवान् ॥ ८९ ॥ युग्मं ॥ ततः सदर्थगंभीर—वरवाक्यैः सुकोमलैः ॥ सूरिभिर्भूरिसंवेगैः । प्रा-रब्धा धर्मदेशना ॥ ९० ॥ तद्यथा—यानपात्रं भवांभोधे—र्दुर्गतिद्वाररोधिका ॥ दया धर्मस्य स-र्वस्वं । कर्तव्या सर्वदा बुधैः ॥ ९१ ॥ सत्यं हितं प्रियं वाक्यं । वाच्यं सत्वसुखावहं ॥ सर्वदापि प-रित्याज्यं । चौर्यं दुःखनिबंधनं ॥ ९२ ॥ मातेव सर्वदा दृश्या । धार्मिकेण परांगना ॥ परित्याज्यः सदा धीरै—र्महारंभपरिग्रहः ॥ ९३ ॥ संसारसौख्यवैमुख्यं । विधेयं सुधियाधिकं ॥ कार्यः सज्ज-नसंसर्गो । न कार्योऽनार्यसंगतिः ॥ ९४ ॥ इत्याद्यनेकधा धर्म—माचक्षाणं मुनीश्वरं ॥ नत्वा प्र-स्तावमासाद्य । रससारोऽब्रवीदिदं ॥ ९५ ॥ भगवन् किं मयाकारि । सुकृतं पूर्वजन्मनि ॥ येनेदृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्धा मम स्फीताः । संजाता राज्यसंपदः ॥ ७६ ॥ सूरिः प्राह महाभाग । कथ्यते शृणु सादरं ॥
इतो भवाच्चतुर्थे त्वं । भवे हर्षपुरे पुरे ॥ ७७ ॥ बभूथ दुर्गता नारी । परकर्मकरी सदा ॥ इतश्च
नगरात्तस्मा—द्गव्यूतांतरसंस्थितं ॥ ७८ ॥ आसीज्जनमनोहारि । काननं कुंदसुंदरं ॥ तत्र शुभ्रा
भ्रसंकाशं । तुंगं जैनेंद्रमंदिरं ॥ ७९ ॥ युग्मं ॥ तस्य मध्ये शिवं शांतं । बिंबं जैनेश्वरं महत् ॥
तत्सुतीर्थमिति ख्यातं । जनवांछितपूरकं ॥ १०० ॥ तत्र चानेकदेशेभ्यः । समायाति बहुर्जनः ॥
स्तोत्रं पूजां बलिं चैव । विदधाति निरंतरं ॥ १ ॥ अथासौ दुर्गता नारी । कानने कुंदसुंदरे ॥ कृ
ता लोकैः प्रपापाली । जनं पाययते पयः ॥ २ ॥

अन्यदा च समायाताः । श्रीमंतो बहवो जनाः ॥ महर्ध्या तैः समारब्धं । स्नात्रं तत्र जिना
लये ॥ ३ ॥ सापि तत्र प्रपापाली । गता स्नात्रदिदृक्षया ॥ स्नाप्यमानस्तया दृष्टो । जिनः कुंभैः
पयोभृतैः ॥ ४ ॥ ततो हर्षभरापूर्णा । मनस्येवं व्यचिंतयत ॥ अहो धन्या इमे लोकाः । पुण्यवं
तः कृतार्थकाः ॥ ५ ॥ श्लाघ्यमेषामिदं जन्म । य एनं परमेश्वरं ॥ कुंकुमोदकसंपूर्णैः । सत्कुंभैः स्न
पयंत्यहो ॥ ६ ॥ अहमपुण्याऽधन्यैव । निःपुण्या दुःखदुःखिताः ॥ दुर्गदारिद्र्यसंदग्धा । किं कुर्वे ध

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नवर्जिता ॥ ७ ॥ ममापि वसुधालभ्य—मत्र संपद्यते पयः ॥ न च कुंकुमकर्पूर—श्रीखंमादि धनं विना ॥ ० ॥ अतोऽहं केवलेनापि । नीरेण परमेश्वरं ॥ स्नपयामि ममापीह । येन धर्मः प्रजायते ॥ ए ॥ विचिंत्यैवं पयःपूर्ण । कुंनमादाय नक्तितः ॥ स्नापयामास तद्विंबं । रोमांचांचितविग्रहा ॥ १० ॥ ततश्च स्थापयामास । पयःपूर्ण मनोहरं ॥ प्रत्यग्रं मृन्मयं कुंनं । नावसारं तदग्रतः ॥११॥ एवं चानेकधा तत्र । दृष्टं दुर्गतया तया ॥ क्रियमाणं जिनेंद्रस्य । स्नात्रं नानाविधैर्जनैः ॥ १२ ॥ तयापि स्नापितं तत्र । तद्विंबं नूरिशो जलैः ॥ पूजितं च मुधालभ्यैः । कुसुमैः काननोद्भवैः ॥१३॥ अथो निजायुषः प्रांते । दुर्गता स्त्री मृता सती ॥ तस्मिन्नेव पुरे जाता । सिंहसेनमहीपतेः ॥१४॥ चंद्रश्रीकुक्षिसंनूता । दुहिता कंदकंदली ॥ रूपसौनाग्यसंपन्ना । लावण्यामृतकूपिका ॥ १५ ॥ युग्मं ॥ अथासौ वर्धते बाला । पुष्णंती सकलाः कलाः ॥ क्रीमान्निश्च ह्यनेकानिः । क्रीमंती हर्षनिर्नरं ॥ १६ ॥ अन्यदा च जगामासौ । सखीवृंदसमन्विता ॥ तत्रैव सर्वतो रम्ये । कानने कुंदसुंदरे ॥ १७ ॥ इतश्चेतो भ्रमंती च । नानाक्रीमापरायणा ॥ तमेवालोकयामास । पूर्वदृष्टं जिनालयं ॥ १० ॥ ततस्तत्र प्रविष्टासौ । तद्विंबं च विलोकितं ॥ वीक्षितं च चिरं कालं । स्निग्धमंथरया

दृशा ॥ १९ ॥ तथासौ चिंतयामास । क मन्ये दृष्टपूर्वकं ॥ जैनचंद्रमिदं गेहं । बिंबं चेदं मनोहरं
॥ २० ॥ काननं च मनोहारि । वृक्षसंदोहसंकुलं ॥ पत्तनं च जनश्चैष । क दृष्टोऽयं नराधिपः ॥
॥ २१ ॥ एवं विचिंतयंत्याश्च । तस्याः शुद्धिविशेषतः ॥ जातिस्मरणमुत्पन्नं । प्राचीनभवगोचरं ॥
॥ २२ ॥ तेनालोकि स्ववृत्तांतः । सर्वः पूर्वभवोद्भवः ॥ ततो मूर्छावशादेषा । पपात धरणीतले ॥
॥ २३ ॥ ततश्चाकुलचित्तेन । सखीलोकेन सत्वरं ॥ वीजिता तालवृंताद्यैः । सिक्ता शीतलवारिणा
॥ २४ ॥ क्षणेन लब्धचैतन्या । स्वस्थीभूता समुत्थिता ॥ वृत्तांतमिममाकर्ण्य । तत्रायातो नरेश्वरः
॥ २५ ॥ ततः पृष्टा नरेंद्रेण । मूर्छाकारणमादरात् ॥ तयापि कथितः सर्व—स्तस्मै पूर्वभवो निजः
॥ २६ ॥ ततश्च विस्मितो राजा । शेषलोकश्च पौरवः ॥ हृष्टः प्रशंसयामास । जिनपूजामहाफलं ॥
॥ २७ ॥ ततः समग्रसामग्र्या । सर्वैः सद्गंधवस्तुभिः ॥ महर्ध्या कारितं राज्ञा । स्नात्रं तत्र जिना-
लये ॥ २८ ॥ ततश्च कुंदकंदल्या । पूजितोऽसौ जिनेश्वरः ॥ कर्पूरकुंकुमोन्मिश्र—सच्चंदनविलेप-
नैः ॥ २९ ॥ पूजितश्च महामूल्य—वस्त्रपुष्पादिवस्तुभिः ॥ ततः स्तोतुं समारब्धा । संवेगभरनि-
र्भरा ॥ ३० ॥ तद्यथा—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जय जय जिण तिजगुत्तम । जय जय तेल्लोक्कमंगलपईव ॥ जय जय सुरसयसंथुय । जय जय तेल्लोक्कसिरिनिलय ॥ ३१ ॥ जय जय गुणमणिरोहण । जय जय पणयाण सयलसुहजणय ॥ जय जय तिहुअणबंधव । जय जय पहु तिहुयणाणंद ॥ ३२ ॥ तुह थोविआवि भत्ती । मह-ल्लकल्लाणकारणं होइ ॥ होइ चिय बहुफलयं । थोवंपि सुखेत्तगयबीयं ॥ ३३ ॥ तुह दंसणेण सामिय । मच्च पणठाइं असुहकम्माइं ॥ किं गरुडदंसणेण । नासंति न विसहरकुलाइं ॥ ३४ ॥ तुह पूयामेत्तेणवि । जीवा पावंति सयलरिद्धीओ ॥ अहवा सुयणंमि कयं । थोवंपि अणंतगुणफलयं ॥ ३५ ॥ दिठे तुमंमि संपइ । मणाउमह नाह विहलिओ ॥ मोहो किं न विलिज्जंत । जहा हिमाइं रविकरपरद्धाइं ॥ ३६ ॥ जो तुह रूवं सामिय । पेछंति सिणिद्धमंथरच्छीहिं ॥ ते पेछिज्जंति इह । साणंदं तिहुयणसिरीए ॥ ३७ ॥ पूइज्जसि जेहिं तुमं । सुरहिवरकुसुमगंधमाईहिं ॥ ते सव्वत्थवि जयगुरु—वरपूयाभायणं होंति ॥ ३८ ॥ भत्तिब्भरनिब्भरंगा । नमंति जे तुम्ह पायपउमाइं ॥ ते सयलसुरवरेहिंवि । नाह नमिज्जंति अणवरयं ॥ ३९ ॥ जेएइं थुणंति सामिय । गंभीरपयत्थविरइयजणएहिं ॥ ते थुवंति सुरेहिंवि । उत्तमपयसंठिया पुरिसा ॥ ४० ॥ ससिसंखछत्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सविय—कलसंकुसलंछियाण सुहयाण ॥ वरमंगलनिलयाणं । नमो नमो तुज्झ पायाणं ॥ ४१ ॥ सुरनरपहुपणयाणं । सरणागयवज्जपंजरसमाणं ॥ पणयजयमुहयराणं । नमो नमो तुज्झ चलणाणं ॥ ४२ ॥ तह पसियसु सामि तुमं । पणईयाण कप्पपायव जिणिंद ॥ आसंसारं जह तुह । करेमि पयपूयणं अहयं ॥ ४३ ॥

एवं स्तुत्वा जिनाधीशं । सद्भक्त्या कुंदकंदली ॥ निष्क्रांतातीवसानंदा । जिनमंदिरमध्यतः ॥ ॥ ४४ ॥ गता राज्ञः सकाशे सा । निषण्णा च तदंतिके ॥ ततस्तत्र जनैः सर्वैः । कृता पूजा विशेषतः ॥ ४५ ॥ एवं तत्र नराधीशः । समं लोकैर्महर्द्धिभिः ॥ कारयित्वा जिनस्नात्रं । निजमंदिरमागतः ॥ ४६ ॥ जिनपूजाफलं तादृ—ग्दृष्ट्वा तत्र जनो बहुः ॥ श्रीमज्जिनेंद्रपूजायां । यत्नं चक्रे विशेषतः ॥ ४७ ॥ अथासौ नरनाथस्य । मंदिरे कुंदकंदली ॥ अमंदानंदसंदोह—मग्ना पूर्णमनोरथा ॥ ४८ ॥ त्रिसंध्यं पूजयंती च । जैनबिंबानि भावतः ॥ कुर्वंती श्रावकं धर्मं । शृण्वंती च जिनागमं ॥ ४९ ॥ दधती वरवात्सल्यं । सदा साधर्मिके जने ॥ धर्मतत्वं च पृछंती । गमयामास वासरान् ॥ ५० ॥ विभिर्विशेषकं ॥ प्राचीनभवसंबंधि—तीव्रदुःखपरंपरां ॥ स्मृत्वा स्मृत्वा ददौ नैव ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कामभोगेषु सा मनः ॥ ५१ ॥ निर्विण्णा कामभोगाच्च । सुव्रतार्यासमीपके ॥ जग्राह विधिना दीक्षां । सर्वकर्मक्षयंकरीं ॥ ५२ ॥ शिक्षिता द्विविधा शिक्षा । पठितं च बहु श्रुतं ॥ प्रतप्तं च तपस्तीव्रं । पालितं च व्रतं चिरं ॥ ५३ ॥ विधायाराधनामंते । सिद्धांतोक्तविधानतः ॥ ततो मृत्वा सुरो जातः । षष्टे कल्पे महर्द्धिकः ॥ ५४ ॥ भुक्त्वा तत्र सुखं दिव्यं । सागराणि चतुर्दश ॥ ततश्च्युत्वेह संजातो । रससारो भवानिति ॥ ५५ ॥ श्रुत्वेमं निजवृत्तांतं । पूर्वजन्मसमुद्भवं ॥ नरेंद्रो रससारोऽपि । जातो जातिस्मरः क्षणात् ॥ ५६ ॥ संवेगातिशयं बिभ्रन् । ब्रूते सूरिं कृतांजलिः ॥ संसारवासतः स्वामि—न्निर्विण्णो नितरामहं ॥ ५७ ॥ कृत्वा सौस्थ्यं निजे राज्ये । गृहीष्ये युष्मदंतिके ॥ संसारोत्तारिणीं दीक्षां । सकलक्लेशनाशिनीं ॥ ५८ ॥ अत्रार्थे माप्रमादीस्त्व—मित्युक्ते सति सूरिणा ॥ सूरिं प्रणम्य भूपालो । निजमंदिरमागतः ॥ ५९ ॥ समस्तमंत्रिसामंत—संमतेन सतां मतं ॥ स्वराज्ये स्थापयामास । जयसारं निजांगजं ॥ ६० ॥ यदन्यदपि कर्तव्यं । तदशेषं विधाय सः ॥ श्रुतसुंदरसूरिणा—मंते दीक्षां गृहीतवान् ॥ ६१ ॥ ततस्तेनाचिरादेव । संसारभयभीरुणा ॥ गृहीता द्विविधा शिक्षा । ग्रहणासेवनाभिधा ॥ ६२ ॥ षष्टाष्टमार्धमासादि—तपस्तप्तं सुदुः-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

करं ॥ द्रव्याद्यभिग्रहैः सार्धं । पालितः संयमश्चिरं ॥ ६३ ॥ एवं द्वादशवर्षाणि । संलेखनाविधानतः ॥ पर्यंतेऽनशनं कृत्वा । समभावसमन्वितः ॥ ६४ ॥ मृत्वा च वैजयंतेऽसौ । संजातोऽनुत्तरः सुरः ॥ ततश्च्युत्वा विदेहेषु । राजा भूत्वा महाबलः ॥ ६५ ॥ लब्ध्वा चारित्रसल्लक्ष्मीं । पालयित्वा च निर्मलां ॥ प्रलीनाशेषकर्मांशो । गतः सिद्धिं महापुरीं ॥ ६६ ॥ इत्यष्टमपूजाफलकथानकं परिसमाप्तं॥ उक्तानि पुष्पाद्यष्टविधपूजाफलसूचकान्यष्टावपि कथानकानि. अथ प्रकारांतरेण पूजामेवाह—

॥ मूलम् ॥—अष्टस्वंगेषु या पूजा । पुष्पैरष्टभिरर्हतः ॥ विशुद्धप्रणिधानेन । कर्माष्टकक्षयंकरी ॥ १ ॥ अष्टकर्मविनिर्मुक्त—पूज्यसद्गुणसूचिका ॥ अष्टपुष्पी समाख्याता । फलं भावनिबंधनं ॥ २ ॥ एकेनापि हि पुष्पेण । पूजा सर्वविदः कृता ॥ त्रिजगत्यपि तन्नास्ति । वस्तु सद्यन्न यच्छति ॥ ३ ॥ व्याख्या—इति श्लोकत्रयं स्पष्टं, न वरमष्टावंगान्यमूनि—शीर्षं १ उरः २, उदरः ३, पृष्टिः ४ द्वौ बाहू ६ द्वे ऊरुणी ७, एतेष्वष्टस्वंगेषु एकैकपुष्पदानात्पुष्पाष्टकं, अर्हतस्तीर्थकृतो विशुद्धप्रणिधानेन निर्मलांतःकरणेन कर्माष्टकक्षयंकरी, ज्ञानावरणाद्यष्टकर्मोच्छेदकारिणीति. तथाष्टकर्मविनिर्मुक्तपूज्यसद्गुणसूचिकेत्यष्टकर्मविनिर्मुक्तश्चासौ पूज्यश्च तीर्थकृत्तस्य सद्गुणास्तेषां सूचिका प्रदर्शिका,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अष्टपुष्पीति संज्ञया समाख्याता कथिता, फलं कार्यं भावनिबंधनं शुभाध्यवसायनिमित्तं. तथैकेनापि हि पुष्पेणेति श्लोकः सुगमः, इति श्लोकत्रयार्थः ॥ अथ विलेपनपूजामाह—

॥ मूलम् ॥—आदाय कुंकुमं रम्यं । कर्पूरोन्मिश्रचंदनं ॥ विलेपनं जिनेंद्रस्य । धन्यैरेव विधीयते ॥ १ ॥ व्याख्या—श्लोकोऽयं सुगमः, अथाभरणपूजाविधित्सया श्लोकत्रयमाह—

॥ मूलम् ॥—नानारत्नसमाकीर्णै—र्हारिहाटकनिर्मितैः ॥ कंठकैः कुंडलैः कांतैः । कंकटैः कर्णपूरकैः ॥ १ ॥ हारिहारैर्महामूल्यैः । कंकणैर्बीजपूरकैः ॥ सद्रत्नस्वर्णपद्माादि—भूषणैर्भवभेदिनं ॥ २ ॥ शांतं कांतं शिवं सौम्यं । जिनबिंबं यैर्नार्चितं ॥ श्रीणां कर्मकरा मूढा—स्ते नरा मूर्खशेखराः ॥ ३ ॥ व्याख्या—नानारत्नसमाकीर्णैरनेकरत्नसंकुलैर्हारिहाटकनिर्मितैः शोभायमानस्वर्णनिष्पन्नैः कंठकैः कंठाभरणैः, कंकटैर्मुकुटैः, कर्णपूरकैः कर्णाभरणविशेषैरिति श्लोकार्थः ॥ १ ॥ हारिहारैः शोभायमानमुक्ताफलाद्याभरणविशेषैः कंकणैर्हस्ताभरणैः, बीजपूरकैः सुवर्णादिनिर्मितप्रसिद्धफलविशेषैः, सद्रत्नस्वर्णपद्मादिभूषणैः प्रधानरत्नकनककमलाद्यनेकप्रवराभरणैर्भवभेदिनं संसारविदारकमिति. ॥ २ ॥ शांतं कांतमित्यादि सुगममिति श्लोकत्रयार्थः. ॥ ३ ॥ अथ वीतरागस्य पु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्पादिपूजाया अनुपयोगित्वमाशंक्य परिहरन् श्लोकत्रयमाह—

॥ मूलम् ॥—यदि ब्रूयान्नरः कोऽपि । पूजया किं प्रयोजनं ॥ वीतरागस्य वाच्योऽसौ । सत्यमेव त्वयोदितं ॥ १ ॥ शीतोष्णकालयोर्यद्व—ज्जनो यत्नेन सेवते ॥ जलानलौ तयोर्नैव । गुणः कोऽपि प्रजायते ॥ २ ॥ तथापीहोपकारोऽस्ति । तत्सेवाकारिणामलं ॥ एवमेव स विज्ञेयो । जिनपूजाविधायिनां ॥ ३ ॥ व्याख्या—यदि ब्रूयाद्यदि वदेन्मनुष्यः कोऽपि कश्चित्पूजया सपर्यया किमिति प्रश्ने प्रयोजनं कार्यं वाच्योऽसौ वक्तव्योऽसौ सत्यमेवावितथमेव त्वया भवतोदितं भणितमिति, एवमाशंक्योत्तरमाह ॥ १ ॥ शीतोष्णकालयोः प्रतीतयोर्यद्वद्येन प्रकारेण जनो लोको यत्नेनादरेण सेवते आश्रयते जलानलौ सलिलज्वलनौ, तयोर्जलानलयोर्नैव गुणो नैवोपकारः कोऽपि कश्चित्प्रजायते भवतीति. ॥ २ ॥ तथापीह तथाप्यत्रोपकारो गुणोऽस्ति विद्यते तत्सेवाकारिणां जलानलसेवाविधायिनां. तत्र जलं सेवमानानां पंकदाहतृष्णापनोदलक्षणो गुणो जायते, अनलसेविनां पुनः सीतापगमादिक इति. एवमेवेत्थमेव स उपकारः पुण्यबंधलक्षणो विज्ञेयो ज्ञातव्यो जिनपूजाविधायिनां सर्वज्ञसपर्याकारिणामिति. उक्तं च—पूयाए कायवहो । पडिकुठो सो य नेय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुज्जाणं ॥ उवगारिणित्ति तो सा । परिसुद्धा कहणु होइत्ति ॥ १ ॥ भन्नइ जिणपूयाए । काय-
वहो जइवि होइ कहिंवि ॥ तहवि हवई परिसुद्धा । गिहीण कूयाहरणजोगा ॥ २ ॥ असयारंभ-
पवत्ता । जं च गिही तेण तेसिं विन्नेया ॥ तिन्निवित्तिफलच्चिय । एसा परिभावणीयमिणं ॥ ३ ॥
उवगारा भावंमिवि । पुज्जाणं पूयगस्स उवगारो ॥ मंताइसरणजलणाइ—सेवणे जह तहेहंपि
॥ ४ ॥ देहाइनिमित्तंपि हु । जे कायवहंमि तह पयट्टंति ॥ जिणपूयाकायवहंमि । तेसि मयव-
त्तणं मोहो ॥ ५ ॥ इति श्लोकत्रयार्थः. अथ जिनपूजाकरणंप्रत्युपदेशं प्रयछन् श्लोकपंचकमाह—

॥ मूलम् ॥—रागद्वेषसमुद्भूत—ग्रंथेरत्यंतदुर्भिदः ॥ यदि वो भेदने वांछा । कुरुध्वं तज्जि-
नार्चनं ॥ १ ॥ जिनार्चनान्महापुण्यं । महापुण्याच्च संपदः ॥ संपदः शिष्टलोकस्य । स्वर्गमोक्षप्र-
साधिकाः ॥ २ ॥ प्राणैः प्रायो गतप्रायैः । शरीरे विशरारुणि ॥ करिकर्णचले वित्ते । चित्ते चिं-
तासमाकुले ॥ ३ ॥ एतदेव हि साफल्यं । जन्मजीवितयोर्जनाः ॥ यज्जिने क्रियते पूजा । त्रिसं-
ध्यं शुद्धचेतसा ॥ ४ ॥ जिनं पूजयतो यस्य । यांत्यहानि निरंतरं ॥ तस्यैव सफलं वित्तं । स पु-
मान् स च पंडितः ॥ ५ ॥ व्याख्या—इति श्लोकपंचकं सुगममेव. अथ जिनपूजाप्रणिधानमपि

P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

दर्शयन् श्लोकमेकमाह—

॥ मूलम् ॥—प्रणिधानमपि प्राहु—र्जिनपूजनगोचरं ॥ स्वर्गादिसाधनायालं । दुर्गताया इव स्त्रियः ॥ १ ॥ व्याख्या—प्रणिधानमप्यभिप्रायोऽपि प्राहुर्ब्रुवते जिनपूजनगोचरं तीर्थंकरार्चनविषयं स्वर्गादिसाधनायालं स्वर्गमर्त्यसुखसाधनायालं स्वर्गमर्त्यसुखसाधनाय समर्थं पारंपर्येण सिद्धिशर्मप्रसाधनायाप्यलं भवतीति, दुर्गताया इव दारिद्र्योपद्रुताया इव स्त्रियो नार्या इति श्लोकसमुदायार्थः, भावार्थः कथानकादवसेयस्तच्चेदं—इह हि भक्तिनिर्भरानेकनाकनाकीननिकरानुगम्यमानमार्गोऽमरवरनिर्मितस्फुरदुरुरुचिरुचिरतरचारुचामीकरप्रवरतरवारिरुहनिकरोपरिक्षिप्तप्रशस्तसमस्तस्वस्तिकाद्यतुललक्षणावलिकलितसरलसुकुमालविमलतरचारुचरणकमलयुगलो निजकतनुप्रभवप्रभास्वरप्रभामंडलविदलिताखिलदिक्चक्रवालोज्जृंभमाणतिमिरभवप्राग्भारः सकलत्रैलोक्यप्रभुः सकलसद्गुणरत्नरत्नाकरः श्रीमन्महावीरवर्धमानस्वामी इक्ष्वाकुकुलनंदनः प्रसिद्धसिद्धार्थपार्थिवपुत्रः पुत्रीयितनिखिलभुवनजनो जनितजनमनश्चमत्कारगुणग्रामो ग्रामाकरपुरपृथ्वीं पृथिवीं विहरन्नन्यदा कदाचित्काकंदीनामिकायां पुरि समाजगाम. तत्र चामरवरविसरविरचितसमवसरणमध्यवर्तिनि भगवति धर्मदेश-

नां विदधति, तथा नानाविधयानवाहनसमारूढप्रौढपत्तिपरिगते गंधसिंधुरमधिष्टिते छत्रछन्नमस्तके मागधोद्गीतगुणगणे भेरीभांकारभरितांबरतले नरपतौ, तथा द्विजवरवैश्यादिके पुरजने, तथा गंधधूपपुष्पपटलप्रभृतिपूजापदार्थव्यग्रकरकिंकरीनिकरपरिगते विविधवसनाभरणरमणीयतरशरीरे नगरनारीनिकरे भगवतो वंदनार्थं व्रजति सत्येकया वृद्धदरिद्रयोषिता जलेंधनाद्यर्थं बहिर्निर्गतया कश्चिन्नरः पृष्टः क्वायं लोक एकमुखस्त्वरितं याति? तेनोक्तं जगदेकबांधवस्य देहिनां जन्मजरामरणरोगशोकदौर्गत्यादिदुःखच्छिदुरस्य श्रीमन्महावीरस्य वंदनपूजनाद्यर्थं. ततस्तच्छ्रवणात्तस्या भगवति भक्तिरभवदचिंतयच्च, यथाहमपि भगवतः पूजार्थं यत्नं करोमि, केवलमहं दुर्गता पुण्यरहिता विविधपूजासामग्रीवर्जितेति. ततोऽरण्यदृष्टानि मुधालभ्यानि सिंदुवारकुसुमानि स्वयमेव गृहीत्वा भक्तिनिर्भरांगी अहो धन्या पुण्या कृतार्था हतलक्षणाहं, सुलब्धं मम जीवितं, मनुष्यजन्मफलं वाहमवाप्तेति भावनया पुलककंटकितकाया प्रमोदजलप्लवप्लावितकपोला भगवंतंप्रति प्रयांती समवसरणकाननयोरंतराल एव वृद्धतया क्षीणायुष्कतया च झगिति मृतिमुपागता. ततः साऽविहितपूजापि पूजाप्रणिधानोल्लसितमानसतया देवत्वमवाप्तवती, ततस्तस्याः कलेवरमवनीपीठलुठितमवलोक्यानुकंपाप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रीतांतःकरणो लोको मूर्छितेयमिति मन्यमानोंभसा सिषेच. ततस्तामपरिस्पंदामवलोक्य लोको भ-
गवंतं पप्रछ, भगवन्नसौ वृद्धा किं मृता वा जीवतीति? भगवांस्तु व्याजहार यथा मृतासौ देवत्वं
चावाप्ता. ततः पर्याप्तिभावमुपगत्य प्रयुक्तावधेः पूर्वभवानुभूतमवगम्य मद्वंदनार्थमागतः स चायं म-
त्पुरोवर्ती देव इति. ततो भगवदभिहितमिदमनुश्रुत्य समस्तः समवसरणधरणीगतो जनः परमवि-
स्मयमगमत, यथाहो पूजाप्रणिधानमात्रेणापि कथममरतामवाप्तासाविति. ततो भगवान् गंभीरां धर्म-
कथामकथयत्, यथा स्तोकोऽपि शुभाध्यवसायो विशिष्टगुणपात्रविषयो महाफलो भवति, तथा च—
एक्कंपि उदगबिंदु । जह पक्खित्तं महासमुद्दंमि ॥ जाइ अक्खयमेवं । पूयावि हु वीयरागेसु ॥ १ ॥
उत्तमगुणबहुमाणो । पयमुत्तसत्तमज्झयारम्मि ॥ उत्तमधम्मपसिद्धी । पूयाए वीअरागाणं ॥ २ ॥ त-
तो भगवांस्तत्संबंधिनं भाविव्यतिकरमकथयत्, स दुर्गतयोषाजीवो देवो देवलोकाच्च्युत्वा कनक-
पुरे नगरे कनकध्वजनामा राजा भविष्यति, स च जन्मांतरोपार्जितपुण्यप्राग्भारवशेन सांसारिक-
सुखान्यनुभवन्नन्यदा शरत्काले शक्रमहोत्सवप्रदर्शनार्थं निर्गछन्नंतरा सरःपरिसरे दर्दुरं भुजंगेन, भु-
जंगमं कुररेण, कुररमजगरेण च ग्रस्यमानं दृष्ट्वा संवेगमापन्नो भवनिर्विण्णमनाश्चिंतयिष्यति, यथा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यं दर्दुरः स्वल्पबलो महाबलेन भुजंगमेन ग्रस्यते, भुजंगमोऽपि तदधिकबलेन कुररेण ग्रस्यते, कुररोऽप्यजगरेण चैवं कृषीवलो बलाधिपेन, बलाधिपोऽप्यमात्येन, अमात्योऽपि राज्ञा, राजापि चक्रवर्तिना, चक्रवर्त्यपि मृत्युना यथाबलं बाध्यते, तदेवमसारोऽयं संसार इति वितर्कयन् संवेगमापन्नः प्राज्यं राज्यं तृणवत्परित्यज्य शब्दादिविषयान् विषविषमान् परिकलय्य प्रत्येकबुद्धो भविष्यति, स चाद्यदिन एव द्रव्यक्षेत्रकालभावभेदभिन्नानभिग्रहान् गृहीष्यति, दुःकरतरतपोभिर्निष्टप्तसर्वांगो निरतिचारां प्रव्रज्यां चिरकालं परिपाल्य प्रवर्धमानशुभपरिणामोऽयोध्यायां शक्रावतारचैत्योद्याने शुक्लभूतलेऽनशनं करिष्यति, मूलोन्मूलितघातिकर्मा च समुत्पन्नदिव्यज्ञानः क्षपकश्रेणिमारुह्य निरुद्धयोगत्रिकः शैलेशीं प्रतिपद्य निःशेषिताशेषकर्मांशोऽष्टमे भवे निर्वाणं गमिष्यति, एवं च पूज्यपूजाप्रणिधानमपि महाफलमिति. किंच—

॥ मूलम् ॥—ऐश्वर्येणापि किं तेन । किं प्रभुत्वेन भूयसा ॥ पांडित्येनापि किं तेन । जिनो यत्र न पूज्यते ॥ १ ॥ व्याख्या—स्पष्टं. इति धर्मरत्नकरंडके जिनपूजाविषये द्वितीयोऽधिकारः समाप्तः ॥ श्रीरस्तु ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ गुरुभक्तिरिति तृतीयोऽधिकार आरभ्यते—अस्य चायमभिसंबंधः—अनंतराधिकारे पूजाविधिरुक्तः, तत्र जिनस्य जिनपूजनस्य च स्वरूपं गुरुभक्तिप्रसादत एव ज्ञायते, इत्यतो गुरुभक्तिप्रशंसात्राभिधीयते, इत्यनेन संबंधेनागतोऽयं व्याख्यायते, तत्र गुरुरिति कः शब्दार्थः? उच्यते—गृ निगरणे, इत्यस्य उणादिक उप्रत्ययांतस्य गुरुरिति भवति, गृणाति प्रतिपादयति शिष्येभ्यः शास्त्रार्थमिति गुरुस्तस्य भक्तिः सेवा पर्युपासनेति पर्यायाः, गुरुभक्तिस्तस्याः प्रशंसा श्लाघा, गुरुभक्तिरिहलौकिकपारलौकिकगुणोपवर्णनमित्यर्थः, गुरुभक्तिप्रशंसात्र वर्ण्यत इति संबंधः, तत्रायमादिश्लोकः—

॥ मूलम् ॥—गुरुभक्तिर्भवांभोधे—स्तारिका दुःखवारिका ॥ धन्यानां वर्तते चित्ते । प्रत्यहं नौरिव दृढा ॥ १ ॥ व्याख्या—गुरुभक्तिर्धर्माचार्यबहुमानो भवांभोधेः संसारसमुद्रात्तारिका, तारणकारिका, दुःखवारिका शारीरमानसाशर्मनिषेधिका, धन्यानां धर्मधनलाभवतां वर्तते संतिष्टते नौरिव बेडेव दृढा बलिष्टेति श्लोकसमासार्थः. ॥ १ ॥ तत्र गुरुलक्षणमिदं—धर्मज्ञो धर्मकर्ता च । सदा धर्मप्रवर्तकः ॥ सत्वेभ्यो धर्मशास्त्रार्थ—देशको गुरुरुच्यते ॥ १ ॥ अथवा—जो जेणं जंमि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णाणंमि । णविज्ज दंसणे च चरणे वा ॥ सो चेव तस्स भन्नइ । धम्मगुरु धम्मदाणाउ ॥ १ ॥ इति प्रथमश्लोकभावार्थः. अथ गुरुभक्तेः फलमाह—

॥ मूलम् ॥—यत्र शिष्टसमाचारो । यत्र धर्मव्यवस्थितिः ॥ तत्राविगानतो दृष्टं । गुरुतत्वं विचक्षणैः ॥ १ ॥ व्याख्या—यत्र कुत्रापि शिष्टजनसमाचारो धार्मिकजनसमाचारो यत्र च धर्मस्य व्यवस्थितिर्व्यवस्था तत्र, विगानं व्यभिचारः, न विगानमविगानं तस्मादविगानतो निश्चयेन दृष्टमुपलब्धं गुरुतत्वं धर्माचार्यरहस्यं विचक्षणैर्विद्वद्भिरिति श्लोकार्थः. ॥ १ ॥ अथ गुरुभक्तिफलमेव दृष्टांतेन स्पष्टमाचष्टे—

॥ मूलम् ॥—प्रथमांतिमतीर्थेशै—स्तीर्थकृन्नामकर्मणः ॥ बीजं लब्धमटव्यां य—द्गुरुभक्त्यत्र कारणं ॥ १ ॥ व्याख्या—प्रथमांतिमतीर्थेशैः प्रथमपश्चिमतीर्थनायकैः प्रलब्धं प्राप्तं बीजं कारणं, कस्य ? तीर्थकृन्नामकर्मणः, तीर्थकरत्वं भूयते येन कर्मणा तत्तीर्थकृन्नामकर्म तस्य, कुत्र बीजं लब्धं ? अटव्यां शून्यारण्ये, गुरुभक्तिर्धर्माचार्येऽतिकर्तव्यता, तत्र तीर्थकृन्नामकर्मलाभे कारणं हेतुः. ॥ १ ॥ तथाहि—धनेन वाणिज्यार्थं विनिर्गतेन वर्षाकालव्याहतगमनेनाटव्यां संतिष्ठता सीदतां

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

साधूनां घृतप्रदानेन तीर्थकरत्वबीजमासादितं. महावीरजीवेनाप्यपरविदेहे ग्रामचिंतकेन सता राजादेशेन काष्ठनिमित्तं कांतारमनुप्रविष्टेन सार्थपरिभ्रष्टा निरसना अटव्यां पर्यटंतः साधवो दृष्टाः, समाहूय भक्तपानेन च प्रतिलाभिताः, स्वस्थावस्थामार्गे चावतारिताः. ततश्च साधूनां तंप्रत्यनुकंपा समजनि, धर्मदेशना कृता, बोधिबीजं च तेन प्राप्तमिति. यदाह—अवरविदेहे गामस्स । चिंतउ रायदारुवणगमणं ॥ साहू भिक्खनिमित्तं । सत्थाहीणे तहिं पासे ॥ १ ॥ दाणं दाउं पंथप्पणयणं । अणुकंपगुरुण कहणसम्मत्तं ॥ सोहम्मे उववन्नो । पलियाउ सुरो महिड्ढीउ ॥२॥ व्यतिरेकमाह—

॥ मूलम् ॥—पापोपहतबुद्धीनां । येषां चेतसि न स्थिता ॥ गुरुभक्तिः कुतस्तेषां । सम्यग्दर्शनमुत्तमं ॥ १ ॥ व्याख्या—पापेन पापाभिसंधिनोपहता दूषिता मतिर्बुद्धिर्येषां ते पापोपहतबुद्धयस्तेषां, येषां केषांचिच्चेतसि मनसि न स्थिता नावस्थानं कृतवती गुरुभक्तिर्धर्माचार्येतिकर्तव्यता, कुतः कस्मान्न कुतोऽपीति, सम्यग्दर्शनं सद्बोधलक्षणमुत्तमं प्रधानं. ॥ १ ॥ ननु सम्यग्दर्शनेन किं कार्यं? चारित्रधर्म एव श्रेयानिति यो ब्रूयात्तस्य दूषणमाह—

॥ मूलम् ॥—तद्भावादुत्तरो धर्मः । साधुश्रावकलक्षणः ॥ तस्मान्मिथ्यादृशः पापाः । साधु

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निह्नवकारिणः ॥ १ ॥ व्याख्या—तद्भावाद्दर्शनलाजनावादुत्तरो देशविरतिसर्वविरतिलक्षणो धर्मो दुर्गतिनिपतज्जंतुजातधरणप्रवणो जीवपरिणामः, यतः—दुर्गतिप्रसृतान् जंतून् । यस्माद्धारयते ततः ॥ धत्ते चैतान् शुभे स्थाने । तस्माद्धर्म इति स्मृतः ॥ १ ॥ साधुश्रावकलक्षणो गृहियतिस्वरूपः. तस्मान्मिथ्यादृशो विपरीतदृष्टयो न संति दुष्षमायां साधव इति वादिनः. यतः—

॥ मूलम् ॥—न विना साधुभिस्तीर्थं । नाऽतीर्थे साधुसंभवः ॥ समं सत्ता तयोर्गीता । सर्वज्ञैः सर्वदर्शिभिः ॥ १ ॥ व्याख्या—न विना न ऋते साधुभिर्मुनिभिस्तीर्थं संसारसागरसंतरणतरंडकल्पं, न च नैवातीर्थे जिनांतरादौ साधुसंभवः साधुसत्ता, सममेककालं सत्ता विद्यमानता तयोः साधुतीर्थयोर्गीता प्रतिपादिता, कैः? सर्वज्ञैः सर्ववस्तुस्तोमविशेषवेदिभिः, सर्वदर्शिभिः समस्तवस्तुसामान्यावलोकिभिः ॥ १ ॥ ननु भवतु शुभकाले सुखमासुखमादावुभयसत्ता, सांप्रतं श्रावकैरेव तीर्थं यातीति यो मन्येत तन्मतं निरस्यन् श्लोकमाह—

॥ मूलम् ॥—अद्यापि दुःखमाकाले । यावद्दुःप्रसहप्रभुः ॥ तावच्चरणसत्तापि । भगवद्वाक्यतः स्थिता ॥ १ ॥ व्याख्या—अद्याप्यधुनापि दुःषमाकाले कालचक्रस्य पंचमेऽरके कियंतंका लं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यावदिति परमार्थः, दुःप्रसहो दुःप्रसहाभिधानः प्रभुः सूरिस्तावदिति तावंतं कालं चरणसत्तापि चारित्रसंभवोऽपि भगवद्वाक्यतः श्रीमन्महावीरवर्धमानस्वामिवचनात्स्थिता प्रतिष्ठिता. ॥ १ ॥ उक्तं च—दुप्पसहंतं चरणं । जं भणियं भगवया इहं तिथ्थे ॥ आणाजुत्ताण इमं । न होइ अहुणत्ति वा मोहो ॥ १ ॥ परितुलियनियबलाणं । सत्तीए जहागमं जयंताणं ॥ संपुन्नच्चिय किरिया । दुप्पसहंताण साहूणं ॥ २ ॥ एवं च सति—जो भणइ नथ्थि धम्मो । न य सामाइयं न चेव वयाइं ॥ सो समणसंघबझो । कायव्वो समणसंघेण ॥ ३ ॥ इह च दुःप्रसहसूरिवक्तव्यता एवमागमे श्रूयते, सा च मूलादारभ्य कथ्यते, तद्यथा—बायालवाससहसूणि—यत्तिए सेक्ककोडिकोम्मित्ति ॥ गोयमवोथ्थो कालो । एथ्थ जिणा चक्किजुयलाइं ॥ १ ॥ चउप्पन्नमहापुरिसा । चोथ्थे अरयंमि जंति गणनाह ॥ चोथ्थारयस्स सेसे । तिवासअठनवमाससेसेसु ॥ २ ॥ मम सिध्धिगयस्स पुणो । पालगराया अवंतिनयरीए ॥ होही तं रयणीए । सठ्ठि वरिसाइं पुह हवई ॥ ३ ॥ तस्स वुह्वीए नंदाए । पणपन्नसयं च होइ वासाणं ॥ मरुयाणं अठसयं । तीसच्चिय पूसमित्तस्स ॥ ४ ॥ बलमित्तभाणुमित्ता । सठी होहंति वासरायाणो ॥ नहवाहणो य राया । होही चत्ताल वासाणं ॥ ५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तह गद्दहिल्लरज्जं । बावन्नसयं च पंचमासयं ॥ एयाणं अवसाणे । होही य पुणो स गोराया ॥६॥
छवाससएहिं । समं पंचपंचमासेहिं ॥ सिद्धिगयस्स उ राया । सगोत्ति नामेण विक्खाउ ॥ ७ ॥
तेरसवाससएहिं । तेवीसइवासवट्टिमेहिं च ॥ पाडलिपुत्ते राया । कक्की होइत्ति सगरन्नो ॥ ८ ॥
एगुणवीसवरिसाणं । सयगए अठवीसवासाइं ॥ वोलीणं पंच मासा । मम सिद्धिगयस्स गणनाह
॥ ९ ॥ होही चंमालकुले । कक्की रुद्दो य चेत्तमासम्मि ॥ अठमिमिविठीजाउ । चउम्मुहो वीय-
नामेणं ॥ १० ॥ तम्मि दिणे महुराए । महुसहन्नवणं पमिस्सए तुंगं ॥ कूरस्स तस्स उदए । देव
य साहू निवारेही ॥ ११ ॥ गावोरूवं काउं । अन्नह वचाहए स पावोत्ति ॥ सिस्सीहुंति कुलिंगा ।
चोरेहिं पया विलुप्पिहिं ॥ १२ ॥ रायम्मरेहिं दलिया । गामा होहिंति नाममेत्तेण ॥ तस्स उ-
दएण नरहं । होही बहुदुक्खपमिपुन्नं ॥ १३ ॥ हिंमंतो दट्ठूणं । पंचवि थूभे उ नंददव्वस्स ॥ जा-
णेत्ता खणिऊणं । थूभे लेहिई तं दव्वं ॥ १४ ॥ पासंडा फेडेही । नंजेवि करेहिं साहु पुण नि-
क्कं ॥ पावो उ नोगवंतो । वारेही देवया तइया ॥ १५ ॥ निमिहिज्जिही पुरं सव्वं । सोत्र्पणं ग-
रुयगंगावाहेणं ॥ सत्तरस उ तब दिणा । देवो वासेही निच्चिहूं ॥ १६ ॥ सो धणपरियणसहिउ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। वलासिज्ज उ नंददविणकयनिचज्ज ॥ बुट्टेही महपावो । पउरं चुप्पिहिही गंगाए ॥ १७ ॥ पन्ना तेण धणेणं । पुरं समारित्तु भुंजिही रज्जं ॥ पाडिवज्ज आयरिज्ज । बुट्टेही तब जोगेणं ॥ १८ ॥ नयरे मिम्मायंगो । देवो वरिसिही होइ सुभिक्खं ॥ पम्मिएणवि कुंभेणं । न किणंता तह होहिंति ॥ १९ ॥ पुणरवि सो साहूणं । गोवाडनिसेहणं करेऊणं ॥ मग्गिही भिक्खभागं । अइलुद्धो पावपडिबद्धो ॥ २० ॥ आयरिज्ज पाडिवज्ज । कप्पववहारधारज्ज तइया ॥ संघसहिज्ज महप्पा । सक्कस्स य देवरन्नस्स ॥ २१ ॥ काउं काउस्सग्गं । अच्छिही ताव जाव सक्कस्स ॥ होही आसणकंपो । आगंतू सोवहेसी य ॥ २२ ॥ छासीसो वासाणं । महराया होइऊण एवमज्ज ॥ गच्छेही पुण नयरं । कक्कीरायत्ति मे कहियं ॥ २३ ॥ सक्केण कक्किपुत्तो । दत्तो अणुसासिऊण जिणधम्मे ॥ ठविज्ज सो पुण रज्जे । होही जिणसाहुपूयरज्ज ॥ २४ ॥ सो दत्तो महराया । काही जिणभवणमंडियं वसुहं ॥ होहिंति अवहिज्ज । समणा होहिंति सुवइणो ॥ २५ ॥ तइया इंदवयारे । दिट्ठे धम्मस्स गुरुपहावंमि ॥ बहुलोज्ज जिणभत्तो । कहीहि साहूण पूयाज्ज ॥ २६ ॥ दत्तसुज्ज जियसत्तु । होही तस्सवि य मेहघोसोत्ति ॥ जिणपूयणरया लोगा । सक्कवयारेण होहिंति ॥२७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्नन्नरायवंसा । होहिंति य गोयमा वियाणेहि ॥ जा विमलवाहणो नर—वइत्ति ता रायधम्मो-
त्ति ॥ २८ ॥ दुप्पसहो जा साहू । होहिंति जुगप्पहाण आयरिया ॥ अज्जसुहम्मपभिई । चउ-
सहिया दोन्नि उ सहस्सा ॥ २९ ॥ वासाण सहस्सेहिं य । एक्कवीसाइ इह भरहवासे ॥ दसवे-
यालिया अत्था । दुप्पसहजइंमि नासिही ॥ ३० ॥ उसप्पिणी इमीसे अ । चत्तारि पडिमाई इह
भरहे ॥ अंतंमि दूसमाए । संघस्स चउविहस्साधि ॥ ३१ ॥ दुप्पसहो समणाणं । सबसिरी साहु-
णीण पडिमिया सड्ढो ॥ नाइलनामो फग्गु—सिरी सावयाणं च ॥ ३२ ॥ राया य विमलवाहण ।
सुहुमो नामेण तस्स य अमच्चो ॥ इय दुसमाए काले । रायामच्चा य पच्छिमया ॥ ३३ ॥ दुप्पस-
हो फग्गुसिरी । सच्चसिरी नाइलो य राया य ॥ इय दूसमचरिमंते । दोरयणी हुंति उच्चाओ ॥
॥ ३४ ॥ दुप्पसहो फग्गुसिरी । सच्चसिरी नाइलो य राया य ॥ इय दूसमचरिमंते । वीस य वा-
साउया सबे ॥ ३५ ॥ छट्ठचउत्थं च तहा । होही उक्कोसगं तवोकम्मं ॥ आणुसट्ठो इंदेणं । का-
ही किल अट्ठमं भत्तं ॥ ३६ ॥ दसवेयालियधारी । पूजिसइ जह य चोदसियपुवी ॥ सो पुण
सुहुतरागं । पूजिसइ समणसंवेण ॥ ३७ ॥ बारसवरिसे जम्म । अट्ठ य वासाइं होइ परियाओ ॥

P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

कालं काही तइयाउ । अठमभत्तेण दुप्पसहो ॥ ३८ ॥ उववज्जिहि विमाणे । सागरनामंमि सो उ सोहम्मे ॥ तत्तो य चयित्ताणं । सिझिही नीरउ जरहे ॥ ३९ ॥ एवं अइक्कमंते । वाससहस्सेहिं एकवीसाए ॥ फिट्टिही लोगधम्मो । अग्गीमग्गो जिणक्काउ ॥ ४० ॥ पूवाए संजाए । वोछेउ होइ चरणधम्मस्स ॥ मझन्ने राईणं । अवरह्ने जायतेयस्स ॥ ४१ ॥ पछिमसंजाए जवे । छेउ कुलधम्मदेसधम्माणं ॥ एसो खलु वोछेउ । दूसमचरिमंमि दिवसंमि ॥ ४२ ॥ तदिमां दुःप्रसहसूरिवक्तव्यतामाकर्ण्य न वक्तव्यं संप्रति चारित्रं नास्तीति, तस्य दुःप्रसह एव व्यवछेद इत्यागमोक्तिरिति. अथैवंविधेऽपि चारित्रप्रतिपादके सर्वजनप्रतीते सिद्धांतवचने यो मन्येत न संति संप्रति साधव इति तंप्रत्यज्युच्चयमाह—

॥ मूलम् ॥—कृत्यमार्गोपदेष्टारो । यत्र संति न साधवः ॥ न तत्र धर्मनामापि । कुतो धर्मः कुतः क्रिया ॥ १ ॥ व्याख्या—कृत्यमार्गोपदेष्टारः शुन्नमार्गोपदेशिका यत्रैकांतदुःषमादौ काले न संति न विद्यंते साधवो मुनयः, नामाप्यभिधानमात्रमपि तत्र देशादौ कुतो धर्मस्य? तर्हि कुतो धर्मः? कुतः क्रिया सदनुष्टानात्मिका? न कुतोऽपि कारणाजावादिति. ॥ १ ॥ साधूनेव स्तुवन्नाह—

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

॥ मूलम् ॥—क्षमादिब्रह्मपर्यंत—गुणरत्नैरलंकृताः ॥ साधवः कलिकालेऽपि । चलंतः कल्प-पादपाः ॥ १ ॥ व्याख्या—कल्पपादपा वर्तंते कल्पोर्वीरुहा वर्तंते साधव इति योगः. कथंभूताः? चलंतश्चंक्रमणशीलाः, क्व? कलिकालेऽपि दुःषमायामपि, कथंभूताः साधवः? क्षमामार्दवार्जवसत्य-शौचब्रह्माकिंचन्यतपःसंयमा एव गुणाः, त एव रत्नानि मरकतादीनि, तैरलंकृता विभूषिताः ॥ १ ॥ एवंगुणेष्वपि साधुषु ये मत्सरोपहतबुद्धयो दोषग्राहिणस्तेषां दोषदर्शनायाह—

॥ मूलम् ॥—कल्पपादपतुल्येषु । ये सुसाधुपराङ्मुखाः ॥ आत्मद्रुहो निर्मर्यादा—स्ते न-रा नरकोन्मुखाः ॥ १ ॥ व्याख्या—कल्पपादपतुल्येषु कल्पोर्वीरुहसमानेषु साधुषु मुनिषु ये केच-न पराङ्मुखा निर्भक्तिका इत्यर्थः, आत्मद्रुह आत्मद्रोहकारिणस्ते निर्मर्यादाः पुरुषा नरकोन्मु-खा दुर्गतिसन्मुखा इति. ॥ १ ॥ किमिति साधुपराङ्मुखा एवं निंद्यंत इत्याह—

॥ मूलम् ॥—गौरव्या गुरवो मान्या । धर्ममार्गोपदेशकाः ॥ सेवनीयाः प्रयत्नेन । संसारांबु-धिसेतवः ॥ १ ॥ व्याख्या—गौरव्या गौरवार्हा गुरवो धर्माचार्या मान्या बहुमानविषया धर्ममार्गो-पदेशका ज्ञानदर्शनचारित्रमोक्षमार्गोपदेष्टारः सेवनीयाः पर्युपासनीया विशेषतः संसारांबुधिसेतवः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संसारसमुद्रसमुत्तरणसेतवो मार्गकल्पाः. ॥ १ ॥ तथा श्रोतव्यं शुद्धसिद्धांतसारं शुद्धसिद्धांतः सारः प्रधानो यत्र तत्, केभ्यः? साधुभ्यस्तदनुसारेणागमानुसारेण विधेया कार्या, का? सदनुष्ठितिः, शोभनानुष्ठानरूपा सुस्थचिंता च साबाधनिराबाधगवेषणा च. सदा सर्वदौदासीन्यभावपरिहारः प्रवर्तननिवर्तनलक्षणस्य वर्जनं परिहारः, तन्निंदाऽश्रवणं तेषां साधूनां निंदा दोषग्रहणलक्षणा तस्या अश्रवणमनाकर्णनं, दोषेषु दोषोद्घट्टनेषु मूकता मूकीभावः कार्यः, दुष्टनिग्रहो दुष्टानां मिथ्यादृष्टीनां यथाशक्त्या निग्रहो निवारणमपकारकरणप्रवृत्तानामिति शेषः, तथा सदाचारप्रमत्तानां ज्ञानादिपंचप्रकाराचारचरणप्रमादिनां मतं संमतमेकांतशिक्षणं रहःशिक्षाप्रदानलक्षणं, यथान्योऽपि मिथ्यादृष्ट्यादिर्न जानाति न वेत्ति यदनेनेदं कुकर्म सेवितमिति. तथा हितं मिताक्षरैस्तथा तेन प्रकारेण हितान्यागामिनि काले पथ्यानि तानि परिमितानि वर्णरूपाणि तैः. अत्र श्रोतव्यं शुद्धसिद्धांतसारमार्हतं वच इत्युपदिष्टं, तत्र ये केचन भावसारं सार्वज्ञं वचः शृण्वंति तेषां तावदैहिकामुष्मिकसकलकल्याणपरंपरा भवत्येव, भावविकलानामपि केषांचिद्दैवयोगेन श्रवणपथमुपगतं सत जैनेंद्रं वचः सकलमपि समीहितं साधयति, यथा रौहिणेयकचौरस्य, तत्कथानकं चात्र—अस्तीह

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सर्वतो रम्यं । पुरं राजगृहाभिधं ॥ स्वर्गखंममिवोत्तुंग—देववेश्मसमाकुलं ॥ १ ॥ आसीत्तत्र श्रि-
यां धाम । श्रेणिको नाम नृपतिः ॥ बभूव तस्य सद्बुद्धिः । सुप्रसिद्धोऽभयाभिधः ॥ २ ॥ पुत्रो
मंत्री च निःशेष—गुणसंदोहमंदिरं ॥ तथा तत्रैव सन्नैलो । वैभारगिरिनामकः ॥ ३ ॥ युग्मं ॥
नानावृक्षसमाकीर्णो । नानागह्वरसंकुलः ॥ प्रोत्तुंगैः शृंगसंदोहैः । संरुद्धगगनांतरः ॥ ४ ॥ तत्रा-
नेकगुहाकीर्णे । झरन्निर्झरसंकुले ॥ बभूवाशेषसत्त्वानां । सदा संतापकारकः ॥ ५ ॥ नानावेषधरो
धीरो । धर्मवार्ताबहिःकृतः ॥ वसत्यलक्षितो लोकै—स्तस्करो रौहिणेयकः ॥ ६ ॥ युग्मं ॥ माया
माता जनी यस्य । मृषा हृदयवासिनी ॥ अदत्तग्रहणं मूल—नीवी नित्यं तदापणे ॥ ७ ॥ अभ-
क्ष्यं विद्यते नास्य । नापेयं किंचिदप्यहो ॥ अगम्यं विद्यते नैव । सर्वाशी सर्वदूषकः ॥ ८ ॥ वा-
सरे नगरस्यांत—र्बहुरूपद्रुपदक्षयः ॥ शनैः शनैश्चरत्येष । खंजन् क्षीणस्वरं लपन् ॥ ९ ॥ यष्ट्यव-
ष्टंभतो धूर्तो । दुःखंदुःखेन गच्छति ॥ कासन्ननारतं रीणः । कष्टंकष्टेन जल्पति ॥ १० ॥ ज्वालस्य-
जीर्णपट्टेन । स्थगितैकविलोचनः ॥ बभ्राम हंडिकाहस्तो । गृहदर्शनकाम्यया ॥ ११ ॥ सधनं नि-
र्धनं चेद—मिदं पुंभिर्विवर्जितं ॥ इत्यादि सकलं ज्ञात्वा । निश्चक्राम ततः पुरात् ॥ १२ ॥ कुभो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जनं परित्यज्य । हित्वा दूरे च हंम्भिकां ॥ सुभोजनं समानीय । बुभुजेऽसौ यथेच्छया ॥ १३ ॥ स्या-
लक्षितश्च लोकेन । गत्वा वैभारपर्वते ॥ तावदास्ते निलीनोऽसौ । यावदस्तं गतो रविः ॥ १४ ॥
ततश्च पर्वतादेष । उत्ततार शनैः शनैः ॥ दत्वा समंततो दृष्टिं । ततो निःशंकमानसः ॥ १५ ॥
वीरवेषं विधायासौ । लोकमोषणवांछया ॥ नक्तं सुप्तेषु लोकेषु । सालमुल्लंघ्य लीलया ॥ १६ ॥
प्रविश्य नगरं तूर्णं । मुषित्वा चिह्नितं गृहं ॥ निर्जगाम तथैवासौ । तस्करो रौहिणेयकः ॥ १७ ॥
त्रिभिर्विशेषकं ॥

एवं दिने दिने तेन । कुर्वता निर्धनीकृतः ॥ राजगृहजनः सर्वो । राज्ञोंतिकमुपागतः ॥१८॥
विज्ञप्तो नृपतिस्तेन । देव दर्शय सांप्रतं ॥ पानीयस्थानमस्माकं । वस्तुमत्र न शक्यते ॥ १९ ॥
युग्मं ॥ राज्ञोक्तं केन कार्येण । कथ्यतां स्वप्रयोजनं ॥ जनेनोक्तं महाराज । सावधानैर्निशम्यतां
॥ २० ॥ युष्मासु विद्यमानेषु । विद्यमानेषु मंत्रिषु ॥ केनापीदं पुरं राज—न्ननाथमिव मुष्यते ॥
॥ २१ ॥ ततः संजातखेदेन । भूमिपालेन भाषितं ॥ कथ्यतां किं गतः क्वापि । भो लोका दंड-
पाशिकः ॥ २२ ॥ श्रुत्वेदं कोट्टपालेन । विधाय करकुड्मलं ॥ जल्पितमेष देवाह—मादेशो मम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दीयतां ॥ २३ ॥ भणितं भूमिनाथेन । भद्र किं न श्रुतं त्वया ॥ यदुक्तं पौरलोकेन । विरागवि-
धुरं वचः ॥ २४ ॥ तस्करं वा लभस्वाशु । लोकानां देहि वा धनं ॥ न लभ्यते मुधा मूढ । त्रि-
दमारद्धिकं पदं ॥ २५ ॥ कृता गवेषणा तेन । बहिरंतश्च सर्वतः ॥ न लब्धस्तस्करः क्वापि । ततो
राज्ञे निवेदितं ॥ २६ ॥ न दृष्टस्तस्करो देव । न धनं मम विद्यते ॥ यादृशं सर्वलोकानां । दी-
यते प्रभुवाक्यतः ॥ २७ ॥ एते वयमिमे प्राणा । गृहसारोऽपि तावकः ॥ कुरु यद्रोचते तुभ्यं ।
किमन्यैर्बहुजल्पितैः ॥ २८ ॥ ततो राज्ञा समाहूतो । मंत्री मंत्रिपुरस्सरः ॥ नाम्नाभयकुमारोऽथ ।
साक्षेपं च प्रभाषितः ॥ २९ ॥ वत्स पंचाहमध्ये त्वं । तस्करं प्रकटीकुरु ॥ नो चेत्तस्करदंडस्ते ।
पतिता नास्ति संशयः ॥ ३० ॥ यदादिशति तातो मे । तत्करोमि न संशयः ॥ तिष्टत सुस्थिता
यूयं । भारोऽयं मयि संभृतः ॥ ३१ ॥ ततस्त्रिकचतुष्केषु । शून्यागारगृहेषु च ॥ वेश्यागृहेषु सर्वेषु
। ध्वजिनामापणेषु च ॥ ३२ ॥ नदीकूपतडागेषु । देवतायतनेषु च ॥ निरूपितो न च दृष्टो । गू-
ढचारी स तस्करः ॥ ३३ ॥ गतान्यहानि चत्वारि । पंचमे च समागते ॥ यामिन्याश्चरमे यामे ।
ह्यभयेन विचिंतितं ॥ ३४ ॥ हुं विज्ञातो मया नैष । चारचारी मलिम्लुचः ॥ तदस्य ग्रहणे कोऽ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्यु—पायोऽन्यश्च विचिंत्यते ॥ ३५ ॥ शालोपरेण कोऽप्येष । संचरति न संशयः ॥ तस्माद्वालं विशालेन । मालयामि पदातिना ॥ ३६ ॥ इदं विचिंत्य विज्ञप्त—स्तेन राजा रहः स्थितः ॥ पादातं मदधस्तात । रात्रिमेकां विधीयतां ॥ ३७ ॥ प्रतिपन्नं नरेंद्रेण । वत्स किं याचितं त्वया ॥ त्वदाधीनं हि मे राज्यं । प्राणा अपि च तावकाः ॥ ३८ ॥ ततोऽभयकुमारेण । पादातेन समंततः ॥ प्राकारो मालितः सर्वः । सावधानेन सर्पता ॥ ३९ ॥

इतश्च नगरासन्ने । ग्रामे च रौहिणीयकः ॥ गतो बंधूपरोधेन । स्थितश्च प्रहरत्रयं ॥ ४० ॥ वलितः सत्वरैः पादैः । प्राप्तो राजगृहे पुरे ॥ एकतो धर्ममाचष्टे । महावीरो जिनेश्वरः ॥ ४१ ॥ अन्यतः पुरलोकेभ्यो । भयं तस्य विवर्धते ॥ तदिदं हंत संजात—मितो व्याघ्र इतस्तटी ॥ ४२ ॥ कर्णयोरंगुलीर्दत्वा । वेगेन प्रपलायितः ॥ विद्धो सव्येतरे पादे । शूलया धूलिछन्नया ॥ ४३ ॥ ततो गंतुमशक्तेन । भीतभीतेन तेन सा ॥ शूला दक्षिणहस्तेन । शीघ्रमेव समुध्धृता ॥ ४४ ॥ इतश्च लोकनाथेन । वदता देवलक्षणं ॥ न स्पृशंति भुवं देवा । निर्निमेषनिरीक्षिणः ॥ ४५ ॥ इत्यादि गदितं वाक्यं । प्रविष्टं तस्य कर्णयोः ॥ भयोऽपि चांगुलीर्दत्वा । कर्णयोः स पलायितः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४६ ॥ वैभारपर्वते गत्वा । भुक्त्वा च वरभोजनं ॥ पीत्वा च वरवारीणि । निलीनो निभृतं स्थि-
तः ॥ ४७ ॥ दिनं गतं निशा जाता । तमःस्तोमो विजृंभितः ॥ दृश्यं न दृश्यते वस्तु । लोकेन
पुरतः स्थितं ॥ ४८ ॥ घूत्कृतं घूकसार्थेन । शिवाभिश्च ववासिरे ॥ स्फीतफेत्कृतशब्देन । जनसं-
त्रासकारिणा ॥ ४९ ॥ इतश्च मंत्रिणा प्रोक्तः । पुररक्षाविधायकः ॥ द्वाररक्षाद्य कर्तव्या । प्रतोली-
नां प्रदानतः ॥ ५० ॥ प्रतिपन्नमिदं तेन । क्रियया च तथा कृतं ॥ शालोऽपि मालितः सर्वो । नि-
रंतरं पदातिना ॥ ५१ ॥ पर्वताच्चूर्णमुत्तीर्ण—स्तस्करो रौहिणीयकः ॥ वीरवेषधरो वीरः । संप्राप्तः
शालसन्निधौ ॥ ५२ ॥ अज्ञातपुरवृत्तांतः । करणाभ्यासयोगतः ॥ शालमुल्लंघयन् बद्धः । शालस्थ-
सुभटैर्दृढं ॥ ५३ ॥ ततोऽभयकुमारस्य । शीघ्रं नीत्वा स ढौकितः ॥ तेनापि यंत्रितं कृत्वा । सुप्रय-
त्नेन धारितः ॥ ५४ ॥ क्षपाक्षये दिनं जात—मुदितोऽरुणसारथिः ॥ स्वकर्मधर्मसंयुक्ता । जज्ञिरे
निखिला जनाः ॥ ५५ ॥ कृतप्रभातकर्तव्यः । श्रेणिको मगधाधिपः ॥ सभासिंहासनासीनो । लो-
केन परिवारितः ॥ ५६ ॥ यावदास्ते क्षणं ताव—दभयोऽपि समागतः ॥ रौहिणीयकनामानं । गृ-
हीत्वा तस्करं तकं ॥ ५७ ॥ युग्मं ॥ वयं निराकुला जाता—स्तात तीर्णभया यतः ॥ प्रभूणां वच-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नं कृत्वा । सेवकाः शेरते सुखं ॥ ५८ ॥ कृतालीकप्रकोपेन । श्रेणिकेन प्रजल्पितं ॥ सुबुद्धिरपि वत्स त्वं । निर्बुद्धिरिव लक्ष्यसे ॥ ५९ ॥ यदस्य नररत्नस्य । बंधायोग्यस्य बंधनं ॥ तद्दुनोति मनो वत्स । मामकीनमनारतं ॥ ६० ॥ अनालोचितकारी हि । नरो नैव प्रशस्यते ॥ ततो विबंधनं कृत्वा । विमुंचैनं ममाग्रतः ॥ ६१ ॥ गतोऽसौ श्रेणिकेनापि । गाढं सावेशचेतसा ॥ चिंतितं यद्ययं नाम । रौहिणीयकसंज्ञकः ॥ ६२ ॥ सहते तदा करोम्यस्य । तीव्रदंडेन शिक्षणं ॥ यथान्योऽपि बिभेत्युच्चैः । कुर्वाणः कर्म कुत्सितं ॥ ६३ ॥ अन्नयोऽपि समायातः । कृत्वादिष्टं महीभुजः ॥ दत्तं तस्मै सुतुष्टेन । स्वांगलग्नं महीभृता ॥ ६४ ॥ वस्त्रादि प्रीतप्रीतेन । तेनापीदं प्रतीच्छितं ॥ तांबूलं च स्वहस्तेन । स्वासनं चासनाय च ॥ ६५ ॥ ततः संजातशंकेन । तस्करेण विचिंतितं ॥ आश्चर्यमिदं जाति य—दद्दष्टे कुरुते नृपः ॥ ६६ ॥ न कृतोऽवसरः कोऽपि । न चास्योपकृतं मया ॥ वैवाहिको न संबंधः । स्वाजन्यं न च तादृशं ॥ ६७ ॥ आदरश्च महानेष । क्रियते मे महीभुजा ॥ महच्छंकापदं चेदं । विपाकोऽस्य न सुंदरः ॥ ६८ ॥ मामयं न विजानाति । नाम च प्रकटं मम ॥ तदयं जीवनोपायो । यत्स्वं नाम न कथ्यते ॥ ६९ ॥ प्रणम्य भणितो राजा । तस्करेण

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ससंभ्रमं ॥ प्रसादः क्रियते कस्य । स्वामिना वेद्यतां मम ॥ ७० ॥ राजाह रौहिणीयस्य । तवायं वीरकर्मणः ॥ स प्राहालं प्रसादेन । मुक्त्वा वस्त्रादिकं ततः ॥ ७१ ॥ तांबूलं च परित्यज्य । निषण्णः शुद्धभूतले ॥ विषण्णवदनो दीन । उवाचेदं नृपं वचः ॥ ७२ ॥ विधातुर्विस्मृतो येन । न कृतं मे स्तनद्वयं ॥ परनामोपजीवी यो । रामा सा न पुमानसौ ॥ ७३ ॥ वरं मृतो वरं दग्धो । मा संजातो वरं नरः ॥ परस्य नाम विक्रीय । प्रसादं यः प्रतीछति ॥ ७४ ॥ धान्यपूराभिधे ग्रामे । शिवशक्तिः कुटुंबिकः ॥ श्यामा भार्या तयोर्जातो । दुर्गशक्तिरहं सुतः ॥ ७५ ॥ तस्मै यद्देहि तद्देहि । नाहं हि रौहिणीयकः ॥ श्रुत्वेदं भूभुजा मुक्तः । स्वीकृतो दंभपाशिना ॥ ७६ ॥ आकारितो नरेंद्रेण । मंत्री मंत्रिपुरस्सरः ॥ अभयो भणितश्चेदं । नामाप्येष न मन्यते ॥ ७७ ॥ अप्रतिपन्ननामा च । कथं कष्टेन मार्यते ॥ तथा कुरु यथा नाम । स्वयं स प्रतिपद्यते ॥ ७८ ॥ ततो निर्व्याकुला यूयं । तीर्णभाराः समंततः ॥ वयमेव करिष्यामो । यथा युक्तमतः परं ॥ ७९ ॥ अभयेनापि सस्नेहं । राजाध्यक्षं स जल्पितः ॥ प्रीतिवृद्धिकृते भद्र । भोक्तव्यं मद्गृहे त्वया ॥ ८० ॥ ददतां वर्धते प्रीतिः । समये प्रतिगृह्णतां ॥ गुह्यं कथयतां चैव । समये प्रतिशृण्वतां ॥ ८१ ॥ भुंजतां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मित्रगेहेषु । प्रस्तावे च प्रतीछतां ॥ इत्येवं वर्धते प्रीतिः । प्राणिनां जववासिनां ॥ ७२ ॥ युग्मं ॥
चौरेण चिंतितं सोऽय—मंतिकस्थो ममांतकः ॥ यज्ञोपितं मया नाम । पृछतोऽपि महीपतेः ॥७३॥
तेनाहमर्पितो राज्ञा । बुद्धिगेहस्य मंत्रिणः ॥ येन केन प्रकारेण । नामविज्ञानहेतवे ॥ ७४ ॥
जवत्वात्मा न मोक्तव्यः । खेदोऽपि च न संगतः ॥ सोढव्यं पतितं सर्वं । वीरेणोन्नतचेतसा ॥७५॥
विधिरेष करोत्येवं । नानाकारा विम्बनाः ॥ स्वयं कृतानि कर्माणि । जुज्यंते स्वत एव हि ॥७६॥
जुज्यते यद्विधिर्दत्ते । विधिदत्तं च पीयते ॥ गम्यते नयते यत्र । विधिदत्ते च सुप्यते ॥ ७७ ॥
गम्यते किं विचारेण । नान्यथा बत मुच्यते ॥ विचिंत्यैवं ततस्तेन । प्रपन्नं मंत्रिणो वचः ॥७८॥
ततोऽजयकुमारेणा—नीतः प्रीतिपुरस्सरं ॥ स्वगृहे दापितं तस्य । विशिष्टं बृहदासनं ॥ ७९ ॥
केनोपायेन हंतायं । निजं नाम वदिष्यति ॥ हुं ज्ञातं मद्यपानेन । तत्र यत्नं प्रकुर्महे ॥ ८१ ॥
मद्यापणात्ततो मद्यं । हृद्यं जनमनोहरं ॥ आनीय च विधायोच्चै—र्गोष्टीबंधं समंततः ॥ ८२ ॥
जणितोऽजयकुमारेण । चारणश्चतुराननः ॥ त्वया गीते समारब्धे । स्तोतव्यो रौहिणीयकः ॥८३॥
कृते तथैव तेनापि । चिंतयामास तस्करः ॥ सोऽयं मन्नामविज्ञान—हेतवे पाशकः कृतः ॥ ८४ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तथा मद्यं पिबत्येष । यथा नो जायते मदः ॥ न च ब्रूते विरूपाणि । चेतना नैव मुह्यते ॥७५॥
पीयमानेषु मद्येषु । दृढकैः सह सुंदरैः ॥ नृत्यत्सु मदमत्तेषु । नरेषु रौहिणीयकः ॥ ७६ ॥ अ·
लीककोपमाधाय । चौरो वदति चारणं ॥ रे चारण दुराचार । कोऽयं त्वो रौहिणीयकः ॥ ७७ ॥
का माता कः पिता तस्य । मूर्खस्त्वं मूढ लक्ष्यसे ॥ नानृतं गायनं कार्यं । याहि याहि ममाग्रतः॥
॥ ७८ ॥ शिवशक्तिसुतं शांतं । श्यामलाकुक्षिसंभवं ॥ दुर्गशक्तिं महाशक्तिं । गीतयोग्यं न गाय·
से ॥ ७९ ॥ ततश्चूर्णेन सन्मिश्रं । पायितो मंत्रिणा सुरां ॥ तया निर्नष्टचेष्टोऽसौ । पपात भुवि
चौर्यकृत् ॥ १०० ॥ न वक्ति श्वसिति नापि । न पश्यति न जिघ्रति ॥ निषिद्धेंद्रियसंचारो । जा·
तो योगीव निश्चलः ॥ १ ॥ तथाविधं तकं दृष्ट्वा । मंत्रिणा निजमंदिरं ॥ उपरिष्टाच्च विमानस्य ।
सदृशं कारितं द्रुतं ॥ २ ॥ पंचवर्णमहामूल्य—वस्त्रस्यूतवितानकैः ॥ यन्मनांसि हरत्येव । यथा·
स्थानं नियोजितैः ॥ ३ ॥ मुक्ताहारार्धहारैश्च । चतुर्दिक्षु विलंबितैः ॥ हारिहीरकजालैश्च । मध्यभा·
गे च मंडितं ॥ ४ ॥ नानापुष्पोपहारेण । सर्वतोऽपि विराजितं ॥ कर्पूरागुरुसन्मिश्र—धूपगंधस·
मुध्धुरं ॥ ५ ॥ वरकस्तूरिकालिप्त—भित्तिस्थभ्रमराकुलं ॥ सारस्वस्तिकमालालि—मौलितं रत्नशा·

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

लितं ॥ ६ ॥ नव्यनव्यव्यवस्थेन । वरनेपथ्यधारिणा ॥ रूपसौभाग्ययुक्तेन । लोकविस्मयकारिणा ॥ ७ ॥ नरनारीसमूहेन । युक्तं युक्तविधायिना ॥ सुरपल्यंकतुल्येन । पल्यंकेन समन्वितं ॥ ८ ॥ कारितं च क्षणादेव । मंत्रिणा निजमंदिरं ॥ ततो भृत्यैः स उत्क्षिप्य । तत्र पर्यंकके वरे ॥ ९ ॥ निवेश्य देवदूष्याभ—पटेनाछादितस्ततः ॥ संजातो मृतसंकाश—स्तस्करो रौहिणीयकः ॥ १० ॥ कुलकं ॥ यथास्थानं स्थितो लोको । मंत्रिणैवं च शिक्षितः ॥ यथा भो भो विधातव्यं । रौहिणीयकसंज्ञितं ॥ ११ ॥ यथायं सहते नाम । नाम्नैव नः प्रयोजनं ॥ स्वयमेकांतदेशे च । शृएवन्नसौ व्यवस्थितः ॥ १२ ॥

चौरेणापि जितश्चूर्ण—स्ततं उद्घाटितं शिरः ॥ विलोक्यादृष्टपूर्वं त—द्गेहं रम्यजनं तथा ॥ १३ ॥ चिंतितं च किमेतद्भो । मन्नेत्रानंदकारकं ॥ दृश्यते सर्वमेवात्र । मयानीक्षितपूर्वकं ॥१४॥ यावदेष मनस्येवं । सर्वतः क्षिप्तलोचनः ॥ विस्मितश्चिंतयामास । तावदानंदनिर्भरः ॥ १५ ॥ जनोऽपि गातुमारब्धः । प्रतीहारेण वारितः ॥ रेरे कल्पं न जानीथ । स्थिरीभवत सांप्रतं ॥ १६ ॥ स्थितेषु तेषु तेनोचे । यथा शृणु सुरप्रभो ॥ सौधर्माख्यो ह्ययं स्वर्गो । विमानमरुणप्रभं ॥ १७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अनाथानां भवान्नाथो । जातो बृहन्मनोरथैः ॥ शृणु कल्पं विमानेश । मंगलं येन कुर्महे ॥१८॥
पिता माता निजं स्थानं । नाम कर्म च कथ्यतां ॥ पूर्वभवभवं सर्वं । क्रियते येन मंगलं ॥१९॥
ततः संभ्रांतचित्तेन । तस्करेण विचिंतितं ॥ सांप्रतं का गतिः कोऽपि । प्रकारो विस्मयावहः ॥२०॥
घटामाटीकृते सर्वं । यदनेन प्रभाषितं ॥ स्वर्गः स्वर्गोकृताश्चैता । इमे देवा अहं सुरः ॥ २१ ॥
देवविमानमेतच्चा—दृष्टं दृष्टिमनोहरं ॥ पितादिकर्मपर्यंतः । परं प्रश्नो न संगतः ॥ २२ ॥ यथात-
थ्येन किं सर्वं । कथ्यते गोप्यतेऽथवा ॥ न जाने निश्चयं तेन । चेतो दोलायते मम ॥ २३ ॥
एवं संशयमापन्नो । यावदास्ते मलिम्लुचः ॥ तावच्चित्ते गतं तस्य । वचः सर्वज्ञभाषितं ॥ २४ ॥
यदुक्तं वीरनाथेन । वदता देवलक्षणं ॥ न स्पृशंति भुवं देवा । निर्निमेषनिरीक्षिणः ॥ २५ ॥
रागद्वेषमहामोह—मूढचित्तस्य भाषितं ॥ न तदेकांततः सत्यं । सत्यासत्यं हि तद्वचः ॥ २६ ॥ रा-
गद्वेषमहामोह—दोषमुक्तस्य जल्पितं ॥ सत्यं पाषाणरेखेव । यथैवोक्तं तथैव तत् ॥ २७ ॥ तद-
स्ति जीवनोपायो । ममाप्येष न संशयः ॥ पश्यामि तावदेतेषां । देवानां दृष्टिलक्षणं ॥ २८ ॥
सोऽथ शय्यां परित्यज्य । निषण्णो ह्यासनोपरि ॥ सनिमेषा इमे दृष्टा । लग्नपादाश्च भूतले ॥२९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः संवादनाहेतोः । कृतात्मनि परीक्षणा ॥ यावद् दृष्टं चलं चक्षु–र्लग्नौ पादौ च भूतले ॥३०॥
न स्वर्गो न सुरा एते । न देव्यो न विमानकं ॥ मायाविलसितं सर्व–मजयस्येति लक्ष्यते ॥
॥ ३१ ॥ मम नामपरिज्ञान–निमित्तमिति मे मतिः ॥ इदं च चिंतितं तेन । बहिश्चेदं प्रकाशि-
तं ॥ ३२ ॥ भवद्भिर्यदहो पृष्टं । पित्राद्यं तन्निशम्यतां ॥ धान्यपूराभिधे ग्रामे । शिवशक्तेः कुटुंबि-
नः ॥ ३३ ॥ गृहिणी श्यामलानाम्नी । दुर्गशक्तिरहं सुतः ॥ दयादानसमायुक्तः । सर्वदर्शनभक्ति-
मान् ॥ ३४ ॥ सदा स्वदारसंतुष्टः । परद्रव्यपराङ्मुखः ॥ अन्यदा च जनन्या मे । रजन्याः प्रहरे
गते ॥ ३५ ॥ गाढा विशूचिका जाता । जीवितव्यांतकारिणी ॥ तेनाहं प्रेषितः पित्रा । वैद्यानय-
नहेतवे ॥ ३६ ॥ यावत्तत्र गतस्ताव–त्पुरद्वारं नियंत्रितं ॥ करणाभ्यासयोगेन । शालमुल्लंघयन्नहं
॥ ३७ ॥ शालस्थितभटैर्बद्धो । ढौकितोऽजयमंत्रिणे ॥ क्षपाक्षये च तेनापि । नीत्वा राज्ञे समर्पि-
तः ॥ ३८ ॥ तेनापि सादरं दृष्टो । गौरवेण धृतः क्षणं ॥ सादरं प्रीतिवृद्ध्यर्थ–मजयेन निमंत्रि-
तः ॥ ३९ ॥ नीतस्तेन निजे गेहे । मद्यपानं च कारितः ॥ मत्तश्च न तदा किंचि–ज्जानेऽहं ग-
तचेतनः ॥ ४० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो मृत्वा सुरो जातो । ब्रवदीयविमानके ॥ संपादयत सर्वाणि । मंगलानि द्रुतं द्रुतं ॥ ॥ ४१ ॥ कालक्षेपो न कर्तव्यः । कार्याणां त्वरिता गतिः ॥ ततोऽन्नयकुमारेण । सर्वमेतन्महीभृते ॥ ४२ ॥ कथितं न नवत्येव । तातायं रौहिणीयकः ॥ अज्ञातेन च किं तेन । मारितेन तपस्विना ॥ ४३ ॥ युग्मं ॥ दुःखेन लभ्यते तात । मानुष्यं जन्म जंतुना ॥ राजाह रोचते यत्ते । तत्कुरुष्व यदृच्छया ॥ ४४ ॥ ततोऽन्नयकुमारेण । स्वभृत्या नणिता यथा ॥ रेरेऽर्धचंद्रकं दत्वा । गृहीत्वा दक्षिणे करे ॥ ४५ ॥ निष्कामयत तं तेऽपि । कृत्वैवं तं बन्नाषिरे ॥ मुक्तोऽसि मंत्रिणा नद्र । गच्छ तत्सत्वरैः पदैः ॥ ४६ ॥ युग्मं ॥ पुनर्जातमिवात्मानं । मन्यमानोऽथ सोऽपि हि ॥ अददद्दक्षिणे दृष्टिं । वामतः पृष्टतस्तथा ॥ ४७ ॥ द्रुतं द्रुतं विनिर्गत्य । व्यजनं देशमाश्रितः ॥ ततश्च चिंतयामास । चौरः संवेगमागतः ॥ ४८ ॥ युग्मं ॥ ते धन्या येऽत्र शृण्वंति । वचः सर्वज्ञनाषितं ॥ यदनिच्छत एवेह । श्रोतुं मे कर्णयोर्गतं ॥ ४९ ॥ जीवितव्याय संजातं । त्राणमन्येन नो कृतं ॥ नमः श्रीवीरनाथाय । वीरितांतरशत्रवे ॥ ५० ॥ सुरासुरनमस्याय । संसारावनिसेतवे ॥ पूर्वापराविरुद्धाय । जीवानां शुद्धिहेतवे ॥ ५१ ॥ संसारसौधदीपाय । श्रीवीरवचसे नमः ॥ यतोऽद्य कष्टयो-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

गेन । यममुखाद्विनिर्गतः ॥ ५२ ॥ विनिर्विशेषकं ॥ चराचरजगन्नाथः । पुत्रीयितजगत्त्रयः ॥ त्रा· णं मे श्रीमहावीरो । यावज्जीवमतःपरं ॥ ५३ ॥ इति संवेगमापन्नो । जवान्निर्विण्णमानसः ॥ चचाल श्रीमहावीर—पादवंदनहेतवे ॥ ५४ ॥ वंदित्वा त्रिजगन्नाथं । निषण्णः शुद्धजूतले ॥ जणितं किं जगन्नाथ । ममास्ति व्रतयोग्यता ॥ ५५ ॥ अस्तीति जणितस्तेन । शीघ्रमात्मा समर्पितः ॥ जणितः प्रजुणा जड । चित्तशुद्धिर्विधीयतां ॥ ५६ ॥ अत्रांतरे समायात—श्चतुरंगबलान्वितः ॥ वंदनाय जिनेंद्रस्य । श्रेणिको मगधाधिपः ॥ ५७ ॥ प्रविश्य विधिना तत्र । दत्वा च भ्रामरीत्रयं ॥ वंदित्वा च महावीरं । निषसादोचितासने ॥ ५८ ॥ ततश्च लोकनाथेन । प्रारब्धा धर्मदेशना ॥ कर्णामृतसमा सारा । संसारोच्छेदकारिणी ॥ ५९ ॥ ततः प्रपेदिरे केचिद् । गृहिधर्मं सदर्शनं ॥ अन्ये च शुद्धचारित्रं । सफलाजनि देशना ॥ ६० ॥ समयं प्राप्य जूपेन । ततः पृष्टो जिनेश्वरः ॥ रौहिणीयाह्वयो नाथ । कुत्र तिष्टति तस्करः ॥ ६१ ॥ प्रकाशयास्य कर्माणि । नामापि प्रकटं प्रजो ॥ परं निरूपितोऽस्माजि—र्न चासौ दृश्यते दृशा ॥ ६२ ॥ जवाच भगवानेष । दक्षिणेन ममाग्रतः ॥ तिष्टति लीनगात्रोऽसौ । निषण्णः शुद्धभूतले ॥ ६३ ॥ सन्मुखो मोक्षमार्गस्य । पापकर्म·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पराङ्मुखः ॥ नैनं प्रत्यशुभं चेतो । विधेयं श्रेणिक त्वया ॥ ६४ ॥ शुभाशुभानि चेतांसि । दिनमध्ये विदेहिनां ॥ जायंते विस्मयोऽप्यत्र । न कर्तव्यो महीपते ॥ ६५ ॥ मोक्षमार्गप्रपन्नस्य । वात्सल्यं तव संगतं ॥ राजाह कुत्सितं कर्म । सुलभं दुर्लभं त्विदं ॥ ६६ ॥ धर्मसद्धर्मकार्याणि । कुर्वतोऽस्य सहायकाः ॥ स्वत एव वयं स्वामिन् । युष्मदादेशनोदिताः ॥ ६७ ॥ इत्युक्त्वा स्वकरे कृत्वा । गच्छताऽभयमंत्रिणा ॥ सगौरवं गृहे नीतो । रौहिणीयकतस्करः ॥ ६८ ॥ आतिथेयीं क्रियां सर्वां । पादप्रक्षालनादिकां ॥ विधाय समये सोऽथ । वस्त्रैश्च परिधापितः ॥ ६९ ॥ भोजनांतरकाले च । विश्रांतोऽभयमंत्रिणा ॥ निर्वेदकारणं पृष्टः । वदतिस्म यथास्थितं ॥ ७० ॥ अभयः प्राह भो भद्र । चित्तशुद्धिपुरस्सरं ॥ प्रव्रज्याग्रहणं श्रेयः । सर्वेषां सुखकारणं ॥ ७१ ॥ यदत्र परसंबंधि । चित्तमालिन्यकारणं ॥ अदत्तं स्वीकृतं सर्वं । तत्तस्यैव समर्पय ॥ ७२ ॥ अज्ञातस्वामिकं द्रव्यं । तथा विस्मृतनायकं ॥ मृतनष्टधनं सर्वं । तच्च राज्ञे प्रदीयतां ॥ ७३ ॥ विशुद्धात्मा ततस्तूर्णं । कुरु धर्मं यथोदितं ॥ प्रतिपन्नमिदं तेन । क्रियया च कृतं द्रुतं ॥ ७४ ॥ ततोऽभयकुमारेण । कृतनिष्क्रमणक्रियः ॥ महामहोत्सवे नैष । वीरनाथेन दीक्षितः ॥ ७५ ॥ ततोऽसौ श्रमणो जातो । गु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णाजरणनूषितः ॥ सुदुःकरतपश्चारी । सर्वजीवदयापरः ॥ ७६ ॥ निःसंगो निर्ममः शांतः । प्रसिद्धो जगतीतले ॥ रौहिणीयो मुनीशश्च । विजहार यथागमं ॥ ७७ ॥ उक्तं च—कूरावि सहावेणं । विसयविसवसाणुगावि होऊण ॥ जिणवयणनावियमणा । तेलोक्कसुहावहा होंति ॥ ७८ ॥ क्षमादिब्रह्मपर्यंतं । धर्मं कृत्वा सुनिश्चलं ॥ उत्पाद्य केवलज्ञानं । जगाम परमं पदं ॥ ७९ ॥ अत्रैव जीवितं दत्तं । परत्र परमं पदं ॥ रौहिणीयकचौरस्य । श्रीवीरवचसा स्फुटं ॥ ८० ॥ इति रौहिणीयककथानकं समाप्तं ॥ श्रीरस्तु ॥

तदेवं श्रीमन्महावीरवर्धमानस्वामिनः सत्कं वचनमाकर्ण्य रौहिणीयकस्य समीहितार्थसंप्राप्तिरनवत, तदन्यस्यापि पित्रादेरेकांते नैवाप्तस्य गुरुस्थानीयस्य लोकद्वयहितं वचः श्रोतव्यं, श्रुत्वा च तदनुसारेण प्रवर्तितव्यं. एवं च वर्तमानानां समस्तसमीहितार्थप्राप्तिरुपजायते पितुर्वचनानुसारतः प्रवर्तमानस्य वसुसारस्येव. अथ कोऽयं वसुसार इत्याशंकायां कथानकं कथ्यते—बनूव नुवनख्यातं । गंनीराख्यं महापुरं ॥ अनेकनैगमस्थानं । रम्ये तीरे महोदधेः ॥ १ ॥ यत्र वेलाकुलं नाति । यानपात्रशतैरलं ॥ शुन्नसितपटाकीर्णैः । शैलैरिव समंततः ॥ २ ॥ यत्र मुक्ताफलव्राताः । शंख

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्राताश्च निर्मलाः ॥ स्थाने स्थाने विलोक्यंते । फेनपुंजा इवोदधेः ॥ ३ ॥ तत्र राजाऽभवत् श्री-
मान् । श्रेयोधाम पदं श्रियां ॥ विक्रमाक्रांतभूपीठः । सिंहविक्रमसंज्ञितः ॥ ४ ॥ अपरित्यक्तमर्या-
दो । वाहिनीशतसेवितः ॥ अनेकगुणरत्नौघ—युक्तः पतिरिवांभसां ॥ ५ ॥ श्रेष्ठिवर्योऽभवत्तत्र ।
श्रेष्ठकार्यविधायकः ॥ वसुनाम्ना यशोधामा । विश्वश्रीकुलमंदिरं ॥ ६ ॥ सदाचारो गुणाधारो । धी-
रो धर्मपरायणः ॥ कृती सत्यप्रतिज्ञश्च । शुचिर्धीमान् सतां मतः ॥ ७ ॥ युग्मं ॥ वसुकांता जनी
तस्य । जनानंदविधायिनी ॥ प्रीतिपात्रं गुणक्षेत्रं । दानदाक्षिण्यमंदिरं ॥ ८ ॥ तयोर्भुजानयोः सौ-
ख्यं । शब्दादिविषयोद्भवं ॥ कालक्रमेण संजातः । सत्पुत्रस्तुष्टिकारकः ॥ ९ ॥ महामहोत्सवेनाथ
। तस्य नाम प्रतिष्ठितं ॥ वसुसार इति ख्यातं । निःशेषैर्बंधुभिर्मुदा ॥ १० ॥ अथासौ वर्धते बा-
लो । लाल्यमानो यथेप्सितं ॥ संपद्यमाननिःशेष—समीहितमनोरथः ॥ ११ ॥ कालक्रमेण पि-
त्रासौ । ग्राहितः सकलाः कलाः ॥ यौवनं च समारूढ—स्तरुणीजनमोहनं ॥ १२ ॥ समानकुल-
शीलायाः । कन्यकाया महर्द्धितः ॥ वसुधरेतिसंज्ञायाः । स पित्रा ग्राहितः करः ॥ १३ ॥ अथैवं
परमप्रीत्या । सार्धं पुत्रेण तिष्टतः ॥ श्रेष्टिनो वसुसंज्ञस्य । वव्रजुर्भूरिवासराः ॥ १४ ॥ अन्यदा श्रे-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ष्टिना पुत्रो । वृद्धभावमुपेयुषा ॥ शिक्षितः पेशलैर्वाक्यै—रेवं पुत्रहितैषिणा ॥ १५ ॥ यथा वत्स सदा काल । कार्या भक्तिर्जिनेश्वरे ॥ सेव्यास्तदुक्तसिद्धांत—वेदिनः साधवः सदा ॥ १६ ॥ श्रोतव्यं च वचो जैनं । हितं पथ्यं तदंतिके ॥ तथा जीवदया कार्या । वार्या दुर्जनसंगतिः ॥ १७ ॥ वक्तव्यं च वचः सत्यं । त्याज्यं चौर्यं च दूरतः ॥ पारदार्यं परित्याज्यं । भाव्यं नात्यंतलोभिना ॥ ॥ १८ ॥ न भोक्तव्यं निशायां च । मांसमद्यादिकं तथा ॥ तथा पुत्र विनीतेन । भाव्यं गुरुजने त्वया ॥ १९ ॥ दाक्षिण्यं च सदा कार्यं । सर्वस्वजनबंधुषु ॥ इत्यादि श्रेष्ठिनो नित्यं । शिक्षयतः स्वनंदनं ॥ २० ॥

वसुसारं गुणाधारं । गतः कालः कियानपि ॥ अन्यदा च शरीरेऽस्य । व्याधिर्जातः सुदारुणः ॥ २१ ॥ दुःसाध्यः सर्ववैद्यानां । ततः श्रेष्ठी व्यचिंतयत् ॥ अहो मदीयमत्यंतं । संजातं विधुरं वपुः ॥ २२ ॥ नाधुना मुच्यते मृत्योः । करोमि स्वहितं ततः ॥ ददामि निजकं वित्तं । धर्मस्थाने यथोचितं ॥ २३ ॥ चतुर्भिः कलापकं ॥ संभाषयामि निःशेष—बंधुमित्रजनं निजं ॥ कुटुंबं च यथास्थाने । सर्वं संस्थापयाम्यहं ॥ २४ ॥ तत्वं च वसुसारस्य । समाख्यामि वसूद्भवं ॥ इत्यालोच्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजे चित्ते । संजाते व्यजने गृहे ॥ २५ ॥ वसुना वसुसारस्य । कर्णे तत्वं निवेदितं ॥ क्रमाग· ता मया मुक्ता । लक्ष्मीर्वत्स तव गृहे ॥ २६ ॥ चंचलैषा स्वभावेन । जवंतं यदि मुंचति ॥ तदा भूमिगृहस्यांत—रुद्घाट्या मंजूषा त्वया ॥ २७ ॥ तदंतर्लिखितं पत्रं । मयैवास्ते सविस्तरं ॥ तदा· दाय रहः स्थाने । वाचनीयं शनैः शनैः ॥ २८ ॥ तदर्थो हृदये धार्यः । कर्तव्यं च क्रमागतं ॥ उ· पहासपरो लोको । यत्किंचन वदेत्पुनः ॥ २९ ॥ तद्वचो हृदये नैव । कर्तव्यं हितमिच्छता ॥ प्रति· पन्नमनेनापि । तद्वचनं तथैव च ॥ ३० ॥ युग्मं ॥ सुपुत्राणां सुशिक्षाणां । नाप्तवाक्ये विचारणा॥ ततोऽसौ दर्शितो राज्ञः । स्वपदे च निवेशितः ॥ ३१ ॥ बद्धो भालतले पट्टो । दत्तं छत्रं महीभु· जा ॥ प्रथमासनिको जातः । सर्वेषां वणिजामयं ॥ ३२ ॥ परिवारोऽपि संतुष्टः । पैत्र्यं पदमधिष्टितं ॥ वसुना वसुसारस्य । दत्ता शिक्षा यथोचिता ॥ ३३ ॥ ततः स्वधर्मकर्माणि । चकार चतुराशयः ॥ द्रव्यबीजं विधानेन । सप्तक्षेत्र्यां नियोजितं ॥ ३४ ॥ ततः समुध्धृतं शल्यं । क्षमितक्षामितं कृतं ॥ कृता देवगृहे पूजा—ऽमारिश्चोद्घोषिता पुनः ॥ ३५ ॥ निर्ममत्वं धृतं चित्ते । पंचधाराधना कृ ता ॥ सर्वाहारनिरोधश्च । स्वीकृतो गुरुसाक्षिकः ॥ ३६ ॥ धर्मध्यानसमारूढो । मृत्वा स्वर्गं जगाम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सः ॥ विधाय मृतकार्याणि । स्वपितुर्बंधुभिः सह ॥ ३७ ॥ गतशोकः स्वकार्याणि । कालेनासौ व्य-
चिंतयत् ॥ सम्मतः पुरलोकस्य । नृपस्यापि स सम्मतः ॥ ३८ ॥ सम्मतो राजलोकस्य । बंधुवर्ग-
स्य सम्मतः ॥ गुणानुरागतो रक्ता—स्तद्गुणग्रहणोद्यताः ॥ ३९ ॥ त्रिभिर्विशेषकं ॥ वसुसारममं-
न्यंत । वसुसारमिति प्रजाः ॥ एवं सरति संसारे । ह्यंतराये पुरा कृते ॥ ४० ॥ समीपमागते लक्ष्मी
—र्जगाम तस्य मंदिरात् ॥ पराभूतिः समायाता । दारिद्र्येण समन्विताः ॥ ४१ ॥ युग्मं ॥ संप्राप्याव-
सरं को वा । जृंभते न महीतले ॥ सानुकूले विधावासी—दनुकूलं नृपादि यत् ॥ ४२ ॥ प्रतिकू-
ले च तत्सर्वं । वर्तते मे प्रतिकूलं ॥ एवं विषण्णचित्तेन । वसुसारेण चिंतितं ॥ ४३ ॥ अहो वि-
धिप्रसादेन । दृष्टं जन्मद्वयं मया ॥ पुरा धनेन संयुक्तं । सांप्रतं धनवर्जितं ॥ ४४ ॥ जात्यादिगु-
णसंपूर्णं । परमार्थेन वर्जितं ॥ तृणादपि लघुं लोको । मन्यते निर्धनं जनं ॥ ४५ ॥ जात्यादि-
भिर्गुणैर्मुक्तं । परलोकसमाश्रितं ॥ मेरोरप्यधिकं लोको । मन्यते सधनं जनं ॥ ४६ ॥ क्षीणोपा-
येन तेनेदं । संस्मृतं पितृभाषितं ॥ उद्घाटिता च मंजूषा । पत्रकं स्वकरे कृतं ॥ ४७ ॥ वाचितं
च रहःस्थाने । मंदनादं प्रमोदतः ॥ हंत लब्धो मयोपायः । सामग्री तस्य दुर्लभा ॥ ४८ ॥ स्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्यस्ति गौतमो द्वीपः । समुद्रांतर्महालयः ॥ जलाविलो महाकच्छः । सुरभीणां समाश्रयः ॥ ४९ ॥
क्षेत्रानुभावतस्तत्र । तृणानामनुभावतः ॥ अग्निसंपर्कतस्तेषां । रत्नं हि भवेत ॥ ५० ॥ या-
नपात्रमतो भृत्वा । भस्मनस्तत्र गम्यते ॥ वितीर्यते च सर्वत्र । भूतले भस्म भूरिशः ॥ ५१ ॥ न-
क्तं तत्र समागत्य । निषीदंते गवां गणाः ॥ तद्विष्ठां गणिकां कृत्वा । भ्रियते यानपात्रकं ॥ ५२ ॥
निजस्थाने समागत्य । भ्रियंते च गृहापणाः ॥ समये चाग्निसंपर्का—ज्जायंते रत्नराशयः ॥ ५३ ॥
हंत तावदुपायोऽयं । सामग्री दुर्लभा पुनः ॥ बुध्यस्ति विभवो नास्ति । वाणिज्यं क्रियते कथं ॥
॥ ५४ ॥ एवमुद्घोषयामास । प्रत्यहं शून्यमानसः ॥ पुररथ्यासु सर्वासु । राजमार्गेण संततं ॥५५॥
पुरान्निर्गम्यमानेन । ह्यन्यदा धरणीभृता ॥ दृष्टः पृष्टश्च तेनापि । पठितं भूपतेः पुरः ॥ ५६ ॥ हंत
लब्धो मयोपायः । सामग्री तच्च दुर्लभा ॥ बुध्यस्ति विभवो नास्ति । वाणिज्यं क्रियते कथं ॥५७॥
राजाह कियता कार्यं । श्रेष्ठिपुत्र धनेन ते ॥ सोऽवक्शतसहस्रेण । दीनाराणां महीपते ॥ ५८ ॥
दत्तो भूपेन लक्षोऽपि । गृहीत्वा गृहमागतः ॥ गमनार्थं समारब्धा । सामग्री कर्तुमंजसा ॥ ५९ ॥
संबलानि विधीयंते । नानारूपाणि भूरिशः ॥ जलेंधनादिसामग्री । सर्वापि प्रगुणीकृता ॥ ६० ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

धीवराश्च समाहूता । पृष्टाः प्रीतिपुरस्सरं ॥ जानीथ गौतमं द्वीप—मूचे तैर्जानीमो वयं ॥ ६१ ॥
परं निर्मानुषो द्वीपः । किं गतैस्तत्र साध्यते ॥ श्रेष्ट्याह किं विचारेण । गृह्यतामीप्सितं धनं ॥
॥ ६२ ॥ स्वीकृतं धीवरैः सर्वं । पोतोऽपि प्रगुणीकृतः ॥ भ्रियते भस्मभांडेन । लोकाश्चोपहसंति तं
॥ ६३ ॥ साधके तिथिनक्षत्रे । पूजयित्वा महोदधिं ॥ सोऽथ पोतं समारूढो । मुक्तः पोतोऽपि धी-
वरैः ॥ ६४ ॥ वेगेन गंतुमारब्धः । पृष्टतः पवनेरितः ॥ मासैः कतिपयैरेव । द्वीपं संप्राप गौतमं ॥
॥ ६५ ॥ मुक्तश्च नंगरस्तत्र । पोतः स्थिरतरीकृतः ॥ विज्ञप्तो धीवरैः श्रेष्टी । द्वीपोऽयं गौतमाभिधः
॥ ६६ ॥ पोतादुत्तार्य तत्राथ । राशयो भस्मनः कृताः ॥ विकीर्णं सर्वतस्तच्च । गतास्ते वासभूमिषु
॥ ६७ ॥ यथास्थानं गते लोके । श्रेष्टी जातो निराकुलः ॥ एकं छगणमेकांते । दग्धं प्रत्ययहेतवे
॥ ६८ ॥ पर्यायांतरमापन्नं । जातं रत्नमनुत्तमं ॥ ततः संजाततोषेण । छगणानां व्रजाः कृताः ॥
॥ ६९ ॥ शोषितास्तापयोगेन । भृतः पोतः समंततः ॥ समये स्वयमारुह्य । मुक्तः पूजापुरस्सरं ॥
॥ ७० ॥ गरुत्मानिव वेगेन । निजं स्थानमुपागतः ॥ मुक्ता नंगरा मिलितो । लोकः सर्वोऽपि
कौतुकी ॥ ७१ ॥ वसुसारोऽपि वेगेन । राजांतिकमुपागतः ॥ वद श्रेष्ठिन् किमानीतं । छगणानीति

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

जल्पितं ॥ ७२ ॥ अंतःप्रहसता राज्ञा । प्रकाशमुदितं वचः ॥ उच्छुल्कमुत्करं भांडं । कुरुष्व क्रयविक्रयं ॥ ७३ ॥ महाप्रसाद इत्युक्त्वा । वसुसारो गतो गृहं ॥ पोतादुत्तार्य सर्वाणि । भृत्यकर्मकरैर्नरैः ॥ ७४ ॥ छगणानि गृहस्यांत—र्मुमोच वसुनंदनः ॥ हृदि प्रमोदसंयुक्तो । हस्यमानो जनैस्तथा ॥ ७५ ॥ भस्मभांडं महामूल्यं । नीतमेतेन गच्छता ॥ आगच्छता समानीतं । प्रतिभांडं करीषकं ॥ ७६ ॥ अहो वाणिज्यकौशल्य—महो बुद्धिरनिंदिता ॥ दत्तो निजे कुलेऽनेन । दारिद्र्यस्य जलांजलिः ॥ ७७ ॥ इत्येवं हसते लोको । गृहेऽपि स्वजना निजाः ॥ श्यामितास्या वदंत्येवं । मा विनाशय मंदिरं ॥ ७८ ॥ छगणानां बहिः स्थानं । कर्तुं पुत्रक संगतं ॥ न शक्यते मुखं धर्तुं । लोकानां हसतां बहिः ॥ ७८ ॥ मौनस्थितेन तेनापि । कर्तव्यं सकलं कृतं ॥ द्विगुणं वेतनं दत्वा । भृत्यवर्गो विसर्जितः ॥ ७९ ॥ गृहशालापणाः सर्वे । कृतास्तालकरक्षिताः ॥ जल्पन्नुपेक्षितो लोकः । पत्रकं पुरतः कृतं ॥ ८० ॥

अन्यदा नक्तमेकांते । कृते छगणपुंजके ॥ ज्वलज्ज्वलनसंपर्का—द्रत्नीभूते मनोरमे ॥८१॥ स्थालकं रम्यरत्नानां । भृत्वा भूपाय ढौकितं ॥ पृष्टेन कथितं सर्वं । रंजितो हृदि भूपतिः ॥ ८२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मुद्रा राजवशा दत्ता । महामंत्रिपदे कृतः ॥ सम्मतः सर्वलोकानां । यथा शरदि चंद्रमाः ॥ ८३ ॥
सुकृतं तत्कृतं तेन । यज्जल्पितं तथैव तत् ॥ अमात्यपदमारूढः । परं राजायते गुणैः ॥ ८४ ॥
सर्वज्ञशासनासक्तो । भक्तः सर्वज्ञपादयोः ॥ सुसाधुपुरतः शुद्ध—सिद्धांतश्रवणे रतः ॥ ८५ ॥ का-
लमुल्लंघयामास । धर्मस्थो वसुसारकः ॥ अयं चोपनयः कार्यः । श्रेष्ठी तीर्थंकरोपमः ॥ ८६ ॥ वसु-
सारसमः संघः । पत्रकं च जिनागमः ॥ दीनारलक्षतुल्यं हि । मानुषत्वं जगुर्जिनाः ॥ ८७ ॥ मू-
लमेतदशेषाणा—मुत्तरोत्तरसंपदां ॥ भस्मभांडसमं ज्ञेय—मशुचीदं कलेवरं ॥ ८८ ॥ अविवेको
महासिंधुः । सद्धर्मः पोतसन्निभः ॥ द्वीपोपमश्च विज्ञेयः । प्रायः सद्गुरुसंगमः ॥ ८९ ॥ शुभध्यानं
ज्वलद्वह्निः । कर्म गोमयसन्निभं ॥ तद्दाहे धर्मरत्नानां । ज्ञानादीनां समुद्भवः ॥ ९० ॥ स्वर्गापव-
र्गसौख्यानि । भुज्यंते तत्प्रसादतः ॥ एवमुपनयो ज्ञेयो । दृष्टांतेऽत्र विशारदैः ॥ ९१ ॥ तदेवं व-
सुसारस्य । कुर्वाणस्य पितुर्वचः ॥ जाता समीहिताऽशेष—कल्याणवरमालिका ॥ ९२ ॥ इति व-
सुसारकथानकं समाप्तं ॥

तदहो रौहिणीयकचौरस्य वक्तव्यतां श्रुत्वा वसुसारस्य श्रेष्ठिनंदनस्य च दृष्टांतं निशम्य निः-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

शेषरागादिदोषशत्रुसंघातविघातकारिण्यपारसंसारपारावारागाधमध्यनिमज्जज्जंतुसंतानसमुत्तरणविधायिनि स्वर्गापवर्गसौख्यसंदोहसंपादके श्रीसर्वज्ञवचने तथैकांतप्रवचने च श्रद्धानं विधेयं, तदनुसारेण च सदनुष्ठाने प्रवृत्तिः कार्या, एवं च कुर्वतां भव्यानां व्युच्छिद्यंते रागादयः, क्षीयंते क्लिष्टकर्माणि, प्रवर्धंते पुण्यप्रकृतयः, सिध्यंते सकलसमीहितानि, ततश्च निरतिचारचारित्रसंपत्त्या सकलकर्मक्षयलक्षणो मोक्षः प्राप्यत इति. तथा यदुक्तं—सदाचारप्रमत्तानां । मतमेकांतशिक्षणं ॥ इति तद्दृष्टांतद्वारेणाह—

॥ मूलम् ॥—अत्रार्थे श्रेणिको ज्ञात—मभयश्च महामतिः ॥ धर्मदृढमना आद्यो । द्वितीयः स्थिरकारकः ॥ १ ॥ व्याख्या—धर्मे सम्यक्त्वादिमूलगुणोत्तरगुणरूपे पुण्यस्कंधे दृढमना निश्चलचित्त आद्यः श्रेणिकाभिधानो नृपः, द्वितीयस्तथैव पुत्रोऽभयकुमारनामा स्थिरकारको धर्मे चलचित्तानां स्थैर्यसंपादकः. ज्ञाते च यथाक्रममिति—समस्ति मगधालंकारकारकं साधुसाध्वीश्रावकश्राविकाचतुर्विधसंघपदप्रचारालंकृतत्रिकचतुष्कचत्वरं राजगृहं नाम पुरवरं, तत्र श्रीमन्महावीरपादपद्ममधुकरः क्षायिकसम्यक्त्वदर्शनी जिनशासने निःप्रकंपमानसो हैहयान्वयसंभवः श्रेणिको नाम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महाराजोऽनूत्, स चान्यदा सौधर्मदेवलोके सुधर्मायां सनायां शक्रसिंहासने आसीनेनानेकसुर-कोटीपरिवृतेन शक्रेण प्रशंसितः, अहो यादृशी श्रेणिकस्य नैर्ग्रंथे प्रवचने निश्चला नक्तिः सुरैरपि क्षोनयितुमशक्या न तादृश्यन्यस्य. एतच्च समाकर्ण्यैकः सुरः शक्रवचनमश्रद्दधानो राजगृहनगर-माजगाम. कृत्वा च वैक्रियं साधुरूपं नगरनिर्गमासन्ने महाह्रदे जालकरो मत्स्यान् जग्राह, स च तेनांतिकं गछता श्रेणिकेन ददृशे, अहो शारदीनशशिकरसंकाशं सर्वज्ञशासनमेष मलिनीकरोती-ति वितर्क्य परिमितसहायः स तत्समीपमगमत, नणितश्चासौ राज्ञा नो नद्र किमिदं क्रियते? ते-नोचे मत्स्यग्रहणं, किमर्थं? संयमोपग्रहार्थं, नास्ति मे कंबलः, तेन च विना प्रदीपप्रनाविद्युद्दारि-धारासचित्तरजश्च निवारयितुं न शक्यते, मत्स्यान् वीथ्यां विक्रीय तद्धेतनेन कंबलं गृहीष्यामि. रा-ज्ञोक्तमलमनेन दुर्व्यवसायेन, अहं ते कंबलं दास्यामि, प्रतिपन्नमनेन, दत्तश्च राज्ञा तस्मै कंबलः. ततो राज्ञा हट्टमार्गेणापन्नसत्वा काचित्संयती प्रत्यापणं कपर्दकान् याचंती दृष्टा, पृष्टा चार्ये! किं क-रोषि? तयोक्तं निश्चिंतस्त्वं परपीमां न जानासि, गर्नवत्यहं, प्रसवो नविता, तत्र च घृतगुडादिना प्रयोजनं, तच्च कपर्दकैर्विना न संपद्यते, तदर्थं चायमारंभः. राज्ञोक्तमहं ते सर्वं करिष्यामि, आग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च मम गृहे, आगता, धृता च विविक्ताश्रये, प्रसूता देवमायया, कारितं भूतास्त्रिया सूतिकर्म, स्वयमपि समीपस्थो न कस्यापि प्रवेशं ददाति. प्रयुक्तावधिना च ज्ञातं देवेन, यादृशोऽयं सुरस्वामिना वर्णितस्तादृश एव महात्मायं, ततोऽसौ संयतीस्वरूपमुपसंहृत्य चलत्कुंडलाभरणभूषितशरीरो देवो बभूव, अवादीच्च यादृशस्त्वं सौधर्मे शक्रेणानेकसुरसमक्षं निश्चलभक्तिः श्रेणिकः सर्वज्ञधर्मे देवेनापि चालयितुमशक्यस्तत्सत्यमेव, नात्र विचारः, तुष्टोऽहं तावद् गृहाण ममाष्टादशसरमष्टादशचक्रं च हाररत्नं गोलकयुगलं च, एवं तदुभयमपि दत्वा देवलोकं जगाम देवः, श्रेणिकोऽपि प्रीतिपात्रमिति कृत्वा हाररत्नं चेल्लणायै ददौ, गोलकयुगलं च सुनंदायै, तया च क्रोधानलदंदह्यमानचित्तया गोलकयुगलं स्तंभस्तंभे प्रस्फोटितं, एकस्माद्गोलकात्कुंडलयुगलं विनिर्गतं, द्वितीयाच्च देवदुष्यवस्त्रयुगलं, प्रहृष्टचित्तया च गृहीतं सुनंदयेति गतं श्रेणिकज्ञातं. अधुनाभयकुमारज्ञातमुच्यते—

बभूव दुर्गतः कोऽपि । पुरे राजगृहाभिधे ॥ निःसंतानो निराधारो । भिक्षाचरशिरोमणिः ॥ ॥ १ ॥ काष्ठभारवहः क्वापि । तृणभारवहोऽपि च ॥ जलाहरणकारीति । लोको वक्ति यदृच्छया ॥ ॥ २ ॥ कंडकः पाशकश्चैव । पादप्रक्षालकस्तथा ॥ कुकर्म कुरुते सर्वं । पुरे तत्र गृहे गृहे ॥ ३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इतश्च विहरन् ग्रामा—नुग्रामं शिष्यसंयुतः ॥ धर्मधामा दयासारो । विश्रुतः श्रुतकेवली ॥ ४ ॥
शिष्यः श्रीवीरनाथस्य । पंचमो गणनायकः ॥ राजगृहे समायातः । परोपकृतिहेतवे ॥ ५ ॥ युग्मं ॥
अवग्रहमनुज्ञाप्य । तस्थौ तत्र गणाधिपः ॥ वंदनार्थं समायाता । राजा पौराश्च भक्तितः ॥ ६ ॥
प्रारब्धा देशना रम्या । हृदयानंदकारिणी ॥ पपुः कर्णपुटैः सर्वे । पीयूषमिव देहिनः ॥ ७ ॥ अ-
त्रांतरे समायातः । कांतारात्काष्टवाहकः ॥ काष्टभारं क्षितौ क्षिप्त्वा । चिंतयामास मानसे ॥ ८ ॥
नेहलोको न वा लोको—ऽपरोऽपि मम विद्यते ॥ अजागलस्तनस्येव । मम जन्म निरर्थकं ॥ ९ ॥
एवं वितर्क्य स रंको । वंदनार्थं समागतः ॥ वंदितो गणभृद्भक्त्या । श्रुतो धर्मस्तदोरितः ॥ १० ॥
भावितो मानसे स्वस्य । क्षयोपशमयोगतः ॥ प्रवर्धमानसंवेगः । प्रोवाच गणनायकं ॥ ११ ॥ यूयं
नाथा अनाथानां । विधायानुग्रहं मम ॥ यद्यस्ति योग्यता मह्यं । तदा दीक्षा प्रदीयतां ॥ १२ ॥
भव्योऽयमिति विज्ञाय । दीक्षितस्तत्क्षणादसौ ॥ जग्राह द्विविधां शिक्षां । ग्रहणासेवनात्मिकां ॥
॥ १३ ॥ गुरूपदेशतस्तत्र । विजहार गृहे गृहे ॥ भक्तपानकृते नित्यं । गीतार्थमुनिभिः सह ॥
॥ १४ ॥ काष्टभारवहो द्वारि । तृणभारवहोऽपि च ॥ कंमकः पीशकश्चैव । पादप्रक्षालकस्तथा ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १५ ॥ इत्यादिपटुवाक्यानि । जनो जल्पति नर्मणा ॥ अभीतिकथनं चक्रे । गुरुभ्यो रंकशिष्य-
कः ॥ १६ ॥ गुरुभिश्चाभयोऽभाणि । विहर्तारो वयं प्रगे ॥ अभयोऽप्याह नो पूर्णो । मासकल्पः
किमुत्सुकाः ॥ १७ ॥ कथितं कारणं तेन । भद्रं भावीति जल्पितं ॥ प्रातरेव समुदाय । पुंजिता
राजवर्त्मनि ॥ १८ ॥ रत्नानां कोटयस्तिस्रो । घोषितं डिंडिमेन च ॥ भो शृण्वंतु जनाः सर्वे । ह्य-
भयस्य प्रभाषितं ॥ १९ ॥ युग्मं ॥ लभ्यंते कोटयस्तिस्रो । वस्तुत्रयविसर्जनात ॥ श्रुत्वेदं मिलिता
लोकाः । सर्वेऽपि धनवांछया ॥ २० ॥ किमत्र कथ्यतां वस्तु । वर्जनीयं धनार्थिना ॥ मंत्रिणा भ-
णिता लोकाः । सावधानैर्निशम्यतां ॥ २१ ॥ पानीयं न च पानीयं । यावज्जीवं सचेतनं ॥ अंग-
नावह्निसेवा च । वर्जनीया प्रयत्नतः ॥ २२ ॥ श्रुत्वेदं विरतो लोको । यातो धनपराङ्मुखः ॥ य-
त्रेदं त्रितयं त्याज्यं । तत्र किं रत्नराशिभिः ॥ २३ ॥ रंकसाधुः समाहूतः । प्रोचे चाभयमंत्रिणा ॥
जलादित्रितयं त्यक्तं । त्वया किं नेति कथ्यतां ॥ २४ ॥ यावज्जीवं मया त्यक्तं । द्रव्यतो भावतोऽ-
पि च ॥ यद्येवं ते मया दत्ता—स्तिस्रोऽपि धनराशयः ॥ २५ ॥ कामभोगप्रमुक्तस्य । किं कार्यं र-
त्नराशिभिः ॥ रत्नराशित्रयत्यागी । रोरः कथमयं जनाः ॥ २६ ॥ धन्यश्च पुण्यवानेष । वंदनीयो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महात्मभिः ॥ पूजनीयो विशेषेण । सर्वजीवाभयंकरः ॥ २७ ॥ शिष्यः स्थिरीकृतो धर्मे । ह्यभयेन सुबुद्धिना ॥ हसन्निवारितो लोकः । कलाकौशलशालिना ॥ २८ ॥ इति धर्मस्थिरीकरणेऽभयकुमारदृष्टांतः ॥ पूर्वभवाभ्यासादेव प्राणिनस्तद्वासवासिता जायंते, एतदेव दर्शयन्नाह—

॥ मूलम् ॥—तिलानां यादृशो वास—स्तैलस्यापि च तादृशः ॥ एवंविधा च संगीता । जिनैर्बोधिर्भवांतरे ॥ १ ॥ व्याख्या—तिलानां धान्यविशेषाणां यादृशो वासो वासना, तैलस्यापि तिलविकारस्यापि तादृश एव तत्प्रकार एव, दार्ष्टांतिकमाह—एवंविधा चैतत्प्रकारा संगीता प्रतिपादिता जिनैरर्हद्भिर्बोधिः प्रेत्यजिनधर्मावाप्तिर्भवांतरेऽग्रेतनजन्मनि. ॥ १ ॥ अत्रैवार्थे दृष्टांतमाह—

॥ मूलम् ॥—चौरयुग्ममिह ज्ञातं । वासनाविषये मतं ॥ एकस्य सुलभा बोधि—र्द्वितीयस्य च दुर्लभा ॥ १ ॥ व्याख्या—चौरयुग्मं चौरद्वंद्वमिह प्रस्तुते ज्ञातमुदाहरणं वासनाविषये संस्कारगोचरे मतं संमतं, एकस्य गुणबहुमानिनः सुलभा सुप्रापा बोधिर्जिनधर्मप्राप्तिः, द्वितीयस्य गुणमत्सरिणो दुर्लभा दुःप्रापा बोधिरिति वर्तते. ॥ १ ॥ चौरयुग्मज्ञातं त्वाह—इहाभूतां नरौ कौचि—दन्योन्यं दृढसौहृदौ ॥ युवानौ साहसोपेतौ । स्वचौर्यबलगर्वितौ ॥ १ ॥ भोगलुब्धौ समस्तेभ्या—

पूरकद्रव्यवर्जितौ ॥ तौ च चौर्यं व्यधासिष्टां । भोगवांछाविडंबितौ ॥ २ ॥ दंडपाशिकलोकेन । सं-
प्राप्तावन्यदा तकौ ॥ नीयमानौ च तौ तेन । वध्यस्थानं तपस्विनौ ॥ ३ ॥ दृष्टवंतौ मुनीन्मान्या-
न्मान्यमानवसंहतेः ॥ साधूनां सत्क्रियां दृष्ट्वा । तयोरेको व्यचिंतयत् ॥ ४ ॥ अहो धन्यतमा एते
। मुनयो विमलक्रियाः ॥ स्वकीयगुणसंदोहा—ज्जगतां पूज्यतां गताः ॥ ५ ॥ वयं पुनरधन्याना-
मधन्या धनकांक्षया ॥ विदधाना विरुद्धानि । वध्यतां प्रापिता जनैः ॥ ६ ॥ चौर्येणोपहतात्मानो ।
यास्यामः कां गतिं मृताः ॥ ही जाता दुःस्वभावेन । लोकद्वयविरोधकाः ॥ ७ ॥ तदेवं साधु सा-
धूनां । वृत्तं वारितकल्मषं ॥ विपरीतमतोऽस्माक—मस्मात्कल्याणकं कुतः ॥ ८ ॥ अन्यः पुनरुदा-
सीनो । भवतिस्म मुनीनभि ॥ गुणिरागादवापैको । बोधिबीजं न चापरः ॥ ९ ॥ ततस्तनुकषाय-
त्वा—द्दानशीलतया च तौ ॥ नरजन्मोचितं कर्म । लब्धवंतावनिंदितं ॥ १० ॥ मृत्वा च तौ स-
मुत्पन्नौ । कौशांब्यां पुरि वाणिजौ ॥ जातौ चानिंदिताचारौ । वणिग्धर्मपरायणौ ॥ ११ ॥ जन्मांत-
रीयसंस्कारा—दाबाल्यात्तयोरभूत् ॥ अत्यंतमित्रताभावो । लोकाश्चर्यविधायकः ॥ १२ ॥ रोचते च
यदेकस्य । तदन्यस्यापि रोचते ॥ ततो लोके गतौ ख्याति—मेकचित्ताविमाविति ॥ १३ ॥ ततः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुलोचितं कर्म । कुर्वतोर्याति वासरः ॥ अन्यदा भुवनानंदी । प्राप्तस्तत्र जिनेश्वरः ॥ १४ ॥ भगवान् श्रीमहावीर । इक्ष्वाकुकुलनंदनः ॥ वाग्भीरैर्जनसंताप—शमनेंभोदसन्निभः ॥ १५ ॥ युग्मं ॥ विदधुस्तस्य गीर्वाणा । व्याख्याभूमिं मनोहरां ॥ तत्रासौ धर्ममाचख्यौ । सनरामरपर्षदि ॥ १६ ॥ तमागतं समाकर्ण्य । कौशांबीवासिनो जनाः ॥ राजादयः समाजग्मु—र्वंदितुं तत्पदांबुजं ॥ १७ ॥ तावपि श्रेष्ठिसत्सूनू । कुतूहलपरायणौ ॥ जनेन सार्थमायातौ । जिननायकसन्निधौ ॥ १८ ॥ जिनस्तु देशयामास । मोक्षमार्गं सनातनं ॥ सत्वानां सर्वकल्याण—कारणं करुणापरः ॥ १९ ॥ ततस्तयोर्वणिक्सूनो—रेकस्य तज्जिनोदितं ॥ श्रद्धानमार्गमायाति । भाव्यते च स मानसे ॥२०॥ स्फाराक्षो मस्तकं धुन्वन् । कर्णपर्णपुटार्पितं ॥ रोमांचितः पिबत्युच्चै—र्जिनवाक्यं यथाऽमृतं ॥२१॥ तदन्यस्य तदा भाति । वालुकाकवलोपमं ॥ अन्योन्यस्य च तौ भावं । लक्षयामासतुस्तरां ॥२२॥ व्याख्याभुवः समुत्थाय । जग्मतुर्भवनं निजं ॥ तत्रैको व्याजहारैवं । भ्रातस्त्वं भावितः किल ॥२३॥ जैनवाचा न चाहं भो—स्तदत्र किमु कारणं ॥ एकचित्ततया ख्याता—वावां लोके ह्यचिरं ॥ ॥ २४ ॥ युग्मं ॥ इदानीमत्र संजातं । विभिन्नं चित्तमावयोः ॥ तदत्र कारणं किं स्या—दन्यो व

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्तिस्स विस्मितः ॥ २५ ॥ सत्यमेव ममाप्यत्र । विकल्पः संप्रवर्तते ॥ केवलं केवली नूनं । निश्च-यं नः करिष्यति ॥ २६ ॥ स एव प्रश्नितोऽत्रार्थे । तद्भावः श्वस्तदंतिके ॥ एवं तौ निश्चयं कृत्वा । प्रातर्यातौ जिनांतिके ॥ २७ ॥ युग्मं ॥

पप्रच्छतुस्तमाराध्य । विनयेन स्वसंशयं ॥ सोऽप्युवाच पुरैकेन । साधवो वां प्रशंसिताः ॥२८॥ न चान्येन तदेतस्य । जातं बीजस्य सत्फलं ॥ सद्बोधे पुनरन्यस्य । निर्बीजत्वेन नान्नवत् ॥२९॥ एतां पूर्वन्नवां सेवां । जिनेनोक्तां सविस्तरां ॥ निशम्यैकस्य संजातं । स्वजातेः स्मरणं क्षणात् ॥ ॥ ३० ॥ ततोऽसौ प्रत्यये जाते । जातः संवेगन्नावितः ॥ न्नावितश्च जिनोद्दिष्टं । प्रपेदे शासनं शुन्नं ॥ ३१ ॥ तत्प्रतिपत्तिसामर्थ्या—च्छुन्नकर्मानुन्नावतः ॥ सिद्धिं यास्यत्यसौ काले—ऽपरः संसा-रमेव हि ॥ ३२ ॥ ननु किमित्येकः सुलभबोधिको जातो नेतर इत्याह—

॥ मूलम् ॥—सर्वदा मानसे येषां । गुरुन्नक्तिर्गरीयसी ॥ पुण्यानुबंधिपुण्येन । तेषां जन्मेह गीयते ॥ १ ॥ व्याख्या—सर्वदा नित्यं मानसे चित्ते येषां पुण्यप्राणिनां गुरुन्नक्तिर्धर्माचार्येतिकर्त-व्यतालक्षणा गरीयसी महती पुण्यानुबंधिपुण्येन कुशलानुबंधिकर्मणा, तेषां जन्मिनां जन्म जाति-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रिह जगति गीयतेऽभिधीयत इति. ॥ १ ॥ सांप्रतं पापानुबंधिपुण्यवतां लक्षणमाह—

॥ मूलम् ॥—औदासीन्यं गुरौ येषा—मृध्यादि च विलोक्यते ॥ पापानुबंधिपुण्येन । तेषां जन्म निगद्यते ॥ १ ॥ व्याख्या—औदासीन्यमुदासीनता गुरौ धर्माचार्यविषये येषां जीवानामृध्यादि च विलोक्यते, संपदादि च दृश्यते, पापानुबंधिपुण्येनाकुशलानुबंधिकुशलकर्मणा तेषां देहिनां जन्मोत्पत्तिलक्षणं निगद्यते प्रतिपाद्यते. ॥ १ ॥ सांप्रतं पापानुबंधिपापवतां लक्षणमाह—

॥ मूलम् ॥—अभक्तिर्मानसे येषां । गुरौ भवति भूयसी ॥ पापानुबंधिपापेन । तेषां जन्मेति लक्ष्यते ॥ १ ॥ व्याख्या—अभक्तिर्गुरुकर्तव्यतापरिहारलक्षणा मानसे हृदये येषामपुण्यवतां गुरौ धर्माचार्यविषये भूयस्यतिशयमहती पापानुबंधिपापेनाकुशलानुबध्यकुशलेन तेषां पापात्मानां जन्मोत्पत्तिरित्येवं ज्ञायत इति. ॥ १ ॥ गुरुभक्तिर्भवद्भिः कर्तव्येति प्रतिपादिताः संतो ये धृष्टोत्तरैस्तां शिथिलयंति तान् श्लोकद्वयेनाह—

॥ मूलम् ॥—पूर्वं कृता करिष्यामः । सांप्रतं व्याकुला वयं ॥ गुरुभक्तिंप्रति प्रोचु-र्ये तेषां न नु विस्मृता ॥ १ ॥ कालरात्रिर्यकारूढा । अविज्ञातसमागमा ॥ समाप्यते क्षणादेव । यस्यां का-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्यपरंपरा ॥ २ ॥ व्याख्या—पूर्वं कृता पश्चात्काले विहिता, करिष्याम आगामिनि काले विश्वास्यामः, सांप्रतं वर्तमानकाले व्याकुला गृहव्यापारपरंपराकरणसमाकुलमानसा गुरुभक्तिं धर्माचार्यैतिकर्तव्यतांप्रति लक्ष्यीकृत्य प्रोचुरुक्तवंतो ये केचन गुरुकर्माणस्तेषां ननु निश्चितं विस्मृता स्मृतिपथमतीता, का? कालरात्रिर्मरणरूपा, या काचिद्रूढा जगति प्रतीता प्रसिद्धा, अविज्ञातसमागमा अविज्ञातोऽलक्षितः समागमः समागमनं यस्याः सा तथा, समाप्यते निष्ठां याति क्षणादेव झटित्येव यस्यां कालरात्रौ कार्यपरंपरा समस्तप्रयोजनपद्धतिरिति. अमुमेवार्थमुपसंहरन्नाह—

॥ मूलम् ॥—किं बहुना विचारेण। यदि कार्यं सुखैर्जनाः ॥ तत्सर्वकुग्रहत्यागा—द्गुरुभक्तिर्विधीयतां ॥ १ ॥ व्याख्या—किं? न किंचिद्बहुना प्रभूतेन विचारेण जल्पेन? यदीत्यभ्युपगमे, कार्यं प्रयोजनं सुखैः सुखैर्जना लोकास्तत्तस्मात्कारणात्सर्वकुग्रहत्यागात्समस्तकुबोधपरिहारेण गुरुभक्तिर्धर्माचार्यसेवाकरणलक्षणा विधीयतां क्रियतामिति. ननु किमित्येवं गुरुभक्तेर्माहात्म्यमुपवर्ण्यते? उच्यते गुरूणां दुःप्रतीकारत्वात, उक्तं च—दुःप्रतिकारौ माता—पितरौ स्वामी गुरुश्च लोकेऽस्मिन् ॥ तत्र गुरुरिहामुत्र च। सुदुःकरतरप्रतीकारः ॥ १ ॥ आगमेऽप्युक्तं—तिएहं दुप्पडियारं स·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मणाउसो, तं जहा—अम्मापिउणो जट्टिस्स धम्मायरियस्स संपाउवियणं, केइ पुरिसे अम्मापियरं सयपागसहसपागेहिं तेल्लेहिं अब्भिंगित्ता सुरहिणा गंधट्टेणं उवट्टित्ता तिहिं उदएहिं मज्जावेत्ता सालंकारजूसियं करेत्ता मणुन्नथालीपागसुद्धं अट्ठारसवंजणाउलं जोयणं जोयावेत्ता जावज्जीवं पिट्ठिवडिंसियाए परिवहेज्जा, तेणवि तस्स अम्मापिउस्स दुप्पडियरं, अहेणं सेयं अम्मापियरं केवलिपन्नत्ते धम्मे आघवतित्ता परूवइत्ता ठावतित्ता जवति, तेणावि नो चेव अम्मापिउस्स सुप्पडियरं जवइ. समाणाउसो केइ महट्ठे दरिद्दं समुक्कसिज्जा, त तेणं से दरिद्दे समुक्किट्ठे समाणे पच्छा पुरं च णं विउलजोगसमिद्धिसमं नागएयावि विहरेज्जा, त तेणं से महट्ठे अन्नया कयाइ दरिद्दी हूयमाणे तस्स दरिद्दस्स अंतियं हव्वमागच्छेज्जा, त तेणं से दरिद्दे तस्स जट्टिस्स सव्वस्समवि दलयमाणे तेणावि तस्स जट्टिस्स दुप्पडियरं जवति. अहेणं से तं जट्टिं केवलिपन्नत्ते धम्मे आघवित्ता परूवइत्ता ठावइत्ता जवति, तेणावि नो तस्स जट्टिस्स सुप्पडियरं जवति. केइ तहारूवस्स समणस्स वा माहणस्स अंतियं एगमवि आयरियं सुवयणं सोच्चा निसम्मकालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववन्नो, तेणं से देवे तं धम्मायरियं दुब्भिक्खदेसाउ सुभि-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रकं देसं साहरेज्जा, कंताराउ वा निकंतारं करेज्जा, दीहकालिएण वा रोगायंकेणं अभिभूयं विमोएज्जा, तेणावि तस्स धम्मायरियस्स दुप्पडियारं भवति. अहेणं से तं धम्मायरियं केवलिपन्नत्ताउ धम्माउ भठं समाणं भुज्जो केवलिपन्नत्ते धम्मे आघवित्ता जाव ठवइत्ता भवति तेणावि नो तस्स धम्मायरियस्स सुप्पडियारं भवति. इदं चागमवचनमवगम्य सदैव गुरुभक्तौ प्रयत्नो विधेय इति गुरुभक्तिप्रशंसाकरणं समाप्तमिति. उक्तो गुरुभक्त्यधिकारस्तद्भक्तिकारिणा च परोपकार एव यत्नो विधेयोऽतोऽत्र परोपकारकारिणां प्रशंसोच्यते. तत्र चायं श्लोकः—

॥ मूलम् ॥—उत्पद्यंते विनश्यंति । कोटिशः क्षुद्रजंतवः ॥ परार्थबद्धबुद्धीनां । सतां पुण्यैः समुद्भवः ॥ १ ॥ व्याख्या—उत्पद्यंते जायंते, विनश्यंति म्रियंते कोटिशो बहुशः क्षुद्रजंतवोऽसारसत्वाः. उत्तरार्धेन तु विपर्ययमाह—सतां सत्पुरुषाणां पुण्यैः कुशलकर्मभिः समुद्भवः समुत्पादः, किंविशिष्टानां सतां? परार्थे परप्रयोजने बद्धा दत्ता बुद्धिर्मतिर्यैस्ते तथा तेषामिति. ॥ १ ॥ संतश्च स्वल्पा एव भवंतीति दर्शयन्नाह—

॥ मूलम् ॥—परोपकारप्रवणाः । सदा स्वार्थपराङ्मुखाः ॥ क्वचित्क्वचिद्विलोक्यंते । विरलाः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सज्जना जनाः ॥ १ ॥ व्याख्या—परेषामुपकार उपकृतिस्तत्र प्रवणाः प्रह्वाः सदा सर्वदा स्वार्थपराङ्मुखाः स्वप्रयोजनविमुखास्त एवंविधगुणभाजो जनाः सज्जनाः संतश्च ते जनाश्च सज्जनाः क्वचित्कचिद्विलोक्यंते प्रतिनियतदेशकालादौ, न सर्वत्र इति. ॥ १ ॥ यतस्त एवंविधा अत आह—

॥ मूलम् ॥—जन्मापि च प्रमोदाय । शोकाय च तदत्ययः ॥ अशिष्टानां तु लोकाना—मुभयस्मिन् विपर्ययः ॥ १ ॥ व्याख्या—जन्माप्युत्पादोऽपि प्रमोदाय हर्षाय, आस्तां वृद्धिः, शोकाय च तदत्ययस्तेषां सतामत्ययो विनाशः शोकाय दुःखाय जनानामिति गम्यते. अशिष्टलोकानामसज्जनानामुभयस्मिन् जीविते मरणे च विपर्ययो हर्षाभावशोकाभावलक्षणः ॥ १ ॥ ननु किमिति संतः स्तूयंते? यतो धराधरादयोऽपि महत्त्वगांभीर्यादिगुणोपेता वर्तंते, अत आह—

॥ मूलम् ॥—धराधरा महीयांसो । गंभीरा वारिराशयः ॥ तथापि च समं शिष्टै—रौपम्यं लेभिरे न ते ॥ १ ॥ व्याख्या—धरां धरणीं धरंतीति धराधराः पर्वता हिमवदादयो महीयांसोऽतिशयमहांतः, गंभीरा वारिराशय इति, गंभीरा अलब्धमध्या वारिराशयो जलाशया लवणसमुद्रादयः, यद्यप्येवंविधा एते तथापि च समं शिष्टैरौपम्यं लेभिरे न ते इति, तथापि, अपिशब्दस्तेषां गुणा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धिक्यसूचनार्थः, समं सार्धं शिष्टैः सद्भिरौपम्यं साम्यं लेभिरे लब्धवंतो न नैव ते धराधरादय इ- ति. ॥ १ ॥ ननु किमिति संतस्तेभ्योऽपि समितिरिच्यंते? अत आह—

॥ मूलम् ॥—येषां चित्तं च वित्तं च । वचः कायो विनश्वरः ॥ परेषामुपकाराय । वेधसेह विनिर्मितः ॥ १ ॥ व्याख्या—येषां सतां चित्तं मनो, वित्तं धनं, कायो देहो विनश्वरः क्षणक्षयी परेषामुपकाराय अन्येषामुपकृतये वेधसेह विनिर्मितो वेधसा धात्रेह जगति विनिर्मितः कृत इति. ॥ १ ॥ सांप्रतं सत्पुरुषाणामेव शाखिभिः सह साम्यमुपदर्शयन्नाह—

॥ मूलम् ॥—आत्मानं दुःस्थितं कृत्वा । परं कुर्वंति सुस्थितं ॥ यथा वृक्षास्तथा संतः । परो- पकृतये रताः ॥ १ ॥ व्याख्या—आत्मानं स्वं दुःस्थितं कृत्वा दुःखितं विधाय परं कुर्वंति सुस्थितं, परमात्मव्यतिरिक्तं कुर्वंति विदधति सुस्थितं सुखितं यथा वृक्षास्तथा संतः, यथा येन प्रकारेण वृ- क्षा महीरुहास्तथा तेनैव प्रकारेण संतः सज्जनाः परोपकृतये रताः, परेषामुपकृतिरुपकारस्तत्र रता आसक्ता इति. ॥ १ ॥ एतदेव भावयति—

॥ मूलम् ॥—छायया सुखयंत्यन्यं । सहंते स्वयमातपं ॥ पुष्पंति च परस्यार्थे । फलंति च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महाद्रुमाः ॥ १ ॥ व्याख्या—छायया सुखयंत्यन्यं, छायया आतपाभावलक्षणया सुखयंति सुखिनं कुर्वंत्यन्यं स्वव्यतिरिक्तं, सहंते स्वयमातपं, सहंते मर्षयंति स्वयमात्मना आतपमौष्ण्यं, पुष्पंति च परस्यार्थे, विकसंति च परस्यार्थे आत्मव्यतिरिक्तस्य प्रयोजनाय, फलंति च फलवंतो भवंति च परस्यार्थं इति संबंधः, ते महाद्रुमा वृक्षा इति. ॥१॥ ननु स्वोदरभरणमेव संगतं, किमन्येनेत्याह—

॥ मूलम् ॥—स्वोदरं भ्रियते कष्टा—द्दिनांते वायसैरपि ॥ परार्थकरणासक्तो । यो जीवति स जीवति ॥ १ ॥ व्याख्या—स्वोदरं स्वकीयमुदरं जठरं भ्रियते पूर्यते कष्टाद्दुःखाद्दिनांते दिनमध्ये वायसैरपि काकैरपि, परं ते जीवन्मृतकाः, यतोऽभ्यधायि—जीवंतो मृतकाः पंच । श्रूयंते किल भारते ॥ दरिद्रो व्याधितो मूर्खः । प्रवासी नित्यसेवकः ॥ १ ॥ अतः परार्थकरणासक्तः परप्रयोजननिष्पादनसमर्थो यो जीवति यः सत्पुरुषो जीवति प्राणान् धारयति स एव जीवति, शेषा जीवन्मृतका इति. ॥ १ ॥ सांप्रतं सत्पुरुषाणामेव मेघैः सहोपमानमाह—

॥ मूलम् ॥—क्लेशेनोपार्ज्य वित्तानि । ददुर्धर्मे नरोत्तमाः ॥ यथा लोकोपकाराय । पयः पीत्वा पयोधराः ॥ १ ॥ व्याख्या—क्लेशेनोपार्ज्य वित्तानि क्लेशेन दुःखेनोपार्ज्यार्जयित्वा च वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्तानि द्रव्याणि, तथा च—अर्थानामर्जने दुःख—मर्जितानां च रक्षणे ॥ आये दुःखं व्यये दुःखं । धिगर्थं दुःखकारणं ॥ १ ॥ ददुर्धर्मे नरोत्तमा ददुरयच्छन् धर्मे पुण्यनिमित्तं नरोत्तमा उत्तमपुरुषाः, यथा लोकोपकाराय जनहितकृते पयो जलं पीत्वात्मसाद्विधाय पयोधरा मेघा इति. ॥ १ ॥ ननु किमिति संतः पुनः पुनः शस्यंत इत्याह—

॥ मूलम् ॥—कथं संतो न शस्यंते । हिमांशुकरणोज्ज्वलाः ॥ येषां सदुपकारेण । जायंते सुखिनो जनाः ॥ १ ॥ व्याख्या—कथं केन प्रकारेण संतः सज्जना न शस्यंते? न श्लाघ्यंते? हिमांशुकरणोज्ज्वलाः, हिमांशुश्चंद्रमास्तस्य किरणाः करास्तद्वदुज्ज्वला निर्मलाः, येषां सदुपकारेण येषां सतां सुंदरोपकृत्या जायंते भवंति सुखिनः शर्मभाजो जना लोकाः, तथाहि—उपकर्तुं प्रियं वक्तुं । कर्तुं स्नेहमकृत्रिमं ॥ सज्जनानां स्वभावोऽयं । केनेंदुः शिशिरीकृतः ॥ १ ॥ अधुना सज्जनानां चंदनचंद्रयोश्च लोकानंदविधायकत्वमाह—

॥ मूलम् ॥—सज्जनाश्चंदनं चंद्रो । यदि न स्युर्महीतले ॥ तदा दुःखोपतप्तानां । किं स्यान्निर्वृत्तिकारणं ॥ १ ॥ व्याख्या—सज्जनाः शिष्टजनाश्चंदनं मलयजं, चंद्रः प्रसिद्धः, यदि न स्युर्म-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

हीतले, यदि चेन्न भवेयुः पृथ्वीतले, तदा तस्मिन् काले दुःखोपतप्तानामसातसंघातपीडितानां किं स्यान्निर्वृत्तिकारणं? किं भवेत्स्वास्थ्यनिमित्तं? न किंचिदित्यर्थ इति. ॥ १ ॥ अथ रविकरैः सह सज्जनानां साम्यमुपदर्शयन्नाह—

॥ मूलम् ॥—अज्ञानध्वांतसंतान—विध्वंसनपटीयसः ॥ रवेरिव कराः संतः । परोपकृतिकारिणः ॥ १ ॥ व्याख्या—अज्ञानमेव ध्वांतमंधकारं तस्य संतानः प्रवाहस्तस्य विध्वंसनं विनाशनं तत्र पटीयसोऽतिशयदक्षा अज्ञानध्वांतसंतानविध्वंसनपटीयसो रवेरिव करा भानोरिव रश्मयः संतः शिष्टजनाः परोपकृतिकारिणः स्वव्यतिरिक्तजनोपकारविधायिनः ॥ १ ॥ अथ सज्जनानामसाधारणं गुणमभिधित्सुराह—

॥ मूलम् ॥—अर्थाभावेऽपि दातारः । सत्यसंधा निराकुलाः ॥ सदारंभाः सदा संतो । निर्भया व्यसनागमे ॥ १ ॥ कार्यशतेऽप्यसंमूढा । गूढमंत्रा दिवानिशं ॥ परार्थमेव कुर्वंति । प्राणैरपि धनैरपि ॥ २ ॥ व्याख्या—अर्थाभावेऽपि धनं विनापि दातारो दायकाः सत्यसंधाः सत्यभाषिणो निराकुला निरुत्सुकाः सदारंभाः सद्व्यापाराः सदा नित्यं संतः सज्जनाः, निर्भया निर्भीका व्यसना-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमे विपदागमे. ॥ १ ॥ तथा कार्यशतेऽपि प्रयोजनशतेऽप्यसंमूढा अविलुप्तधियो गूढमंत्रा अन- भिज्ञातपर्यालोचा दिवानिशं रात्रिंदिवं परार्थमेव परप्रयोजनमेव कुर्वंति विदधति प्राणैरुच्छ्वासादि- भिर्दशप्रकारैः, धनैर्वित्तैः, अपिशब्दः सतां परोपकरणैकचित्ततां सूचयति, यतः—किं चंद्रेण महो- दधेरुपकृतं दूरेऽपि संतिष्ठता । वृद्धौ येन विवर्धते व्रजति च क्षीणे क्षयं सागरः ॥ आ ज्ञातं पर- कार्यनिश्चितधियां कोऽपि स्वभावः सतां । स्वैरं गैरपि येन यांति तनुतां दृष्ट्वा परं दुःखितं ॥ १ ॥

॥ मूलम् ॥—कैः कैर्वा न प्रशस्यंते । परोपकृतिकारिणः ॥ कुर्वंतो जनतानंदं । नरचंद्रकु- मारवत ॥ १ ॥ व्याख्या—श्लोकोऽयं स्पष्टः, नरचंद्रकुमारदृष्टांतश्चायं, तद्यथा—समस्ति भारते वर्षे । रामाजनविराजिता ॥ सत्पुरुषसमाकीर्णा । विस्तीर्णत्रिकचत्वरा ॥ १ ॥ श्रीवासुपूज्यसर्वज्ञ—स- त्कल्याणसुरागमा ॥ मंदिरैर्मंदरोदारै—र्मण्डिता च समंततः ॥ २ ॥ उद्दामकाननोद्यानैः । सदा मं- डितभूतला ॥ सौराज्येन सुखावासा । चंपानाममहापुरी ॥ ३ ॥ त्रिभिर्विशेषकं ॥ केशेषु बंधनं य- स्यां । दंडश्छत्रेषु श्रूयते ॥ वाहनं वाजिनामेव । जने नैव विलोक्यते ॥ ४ ॥ पालयति महीपा- ल—स्तां पुरीं पुरुषोत्तमः ॥ नरसिंहाभिधो वीरः । सदा नीतिपरायणः ॥ ५ ॥ दुर्वारवैरिवारेण ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रणेनैव विनिर्जितः ॥ सत्त्ववर्जितया यस्तु । वृतो तोषाज्जयश्रिया ॥ ६ ॥ द्वितीयाचंद्रलेखेव । ज-
नानंदविधायिनी ॥ आसीत्प्रियतमा तस्य । चंद्रलेखेति विश्रुता ॥ ७ ॥ भुंजानस्य तया सार्धं ।
पंचापि विषयानलं ॥ कतिचिद्वासरा जग्मु—र्धर्मार्थावपि सेवतः ॥ ८ ॥ अथ पुत्रः समुत्पन्नः ।
सल्लक्षणविराजितः ॥ सौम्यो जनमनोमोद—दायी चंद्रसमाननः ॥ ९ ॥ नरचंद्राभिधो रक्त—
कोमलकरपल्लवः ॥ वर्धमानः शरीरेण । संजातः स कलोचितः ॥ १० ॥ युग्मं ॥ स्वधिया स्वल्पका-
लेन । गृहीताः सकलाः कलाः ॥ यौवनं च समारूढो । लोकलोचनशोभनं ॥ ११ ॥ उदग्रयौव-
नस्थोऽपि । कलाभ्यासपरायणः ॥ कामबाणव्यथातीतो । निर्वाहयति वासरान् ॥ १२ ॥ अन्यदा
चिंतयामास । नरचंद्रः स्वमानसे ॥ परोपकारिणामेव । सफलं जन्म मे मतिः ॥ १३ ॥ कर्तव्योऽ-
सौ सदा सद्भि—र्जीवितेनापि सत्वरं ॥ जायंते जंतवो येन । सुखिनो जगतीतले ॥ १४ ॥ उप-
कारपराः संतो । दुर्जनास्त्वपकारिणः ॥ एतदेव स्फुटं लिंगं । तयोरिह निगद्यते ॥ १५ ॥ आसा-
द्य मानुषं जन्म । सदा कार्यो मनीषिणा ॥ उपकारः परो नित्य—मन्यथा जन्म हारितं ॥ १६ ॥
उपकारोऽपि विज्ञेयो । निराशंसेन चेतसा ॥ विधीयते विशालेन । यः सदा शुद्धबुद्धिना ॥ १७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यतोऽभ्यधायि—अयं निजः परो वेति । गणना लघुचेतसां ॥ उदारचरितानां तु । वसुधैव कुटुंबकं ॥ १८ ॥ आनंदबिंदुसंदोह—दायी कामिजनप्रियः ॥ अवतीर्णस्तदा रम्यो । वसंतसमयो जने ॥ १९ ॥ धरंति मंजरीवृंदं । सहकारा मनोहरं ॥ पुष्पिताः किंशुका यत्र । रक्ता इव समंततः ॥ २० ॥ अशोकः पल्लवोल्लासी । कलकंठरवाकुलः ॥ सकामकामिनीपाद—पातसंजातसंमदः ॥ ॥ २१ ॥ किंबहुना समस्तापि । वनराजी विराजिता ॥ वसंतसमये जाते । रम्यया कुसुमश्रिया ॥ ॥ २२ ॥ उत्फुल्लफुल्लकिंजल्क—पानसंजातसंमदाः ॥ अलयस्तत्र गुंजंति । मंडं श्रुतिसुखावहं ॥ ॥ २३ ॥ निर्गच्छंति महाभक्त्या । चच्चर्यः सुमनोहराः ॥ आंदोलिका विधीयंते । शाखिशाखासु सुंदराः ॥ २४ ॥ गायनाः क्वापि गायंति । रम्यमानंदपूरिताः ॥ पिबंति क्वापि मद्यानि । जना हर्षाकुला भृशं ॥ २५ ॥ कामुकाः क्वापि कांताभिः । समं जल्पंति नर्मणा ॥ क्वापि देहस्य शृंगारं । कुर्वंति वसनादिभिः ॥ २६ ॥ नैव लोके जनः कोऽपि । विद्यते यो न गंजितः ॥ सरागकामदेवेन । वसंते तु विशेषतः ॥ २७ ॥ उद्दामकाममत्तेभ—कुंभनिर्भेदकेसरी ॥ वसंतसमये नूनं । निर्विकारो जिनेश्वरः ॥ २८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नरचंद्रो महासत्वो । राजसूनुः सुमानसः ॥ आलोक्य तं पुरीलोकं । सारशृंगारशालिनं ॥ ॥ २९ ॥ स्फारचित्ततया स्पृष्ट—श्चिंतां चक्रे विशालधीः ॥ अस्मिन्नसारसंसारे । किं विलासैर्मनीषिणां ॥ ३० ॥ स्तोकावस्थैर्विशेषेण । वसंतोत्सवसंभवैः ॥ बालक्रीडागृहप्रायै—र्विद्वज्जनजुगुप्सितैः ॥ ३१ ॥ त्रिभिर्विशेषकं ॥ तेऽपि वित्तेन लोकानां । भूयसा स्युः सतामलं ॥ काकमांसमिवोच्छिष्टं । वर्जनीया विशेषतः ॥ ३२ ॥ तथाहि—काकमांसं तदुच्छिष्टं । तुच्छमत्यंतदुर्बलं ॥ भक्षितेनापि किं तेन । तृप्तिर्येन न जायते ॥ ३३ ॥ एवं तुच्छेष्वसारेषु । यद्विलासेषु रज्यते ॥ जनस्तत्राज्ञता हेतु—रुतात्मभरणं तथा ॥ ३४ ॥ शुभचित्तः समालोच्य । चेतसा रहसि स्थितः ॥ कलाभ्यासपरः शांतः । समास्तेऽसौ निराकुलः ॥ ३५ ॥ महाराजोऽथ पप्रछ । नरसिंहो जनं निजं ॥ किं भो नरचंद्राद्या । लोकाः सर्वेऽपि मामकाः ॥ ३६ ॥ संजातेऽथ मनोमोदे । माधुमासेऽतिशालिनि ॥ क्रीडंति वा न वेत्यत्र । सत्यमेव निगद्यतां ॥ ३७ ॥ युग्मं ॥ ततो जनो जगादैनं । महीनाथं कृतांजलिः ॥ तव पुत्रं विना नाथ । शेषाः क्रीडंति मानवाः ॥ ३८ ॥ तद्वचनं समाकर्ण्य । शंकितो निजमानसे ॥ उत्थाय सहसा स्नेहा—त्कुमारांतिकमागतः ॥ ३९ ॥ कुमारोऽपि समुत्थाय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। विनयानतविग्रहः ॥ ऊचे कृतशिरःपाणिः । कार्यं तात निगद्यतां ॥ ४० ॥ राजाह सत्कुले जन्म । रूपं रोगविवर्जितं ॥ वयोऽतिसुंदरं पुत्र । वित्तं तव गृहेऽधिकं ॥ ४१ ॥ परिजनो विनीतश्च । स्वाज्ञैश्वर्यं च सुंदरं ॥ जनानुरागः सौभाग्यं । जातं ते पुण्ययोगतः ॥ ४२ ॥ विलासकारणे यूनां । वसंते समुपस्थिते ॥ विलासविमुखेनेह । मुनिनेव किमास्यते ॥ ४३ ॥ कुमारः प्राह—श्रूयतां कारणं तात । येन न क्रियते मया ॥ विलासो यौवनस्थेन । वसंतेऽपि समागते ॥ ४४ ॥ कायश्चकास्ति रूपेण । रूपं भाति सयौवनं ॥ शृंगारैर्यौवनं भाति । शृंगारा अपि संपदा ॥ ४५ ॥ अथवा—सुगुणै रूपमाभाति । रूपं भाति सुशीलतः ॥ शोभते सर्व एवेह । लोको लक्ष्म्या विशालया ॥ ४६ ॥ विवाहवृद्धियात्रासु । मित्राणां संगमे तथा ॥ जायते मानभंगो हि । मानिनामल्पसंपदां ॥ ४७ ॥ यथाकाशं विना चंद्रं । सरोऽपि कमलैर्विना ॥ शोभते नैव लोकेऽस्मिं—स्तथा भोगो धनं विना ॥ ४८ ॥ उन्नतिर्जायते लोके । निःसंगानां धनं विना ॥ विलासिनां विना वित्तै—र्जायते मानखंडनं ॥ ४९ ॥ तस्मादलं विलासैर्नः । स्वल्पकालैः स्वपोषकैः ॥ श्रुत्वेदं वचनं राजा । चिंतयामास मानसे ॥ ५० ॥ विलासचित्तो मत्सूनु—र्महेच्छोऽयं नरोत्तमः ॥ नैवास्य

जायते तोषो । विलासैर्दानवर्जितैः ॥ ५१ ॥ परोपकारो माध्यस्थ्यं । दाक्षिण्यं दानशीलता ॥ सतामुदारचित्तानां । यतोऽमी सहजा गुणाः ॥ ५२ ॥ ततो राजा बभाणैवं । रंजितस्तद्गुणैरलं ॥ अस्ति वित्तं तवायत्तं । कुरु वत्स समीहितं ॥ ५३ ॥ आदिदेश ततो राजा । भांडागारिकमंजसा ॥ दातव्यं भोस्त्वया सर्वं । कुमारो यत्समीहते ॥ ५४ ॥ एवं सर्वं समादिश्य । राजा स्वार्थमशिश्रियत् ॥ ततः कुमारवाक्येन । पुर्यामुद्घोषणे कृते ॥ ५५ ॥ समायाता जनाः सर्वे । युवानः सविशेषतः ॥ कुमारशासनात्तुष्टा । मधुमासदिदृक्षवः ॥ ५६ ॥ युग्मं ॥ कुमारस्तानथ प्रेक्ष्य । चिंतयामास मानसे ॥ आत्मतुल्यानिमान् कुर्वे । सहस्रादिप्रदानतः ॥ ५७ ॥ यौवनं जीवितं वित्तं । व्यापारो रूपमेव वा ॥ तदेव शस्यते सद्भि—रुपकाराय देहिनां ॥ ५८ ॥ ततः समानतांबूलं । तुल्याभरणभूषणं ॥ समानवस्त्रसत्पुष्पं । तुल्ययानादिवाहनं ॥ ५९ ॥ तुल्यकर्पूरसन्मिश्र—श्रीखंडादिविलेपनं ॥ कारयित्वा जनं सर्वं । कुमारो हृष्टमानसः ॥ ६० ॥ विहितस्फारशृंगारः । पुरमध्याद्विनिर्ययौ ॥ स्थाने स्थाने इमाः श्रव्याः । शृण्वन् वाचो जिनोदिताः ॥ ६१ ॥ त्रिभिर्विशेषकं ॥ धन्योऽयं पुण्यवानेष । श्लाघ्यं जन्मास्य गण्यते ॥ येनेप्सितार्थदानेन । सर्वोऽयं तोषितो जनः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६२ ॥ ततो गत्वा वरोद्याने । पुष्पसुंदरनामनि ॥ कुमारः सह लोकेन । प्रमोदरसनिर्भरः ॥ ॥ ६३ ॥ दीनानाथादिलोकेभ्यो । याचकादिजनाय च ॥ वांछातीतं ददद्द्रव्यं । संक्रीमति यथे-च्छया ॥ ६४ ॥ युग्मं ॥ एवमर्थव्ययं वीक्ष्य । भांडागारनियुक्तकः ॥ राज्ञे निवेदयामास । सर्वं पुत्रविजृंभितं ॥ ६५ ॥ ददाति ते महाराज । पुत्रो दानमनर्गलं ॥ सहस्रलक्षकोटीभि—र्दीनादिभ्यः कुबेरवत् ॥ ६६ ॥ कतिचिद्वासरानेष । यद्येवं देव दास्यते ॥ तदा नूनं महाराज । रिक्तः कोशो भविष्यति ॥ ६७ ॥

श्रुत्वेदं वचनं राजा । कोशक्षयनिवेदकं ॥ दूनितो मानसे बाढं । कुमारंप्रति रंहसा ॥ ६८ ॥ आहूय निष्टुरैर्वाक्यै—रुपालब्धकुमारकं ॥ मूढबुद्धिर्न जानासि । धनानामर्जने श्रमं ॥ ६९ ॥ युग्मं ॥ किं दुर्गो हस्तिनो देशो । वाजिनो वातिसुंदराः ॥ इयद्वित्तव्ययात्सिद्धं । यत्ते तन्मे निवेदय ॥ ७० ॥ कुमारोऽपि समाकर्ण्य । सोपालंभं वचः पितुः ॥ समुत्थाय समायातो । दुःखितो निजमंदिरं ॥ ७१ ॥ तत्रापि शयने सुप्तो । रात्रौ चिंतितवानसौ ॥ मानभंगे हि यद्दुःखं । तन्मृत्योरतिरिच्यते ॥ ७२ ॥ यतः—मरणे स्यात्क्षणं दुःख—माजन्मं मानखंडने ॥ विषहंते कथं ना-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

म । मानिनो मानखंमनं ॥ ७३ ॥ सह्यतां मानभंगो हि । साधुभिर्मोदकांक्षिभिः ॥ मानिभिः सह्यते नैव । तद्धना एव येन ते ॥ ७४ ॥ सह्यते मानभंगो हि । निर्विज्ञानैर्नपुंसकैः ॥ जन्मभूमिसमासक्तै—र्मंडूकैरिव मानवैः ॥ ७५ ॥ इत्यादि चिंतयित्वाथ । खड्गपाणिर्निरुत्सुकः ॥ रजन्यां निर्ययौ धीर । एकाकी सुविचक्षणः ॥ ७६ ॥ कथानकविशेषेण । पुरे पारेतकाभिधे ॥ सायं संप्राप तत्रापि । सुप्तोऽसौ देवमंदिरे ॥ ७७ ॥ अथ निद्राविरामेऽसा—वासन्ने गिरिगह्वरे ॥ वह्निमालोकयामास । ज्वलंतं मनुजोत्तमः ॥ ७८ ॥ किंकारणो भवेदग्निः । कौतुकाक्षिप्तमानसः ॥ समुत्थाय ततो धीरो । ज्वलनाभिमुखं ययौ ॥ ७९ ॥ अपश्यद्यामतस्तत्र । धातुर्वादिजनान् बहून् ॥ ताम्रयोगसमायुक्तान् । भूरिवित्ताभिलाषिणः ॥ ८० ॥ आशीर्वादं ददौ तेभ्यः । सिद्धिरस्तु समीहिते ॥ स्वागतं तेऽपि जल्पंतः । कुमाराभिमुखं गताः ॥ ८१ ॥ इतश्च पुण्ययोगेन । सिद्धं स्वर्णमनुत्तरं ॥ अहो पुण्यवतां योगः । सर्वकल्याणकारणं ॥ ८२ ॥ लात्वा स्वर्णं ततः प्रोचु—स्ते तुष्टाः कुमरं प्रति ॥ गृहाणेदं महाभाग । स्वपुण्यैः समुपार्जितं ॥ ८३ ॥ यतः—एवंविधा समस्तापि । सामग्री हेमसाधिका ॥ संजाता न पुनर्जातं । जातरूपं त्वया विना ॥ ८४ ॥ ततोऽवोचत्कुमारस्तान् । स्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भावोदारया गिरा ॥ युष्मदीयमिदं स्वर्णं । न ममास्ति प्रयोजनं ॥ ७५ ॥ श्रुत्वेदं विस्मिताः सर्वे । चिंतां चक्रुः स्वचेतसि ॥ महीनाथसुतः कोऽपि । परोपकृतिकारकः ॥ ७६ ॥ लात्वा स्वर्णं स्वके स्थाने । ततः सर्वेऽपि ते गताः ॥ कुमारोऽपि महीं भ्राम्यन् । पुरे भोगपुरे गतः ॥ ७७ ॥ दृष्ट्वा तत्र वरोद्यानं । नानावृक्षसमाकुलं ॥ विश्रामहेतवे तत्र । प्रविष्टो हृष्टमानसः ॥ ७८ ॥ उद्यानदीर्घिकानीरे । स्नात्वा पीत्वा च तज्जलं ॥ अशोकवरवृक्षस्य । सछायायां स सुप्तवान् ॥ ७९ ॥ इतश्चापुत्रको राजा । मृतस्तत्र महापुरे ॥ ततश्च पंच दिव्यानि । मंत्रिभिरभिषेचिरे ॥ ८० ॥ ततस्तानि चिरं भ्रांत्वा । तत्र सर्वत्र पत्तने ॥ निर्गत्य काननस्थस्य । कुमारस्यांतिकं ययुः ॥ ८१ ॥ ततो राज्याभिषेकाणा—भिषिक्तः कुमरस्तकैः ॥ हस्तिस्कंधसमारूढो । महर्ध्या पुरमाविशत ॥८२॥ जातो राजा महाकोशः । प्रचंडश्चंडशासनः ॥ ख्यातकीर्तिः प्रजानंदः । साधिताशेषभूतलः ॥८३॥ अन्यदा ये पुरा दृष्टा । धातुर्वादकमानवाः ॥ भूपेन ते समागत्य । नत्वा भूपं निषेदिरे ॥ ८४ ॥ ततः सन्मानिता राज्ञा । तांबूलादिप्रदानतः ॥ पृष्ट्वा च कुशलोदंतं । भोजिता निजमंदिरे ॥८५॥ ततो दत्तं धनं भूरि । प्रासादाश्च मनोहराः ॥ उक्ताश्च मत्समीपे भो । संतिष्ठत निराकुलाः ॥८६॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

श्रुत्वेदं तेऽपि सानंदा—स्तस्थुर्विलसतो धनं ॥ पूजिता राजलोकेन । नृपतेरपि वल्लभाः ॥ ९७ ॥
अन्यदा भणिता राज्ञा । भूरिद्रव्यार्थिना सता ॥ यथा भो मम वाक्येन । स्वर्णसिद्धिर्विधीयतां ॥
॥ ९८ ॥ युष्माकं सर्वमेवात्र । साहाय्यं प्रकरोम्यहं ॥ क्रियतां सर्वसामग्री । पात्यतां भूरि कांचनं
॥ ९९ ॥ ततस्तेऽपि विधायाशु । सामग्रीमखिलामपि ॥ स्वर्णसिद्धिं प्रयत्नेन । प्रवृत्ताः कर्तुमंजसा
॥ १०० ॥ राज्ञः पुण्यानुभावेन । पातितं भूरि कांचनं ॥ तुष्टो राजा ततश्चैत—च्चिंतयामास मान-
से ॥ १ ॥ वांछितार्थप्रदानेन । विधाय निःऋणां महीं ॥ करोमि सुस्थितं लोकं । सांप्रतं सर्वमेव
हि ॥ २ ॥ विचिंत्यैवं ततो राजा । समाहूय स्वमंत्रिणः ॥ बभाण भणितिप्रौढः । प्रौढवाक्यैरिदं
मुदा ॥ ३ ॥ अहोऽहो मंत्रिणः सर्वे । समाहूय जनं ततः ॥ पृच्छ्यतां येन यावच्च । दातव्यं वि-
द्यते धनं ॥ ४ ॥ तत्तावद्दीयतां तस्मै । क्रियतां निःऋणां महीं ॥ ततस्तूर्णं तथा चक्रे । मंत्रिभी
राजशासनं ॥ ५ ॥ सर्वेषु चैव देशेषु । सर्वग्रामपुरादिषु ॥ दत्तं यथेप्सितं द्रव्यं । सर्वलोकाय भू-
भुजा ॥ ६ ॥ सर्वपाखंडिलोकानां । सर्वदीनादिदेहिनां ॥ चकारोपकृतिं राजा । वांछातीतं धनं द-
दन् ॥ ७ ॥ एवं च कुर्वतो राज्ञो । लोकं सर्वत्र सुस्थितं ॥ गतः कालो बहुर्जाता । कीर्तिः शुभ्रा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जगत्त्रये ॥ ८ ॥

अन्यदा स्वर्गनाथेन । स्वर्गे स्वर्गौकसां पुरः ॥ सदौदार्यगुणो राज्ञो । वारंवारं प्रशंसितः ॥ ॥ ९ ॥ यथा नो नो सुराः श्रीमा—न्नरचंद्रो नरेश्वरः ॥ सर्वदा सर्वलोकाय । ददात्येव हि वांछितं ॥ १० ॥ वाक्यमेतत्सुरेंद्रस्य । द्वावश्रद्दधतौ सुरौ ॥ परीक्षार्थं समायातौ । राज्ञो नोगपुरं पुरं ॥ ॥ ११ ॥ तत्रैकः शक्ररूपेण । जगाम नृपसन्निधौ ॥ जगादेवं स्फुटैर्वाक्यै—र्नराधीशं कृतांजलिः ॥ ॥ १२ ॥ अहं हि सूरराजस्य । सूरसेनाभिधः सुतः ॥ श्रीमच्चंद्रपुरस्वामी । सुप्रतीतो रिपुस्तव ।१३। तावकीनैर्महादंभै—र्निर्जितो लूषिता पुरी ॥ सर्वं मम हृतं राज्यं । पुरमंतःपुरं तथा ॥ १४ ॥ वियोजितः स्वबंधुन्यो । ब्रंशितो राज्यसंपदः ॥ एकाक्येव चिरं भ्रांतो । महीपीठे सुदुःखितः ॥१५॥ भ्राम्यता च मयाश्रावि । कीर्तिर्दानोद्भवा तव ॥ ततो मया व्यचिंत्येव । किमन्यैस्तुबकैर्जनैः ॥१६॥ सेवितैर्याचितैर्वापि । कृपणैर्द्रव्यलोलुपैः ॥ याचिता अपि ते दद्युः । शतं पंचशतानि वा ॥ १७ ॥ युग्मं ॥ तदौदार्यगुणोपेतं । नरचंद्रनरेश्वरं ॥ दातारमीप्सितार्थस्य । शत्रुमप्याश्रयाम्यहं ॥ १८॥ एवं विचिंत्य राजेंद्र । समायातस्त्वदंतिके ॥ न कार्यः प्रार्थनाजंगः । किंचित्तुबं प्रयछ मे ॥ १९ ॥ न्नू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पतिः प्राह याचस्व । यद्भवतः प्रतिभासते ॥ स प्राह दीयतां तर्हि । राज्यं राजेंद्र मे निजं ॥२०॥ ततश्च नरचंद्रेण । नृपभुजोदारचेतसा ॥ तृणाय मन्यमानेन । तस्मै राज्यमदीयत ॥ २१ ॥ यतः—कियती पंचसहस्त्री । कियती लक्षा च कोटिरपि कियती ॥ अनुकंपामयमनसां । सा रत्नवती वसुमती कियती ॥ २२ ॥ किमत्र चित्रं यत्संतः । परानुग्रहकारिणः ॥ न हि स्वदेहशांत्यर्थं । जायंते चंदनद्रुमाः ॥ २३ ॥ ततो राजा विनिष्क्रांतः । पुरात्खड्गसहायकः ॥ जगाम बहिरुद्याने । सानंदो दैन्यवर्जितः ॥ २४ ॥ तत्रैवं चिंतयामास । विशालोदारचेतसा ॥ परोपकारतानिष्ठो । महेभः स्वभमानसः ॥ २५ ॥ तद्यथा—पाताला न्न विमोचितो बत बलिर्मृत्युर्न नीतो क्षयं ॥ नो मृष्टं शशलांछनस्य मलिनं नोन्मूलिता व्याधयः ॥ शेषस्यापि धरां विधृत्य न कृतो भारापहारः क्षणं । चेतः सत्पुरुषाभिमानकलुषं मिथ्यैव किं खिद्यसे ॥ २६ ॥

यावदेवं नराधीशः । संतिष्ठति विचिंतयन् ॥ तावच्छशकव्याधस्य । रूपद्वयं विकुर्व्य सः ॥२७॥ देवो द्वितीयकस्तूर्णं । समायातो नृपांतिकं ॥ तत्रासौ शशकः शीघ्रं । राज्ञः पादांतमाश्रितः ॥२८॥ राजन् मां रक्ष रक्षेति । भक्ष्यमाणो भयातुरः ॥ त्वमेवात्र मम त्राण—मत्राणत्राणकारकः ॥ २९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः प्रच्छादितः स्वीय—वस्त्रे तेन स भूभुजा ॥ आयातस्तदनु व्याधो । बिभ्राणः सशरं धनुः ॥ ॥ ३० ॥ नृपस्य पुरतो भूत्वा । बभाणैवं स्फुटाक्षरैः ॥ शशकोऽयं महाराज । लब्धोऽत्यंतक्षुधालुना ॥ ३१ ॥ तदर्पयस्व येनैनं । भक्षयामि बुभुक्षितः ॥ राजाह किं तवानेन । याचस्व द्रव्यमीप्सितं ॥ ॥ ३२ ॥ द्रव्येण लप्स्यसे मांस—मन्यद्वा वस्तु वांछितं ॥ व्याधः प्रोवाच मे राज—न्ननेनैव प्रयोजनं ॥ ३३ ॥ राजाह मे वराकोऽयं । शशकः शरणागतः ॥ तदेनं नार्पयाम्येव । किंचिदन्यत्प्रयाच्यतां ॥ ३४ ॥ यद्येवं दीयतां ताव—त्स्वमांसं क्षुधिताय मे ॥ तोल्यते शशको याव—द्यदि चेतसि ते कृपा ॥ ३५ ॥ राज्ञोक्तं गृह्यतां मांसं । शशको मुच्यतामयं ॥ एवमुक्त्वा सहर्षेण । नाराची प्रगुणीकृतः ॥ ३६ ॥ ततः शशकमेकत्र । तत्रारोप्य नरेश्वरः ॥ उत्कृत्योत्कृत्य जंघातो । मांसं चिक्षेप सोऽन्यतः ॥ ३७ ॥ यथा यथा क्षिपत्येष । स्वमांसं तत्र भूपतिः ॥ तथा तथा महाभारः । शशको वर्धतेतरां ॥ ३८ ॥ एवं तत्र निजं मांसं । क्षिपन् राजा मुहुर्मुहुः ॥ संजातो मरणावस्थो । मूर्छया पतितः क्षितौ ॥ ३९ ॥ तथापि तेन नो मुक्तं । निजं सत्वं मनागपि ॥ महासत्वेन वीरेण । परोपकृतिचंचुना ॥ ४० ॥ ततो विज्ञाय तौ देवौ । राज्ञश्चित्तं सुनिश्चलं ॥ प्रकटीभूय भा·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षेते । श्लाघ्यमानौ नरेश्वरं ॥ ४१ ॥ अहो ते परमौदार्य—महो ते सत्वमूर्जितं ॥ अहो ते नृप-गांभीर्य—महो ते वीर वीरता ॥ ४२ ॥ अहो ते निर्मला कीर्ति—स्त्रैलोक्योदरचारिणी ॥ शक्रेणापि सुराध्यक्षं । यस्त्वं संश्लाघ्यसे नृप ॥ ४३ ॥ एवं नृपगुणान् स्तुत्वा । कथयामासतुस्तकौ ॥ राज्ञः सर्वं स्ववृत्तांतं । शक्रश्लाघादिकं मुदा ॥ ४४ ॥ ततस्तोषेण तौ देवौ । हारं त्रैलोक्यसुंदरं ॥ नृपाय दातुमारब्धौ । न चासौ तं गृहीतवान् ॥ ४५ ॥ ततस्ताभ्यां नृपः प्रोक्तो । भो नृप क्षमयस्व नौ ॥ इयच्चिरं यदावाभ्यां । विना दोषं कदर्थितः ॥ ४६ ॥ गच्छ राजन्निजे राज्ये । पालयस्व निजाः प्रजाः ॥ जीव नंद चिरं कालं । दुर्लभास्त्वादृशा जनाः ॥ ४७ ॥ एवमुक्त्वा गतौ देवौ । स्वस्थानं तुष्टमानसौ ॥ स्वनेशमागत्य राजापि । प्राज्यं राज्यमपालयत् ॥ ४८ ॥ अनेका वरभूपाल—कन्यकाः परिणीतवान् ॥ भुक्त्वा भोगांश्चिरं कालं । जाताः पुत्रा मनोहराः ॥ ४९ ॥

अन्यदा नरचंद्राय । समानयनहेतवे ॥ प्रेषिता नरसिंहेन । पित्रामात्या महत्तराः ॥ ५० ॥ आगत्य नरचंद्रस्य । पितुर्वाक्यं निवेदितं ॥ यथा भो जनकेन त्वं । समाहूतोऽसि सादरं ॥ ५१ ॥ तद्राजन् गम्यतां तत्र । पितुर्वाक्यं विधीयतां ॥ ततश्च नरचंद्रोऽपि । निजे राज्ये निजं सुतं ॥५२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निवेश्य नरधर्माख्यं । सर्वलोकस्य संमतं ॥ संभाष्य पौरजं लोकं । सन्मान्य च यथोचितं ॥ ५३॥
कृत्वा सामग्रिकां सर्वां । सांतःपुरो नरेश्वरः ॥ कुर्वन् सर्वजनानंदं । समायातः पितुः पुरं ॥ ५४ ॥
विच्छिर्विशेषकं ॥ आनंदितस्ततो राजा । सर्वः परिजनस्तथा ॥ नरचंद्रे समायाते । जीमूत इव के·
किनः ॥ ५५ ॥ ततो राजा निजे राज्ये । नरसिंहो निवेश्य तं ॥ दत्वा धर्मे धनं भूरि । कृत्वा
सर्वं यथोचितं ॥ ५६ ॥ धर्मार्थी स्वक्रमायातं । वनवासमशिश्रियत् ॥ नरचंद्रोऽपि संजातः । प्रजा·
नंदो महानृपः ॥ ५७ ॥ युग्मं ॥ प्रभूता साधिता पृथ्वी । प्रभूता जज्ञिरे गजाः ॥ प्रभूता वाजि-
नो जाताः । प्रभूताः स्यंदनास्तथा ॥ ५८ ॥ बभूव भूरिपादातं । द्रव्यं जातं प्रभूतकं ॥ शत्रवो मि-
त्रतां नीता । गुणग्राही जनः कृतः ॥ ५९ ॥ उल्लासिता सिता कीर्ति—र्विश्वविश्वाग्निगामिनी ॥
पूरिता भूरिदानेन । समस्तार्थिमनोरथाः ॥ ६० ॥ एवं प्रकुर्वता तेन । नरचंद्रेण भूभुजा ॥ मध्ये
परोपकर्तॄणां । स्वा रेखा धुरि वापिता ॥ ६१ ॥ अन्यदा बहिरुद्याने । चंपकामोदनामनि ॥ शी·
लसुंदरनामानः । समायाता मुनीश्वराः ॥ ६२ ॥ चतुर्ज्ञानसुविज्ञात—सर्वविज्ञेयविस्तराः ॥ बहुशि-
ष्यसमायुक्ता । भव्यांभोरुहभास्कराः ॥ ६३ ॥ तदागमं समाकर्ण्य । वंदनार्थं बहुर्जनः ॥ पुरमध्या-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्विनिष्क्रांतो । हेलया भक्तिनिर्भरः ॥ ६४ ॥ राजाप्यागमनं ज्ञात्वा । सूरीणां ज्ञानशालिनां ॥ जगाम वंदनाद्यर्थं । समं सामंतमंत्रिभिः ॥ ६५ ॥ अभिवंद्य यथौचित्यं । सूरीनन्यमुनींस्तथा ॥ निषण्णश्चोचिते स्थाने । ततः सूरिभिरंजसा ॥ ६६ ॥ गंभीरधीरनादेन । प्रारब्धा धर्मदेशना ॥ मिथ्यात्वविततध्वांत—ध्वंसनैकरविप्रभा ॥ ६७ ॥ युग्मं ॥ भो भो भव्या इमे जीवाः । सर्वेऽपि सुखलिप्सवः ॥ सुखं च धर्मतस्तस्मा—द्धर्मे यत्नो विधीयतां ॥ ६८ ॥ धर्मस्तु स एवेह । यः सर्वज्ञैः प्ररूपितः ॥ अहिंसादिगुणाधारः । सारः सर्वजगद्धितः ॥ ६९ ॥

इत्याद्यनेकधा धर्म—माचक्षाणं मुनीश्वरं ॥ पप्रच्छावसरं प्राप्य । नरचंद्रो नरेश्वरः ॥ ७० ॥ भगवन् किं मयाकारि । शुभं कर्मान्यजन्मनि ॥ चिंताक्रांता ममाशेषा । येन पूर्णा मनोरथाः ॥ ॥ ७१ ॥ सूरिः प्राह महाराज । श्रूयतां सावधानतः ॥ त्वमासीर्भो नराधीश । कुंजरः पूर्वजन्मनि ॥ ७२ ॥ विंध्याटव्यां सुभद्राख्य—श्चतुर्दंतः शितप्रभः ॥ सुरूपो भद्रजातीयो । हस्तियूथस्य नायकः ॥ ७३ ॥ युग्मं ॥ अन्यदा च त्वया दृष्टः । साधुर्दृष्टव्यदर्शनः ॥ अवधिज्ञानसंपन्नो । नभोगामी विहंगवत् ॥ ७४ ॥ ततस्त्वं धावितो वेगा—त्तं प्रत्यारुष्टमानसः ॥ गतस्तूर्णं तदासन्ने । सम्य-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

गालोकितो मुनिः ॥ ७५ ॥ ततस्तद्दर्शनादेव । कोपावेशं विमुक्तवान् ॥ स्तंभित इव सन्मंत्रैः । स्थितस्तस्याग्रतो मुनेः ॥ ७६ ॥ ततस्त्वं साधुना प्रोक्तो । गंभीरोदारया गिरा ॥ अहो पूर्वभवः किं ते । विस्मृतो वरकुंजर ॥ ७७ ॥ वाणिज्यं वा त्वयाकारि । मया सार्धं तदा गज ॥ अथ त्वं धावितो भद्र । दूरं रुष्टो ममोपरि ॥ ७८ ॥ यदि ते विस्मृतं सर्वं । तदाकर्णय कथ्यते ॥ त्वं चाहं च वरे द्वीपे । धातकीखंडनामनि ॥ ७९ ॥ पुरे राजपुरे हस्तिन् । द्वावप्यावां वयस्यकौ ॥ अभवाव वणिक्पुत्रौ । स्नेहवंतौ परस्परं ॥ ८० ॥ युग्मं ॥ कृतवंतौ सहैवावां । वाणिज्यं द्रविणार्थिनौ ॥ वंचितोऽहं त्वया द्रव्य—लाभेनानेकधा तदा ॥ ८१ ॥ तेन त्वं वंचनादोषा—न्मृत्वा जातोऽसि कुंजरः ॥ कृतं हि कुत्सितं कर्म । नामोघं जायते यतः ॥ ८२ ॥ येन ते परमाप्रीति—स्तदाभवन्ममोपरि ॥ मामालोक्य तव क्रोधः । प्रशांतस्तेन हेतुना ॥ ८३ ॥ सहसा येन दृष्टेन । कोपावेशः प्रशाम्यति ॥ वर्धते प्रीतिरत्यर्थं । पूर्वं बंधुः स तस्य भोः ॥ ८४ ॥ सहसा येन दृष्टेन । कोपावेशः प्रवर्धते ॥ हीयते प्रीतिरत्यर्थं । पूर्वशत्रुः स तस्य हि ॥ ८५ ॥ अहं पुनस्तदाभूवं । सदा दानपरायणः ॥ किंचित्तनुकषायत्वा—त्प्रांजलिः सर्वकर्मसु ॥ ८६ ॥ ततो मृत्वा समुत्पन्नः । पुरे रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जपुरान्निधे ॥ श्रेष्टिनश्चंदनाख्यस्य । पुत्रः सुंदरनामकः ॥ ८७ ॥ क्रमेण यौवनं प्राप्तः । कामिनीजनमोहनं ॥ विशालवंशजां कन्यां । विभूत्या परिणीतवान् ॥ ८८ ॥ भुक्त्वा भोगास्तया सार्धं । जाता योग्याः सुता मम ॥ संपालितः सुखेनैव । चिरं कालं गृहाश्रमः ॥ ८९ ॥ आयाताः सूरयस्तत्र । श्रुतसागरनामकाः ॥ धर्मं श्रुत्वा गृहीता च । प्रव्रज्येयं तदंतिके ॥ ९० ॥ अधीतो भूरिसिद्धांतः । सुष्टु तप्तं तपश्चिरं ॥ संजातमवधिज्ञानं । लब्धिश्चाकाशगामिनी ॥ ९१ ॥ दृष्टश्च ज्ञानसदृष्ट्या । ज्ञातो हस्तितया भवान् ॥ समायातश्च तेनाहं । त्वत्प्रतिबोधहेतवे ॥ ९२ ॥ तदहो सांप्रतं हस्तिन् । कोपं मुंचस्व सर्वथा ॥ प्रतिपद्यस्व सद्धर्मं । तूर्णं स्वहितमाचर ॥ ९३ ॥ श्रुत्वेदं स गजस्तत्र । जातो जातिस्मरः क्षणात् ॥ ततस्तस्य मुनेः पार्श्वे । श्रावकत्वं प्रपन्नवान् ॥ ९४ ॥ ततोऽसौ सुमुनिः सम्यग् । बोधयित्वा गजं तकं ॥ जगाम निजके स्थाने । कालेन च शिवालये ॥ ९५ ॥ गजोऽपि श्रावकं धर्मं । पालयित्वा चिरं ततः ॥ पर्यंतेऽनशनं कृत्वा । मृत्वा सौधर्मनामनि ॥ ९६ ॥ देवलोके सुरो जातो । महातेजा महर्द्धिकः ॥ ततश्च्युत्वा भवानत्र । नरचंद्रो नृपोऽजनि ॥ ९७ ॥ युग्मं ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

श्रुत्वेदं सूरिसद्वाक्यं । नृपतिर्मूर्छितः क्षणं ॥ सस्मार पूर्वजां जातिं । शुभभावानुभावतः ॥ ॥ ९८ ॥ ततः सूरिमुवाचैवं । संवेगोध्धुरया गिरा ॥ भदंताहं निजे राज्ये । सुस्थं कृत्वा त्वदंतिके ॥ ९९ ॥ सर्वक्लेशहरां दीक्षां । गृहीष्यामि मुनीश्वर ॥ एवमुक्त्वा गतो राजा । स्वगेहे सपरिच्छदः ॥ २०० ॥ युग्मं ॥ ततो राज्ये सुसेनाख्यं । निजपुत्रं न्यवेशयत् ॥ कृत्वान्यदपि यत्कृत्यं । दत्वा दानं यथेप्सितं ॥ १ ॥ कारयित्वा महापूजां । सर्वेषु जिनवेश्मसु ॥ वस्त्रपात्रादिभिः सम्य—क्प्र· तिलाभ्य मुनीन्नृपः ॥ २ ॥ सूरिणामंतिके तत्र । गत्वा संविग्नमानसः ॥ जग्राह विधिना दीक्षां । सर्वकर्मविमोचिनीं ॥ ३ ॥ त्रिभिर्विशेषकं ॥ ततो गीतार्थसत्साधु—समीपे शुभभावतः ॥ शिक्षि· ता द्विविधा शिक्षा । नरचंद्रसुसाधुना ॥ ४ ॥ पालितः सुचिरं शुद्धः । संयमस्तपसा सह ॥ साव· शेषीकृतं कर्म । संसारश्च लघूकृतः ॥ ५ ॥ पर्यंते विधिना मृत्वा । संजातोऽनुत्तरे सुरः ॥ ततश्च्यु· त्वा विदेहेऽसौ । व्रतं लात्वा शिवं गतः ॥ ६ ॥ चरितमिदमुदारं सर्वलोकैकसारं । नरपतिनरचंद्र- स्याद्भुतं भव्यलोकाः ॥ त्रिभुवनजनतानां दत्तमोदं निशम्य । कुरुत निजकशक्त्या सर्वलोकोप· कारं ॥ ७ ॥ इति श्रीनरचंद्रस्य कथानकं परिसमाप्तं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ परोपकर्तृनेव विशेषतः प्रशंसयन्नाह—

॥ मूलम् ॥—मिथ्येदं कूर्मशेषाभ्यां । यन्मही विधृता किल ॥ परोपकर्तृभिः सद्भि—र्धृता भूरिति मे मतिः ॥ १ ॥ व्याख्या—मिथ्या अलीकमिदं जनजल्पितं कूर्मशेषाभ्यां कच्छपनागराजाभ्यां यदिति संभावनायां मही मेदिनी विधृता विशेषेण धारिता, किलेत्यपवादे, तर्हि कैर्धृतेत्याह—सद्भिः सज्जनैः परोपकर्तृभिः परोपकारनिष्ठैर्धृता धारिता भूर्भूमिरित्येवं मे मम मतिर्बुद्धिरिति. ॥ ॥ १ ॥ सांप्रतं परोपकारिणां फलमुपदर्शयन्नधिकारं निगमयन्नाह—

॥ मूलम् ॥—परोपकारकर्तृणां । मृतानामप्यनर्गलं ॥ बंभ्रमीति जगत्कृत्स्नं । कुंदेंदुधवलं यशः ॥ १ ॥ व्याख्या—परोपकारकर्तृणां परोपकृतिविधायिनां मृतानामपि परासुतां प्राप्तानामप्यनर्गलमनिवारितप्रसरं बंभ्रमीति सर्वतोऽतिशयेन विचरति जगल्लोकं कृत्स्नं समस्तं कुंदेंदुधवलं कुंदचंद्रनिर्मलं यशः सर्वदिग्गामीति परोपकाराधिकारः परिसमाप्तः, इति चतुर्थोऽधिकारः ॥ संतोषवद्भिरेव सद्भिः परोपकारो विधीयत इत्यतः परोपकारसमनंतरं संतोषाधिकार उच्यते, तत्र संतोषवतः प्रशंसयन्नाह—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ मूलम् ॥—सर्वतोऽपि प्रसर्पंती । तृष्णावल्ली निर्गला ॥ यैः संतोषासिना छिन्ना । त एव सुखिनो जनाः ॥ १ ॥ व्याख्या—सर्वतोऽपि समंततोऽपि प्रसर्पंती विसर्पंती तृष्णावल्ली वांछावल्लरी निर्गला अनिवारितप्रसरा यैः कैश्चन महानुभावैः संतोषासिना वांछाविच्छेदिखड्गेन छिन्ना द्विधा कृता त एव नान्ये सुखिनः शर्मभाजो जना लोका इति. ॥ १ ॥ न केवलं संतोषवंतः संतः सुखिनो भवंति, किंतु राजादिष्वपि ते निस्पृहाश्चेत्युपदर्शयन्नाह—

॥ मूलम् ॥—निःस्पृहस्य तृणं राजा । तृणं शक्रस्तृणं धनी ॥ कांचनोऽपि तृणं मेरु—र्धनदोऽपि तृणायते ॥ १ ॥ व्याख्या—निःस्पृहस्य गतलोभस्य तृणं वीरुणादि राजा नरेश्वरः, तृणं शक्रो देवराट्, तृणं धनी धनवान्, तथा कांचनोऽपि स्वर्णमयोऽपि मेरुर्मंदरस्तृणं, धनदोऽपि समस्तनिधानाधिपतिरपि तृणायते तृणवदाचरति निःस्पृहंप्रतीति गम्यते. ॥ १ ॥ न केवलं संतुष्ट इह लोक एव सुखी, संसारोऽपि तस्य कतिपयभवभाव्येवेति दर्शयन्नाह—

॥ मूलम् ॥—अनाद्यनंतसंसार—मार्गस्तस्य सुखोत्तरः ॥ वामेतरकरे यस्य । संतोषः संबलं वरं ॥ १ ॥ व्याख्या—न विद्यते आदिर्यस्य सः, तथा न विद्यतेंतो यस्य सोऽनाद्यनंतः, स चासौ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संसारमार्गश्चानाद्यनिधनभवपथाः, तस्य संतोषवतः सुखत्तोरः सुलंघ्यो, वामेतरकरे दक्षिणबाहै य-स्य कस्यापि संतोषः संतुष्टता संबलं पथ्यदनं वरं प्रधानमिति. ॥ १ ॥ ननु कथं धनं विना संतो-षवतां सुखं भवतीत्याह—

॥ मूलम् ॥—संतोषामृततृप्तानां । यत्तेषां सुखमुत्तमं ॥ कुतस्तद्धनलुब्धानां । दिवारात्रौ च धावतां ॥ १ ॥ व्याख्या—संतोषामृततृप्तानां संतोषपीयूषप्रीणितानां यदित्यनाख्येयं तेषां संतोषवतां सुखं शर्मोत्तमं प्रधानं भवति, तदिति सुखं धनलुब्धानामर्थगृद्धिमतां दिवारात्रौ वा रात्रिं दिवं च धावतां प्रसर्पतां कुतः? न कुतोऽपीत्यर्थः. ॥ १ ॥ सांप्रतं यद्वशेन सत्वाः सुखिनो भवंति तं संतोषं नमस्कुर्वन्नाह—

॥ मूलम् ॥—दुःखदारुकुठाराय । बह्वाशापाशनाशिने ॥ निःशेषसुखमूलाय । संतोषाय न-मोनमः ॥ १ ॥ व्याख्या—दुःखदारुकुठारायेत्यशर्मदारुविदारणपरशवे, बह्वाशापाशनाशिने प्रभूत-वांछाबंधनविनाशकाय, निःशेषसुखमूलाय समस्तशर्मकारणाय संतोषाय संतुष्टये नमोनमोऽतिशये-न नमस्कारोऽस्तु. ॥ १ ॥ इह लोक एव संतोषफलमाह—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ मूलम् ॥—यद्दीनानि न जल्पंति । यत्सेवां नैव कुर्वते ॥ यद्गुरुत्वं ययुर्लोकाः । संतोषस्तत्र कारणं ॥ १ ॥ व्याख्या—यदिति जाषायां, दीनानि तुछानि न नैव जल्पंति जाषंते, यत्सेवां परोपसर्पणलक्षणां न कुर्वते न विदधति, यद्गुरुत्वं महत्वं ययुर्गता उपलक्षणत्वाद्यांति गमिष्यंति च लोका जनाः, संतोषो निःस्पृहत्वं तत्र महत्त्वगमने कारणं बीजमिति. ॥ १ ॥ सांप्रतं संतोषवतां सर्वमपि सुखायेत्युपदर्शयन् श्लोकद्वयमाह—

॥ मूलम् ॥—यद्वा तद्वा जलं येषां । यद्वा तद्वा च जोजनं ॥ आसनं शयनं यानं । जायते सुखकारणं ॥ १ ॥ तेषां दूरतरं दुःखं । सुखं च निकटस्थितं ॥ यतः संतोषसाराणि । सुखानि जगदुर्जिनाः ॥ २ ॥ व्याख्या—यद्वा तद्वा यदेव तदेव सुंदरासुंदरमित्यर्थः, जलं पानीयं येषां संतोषतृप्तानां, यद्वा तद्वा च जोजनं यदेव तदेव मनोरमामनोरममित्यर्थः, जोजनमभ्यवहार्यं, आसनं पट्टपीठकादि, शय्यतेऽस्मिन्निति शयनं सर्वांगीणशय्या, यानं वेसरादि, जायते जवति सुखकारणं शर्मनिबंधनमिति. ॥ १ ॥ तेषां संतोषिणां दूरतरं दवीयस्तरं दुःखमसातं, सुखं च सातं च निकटस्थितं समीपवर्ति, कुत एतदित्याह—यद्यस्मात्कारणात्संतोषसाराणि वांछाविछेदप्रधानानि सुखा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नि सातानि जगद्गुरुक्तवंतो जिना केवलिन इति. तथा च—जइ जह्मव तह्मव जहव । तहव हे हियय निव्वुइं कुणसि ॥ तादुकुह तुह जम्मं । तरेवि डुक्कं चिय न होइ ॥ १ ॥ २ ॥ सांप्रतं समस्तविशालवस्तूनां मध्ये निःस्पृहाणां विशालत्वमुपदर्शयन्नाह—

॥ मूलम् ॥—न च पृथ्वी तथा पृथ्वी । स्वयंभूरमणोऽपि वा ॥ ब्रह्मांडमपि नो तादृ—ग्यादृशो निःस्पृहो जनः ॥ १ ॥ व्याख्या—न च नैव पृथ्वी वसुंधरा तथा सुसंतुष्टवत्पृथ्वी विस्तीर्णा, स्वयंभूरमणोऽपि वा समस्तसमुद्रपर्यंतवर्तिसमुद्रो वा, अपिवाशब्दौ समुच्चयार्थौ, ब्रह्मांडमपि जगदुत्पत्तिकारणमपि नो तादृग् न तादृशं, यादृशो यद्विधो निःस्पृहो निरभिलाषो जनो लोक इति. ॥ १ ॥ इदानीं संतोषिण ऐहिकसुखमाह—

॥ मूलम् ॥—कृतं शेषगुणैस्ताव—त्संतुष्टस्येह देहिनः ॥ एतावतैव पर्याप्तं । यदधीनो न कस्यचित् ॥ १ ॥ व्याख्या—कृतं परिपूर्णं शेषगुणैरन्यगुणैस्तावदिति क्रमे, संतुष्टस्य निरीहस्येह जगति देहिनः प्राणिनः, एतावतैवामुनैव पर्याप्तं कृतं, यद्यस्मात्कारणादधीन आयत्तो न कस्यचिन्न कस्यापीति. ॥ १ ॥ इदानीमसंतुष्टानामिहैव दुःखपरंपरामुपदर्शयन् श्लोकद्वयमाह—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ मूलम् ॥—कुटुंबककृते धाव—न्नितश्चेतश्च संततं ॥ किं कृतं किं करिष्यामि । किं करोमीति चिंतयन् ॥ १ ॥ छिद्यते प्रत्यहं प्राणी । बह्वाशापाशपाशितः ॥ वांछाविच्छेदजं सौख्यं । स्वप्नेऽप्येष न विंदति ॥ २ ॥ व्याख्या—कुटुंबककृते गृहनिमित्तं धावन् पर्यटन्नितश्चेतश्च यतस्ततः संततमनवरतं, किं कृतमित्यतीतकाले, किं करिष्यामीति वर्तमाने च चिंतयन् वितर्कयन्, ॥ १ ॥ खिद्यते क्लिश्यते प्रत्यहमनुदिनं जंतुः प्राणी बह्वाशापाशपाशितः प्रभूतमनोरथबंधनबद्धो वांछाविच्छेदजमिच्छानिनिवृत्तिजं सौख्यं शर्म स्वप्नेऽपि सुप्तजागरावस्थायामप्येष प्राणी न विंदति न लभते. ॥ ॥ २ ॥ अत्रैवार्थे दृष्टांतद्वयमाह—

॥ मूलम् ॥—असंतोषो हि दोषाय । संतोषः सुखहेतवे ॥ कपिलो ज्ञातमत्रार्थे। पिंगला च पणांगना ॥ १ ॥ व्याख्या—असंतोषोऽपरापरवस्तुसस्पृहता दोषाय दूषणहेतवे, संतोषो निरीहता सुखहेतवे शर्मनिमित्तं, कपिलः पुरोहितपुत्रो ज्ञातं निदर्शनमत्रार्थे संतोषसुखविषये, पिंगला च पिंगलाभिधाना च पणांगना, पणो मूल्यं तत्प्रधानांगना पणांगना मूल्यभोग्या वेश्येत्यर्थः. ॥ १ ॥ ज्ञाते च यथाक्रममिमे—बभूव नगरी रम्या । रम्यारामविराजिता ॥ कौशांबी नाम विख्याता । व·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्सादेशसुभूषणा ॥ १ ॥ सुमनः संघसंयुक्ता । मेरुचूलेव सुंदरा ॥ सुप्रतिष्ठा सुवर्णौघ—धारिका
शर्मकारिका ॥ २ ॥ युग्मं ॥ जितशत्रुर्महाराज—स्तस्यामासीन्नरोत्तमः ॥ समृद्धोदग्रसत्कोशः । प्र-
जापालनतत्परः ॥ ३ ॥ सम्मतः सर्वकार्येषु । तस्यासीच्च पुरोहितः ॥ काश्यपाह्वः सदाचारो । गु-
णाधारो गुणिप्रियः ॥ ४ ॥ चतुर्दशमहाविद्या—स्थानसागरपारगः ॥ राज्ञा वितीर्णसद्वृत्तिः । स-
द्वृत्तः पार्वणेंदुवत् ॥ ५ ॥ युग्मं ॥ भार्या तस्य यशानाम्नी । विशालाक्षी मनःप्रिया ॥ कपिलाह्व-
स्तयोः पुत्रः । संजज्ञे कांतलोचनः ॥ ६ ॥ बालत्वे वर्तमानस्य । कपिलस्य स काश्यपः ॥ विधेः
स्वच्छंदकारित्वा—त्पंचत्वं समुपागतः ॥ ७ ॥ भूभुजा तत्पदं दत्तं । तदन्यस्मै द्विजन्मने ॥ ततोऽसा-
वश्वमारूढ । आतपत्रविराजितः ॥ ८ ॥ एति गच्छति सानंदं । सदलंकारधारकः ॥ यशाया गृहपा-
र्श्वाच्च । परिवारयुतः सदा ॥ ९ ॥ अन्यदा तं तदा ऋद्ध्या । व्रजंतं तं पुरोहितं ॥ प्रत्यासन्नं स्वगे-
हस्य । समालोक्य यशा ततः ॥ १० ॥ भूतपूर्वां निजां स्फीतिं । स्मृत्वारोदीत्सुदुःखिता ॥ कपिले-
न ततः स्पृष्टा । मातः किं शोककारणं ॥ ११ ॥ सापि सर्वं स्ववृत्तांतं । कपिलाय न्यवेदयत् ॥ स
प्राह किं न मे दत्तं । पदं पैत्र्यं महीभुजा ॥ १२ ॥ तयोक्तं पुत्र सद्विद्या—हीनैस्तल्लभ्यते न हि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ तेन प्रोक्तमधीयेऽहं । सद्विद्यामंब सांप्रतं ॥ १३ ॥ ततो यशाब्रवीदेवं । पुत्रवाक्येन रंजिता ॥ भवंतं पाठयिष्यंति । नेहवास्तव्यपंडिताः ॥ १४ ॥ तद्वत्स गच्छ वेगेन । श्रावस्तीं नगरीं यतः ॥ समस्ति तव सद्विद्या—महासागरपारगः ॥ १५ ॥ मित्रं तव पितुर्विद्वा—निंद्रदत्ताभिधः सुधीः ॥ मित्रस्नेहेन सोऽवश्यं । भवंतं पाठयिष्यति ॥ १६ ॥ श्रुत्वेदं वचनं मातुः । श्रावस्त्यां कपिलो गतः ॥ उपाध्यायस्ततस्तेन । प्रणतो भक्तियोगतः ॥ १७ ॥ निवेदितं यथा तात । विद्यार्थमहमागतः ॥ तेनोचे सुंदरं भद्र । विद्यायाः समुपार्जनं ॥ १८ ॥ विद्याहीना यतो लोके । मानवाः पशुभिः समाः ॥ न शोभंते सभामध्ये । हंसौघे इव वायसाः ॥ १९ ॥ तथा चोक्तं—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं । विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥ विद्या बंधुजनो विदेशगमने विद्या परा देवता । विद्या राजसु पूजिता न हि धनं विद्या विहीनः पशुः ॥ २० ॥ किं तेन जातु जातेन । यो न विद्वान्न धार्मिकः ॥ तथा गवा हि किं कृत्यं । या न धेनुर्न गर्भिणी ॥ २१ ॥ दाने यशसि शौर्ये च । यस्य न प्रथितं यशः ॥ विद्यायामर्थलाभे वा । मातुरुच्चार एव सः ॥ २२ ॥ विद्यायाः साधनानीह । विद्यंते मम मंदिरे ॥ केवलं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भोजनं भद्र । निर्धनत्वान्न विद्यते ॥ २३ ॥ तानि चामूनि विद्यासाधनानि—आरोग्यबुद्धिविनयो-
द्यमशास्त्ररागा । अभ्यंतरा जगति पाठगुणा भवंति ॥ आचार्यपुस्तकनिवाससहायवस्त्रा । बाह्याश्च
पंच पठनं परिवर्धयंति ॥ २४ ॥ तेनोचे भिक्षयित्वाहं । पठिष्ये भवदंतिके ॥ उपाध्यायस्ततः प्रा-
ह । वत्सैवं पठनं कुतः ॥ २५ ॥ एवमुक्त्वा समं तेन । गतोऽसौ श्रेष्ठिनो गृहं ॥ शालिभद्राभिधा-
नस्य । ततश्चैवमभाषत ॥ ७ ॥ कौशांब्या अयमायातो । विद्यार्थी सुहृदंगजः ॥ तदस्य कुरु सा-
हाय्यं । त्वमाहारप्रदानतः ॥ ८ ॥ श्रेष्ठिनापि च तत्तोषा—त्प्रतिपन्नं गुरोर्वचः ॥ भोजनाय ततस्त-
स्य । दासी तेन निरूपिता ॥ ९ ॥ अधीते सोऽपि सानंदो । हास्यशीलः स्वभावतः ॥ मोहयौव-
नसंवास—दोषात्संमूढमानसः ॥ १० ॥ कामस्य दुर्जयत्वाच्च । तस्यां दास्यां प्रलुब्धवान् ॥ अवोच-
दन्यदा सा तं । स्नेहेन रहसि स्थितं ॥ ११ ॥ यद्यहं सह केनापि । वस्त्रमूल्याय संवसे ॥ सोढव्यं
तत्त्वया कांत । यतस्त्वं तद्विवर्जितः ॥ १२ ॥ एवमस्त्विति तेनापि । तद्वचः प्रतिपद्यते ॥ सखेदा
चान्यदा तेन । दृष्टा पृष्टा च कारणं ॥ १३ ॥ तयोचे सर्वदासीनां । महः कल्ये भविष्यति ॥ तां-
बूलादिविहीनाया । लाघवं भविता मम ॥ १४ ॥ सोऽपि श्रुत्वा वचस्तस्या । विनिद्रो दुःखविह्वलः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ अमुंचद्दीर्घनिःश्वासां—स्तदिच्छापूरणाशयः ॥ १५ ॥ उक्तं च—सीयंतपरियणज्जहियाण । पुरिसाण धणविहीणाण ॥ न हु नवरि कायराणं । गरुयाणवि चलइ मइविहवो ॥ १६ ॥ वल्लाण सा ततः कांतं । गच्छ त्वं धनमंदिरं ॥ प्रातरेव समुच्छाय । यतोऽसावग्रजन्मने ॥ १७ ॥ द्वौ माषौ जातरूपस्य । प्रथमाय प्रयच्छति ॥ मायासीदपरः कश्चि—दर्धरात्रेऽपि निर्गतः ॥ १८ ॥ युग्मं ॥ चौरोऽयमिति मत्वा तै—र्गृहीतो दंडपाशिकैः ॥ आस्थानसन्निषण्णस्य । राज्ञस्तैरुपदर्शितः ॥ १९ ॥ तेनाख्याणि यथा विप्र । किमु युक्तं तवेदृशं ॥ अमायी कथयामास । राज्ञः सत्यं स्वमाशयं ॥२०॥ ततः संजातकारुण्यो । राजा तुष्टस्तदार्जवात् ॥ अवादीत्तं द्विजं मुग्धं । वरं वृणु यथेप्सितं ॥ २१ ॥ स प्राहालोच्य याचिष्ये । राजाहालोचयस्व भोः ॥ गत्वैकांते ततश्चैव—मारब्धश्चिंतितुं यथा ॥ ॥ २२ ॥ राजा तुष्टो ददात्यद्य । द्रव्यं मे तावदीप्सितं ॥ माषद्वयेन किं कार्यं । याचेऽहं माषपंचकं ॥ २३ ॥ नालं तांबूलमूल्येऽपि । नूनं तन्मे भविष्यति ॥ दशमाषांस्ततो याचे । तेऽपि वस्त्राद्यसाधकाः ॥ २४ ॥ मार्गयामि शतं नालं । तदप्याभरणाय मे ॥ बंधुवर्गसमेतस्य । सहस्रोऽपि दशायते ॥ २५ ॥ प्रार्थयामि ततो लक्षं । क्षितीशं वरदायिनं ॥ परोपकारकर्तृत्वे । लक्षमप्यक्षमं ततः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २६ ॥ कोटिं याचे सुवर्णस्य । दीनादेर्दानसाधिकां ॥ हस्त्यश्वरथपादाति—साधने सापि नो सदा ॥ २७ ॥ चिंतावीचिचयोत्क्षिप्त—लोभसागरमध्यगः ॥ स्थितः संचिंतयन्नेवं । क्षणं संतोषवर्जितः ॥ २८ ॥ शुद्धत्वाज्जीवरूपस्य । चित्रत्वात्कर्मणां गतेः ॥ जज्ञे सदृज्ञानसंयोगः । कपिलस्य ततो दृढः ॥ २९ ॥ ततः सदृज्ञानसंयोगा—च्चिंतयामास तत्क्षणं ॥ अहो लोभस्य माहात्म्य—मपूर्वं दुःखकारणं ॥ ३० ॥ यतः—

यदि स्याद्रत्नसंपूर्णो । जंबूद्वीपः कथंचन ॥ अपर्याप्तः प्रहर्षाय । लोभात्तस्य जिनैः स्मृतः ॥ ॥ ३१ ॥ अहो मया किमारब्ध—मज्ञानवशवर्तिना ॥ विज्ञाय वचनं मातु—र्विद्यादातुश्च सुंदरं ॥ ३२ ॥ जानन्नपि यदासक्तः । सामान्यायां स्त्रियामहं ॥ तदिदं सत्यतां नीतं । वचनं मोहवर्तिना ॥ ३३ ॥ सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेंद्रियाणां । लज्जां तावद्विधत्ते विनयमपि समालंबते तावदेव ॥ भ्रूचापाक्षेपमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते । यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतंति ॥ ३४ ॥ ताव फुरइ वेरग्गु । चित्ति कुललज्जवि तावहिं ताव ॥ अकज्जहतणि य संक । गुरुयाणवि भउ ताव ॥ ३५ ॥ ताविंदियह वसाइ । जसह सिरिहाइ ताव

हि ॥ रमणीहिं मणमोहिणीहिं । पुरिस वसी होइ न जावहि ॥ ३६ ॥ सो सुकयकम्मु सो नि-
उणमइ । सिवहमग्गि सो संघम्मिज्ज ॥ परमोहणज्जसहिसरिसिय । महिलाण पेम्मंमि नो पडिज्ज
॥ ३७ ॥ तस्मादलं सुवर्णेन । विषयैरप्यलं मम ॥ कृतं कांताप्रसंगेन । घोरसंसारहेतुना ॥ ३८ ॥
एवं चिंतयतस्तस्य । जातिस्मरणमंजसा ॥ संपन्नं शुद्धभावस्य । स्वयंबुद्धस्ततोऽजनि ॥ ३९ ॥ दे-
वतादत्तलिंगोऽयं । स्वयं लुंचितकुंतलः ॥ प्रत्यक्षो धर्म एवैष । राजानं समुपस्थितः ॥ ४० ॥ रा-
ज्ञोचे किं त्वयाचिंति । ततः सोऽपि न्यवेदयत ॥ आत्मेच्छाविस्तरं सर्वं । नरेंद्राय पठन्निदं ॥ ४१ ॥
उक्तं च—जहा लाहो तहा लोहो । लाहालोहो पवड्ढइ ॥ दोमासकणयकज्जं । कोडिणवि न
निठियं ॥ ४२ ॥ ददामि च्छद्र ते कोटिं । राज्ञोचे चारुचेतसा ॥ मुनिनोक्तं मया सर्वं । परित्यक्तं
धनादिकं ॥ ४३ ॥ यतः—अर्थानामर्जने दुःख—मर्जितानां च रक्षणे ॥ आये दुःखं व्यये दुःखं
। धिगर्थं दुःखकारणं ॥ ४४ ॥ इत्यादिधर्ममाख्याय । कपिलाख्यो महामुनिः ॥ विजहार महीपीठे
। संयमी मुनिसत्तमः ॥ ४७ ॥ नर्ममो निरहंकारो । निरारंभो निरालयः ॥ निःसहायो निराशंसो
। निःसंगो निःपरिग्रहः ॥ ४८ ॥ युक्तः समितिभिर्नित्यं । सुगुप्तो गुप्तिभिस्तथा ॥ क्षांत्यादिसद्गुणो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पेतः । सर्वशीलांगधारकः ॥ ४९ ॥ त्रिभिर्विशेषकं ॥ षण्मासांते ततस्तस्य । ज्ञानमुत्पन्नमुत्तमं ॥
घातिकर्मक्षये जाते । लोकालोकावभासकं ॥ ५० ॥ इतश्च—

अस्ति राजगृहस्येह । श्रावस्त्याश्च महापुरः ॥ दुष्टश्वापदसंकीर्णा—पांतराले महाटवी ॥५१॥
तस्यामिक्कडसंज्ञानां । चौराणां शतपंचकं ॥ अस्त्येतत्प्रतिबोधार्थं । तदंतः कपिलो गतः ॥ ५२ ॥
दृष्टः शाखिगतेनैष । दस्युना मुनिपुंगवः ॥ श्रमणोऽयं समायाति । शेषाणां च निवेदितं ॥५३॥
ततस्ते तं समादाय । निन्युश्चौराधिपांतिकं ॥ तेनापि स मुनिः प्रोक्तो । नृत्यतां नृत्यतां मुने ॥
॥ ५४ ॥ तेषां विज्ञाय स ज्ञान—चक्षुषा मोक्षकारणं ॥ इत्थमेव ततः प्राह । वादको नो न वि-
द्यते ॥ ५५ ॥ केलिना मिलिताः सर्वे । तालाः कुर्वंति दस्यवः ॥ तेषां मध्यगतः साधु—र्ध्रुवकं
यागतीदृशं ॥ ५६ ॥ अधुवे असासयंमि । संसारंमि दुक्खपउरए ॥ किं नाम होज्ज तं कम्मं । जे-
णाहं दुग्गइं न गच्छेज्जा ॥ ५७ ॥ एवं भगवतोद्गीते । तेऽपि गायंति दस्यवः ॥ तालाश्च कुट्टयं-
त्युच्चैः । सानंदाः समचेतसः ॥ ५८ ॥ एवमुद्गीतिकाव्याजा—दनित्यत्वं प्रकाशयन् ॥ सम्यक्संबो-
ध्य तान् सर्वान् । दीक्षयामास सन्मुनिः ॥ ५९ ॥ ततस्ते साधवो जाताः । साधुसद्गुणधारिणः ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

जाता जातिस्मराः सर्वे । सर्वे संविग्नमानसाः ॥ ६० ॥ कालेन केवलज्ञानं । सर्वेषामुदपद्यत ॥ ततश्च क्षीणकर्मांशा । ययुः सर्वे शिवालयं ॥ ६१ ॥ इति कपिलाख्यानकं समाप्तं ॥ इदानीं पिंगलाख्यानमुच्यते—

अव्यक्तलिंगधारीह । नरः संतोषसुंदरः ॥ केनापि वणिजा पृष्टः । को गुरुस्ते निवेद्यतां ॥ ॥ १ ॥ पिंगला कुररः सर्पः । सारंगास्त्रस्तलोचनाः ॥ इषुकारकुमारी च । षडेते गुरवो मम ॥२॥ श्रुत्वेदं वणिजा प्रोक्तं । गुरुरेकः शरीरिणां ॥ महत्कौतुकमेतच्च । गुरवः षट् कथं तव ॥ ३ ॥ संतोषसुंदरः प्राह । सावधानमनाः शृणु ॥ एकस्यापि हि संजाता । गुरवः षट् यथा मम ॥ ४ ॥ नानावर्णसमाकीर्णं । नानासौधसमाकुलं ॥ विशालशालसंयुक्तं । सुरसद्मविराजितं ॥ ५ ॥ कामिनीमंजुमंजीर—रवरंजितहंसकं ॥ समस्तमेदिनीपीठे । रम्यं रत्नपुरं पुरं ॥ ६ ॥ युग्मं ॥ तत्राहं भांडमादाय । गतो वाणिज्यकर्मणे ॥ वाणिज्यं कुर्वता दृष्टा । पिंगलाख्या विलासिनी ॥ ७ ॥ ततो जातानुरागोऽहं । संवसामि तया सह ॥ वाणिज्ये प्रतला बुद्धि—स्तस्यासक्तस्य मेऽजनि ॥ ॥ ८ ॥ अन्यदाहं गृहे तस्या । अर्धरात्रे समागतः ॥ यावत्सा पिंगला सुप्ता । निश्चिंता सपरिच्छदा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ९ ॥ अहो सुखं स्वपित्येषा । कृतकृत्या इवाधिकं ॥ विचिंत्यैवं क्षणं चित्ते । श्लोकोऽयं पठितो मया ॥ १० ॥ आशा हि परमं दुःखं । निराशा परमं सुखं ॥ आशां निराशतां नीत्वा । सुखं स्वपिति पिंगला ॥ ११ ॥ प्रजाते पुनरायातः । पृष्टा सा पिंगला मया ॥ किं कारणं विशालाक्षि । निशीथे तव मंदिरं ॥ १२ ॥ दत्तार्गलं निःशब्दं च । मया सुप्तु विलोकितं ॥ यदि कथ्यं तदा शीघ्रं । मम साधय कारणं ॥ १३ ॥ युग्मं ॥ तयोक्तं साधयाम्येषा । निशामय निराकुलः ॥ सज्ज्ञाने कथितं कार्यं । गुणायैव प्रजायते ॥ १४ ॥ एकदा जागराद्गाढं । संजाता मे विसूचिका ॥ जाताहं मरणावस्था । कष्टंकष्टेन जीविता ॥ १५ ॥ ततस्तदा मयाकारि । प्रतिज्ञेयं सुखावहा ॥ आद्ययामद्वयादूर्ध्वं । सुप्तव्यं निश्चितं मया ॥ १६ ॥ आद्यमेवं च यामिन्या । जागर्मि प्रहरद्वयं ॥ ततः संतुष्टचित्ताहं । नित्यं स्वपिमि सुस्थिता ॥ १७ ॥ असंतोषो हि दुःखाय । संतोषः सुखकारणं ॥ असंतोषोपतप्तानां । संतोषो नंदनं वनं ॥ १८ ॥ असंतुष्टस्य यद्दुःखं । संतुष्टस्य च यत्सुखं ॥ अनयोरंतरं ज्ञेयं । भानुखद्योतयोरिव ॥ १९ ॥ आद्ययामद्वये जातं । यद्वित्तं तेन मे धृतिः ॥ एवं निश्चयमाधाय । तिष्ठामि सुखिता सदा ॥ २० ॥ तवापि संगतश्चायं । संतोषः सर्ववस्तुषु ॥ सुसंतोष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समो बंधु—र्न भूतो न भविष्यति ॥ २१ ॥ प्रतिपद्याद्य तद्वाक्यं । धर्मे दत्वा निजं धनं ॥ ततो मया गृहीतं जोः । सुसंतोषव्रतं परं ॥ २२ ॥ स्थितस्तत्र सुसंतुष्टः । कतिचिद्दिवसानहं ॥ एवं भो मम संजाता । संतोषे पिंगला गुरुः ॥ २३ ॥ अन्यदा च ततः स्थाना—न्नजता बहिरीक्षितः ॥ गृहीतमांसपेशीकः । कुरराख्यो विहंगमः ॥ २४ ॥ हन्यमानस्तरां लुब्धैः । पक्षिभिर्मांसलम्पिभिः ॥ चंडतुंडाभिघातेन । सर्वैरपि समंततः ॥ २५ ॥ कथंचिद्दैवयोगेन । मांसपेशी तदाननात् ॥ पतिता भूतले क्वापि । गृहीता काकपक्षिणा ॥ २६ ॥ ततस्तं कुररं मुक्त्वा । सर्वे ते वायसंप्रति ॥ धाविताः स पुनर्जातः । कुररो नितरां सुखी ॥ २७ ॥ ततस्तत्कौतुकं दृष्ट्वा । मया चित्ते विचिंतितं ॥ सामिषस्य सदा दुःखं । सौख्यमामिषवर्जनात् ॥ २८ ॥ ततो मया परित्यक्तः । समग्रोऽपि परिग्रहः ॥ तेन तस्य परित्यागे । कुररोऽपि गुरुर्मम ॥ २९ ॥ ततोऽग्रे गच्छता दृष्टः । सर्पः सर्वभयंकरः ॥ भूमिस्त्रीवेणिसंकाशः । परवेश्मकृताश्रयः ॥ ३० ॥ ततोऽचिंति मया चित्ते । सुंदरं व्रतिनां व्रतं ॥ गृहारंभो हि पापाय । दुःखाय च शरीरिणां ॥ ३१ ॥ ततःप्रभृति जातोऽह—मपराश्रमसेवकः ॥ ततः परकृतावासे । सर्पो मे गुरुतां गतः ॥ ३२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्रमेण गच्छता दृष्टं । काननं विपदाननं ॥ तत्र लातुं समारब्धा । लुब्धकैः पाशबंधनैः ॥३३॥
वागुरासु विचित्रासु । सारंगास्त्रस्तलोचनाः ॥ परं ते पतिता नात्र । ह्यप्रमत्ततया तया ॥ ३४ ॥
युग्मं ॥ नानाविधैरुपायैस्तै—र्व्याधैर्हंतुं समीहिताः ॥ रक्षिता निजमात्रेव । निःप्रमादतया तया ॥
॥ ३५ ॥ अप्रमादप्रसादेन । जातास्ते चिरजीविनः ॥ निर्विषण्णमनसो व्याधाः । सविषादास्ततो ग-
ताः ॥ ३६ ॥ ततो मया विचिंत्यैव—मप्रमादो हि सौख्यदः ॥ कर्तुं युक्तो ममाप्येष । तथैव कृत-
वानहं ॥ ३७ ॥ एवं मे गुरवो जाताः । सारंगास्तत्र कानने ॥ अप्रमादविधौ जाड । सदा चकित-
चेतसः ॥ ३८ ॥ ततोऽग्रे गच्छता दृष्ट । इषुकारः पुराद्बहिः ॥ शरव्रातमृजूकुर्व—न्निश्चलीकृतमान-
सः ॥ ३९ ॥ अत्रांतरे समायातः । पुमानेकस्तदंतिके ॥ तेनोक्तं किं त्वया दृष्टो । गच्छन् राजामु-
ना पथा ॥ ४० ॥ स प्राह न मया दृष्टः । स्वकर्मैकाग्रचेतसा ॥ ततो मया व्यचिंत्येवं । न चायं
विकलेंद्रियः ॥ ४१ ॥ अथ चानेन नो दृष्ट—श्चतुरंगबलान्वितः ॥ राजा गच्छन् समीपेन । मह-
देतत्कुतूहलं ॥ ४२ ॥ यस्मात्स्वकार्यनिष्टत्वा—देकचित्तैर्न दृश्यते ॥ चलं वा स्थाणु वा वस्तु ।
समीपेऽपि शरीरिभिः ॥ ४३ ॥ एकाग्रचेतसामेव । स्वार्थसिद्धिरपि ध्रुवं ॥ तन्मयापि मनः कार्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेकाग्रं धर्मचिंतने ॥ ४४ ॥ ततःप्रभृति भो भद्र । संयमेंद्रियपंचकं ॥ जयाजयफलं तस्य । ध्यानस्थश्चिंतयेद्यथा ॥ ४५ ॥ दिवसरजनीसारैः सारितं पञ्चगेहं । समयफलकमेतन्मंडितं भूतधात्र्यां ॥ इह हि जयति कश्चिन्मोक्षमक्षैर्विधेयै—रधिगतमपि चान्ये विप्लुतैर्हारयंति ॥ ४६ ॥ तदेकाग्रमनोध्याने । पंचेंद्रियविनिग्रहे ॥ इषुकारो गुरुर्जातो । ममैवमवधारय ॥ ४७ ॥ तथात्रैव पुरे दृष्टा । कंडयंती कुमारिका ॥ तंदुलान् वलयाराव—खेदितश्रवणद्वया ॥ ४८ ॥ ततः सामुंचदेकैकं । वलयं शब्दशांतये ॥ तथापि तत्कृताराावो । नोपशांतो मनागपि ॥ ४९ ॥ ततो द्वे त्रीणि चत्वारि । न च शाम्यति तद्ध्वनिः ॥ ततो विमुच्य शेषाणि । तदैकैकं धृतं तया ॥ ५० ॥ शांतः शब्दस्ततस्तस्य । जाता चित्तस्य निर्वृतिः ॥ दृष्ट्वेदं सुखदा तेन । रुचितैकाकिता मम ॥ ५१ ॥ ततोऽहं बंधुसंबंधि—मित्रवर्गं विमुच्य च ॥ विचरामि सुखेनैव । सदैकाकी निराकुलः ॥ ५२ ॥ तदेवमेकत्वे मे । गुरुर्जाता कुमारिका ॥ तदेवं मम भो भद्र । गुरवः षट् प्रजज्ञिरे ॥ ५३ ॥ स्वस्त्यस्तु सांप्रतं तुभ्यं । स्वस्थानं समलंकुरु ॥ इत्युक्त्वा सोऽपि संप्राप । स्थानं स्वेष्टं तदा द्रुतं ॥ ५४ ॥

सांप्रतमाशापिशाचिकाया जयोपायं, तज्जये च सुखमुपदर्शयन्नाह—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ मूलम् ॥—आशापिशाचिका नित्यं । देहस्था दुःखदायिनी ॥ संतोषवरमंत्रेण । स सुखी येन नाशिता ॥ १ ॥ व्याख्या—आशापिशाचिका वांछाव्यंतरी नित्यं सर्वदा देहस्था शरीरस्था दुःखदायिन्यशर्मप्रदा संतोषवरमंत्रेण निःस्पृहतापरममंत्रेणासावनिर्दिष्टनामा सुखी शर्मवान् येनकेनचिन्नाशिता देहाद् दूरीकृता. ॥ १ ॥ असंतुष्टो हि जंतुर्भवभ्रमणे दुःखितो भवतीति दर्शयन्नाह—

॥ मूलम् ॥—चिंताचक्रसमारूढो । योगदंडसमाहतः ॥ कर्माष्टककुलालेन । भ्राम्यते घटवन्नरः ॥ १ ॥ व्याख्या—चिंताचक्रसमारूढो विकल्पमालारथांगारूढो योगदंडसमाहतो मनोवाक्कायलकुटाहतः कर्माष्टककुलालेन ज्ञानावरणीयादिकर्माष्टककुंभकारेण भ्राम्यते भ्रमणशीलः क्रियते घटवत्कुंभवन्नरो मानवोऽसंतुष्ट इति गम्यते. ॥ १ ॥ ननु वांछासद्भावेऽपि जनः सुखी भविष्यति, कोऽत्र विरोधः? इत्याशंकापनोदाय श्लोकद्वयमाह—

॥ मूलम् ॥—आतपछाययोर्यद्व—त्सहावस्थानलक्षणः ॥ विरोधस्तद्वदत्रापि । विज्ञेयः सुखवांछयोः ॥ १ ॥ वांछा चेन्न सुखं जंतो—स्तद्विना शर्म संततं ॥ न भूतानि न भावीनि । सुखानि सह वांछया ॥ २ ॥ व्याख्या—आतपस्तापश्छाया चातपाभावभाविनी, तयोर्यद्वद्यथा सहवस्थानल-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

क्षणः समवस्थितिस्वरूपो विरोधो विपर्यस्तदा तद्वत्तथात्वापि प्रस्तुते विज्ञेयो वेदितव्यः सुखवांछयोः शर्मेछयोः ॥ १ ॥ एतदेव दर्शयति—वांछा स्पृहा चेद्यदि न सुखं नैव शर्म जंतोर्देहिनः, तद्विना वांछाविरहे शर्म सातं संततमविछेदं, एतदेव निगमयति—न भूतानि न जातानि, न भावीति न भविष्यंति, उपलक्षणत्वान्न भवंति च सुखानि सातानि सार्धं वांछया स्पृहया. ॥ २ ॥ सांप्रतं संतोषफलमुपदर्शयन् संतोषाधिकारमुपसंहरन्नाह—

॥ मूलम् ॥—संतोषसुखशय्यायां । सद्विवेकपटावृताः ॥ स्वपंति ये महात्मानः । शेरते ते निराकुलाः ॥ १ ॥ व्याख्या—संतोषसुखशय्यायां निरीहतामृदुपर्यंके सद्विवेकपटावृता निर्मलबोधपटावृता निर्मलबोधपटावगुंठिताः स्वपंति स्वापं विदधति ये केचन महात्मानो महापुरुषाः शेरते स्वपंति ते नरा निराकुला निशंकसुप्त्या इति. ॥ १ ॥ तदेवंविधविविधामलगुणकलापभाजो भवंति संतोषकारिणो जनाः, ये सर्वत्रैवासंतुष्टचेतसो भवंति ते परद्रव्यार्थिनः संतो व्यापादयंति प्राणिनः, वदंति मृषावादं, रचयंति कूटकपटानि, वंचयंति मित्रमंडलानि, दुह्यंति निरंतरं स्नेहपरानपि निजकगुरुजनबंधुसंबंधिनः, आरंभयंति महारंभान्, मुष्णंति परद्रव्याणि, कुर्वंति न्यासापहारं, लोपयंति

 Jun Gun Aaradhak Trust

धर्मव्यवहारं, न गणयंति कुलाचारं, घातयंति ग्रामनगरादीनि, विलुंपंति मार्गेषु भूरिद्रविणसंभार-
संभृताननेकसार्थान्, कुर्वंति निःकरुणाः संतो भ्रूणहत्यां गोहत्यां ब्रह्महत्यां स्त्रीहत्यां च, किं बहुना?
यदेकांतेन लोकद्वयविरुद्धं सकलबुधजननिंदितं सर्वथा विवेकिनामतिदुष्करं निस्त्रिंशं निर्घृणं, नि-
स्त्रपं निर्मर्यादं पातकानामपि महापापं स कर्ता, यत श्रुतमात्रमपि लोमोद्धर्षकारकं तदपि कुर्वंति,
कियद्वाऽसंतुष्टचित्तानां चेष्टितं कथ्यते—ये परद्रव्यं जिघृक्षवः कानि कानि कूटकपटानि न रचयं-
ति? यथा ताराचंद्रसत्कं यानपात्रं भूरिद्रविणजातसंभृतं समायातमाकर्ण्य लोभनंदादिभिः पुरंदर-
वास्तव्यैरनेकानि कूटकपटानि कर्तुमारब्धानि, तथापि नार्थसिद्धिः संजातेति ताराचंद्रस्य पोताधि-
पतेरुत्कटपुण्ययुक्तत्वात्, कथानकं चात्र—

बभूव विश्वविख्यातं । पुरं तारापुराभिधं ॥ कैलासपर्वताकारं । तुंगप्राकारवेष्टितं ॥ १ ॥ तत्रा-
भवच्छ्रियां धाम । ताराचंद्राभिधो वणिक् ॥ ख्यातकीर्तिर्जने मान्यः । सुहृदानंदकारकः ॥ २ ॥ ता-
रप्रभा प्रिया तस्य । विनयादिगुणान्विता ॥ प्रेमस्थानं परं चारु—शीलालंकारशालिनी ॥ ३ ॥
अथार्थिना महापोत—स्ताराचंद्रेण चान्यदा ॥ महार्घ्यभूरिभांडानां । भृतोऽन्यद्द्वीपयायिना ॥४॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कृता सर्वापि सामग्री । सज्जीभूताश्च धीवराः ॥ समारूढाश्च निःशेषा । वणिजः सुभटास्तथा ॥ ५ ॥ अथाशेषं निजं लोकं । सम्यक्संभाष्य सादरं ॥ विसृष्टवांश्च सन्मान्य । तांबूलादिभिरंजसा ॥ ६ ॥ अनेकभटसंयुक्तः । शुभालंकारधारकः ॥ भूरिद्रव्यप्रदानेन । पूरितार्थिमनोरथः ॥ ७ ॥ गत्वा पोते समारूढो । बंदिगीतयशास्ततः ॥ हेलयाहतसत्तूर्य—शब्देरापूरितांबरः ॥ ८ ॥ कृतपूजोपचारश्च । योषाभिर्गीतमंगलः ॥ कृतकोलाहलो लोकै—र्यथास्थानस्थितप्रजः ॥ ९ ॥ छत्रछन्नमुखश्चारु—चामरैरुपवीजितः ॥ उत्क्षिप्तनंगरो मुक्त—पोतः पूर्णमनोरथः ॥ १० ॥ शीघ्रं गंतुं प्रवृत्तोऽसौ । पृष्टतः पवनेरितः ॥ एष याति गतो दूरं । दृश्यते नैव लोचनैः ॥ ११ ॥ पंचभिः कुलकं ॥ इत्युक्त्वा वलितो लोको । गतो निजनिजे गृहे ॥ पोतोऽपि वायुवेगेन । लंघित्वा लघुसागरं ॥ १२ ॥ रत्नमेखलनामानं । द्वीपं प्राप्तस्ततो धृतः ॥ पोतादुत्तार्य भांमानि । श्रेष्ठिना राशयः कृताः ॥ १३ ॥ युग्मं ॥ यथास्थानं स्थितो लोकः । श्रेष्ठी जातो निराकुलः ॥ भुक्तेऽपि ते निराबाधे । जाते पोतजनेऽखिले ॥ १४ ॥ पुरंदरपुरावासी । लोभनंदिरिति श्रुतः ॥ वणिक् च नामतः श्रेष्ठी । कर्मतः पापकर्मकृत् ॥ १५ ॥ अत्रैव च पुरे मंत्री । काणो मायानिकेतनं ॥ वसतिस्म

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुराचारो । लोभसागरसंज्ञितः ॥ १६ ॥ परद्रव्यापहारेछः । सदा संक्लिष्टमानसः ॥ तत्रास्ते चर्मका-
रोऽपि । मायामय इति स्मृतः ॥ १७ ॥ तथान्यो लोकविख्यातो । मान्यो विप्रगुणान्वितः ॥ आ-
दित्यमंदिरे तत्र । द्विजो विगतलोचनः ॥ १८ ॥ अविद्यमाननेत्रोऽपि । त्रिलोचन इति स्मृतः ॥
होराबलेन लोकानां । दत्तादेशो विचक्षणः ॥ १९ ॥ अथ बोहित्थमायातं । भूरिभांडसमाकुलं ॥
श्रुत्वानेकजनाकीर्णं । ताराचंद्रं च तत्प्रभुं ॥ २० ॥ लोभनंदिर्गतो रात्रौ । तदंते वंचनेछया ॥ कृ-
तोचितोपचारश्च । निषण्णो दर्शितासने ॥ २१ ॥ कुशलं ते शरीरस्य । पृष्टोऽसौ लोभनंदिना ॥
पूर्वाभाष्यमिदं चैव । सुलभं सज्जने जने ॥ २२ ॥ किं भांडं वा कियद्वापि । पृछतो मम कथ्य-
तां ॥ तेनापि कथितं सर्वं । प्रायः प्रांजलचेतसा ॥ २३ ॥ शिरो विधूय तेनापि । सखेदमिव ज-
ल्पितं ॥ प्रयास एव ते जातः । कुभांडानयनादिह ॥ २४ ॥ यस्मादेतस्य नास्त्यत्र । ग्राहकः को-
ऽपि सर्वथा ॥ परं तथापि गृह्णामि । कीर्तिभंगभयादहं ॥ २५ ॥ दास्यामि प्रस्थकं त्वेकं । तुभ्यं
वांछितवस्तुनः ॥ प्रतिपन्नमनेनापि । सत्यंकारश्च ढौकितः ॥ २६ ॥ साक्षिणो विहिता लोका । भां-
डं दृष्ट्वाहृतं कृतं ॥ आगतः स्वगृहे श्रेष्ठी । प्रमोदभरनिर्भरः ॥ २७ ॥ अहो मे धन्यता येन ।

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

परश्रीः स्ववशे कृता ॥ द्वितीययामे यामिन्या । मंत्री लोभपरायणः ॥ २८ ॥ ताराचंद्रांतिकं प्राप्तो । निषण्णो बृहदासने ॥ भणितो मंत्रिणा श्रेष्ठि—स्ताराचंद्र निशम्यतां ॥ २९ ॥ एकदा दंडितो राज्ञा । कारागारे प्रवेशितः ॥ कथंचिदंतरं लब्ध्वा । नष्टोऽहं जीविताशया ॥ ३० ॥ मुच्यमानो मया दृष्टः । पोतः पुण्यैः पुराकृतैः ॥ तेनोत्तीर्य द्रुतं प्राप्तः । पुरे तारापुराभिधे ॥ ३१ ॥ तत्रापि मंदिरे गत्वा । तावकीने चिरं स्थितः ॥ अन्यदा भणितं राज्ञा । लक्षे दत्ते न ते भयं ॥ ३२ ॥ मयापि त्वत्पितुः पार्श्वा—ल्लक्षो निजकरे कृतः ॥ लोकाध्यक्षं मया मुक्तं । ग्रहणे दक्षिणेक्षणं ॥३३॥ लक्षं लात्वा समायात—स्तं दत्वा तोषितो नृपः ॥ भूयोऽपि स्वं पदं लब्धं । ते दरास्ते च मोचकाः ॥ ३४ ॥ अद्य त्वं पुनरायातो । मम पुण्यैः प्रणोदितः ॥ लात्वा लक्षं स्वकं भद्र । देहि मे दक्षिणेक्षणं ॥ ३५ ॥ दत्ते च लोचने मह्यं । कर्तव्यो भांडविक्रयः ॥ आहारे व्यवहारे च । न लज्जा गुणकारिणी ॥ ३६ ॥

एवमुक्त्वा गतो मंत्री । विषण्णः पोतनायकः ॥ चिंताचक्रसमारूढः । किंकर्तव्यसमाकुलः ॥ ॥ ३७ ॥ खिन्नोऽदीनमनाः श्रांतः । शून्यचेताः परिभ्रमन् ॥ उपानत्संधनाहेतो—श्चर्मकारापणे ग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तः ॥ ३८ ॥ दृष्टो मायामयेनैष । चर्मकारेण लोभिना ॥ नीतः सगौरवं गेहे । निषण्णो वरविष्टरे ॥ ३९ ॥ पृष्टश्च केन कार्येण । यूयमत्र समागताः ॥ श्रेष्ट्याह वर्ध्रसंधान—हेतवे वयमागताः ॥ ॥ ४० ॥ चर्मकारः पुनः प्राह । किं मे दास्यथ वेतनं ॥ श्रेष्ट्याह किं विचारेण । कुरु कर्म निराकुलः ॥ ४१ ॥ तोषवंतं करिष्यामि । भवंतं भूरिदानतः ॥ वर्ध्रसंधानतस्तेनो—पानहौ प्रगुणीकृतौ ॥ ४२ ॥ वेतने काकिणी दत्ता । न तुष्टश्चर्मकर्मकृत् ॥ रूपकार्धं ततो द्रम्म । एवं यावच्छतं गतः ॥ ४३ ॥ सहस्रलक्षकोटीभि—स्तेन तोषमगच्छता ॥ भणितश्चर्मकारेण । श्रेष्टिन् संस्मर जल्पितं ॥ ४४ ॥ तव पोतगते द्रव्ये । निःशेषे मम मंदिरे ॥ प्रविष्टे यदि मे तुष्टिः । संतुष्टिर्नान्यथा मम ॥ ४५ ॥ ममाधीनं धनं सर्वं । भवान् कर्मकरो मम ॥ न दातव्यं न भोक्तव्यं । रक्षणीयं प्रयत्नतः ॥ ४६ ॥ एवमुक्त्वा गतो गेहे । चर्मकारः प्रमोदभृत ॥ ताराचंद्रो निजं स्थानं । गच्छन् श्रांतः शनैः शनैः ॥ ४७ ॥ दृष्टो मदनमंजर्या । वेश्यया वरवेषया ॥ निरूपितश्चिरं कालं । साभिलाषेण चक्षुषा ॥ ४८ ॥ दास्या स्वगृहमानीतो । ततो मकरदंष्ट्रया ॥ स्नापितो भोजितो दत्त—तांबूलः सविलेपनं ॥ ४९ ॥ नक्तं मदनमंजर्या । सह सुप्तोऽनुरक्तया ॥ प्रजाते कथितं सर्वं । कु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ट्टिन्या तस्य हृष्टया ॥ ५० ॥ यथैषा मे प्रिया पुत्री । नाम्ना मदनमंजरी ॥ पुरुषद्वेषिणी भूत्वा । बभूव त्वयि तोषिणी ॥ ५१ ॥ तदिमां भवते दत्वा । संजाताहं निराकुला ॥ सुस्थितं जायते चेतो । योग्ययोगेन देहिनां ॥ ५२ ॥ उक्ता च सा यथा वत्से । त्वया भाव्यं विनीतया ॥ विनयो हि कारणं येन । सर्वदा सर्वसंपदां ॥ ५३ ॥ एवं च वसतस्तत्र । वव्रजुर्भूरिवासराः ॥ स्वर्नाथस्येव सौधर्मे । सततं हृष्टचेतसः ॥ ५४ ॥ अन्यदा च तया पृष्टः । कस्त्वं कस्मादिहागतः ॥ ततस्तस्यै स्ववृत्तांतः । सर्वस्तेन निवेदितः ॥ ५५ ॥ तयोक्तं विषदेषा ते । परं खेदो न संगतः ॥ आपदः संपदश्चैव । समीपस्थाः शरीरिणां ॥ ५६ ॥ एवमुक्त्वा गता तूर्णं । कुट्टिनी भानुमंदिरे ॥ ततस्त्रिलोचनं भट्टं । प्रणम्योवाच सा यथा ॥ ५७ ॥ समयोऽस्ति न वा विप्र । पृष्टव्यं मम किंचन ॥ स प्राह समयो दत्त—श्रमकृतश्रेष्टिमंत्रिणां ॥ ५८ ॥ एवं विज्ञाय सा सर्वं । कुट्टिनी स्वगृहे गता ॥ जामाता भणितो वत्स । स्वल्पं हि व्यसनं तव ॥ ५९ ॥ यामिन्याः प्रथमे यामे । व्यतीते रविमंदिरे ॥ प्रच्छन्नीभूय तिष्ठ त्वं । शृण्वन् श्रेष्ठ्यादिजल्पितं ॥ ६० ॥ तेनापि च कृतं सर्वं । यथादिष्टं तथैव तत् ॥ ततः श्रेष्ठी समायातो । यामिन्याः प्रहरे गते ॥ ६१ ॥ गात्रेणान्याणि कर्णांते ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

लोऽजनंदिः समागतः ॥ प्रवेशय द्रुतं वत्स । द्वाररक्षापरो भव ॥ ६२ ॥ प्रविश्य श्रेष्ठिना भानु—
रुपाध्यायश्च वंदितः ॥ आख्याय पूर्ववृत्तांतं । श्रेष्ठिनेदं प्रजल्पितं ॥ ६३ ॥ निरूपय निजां होरां ।
निर्वाहो भविता न वा ॥ निरूप्य भणितं तेन । भद्र होरा न भद्रिका ॥ ६४ ॥ यदि वक्ष्यसौ
देहि । मे मशकास्थिप्रस्थकं ॥ उत्तरानिलपूतानां । खंडितानामुदूखले ॥ ६५ ॥ तदा ते संकटं
मन्ये । मौनमेवात्र सुंदरं ॥ श्रेष्ठी प्राह किमीदृक्षा । बुद्धिस्तस्य भविष्यति ॥ ६६ ॥ इत्युक्त्वाथ
गतः श्रेष्ठी । ततो मंत्री समागतः ॥ गात्रेणावेदितः सोऽपि । प्रविष्टो भानुमंदिरे ॥ ६७ ॥ भानु
मंतं नमस्कृत्य । नतो भट्टस्त्रिलोचनः ॥ ततश्चाभाणि तेनैव—माशीर्वाददपुरस्सरं ॥ ६८ ॥—नंद
मंत्रिन् धनवान् भव? तुष्प्रसाद ततो मंत्री । लब्धाशीः शुद्धभूतले ॥ कथितश्च स्ववृत्तांतो । यो कृ-
तो वणिजा सह ॥ ६९ ॥ युष्मत्पादप्रसादेन । कल्याणं समुपस्थितं ॥ निरूपय निजां होरां । चि
त्तनिर्वृत्तिहेतवे ॥ ७० ॥ विभाव्य भणितं तेन । सखेदेन द्विजन्मना ॥ अपूर्वं यदि कल्याणं ।
मंत्रिन् होरा न सुंदरा ॥ ७१ ॥ तेनोचे त्वत्प्रसादेन । सर्वं सुस्थं भविष्यति ॥ इत्युक्त्वा च गतो
मंत्री । चर्मकारः समागतः ॥ ७२ ॥ गात्रेण भणितः सोऽपि । प्रविष्टो रविमंदिरे ॥ दूरस्थेन ततो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भानुः । शिरोनमनपूर्वकं ॥ १३ ॥ उपाध्यायोऽपि तेनैव । क्रमेणानेन वंदितः ॥ विप्रः प्रोवाच
भो भद्र । किमागमनकारणं ॥ १४ ॥ युग्मं ॥ सोऽवग् मयि कृपां कृत्वा । श्रूयतां कथयाम्यहं ॥
मया स्वबुद्धियोगेन । वचनछलनात्तथा ॥ १५ ॥ ताराचंद्राभिधः श्रेष्टी । छलितः सांप्रतं किल ॥
तत्प्रश्नार्थमहं नूनं । संप्राप्तो युष्मदंतिके ॥ १६ ॥ युग्मं ॥ सुप्रसादं मनः कृत्वा । स्वामिन् होरां नि-
रूपय ॥ विभाव्य भणितं तेन । रेरे होरा न सुंदरा ॥ १७ ॥ यदि वदत्यसौ श्रेष्टी । रत्नसारस्य
भूपतेः ॥ अपुत्रस्य सुतो जात—स्तेन तुष्टो जनोऽखिलः ॥ १८ ॥ त्वं तु तुष्टोऽथवा नेति । चर्म-
कार निवेदय ॥ यदि ब्रूषे न संतुष्ट—स्ततो भूमिपतेर्भयं ॥ १९ ॥ संतुष्टश्चेद्धनं नैव । लभ्यं सं-
तोष एव हि ॥ तत् श्रुत्वा चर्मकारोऽपि । निरानंदो गतो गृहे ॥ ८० ॥ विप्रस्य निष्टुरैर्वाक्यै—
र्दूनितो मानसे यतः ॥ वचसोऽनुकूलात्तुष्टि—रसत्यादपि जायते ॥ ८१ ॥ विवाहमंगलान्यत्र । प्र-
तीतानि निदर्शनं ॥ असत्यान्यपि लोकानां । जायंते प्रीतिहेतवे ॥ ८२ ॥ अथोद्गतो दिनाधीश—
स्ताम्रचूडैर्विवासिरे ॥ उत्थाय स्वक्रियाः कर्तुं । समारब्धो जनस्ततः ॥ ८३ ॥ ताराचंद्रोऽपि वेगेन ।
निर्गतो रविमंदिरात् ॥ गतो वेश्यागृहे तोषात् । किंचिदुत्फुल्ललोचनः ॥ ८४ ॥ ततोऽसौ रात्रिवृत्तां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं । पृष्टो मकरदंष्ट्रया ॥ तेनापि कथितः सर्वो । यथा दृष्टो यथा श्रुतः ॥ ८५ ॥ स तया भणि-
तो भद्र । तथा कार्यं त्वयाधुना ॥ यथा श्रुतं द्विजस्यांते । जयो येन प्रजायते ॥ ८६ ॥ एवमु-
क्त्वा गता वेश्या । पुरतो राजमंदिरे ॥ दृष्टा पृष्टा च भूपेन । किमागमनकारणं ॥ ८७ ॥ तयोक्तं
देव कार्येण । समयश्चेन्निवेद्यते ॥ अनुज्ञाता नरेंद्रेण । वेश्या वक्तुं प्रचक्रमे ॥ ८८ ॥ हाहा क-
ष्टं महीनाथ । महत्खेदस्य कारणं ॥ कुतोऽपि वणिजः कोऽपि । पोतेनात्र समागतः ॥ ८९ ॥ श्रे-
ष्ठिना मंत्रिणा चैवं । तथा चर्मकरेण च ॥ त्रिनापि कारणं नाथ । निर्नाथ इव खेद्यते ॥ ९० ॥
द्वीपस्य नगरस्यास्य । तवापि च महीपते ॥ अकीर्तिर्महती तेन । स्वामिन् विज्ञप्यसे मया ॥९१॥
श्रुत्वेदं भूभुजाभाणि । रेरे नगररक्षक ॥ गत्वा तं वणिजं लात्वा । शीघ्रमागच्छ मत्पुरः ॥ ९२ ॥
सोऽपि शीघ्रं समादाय । संप्राप्तो नृपतेः पुरः ॥ पुण्यानुभावतस्तस्य । सानुकूलो नृपोऽजनि ॥९३॥
नत्वा नृपं निषण्णोऽसौ । सानंदं वीक्ष्य भूभुजा ॥ पृष्टस्त्वं कुत्र वास्तव्यः । किमानीतं त्वया वद ॥
॥ ९४ ॥ तेनापि कथितं सर्वं । यथावृत्तं महीभुजे ॥ ततः श्रेष्ठी समाहूतो । भूमिपालेन सत्वरं ॥
॥ ९५ ॥ आयातस्तं तथा दृष्ट्वा । जातः साशंकमानसः ॥ विनम्य च महीनाथं । निषण्णश्चोचिता-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सने ॥ ९६ ॥ रोषारुणितनेत्रेण । साक्षेपं धरणीभृता ॥ भणितो भएयसे किंचि—च्छोभनंदे नि· शामय ॥ ९७ ॥ हे श्रेष्ठिन् श्रेष्ठकर्माणि । कुर्वन् श्रेष्ठी निगद्यते ॥ शेषस्तु नामतः श्रेष्ठी । भएय- ते न तु कर्मतः ॥ ९८ ॥ किमराजमिदं स्थानं । न्यायो वात्र न लभ्यते ॥ येन सर्वाणि कार्या· णि । क्रियंते स्वेछया त्वया ॥ ९९ ॥ विदेशिवणिजा सार्धं । विवादः केन हेतुना ॥ किं कुकर्म कृतं तेन । किंवानेन विनाशितं ॥ १०० ॥ श्रेष्ठ्याह श्रूयतां देव । सावधानेन चेतसा ॥ आति· थेयीं क्रियां कर्तु—मस्यावासे गता वयं ॥ १ ॥ संलापपूर्वकं पृष्टा । वयमेतेन सांजसं ॥ किमस्ति नास्ति वा मित्र । भांडानामत्र निर्गमः ॥ २ ॥ मयोक्तं दीर्घकालेन । ततो विषादिचेतसा ॥ स्या· मितास्येन संलप्त—मनेनेदं मुहुर्मुहुः ॥ ३ ॥ शीघ्रं निर्गममिछामो । न चिरं स्थास्नवो वयं ॥ म· याप्यागतचित्तेन । भणितो भद्र सांप्रतं ॥ ४ ॥ अस्त्युपायः परं मित्र । भवते यदि रोचते ॥ य· त्किंचिद्रोचते तुभ्यं । प्रतिभांमं तत्प्रस्थकं ॥ ५ ॥ भृत्वा शीघ्रं प्रयछामि । ततस्ते भांडनिर्गमः ॥ प्रतिपन्नमनेनापि । सत्यंकारश्च ढौकितः ॥ ६ ॥ युग्मं ॥ विधृताः साक्षिणो लोका । भांमं दृष्ट्वा· हृतं कृतं ॥ संव्यवहारमुछेति । निषिद्धा भांडविक्रये ॥ ७ ॥ न चौर्यं छलनं नैव । व्यवहारो मया

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

कृतः ॥ यद्यस्यापि निषेधोऽस्ति । वणिग्धर्मो गतस्तदा ॥ ८ ॥ राजाह संगतं ब्रूते । श्रेष्ठी न्यायानुगं वचः ॥ श्रेष्ठिना लभ्यमेवेदं । यद्ययं मन्यते वणिक् ॥ ९ ॥ ताराचंद्रस्ततो ब्रूते । सत्यं सर्वमिदं नृप ॥ गृह्णात्वयं निजं लभ्यं । युष्माकं चरणाग्रतः ॥ १० ॥ ददातु प्रस्थकं मह्यं । नव्यानां मशकास्थनां ॥ उत्तरानिलपूतानां । खंडितानामुदूखले ॥ ११ ॥ ततो दातुमशक्तेन । जजल्पे श्रेष्ठिना वचः ॥ विजितोऽहं महाभाग । जयस्त्वयि व्यवस्थितः ॥ १२ ॥ राजाध्यक्षं मया मुक्तः । सभा सर्वात्र साक्षिणी ॥ ततो मंत्री समाहूत—स्तदा सोऽपि समागतः ॥ १३ ॥ विनम्य च महीनाथं । निषसादोचितासने ॥ भणितो भूमिपालेन । मंत्रिन् मंत्रो न सुंदरः ॥ १४ ॥ विवादः केन कार्येण । संजातो वणिजा सह ॥ साधयागतमात्रेण । किंचानेन विनाशितं ॥ १५ ॥ व्यवहारनिरोधोऽपि । सहसैव कथं कृतः ॥ कथितं किं न नः कार्यं । स्वछंद इव लक्ष्यसे ॥ १६ ॥ मंत्र्याह श्रूयतां देव । सावधानेन चेतसा ॥ एकदाहं हताशेन । विधिनालं विडंबितः ॥ १७ ॥ इतो नीतः समाकृष्य । पुरे तारापुरेऽन्यदा ॥ अस्य पित्रा समं तत्र । जातं मे सख्यमुत्तमं ॥ १८ ॥ अन्यदा याचितो लक्षो । दत्तस्तेनापि सोंजसा ॥ तस्मै ग्रहणके दत्तं । दक्षिणाक्षि निजं मया ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १९ ॥ वयमत्र समायाताः । संहृतः सोऽपि वेधसा ॥ एषोऽप्यत्रागतो दृष्टः । सांप्रतं भणितो म· या ॥ २० ॥ दत्वा लक्षं जनाध्यक्षं । गृहेऽहं दक्षिणेक्षणं ॥ व्यापारोऽयं महाराज । संमतो व्यव· हारिणां ॥ २१ ॥ राज्ञोक्तं शोभनं वक्ति । मंत्री नीतिविचक्षणः ॥ तदहो मंत्रिणो दोषो । विद्य· ते नात्र कर्मणि ॥ २२ ॥

ताराचंद्रस्ततः प्राह । सत्यमेतन्न संशयः ॥ व्यवहारविलोपो हि । परिणामे न सुंदरः ॥ २३॥ संति प्रभूतलोकाक्षि—लक्षाणि ग्रहणे मम ॥ तन्मध्यमिलितं नैव । लप्स्यते तव लोचनं ॥ २४॥ तदर्पयाक्षि मे वामं । तत्तुल्यं वीक्ष्य येन ते ॥ आनीय च जनाध्यक्षं । दीयते दक्षिणेक्षणं ।२५। ततः संजातखेदेन । चिंतितं काणमंत्रिणा ॥ अहो मे मूर्खता येन । दीर्घं दृष्टं न चेतसा ॥२६॥ अथ संकटमायातं । लोकनीतिरियं पुनः ॥ सर्वनाशे समुत्पन्ने । ह्यर्धं त्यजति पंडितः ॥ २७ ॥ नि· र्जितोऽहं महाभाग । बुद्धिस्ते भद्र भद्रिका ॥ राजाध्यक्षं मया मुक्तो । व्यवहारं निजं कुरु ॥२८॥ चर्मकारः समानीतो । भयभीतमना नरैः ॥ ब्रूहि रे वणिग्भांडस्य । व्यापारः किं निवारितः ।२९। तेनापि कथितं सर्वं । यत्कृतं यच्च भाषितं ॥ सभ्यैर्भाणि निर्दोष—श्चर्मकारोऽपि लक्ष्यते ॥३०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ताराचंडोऽप्युवाचेदं । मायामथ निशामय ॥ यच्च लोकान्मयाश्रावि । वचो विस्मयकारकं ॥ ३१ ॥
रत्नसारनरेंद्रस्य । निष्पुत्रस्य सुतोऽजनि ॥ तेन तुष्टो जनः सर्व—स्त्वं तुष्टः किं न कथ्यतां ।३२।
स प्राह सुतरां तुष्ट—स्तर्हि याहि निजे गृहे ॥ न ते किंचिच्च दातव्यं । परितोषो हि वेतनं ॥
॥ ३३ ॥ ताराचंडो नरेंद्रस्य । प्रणम्य पदपंकजं ॥ पाशत्रयविनिर्मुक्तो । व्यवहारपरोऽजनि ॥ ३४॥
स्वल्पेनापि च कालेन । विक्रीतं वणिजा निजं ॥ भांडं च भूरिलाभोऽपि । लब्धः पुण्यानुभाव-
तः ॥ ३५ ॥ पृष्टो राजा भृतो पोतः । प्रतिभांडेन सर्वतः ॥ गत्वा मकरदंष्ट्रापि । पृष्टा गमनहेतवे
॥ ३६ ॥ रुद्धशब्दं रुदंती सा । लोचने गलदश्रुणी ॥ बिभ्रती वक्तुमारब्धा । यथेयं मम पुत्रिका
॥ ३७ ॥ प्राणेभ्योऽपि प्रिया वत्स । दत्ता मदनमंजरी ॥ आकृष्टयुवभृंगौघा । ह्याम्रडोरिव मंजरी ॥
॥ ३८ ॥ भद्रेण भवता भाव्यं । भद्रिका सा विशेषतः ॥ प्रतिकूलेऽनुकूला ये । स्वल्पास्ते सज्ज-
ना जनाः ॥ ३९ ॥ मयि स्नेहो न मोक्तव्य—स्ताराचंद्र सदा त्वया ॥ यत्प्रतिपन्ननिर्वाहं । कुर्वते
विरला जनाः ॥ ४० ॥ उक्तं च—बहुवल्लहेवि कय—विप्पिएवि अन्नन्नबद्धरागेवि ॥ जंमि मणो
नियत्तइ । सो नेहो परिचत्त सेसो ॥ ४१ ॥ ताराचंड चिरं जीव । यावच्चंद्रदिवाकरौ ॥ स्मर्तव्याहं

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

सदाकालं । वत्से मदनमंजरी ॥ ४२ ॥ इत्युक्ते दंपती पोते । समारूढौ जनाकुले ॥ पोतोऽपि गं·
तुमारब्धो । गरुत्मानिव वेगतः ॥ ४३ ॥ स्तोकैरेव दिनैस्तूर्णं । पूर्वपुण्यानुजावतः ॥ प्राप्तो जल·
निधेस्तीरे । पुरे तारापुराजिधे ॥ ४४ ॥ नानाक्रयाणकाकीर्णं । श्रुत्वा तं पोतमागतं ॥ आनंदि·
तो नराधीशो । नागरीको जनस्तथा ॥ ४५ ॥ ततस्तीरे धृतः पोतो । लंबिता नंगरा द्रुतं ॥ उ·
त्तीर्णश्च ततः पोता—ताराचंद्रो जयान्वितः ॥ ४६ ॥ ततः पणांगनावृंदैः । सानंदैः कृतमंगलः ॥
अनेकैर्बंदिवृंदैश्च । स्तूयमानगुणोत्करः ॥ ४७ ॥ मानयन्मान्यलोकौघं । नमनीयान्नमन्नसौ ॥ सं·
जाषयंश्च संजाष्यान् । दानं ददत्तदर्थिनां ॥ ४८ ॥ संप्राप्तो निजगेहं च । बद्धबंधुरतोरणं ॥ निज·
स्य बंधुवर्गस्य । सोत्कंठो मिमिले स च ॥ ४९ ॥ विजिर्विशेषकं ॥ पुष्पतांबूलवस्त्राद्यैः । सन्मा·
नितो निजो जनः ॥ गतश्च निजके स्थाने । ताराचंडविसर्जितः ॥ ५० ॥ कृत्वा स्नानादिकं कृत्यं
। ताराचंडोऽपि सत्वरं ॥ गृहीत्वा प्राभृतं प्राज्यं । जगाम नृपमंदिरं ॥ ५१ ॥ दृष्टो राजा ततस्तस्मै
। ढौकितं प्राभृतं तथा ॥ प्रोक्तश्च निजवृत्तांतः । स्वपोतागमनादिकः ॥ ५२ ॥ उच्छुल्कश्च कृतो
राज्ञा । ततो वेलाकुले गतः ॥ उत्तारितं ततो जांमं । नीतं च निजमंदिरे ॥ ५३ ॥ सर्वस्यापि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वलोकस्य । दातव्यं च ददौ मुदा ॥ ततोऽसौ बुभुजे भोगान् । प्रमोदभरनिर्भरः ॥ ५४ ॥ सार्धं निजकभार्याभ्यां । पूर्णाखिलमनोरथः ॥ धर्मध्यानरतो नित्यं । संतोषैकमनाः खलु ॥ ५५ ॥ विज्ञायेदमसंतोषः । सर्वदा त्यज्यतां जनाः ॥ विधीयतां च संतोषः । सर्वकल्याणकारकः ॥ ५६ ॥ इति संतोषाधिकारे ताराचंद्राभिधश्रेष्ठिकथा परिसमाप्ता. ॥ इति पंचमोऽधिकारः समाप्तः ॥

अथ संसाराधिकारः षष्टः प्रारभ्यते, अस्य चायमभिसंबंधः—पूर्वं संतोषवतां प्रशंसा कृता, संतोषत्वं च संसारासारताभावनात एव जायते, इत्यतः संसारासारतात्र प्रोच्यते, इत्यनेन संबंधोऽयं व्याख्यायते, तत्रैते श्लोकाः—

॥ मूलम् ॥—यौवनं जरयाघ्रातं । रूपं रोगैरभिद्रुतं ॥ जीवितं यमराजस्य । वशवर्ति क्व सारता ॥ १ ॥ पर्वता अपि शीर्यंते । शुष्यंति च जलाशयाः ॥ यत्र तत्रान्यवस्तूनां । सारता कुत्र कल्प्यते ॥ २ ॥ एवं सांसारिकाः सर्वे । भावा वैरस्य हेतवः ॥ रंभास्तंभोपमाः प्रायो । निस्साराः क्षणभंगुराः ॥ ३ ॥ जीवेनानंतशः क्षुण्णे । चतुर्गतिगतागतैः ॥ तथाप्यलब्धपर्यंते । ह्यनादौ भवसागरे ॥ ४ ॥ अलब्धांतःपरिस्पंदे । दुःखश्वापदसंकुले ॥ व्याधिजन्मजरामृत्यु—वारिवारभयंकरे ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

॥ ५ ॥ प्रमादमदिरामूढो । विचेता नष्टसत्स्मृतिः ॥ कः प्राणी पतितो नात्र । व्यूढो विषयवीचिभिः ॥ ६ ॥ त्रिभिर्विशेषकं ॥ नानायोनिसमाकीर्णे । जीवः कर्मविनिर्मितां ॥ त्रैलोक्यरंगे नटव—न्न- त्तेऽनेकस्वरूपतां ॥ ७ ॥ क्वचिन्नारकभावेन । क्वचित्तिर्यग्योनिकः ॥ क्वचिच्च जायते मर्त्यो । दिवि देवः कदाचन ॥ ८ ॥ क्वचिद्राजा क्वचिद्रंकः । क्वचिद्दुःखी क्वचित्सुखी ॥ क्वचिन्निंद्यः क्वचिद्वंद्यः । क्वचिद् ज्ञानी क्वचिज्जडः ॥ ९ ॥ सुरूपः सुभगः क्वापि । कुरूपो दुर्भगः क्वचित ॥ क्वचिद् द्वेष्यः प्रियः क्वापि । जीवो जगति जायते ॥ १० ॥ प्रियाप्रयोजने केचि—त्केचिच्चापत्यचिंतया ॥ नी- रोगताकृते केचित् । केचिद्धनजिगीषया ॥ ११ ॥ खिद्यंते सर्वदा जीवा । असंपूर्णमनोरथाः ॥ रा- गद्वेषग्रहग्रस्ता । विवदंतः परस्परं ॥ १२ ॥ शुक्रशोणितसंभूते । सप्तधातुमलाश्रये ॥ त्वङ्मात्रप्रावृ- ते पुंसां । काये का रमणीयता ॥ १३ ॥ रमणी या रमणीया । निगद्यते काममोहितमनोभिः ॥ तस्या अपि निस्सारं । शरीरकं पूतिमलगंधि ॥ १४ ॥ संसारासारता येषा—मेषा नो मनसि स्थि- ता ॥ भ्रमंति ते सदा त्रस्ता । भवारण्ये मृगा यथा ॥ १५ ॥ जनयित्री जनी यत्र । जनी च ज- निका भवेत् ॥ कुबेरदत्तया दत्तो । दृष्टांतोऽत्र जिनागमे ॥ १६ ॥ संसारासारतामेनां । विभाव्य

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

निजमानसे ॥ ते धन्या येऽत्र संसारे । कुर्वते न रतिं जनाः ॥ १७ ॥

व्याख्या—इति श्लोका अष्टादश प्रायः पाठसिद्धा एव, तथापि किंचिद्व्याख्यायते—तत्र यौवनं जरयाघ्रातमिति तरुणत्वं वृद्धत्वेन क्रोडीकृतं, रूपं रोगैरभिद्रुतमिति सुगमं, जीवितं यमराजस्य वशवर्तीत्यायुष्कं मृत्योरायत्तं, अतः कारणात्क सारता, न कुत्रापीत्यर्थः. पर्वता अपि शीर्यंते इति श्लोकः सुगमः, एवं सांसारिकाः सर्वे भावाः, इत्येवममुना प्रकारेण सांसारिकाः संसारोद्भवाः सर्वे समस्ता भावाः पदार्था वैरस्यहेतव इति विरसताकारणं, रंभास्तंभोपमा इति कदलीस्तंभसदृशाः प्रायो निःसारा इति, प्रायेण साररहिताः, क्षणभंगुरा इति क्षणविनश्वराः. जीवेनानंतशः क्षुण्ण इत्यादिश्लोकत्रयः, तत्र कः प्राणी पतितो नावगूढो विषयवीचिभिरिति संबंधः. जीवेन जंतुनानंतशोऽनंतवाराः क्षुण्णे व्याप्ते, चतुर्गतिगतागतैरिति नारकतिर्यग्नरामरलक्षणे गतिचतुष्टये गमनागमनैः, तथापि तेनापि प्रकारेणानंतकृत्वः परिभ्रमणलक्षणेनाप्राप्तावसानेऽनादावादिरहिते भवसागरे संसारसागरेऽलब्धांतःपरिस्पंदेऽप्राप्तमध्यविभागे, दुःखश्वापदसंकुलेऽशर्मदुष्टजलचरजीवाकुले, व्याधिजन्मजरामृत्युवारिवारभयंकरे इति व्याधिजन्मजरामृत्यव एव वारिवारो जलव्रातस्तेन भयंकरे भयानके,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रमादमदिरामूढ इति प्रमाद एव मदिरा सुरा तया मूढो विगतकृत्याकृत्यविवेको, विचेता नष्टचित्तः, नष्टसत्मतिर्नष्टसन्मार्गः, कः प्राणी पतितो नात्र संसारे? व्यूढः प्रेरितो विषयवीचिभिः शब्दादिविषयकल्लोलैः? अपितु सर्वोऽपीत्यर्थः. तथा नानायोनिसमाकीर्णेऽनेकजीवोत्पत्तिस्थानाकुले जीवः प्राणी कर्मनिष्पादितां त्रैलोक्यरंगे त्रिभुवनरंगभूमौ, रंगश्च नर्तनस्थानं, नटवन्नट इव धत्ते धारयत्यनेकरूपतां नानाप्रकाररूपतामिति. एतदेव व्यनक्ति, कचिन्नारकभावेनेत्यादिश्लोकास्त्रयः सुगमा एव. किंच संसारवर्तिनो जीवाः सर्वदा दुःखिता एवेति दर्शयन्नाह—प्रियाप्रयोजने केचिदित्यादिश्लोकास्त्रयः सुगमा एव. तथा शरीरेषु सारताबुद्धिं निरस्यन्नाह—शुक्रशोणितसंभूत इत्यादि, शुक्रं पितुः संबंधिरेतः, शोणितं मातुः संबंधि रक्तं, ताभ्यां संभूते निष्पन्ने सप्तधातुमलाश्रये त्वग्रक्तमांसमेदास्थिमज्जाशुक्रलक्षणमलस्थाने त्वङ्मात्रावृते छविमात्राच्छादिते पुंसां पुरुषाणां काये शरीरे का? न काचिदित्यर्थः, रमणीयता रम्यत्वमिति. तथा रमणीया रम्या रमणी कामिनी या यका निगद्यत उच्यते काममोहितमानसैस्तस्या अपि चारुत्वेनाभिमताया अपि रमण्या निःसारं साररहितं पूतिमलगंधि कुत्सितमलयुक्तं. अथोपसंहरन्नाह—संसारासारता येषामित्यादिश्लोकास्त्रयः सुगमा एव.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुबेरसेनादृष्टांतः पुनरयं—अस्तीह भारते क्षेत्रे । धरारामावतंसकः ॥ सरःसरित्पुरग्राम—विहारारामराजितः ॥ १ ॥ सूरसेनाभिधो देशो । जनतानंदकारकः ॥ प्रमोदकारकानेक—वस्तुस्तोमसमाकुलः ॥ २ ॥ युग्मं ॥ बभूव तत्र विख्याता । कुबेरपुरसन्निभा ॥ नित्यं पुण्यजनाकीर्णा । मथुरानामसत्पुरी ॥ ३ ॥ रेजुर्यत्र सपद्मानि । मनोहारीणि सर्वतः ॥ मध्ये शुभ्रोच्चगेहानि । बहिश्चारुसरांसि च ॥ ४ ॥ प्रियालपनसाराणि । सुमनःशोभितानि च ॥ यत्रांतः साधुवृंदानि । काननानि बहिर्बभुः ॥ ५ ॥ परं प्रार्थयते लोकं । यत्र साधुजनो भृशं ॥ दुःखैरेव गुणो यत्र । दोषाय खलु कल्प्यते ॥ ६ ॥ गुणस्य बाधिका वृद्धि—र्यत्रेष्टा शब्दशासने ॥ आगमस्यापि नित्यत्वं । यत्र तत्रैव संमतं ॥ ७ ॥ स्त्रीलोचनेषु लोलत्वं । कृशत्वं यदि विग्रहे ॥ पक्षपातः पतंगेषु । पत्रचिंता च नारीषु ॥ ८ ॥ कामिनां दूतसंचारो । रात्रेर्दोषाभिधेयता ॥ भ्रूलतासु विलासिन्याः । कौटिल्यं यत्र बिभ्रती ॥ ९ ॥ आसीत्तत्र विशालाक्षी । विदग्धा कामिनां प्रिया ॥ नाम्ना कुबेरसेनेति । सुप्रसिद्धा विलासिनी ॥ १० ॥ या सर्वकामशास्त्रेषु । सकलासु कलासु च ॥ निःशेषरतचेष्टासु । प्राविण्यमधिकं दधौ ॥ ११ ॥ शृंगाररसभृंगारो । विलासरसकूपिका ॥ सद्भावपण्यपयःकुंभं । सारसौंदर्यमं-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दिरं ॥ १२ ॥ सच्चंदनद्रुमालीव । भुजंगौघनिषेविता ॥ प्रावृट्कालनभःश्रीवद्—घनोत्तुंगपयोधरा ॥ १३ ॥ भुजंगराजराजीव । महाभोगविराजिनी ॥ मीनकेतुपताकेव । जगन्मोहविधायिनी ॥१४॥ समग्रकामशास्त्रोक्ता—लिंगनादिगुणव्रजे ॥ सर्वातिशायिनैपुण्यं । दधार चतुराननना ॥ १५ ॥ चतुर्भिः कलापकं ॥

एवं वेश्याजने प्राज्यं । प्राधान्यं प्रवितन्वती ॥ मान्या सा राजलोकस्य । पौरलोकस्य चाधिकं ॥ १६ ॥ नरेंद्रामात्यपुत्राद्यै—स्त्यागिभिर्भोगिभिः सह ॥ भुंजाना सुंदरान् भोगान् । निन्ये कालं यथासुखं ॥ १७ ॥ युग्मं ॥ अन्यदा जठरे तस्या । गर्भः प्रादुरभूत्किल ॥ तेनासौ वर्धमानेन । नितरां पीडिता सती ॥ १८ ॥ स्वमातुः कथयामास । यथा मातर्ममाधुना ॥ संजाता दारुणा पीडा । जठरांतः सुदुःसहा ॥ १९ ॥ युग्मं ॥ तयाप्याशु समाहूय । वैद्यस्यासौ प्रदर्शिता ॥ तेनापि क्षणमालोक्य । पृष्टं रोगस्य कारणं ॥ २० ॥ यथेयं किं सदा भुंक्ते । पिबत्यंबु च कीदृशं ॥ स्थाने वा कीदृशे शेते । व्यापारं वा करोति कं ॥ २१ ॥ इत्यादि प्रश्निते कृत्स्ने । तेन वैद्येन मूलतः ॥ माता कुबेरसेनाया—स्तस्मै सर्वं न्यवेदयत् ॥ २२ ॥ ततश्चासौ परामृश्य । कराग्रेण सम·

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

ततः ॥ सम्यक्सम्यक् तदुदरं । गर्भदोषमबुध्यत ॥ २३ ॥ ततो निश्चित्य तां पीडां । बभाणैवं भि-
षग्वरः ॥ यथास्या जठरे पीडा । युग्मगर्भसमुद्भवा ॥ २४ ॥ तस्मादस्यै ददामीदं । नानाद्रव्यं
शुभौषधं ॥ मनाक्संजायते येन । शरीरेऽस्याः सुखासिका ॥ २५ ॥ प्रदत्तं च तकं तेन । वैद्येन
विधिपूर्वकं ॥ ईषत्कुबेरसेनायाः । उपशांता च वेदना ॥ २६ ॥ ततः सन्मान्य तांबूल—पुष्पादि-
वरवस्तुभिः ॥ सस्नेहं सप्रणामं च । तया वैद्यो विसर्जितः ॥ २७ ॥ ततश्च कुट्टिनी प्राह । यथा
वत्से व्यथाकरं ॥ गालयामि प्रयोगेण । युग्मगर्भमिमं तव ॥ २८ ॥ अन्यथा तेऽस्य गर्भस्य । व-
र्धमानस्य दोषतः ॥ अत्यंतं दारुणा पीडा । भविष्यति सुदुःसहा ॥ २९ ॥ अतोऽयं गाल्यतां ग-
र्भः । क्रियतां मामकं वचः ॥ यद्यस्ति जीविताशा ते । नोचेत्पुत्रि विनंक्ष्यसि ॥ ३० ॥ कुबेरसे-
नयापीदं । श्रुत्वा मातुः प्रभाषितं ॥ दयार्द्रचित्तयावाचि । मातर्भाणीर्मातरीदृशं ॥ ३१ ॥ महापात-
कमेतद्धि । विशिष्टजननिंदितं ॥ यद्गर्भपातनं नाम । भ्रूणहत्येति तद्विदुः ॥ ३२ ॥ तस्मान्न गाल-
याम्येनं । गर्भं प्राणात्ययेऽपि हि ॥ किं भूरिजल्पितेनाथ । यद्भाव्यं तद्भविष्यति ॥ ३३ ॥ अथो-
वाह तकं गर्भं । कुर्वंतमपि वेदनां ॥ दिवसेषु च पूर्णेषु । सासूत युगलं वरं ॥ ३४ ॥ दारको दा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रिका चेति । सुरूपं डिंभकद्वयं ॥ कदलीगर्भसंकाशं । सर्वावयवसुंदरं ॥ ३५ ॥ अथाज्ञापि हि-
तार्थिन्या । जनन्या सा निजांगजा ॥ यथा डिंभकयुग्मं ते । नेदं सुंदरि सुंदरं ॥ ३६ ॥ यतस्ते
जनिता तेन । गर्भस्थेनापि वेदना ॥ अत्यंतं दुःसहा वत्से । तदिदं त्यज्यतामिति ॥ ३७ ॥ त-
यावाचि करिष्यामि । जननि तावकं वचः ॥ किंतु प्रपालयाम्येत—त्कतिचिद्दिवसानहं ॥ ३८ ॥
दशाहोत्सवमेतस्य । तावदंब करोम्यहं ॥ पश्चाच्च पूरयिष्यामि । सर्वांस्तव मनोरथान् ॥ ३९ ॥ एवं
तर्हि विधेहीति । प्रतिपन्ने तया ततः ॥ तदपत्ययुगं सापि । पालयामास यत्नतः ॥ ४० ॥ समग्रा-
भिष्टसंपत्त्या । हृद्यैर्मितहिताशनैः ॥ पालयंत्यास्ततस्तस्या । दिनानां दशकं गतं ॥ ४१ ॥ अथाका-
रि तयोः कृत्यं । दशाहोत्सवसंभवं ॥ सर्वं सर्वजनानंद—कारकं सुमहर्द्धिभिः ॥ ४२ ॥ ततः कुबेर-
दत्तेति । नामांकं मुद्रिकाद्वयं ॥ कारयित्वा तया बद्धं । कंठे बालकयोस्तयोः ॥ ४३ ॥ ततश्च चा-
रुमंजूषा । प्रत्यग्रा प्रगुणीकृता ॥ विस्तीर्णमध्यभागोरु—विन्यस्तमृदुतूलिका ॥ ४४ ॥ तूलिकोपरि
तद्युग्मं । शायितं च ततस्तया ॥ अश्रुपातं विमुंचंत्या । वरवस्त्रसमावृतं ॥ ४५ ॥ ततश्च पिहितद्वा-
रा । सा मंजूषा सुसंवृता ॥ नीरंध्रीकृतसर्वांगा । ताडिता बद्धशृंखला ॥ ४६ ॥ ततश्चासौ समुत्पा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ष्य । नीत्वा पुंभिः कृतादरैः ॥ यमुनायां महानद्यां । संध्याकाले प्रवाहिता ॥ ४७ ॥ वीचिवन्नीरपूरेण । महावेगप्रवाहिणा ॥ ऊह्यमानाथ सा प्रातः । प्राप्ता सौरिकपत्तने ॥ ४८ ॥ अथ शरीरचिंतार्थ—मागतौ सरितस्तटे ॥ सौरिकपुरवास्तव्यौ । श्रेष्ठिनौ श्रेष्ठचेष्टितौ ॥ ४९ ॥ नाम्नैको यक्षदत्ताख्यो । महेश्वराभिधोऽपरः ॥ नदीतीरोपकंठं च । यावच्छौचार्थमागतौ ॥ ५० ॥ तावत्तौ नीरपूरेण । प्रेर्यमाणां मनोहरां ॥ दृष्टवंतौ नदीमध्ये । मंजूषां मंक्षुगामिनीं ॥ ५१ ॥ विनिर्विशेषकं ॥ समीक्षमाणयोरेव । तयोस्तत्र सकौतुकं ॥ हस्ताभ्यासे क्षणादेव । वेगेनैव समाययौ ॥ ५२ ॥ ततस्ताभ्यां धृता शीघ्रं । गच्छंती करपल्लवैः ॥ नीता च तीरदेशे सा । तथोद्घाट्य निरीक्षिता ॥ ॥ ५३ ॥ ततोऽवलोकितं ताभ्यां । तन्मध्ये बालकद्वयं ॥ कंकेल्लिपल्लवच्छायं । सुकुमारशरीरकं ॥ ॥ ५४ ॥ देहोद्भूतप्रभाजालै—रुद्योतयद्दिशो दश ॥ कुर्वद्रूपातिरेकेण । लोकानां लोचनोत्सवं ॥ ५५ ॥ ततो महेश्वरः प्राह । तद्रूपाक्षिप्तमानसः ॥ भो श्रेष्ठिन् पश्य पश्येदं । सुंदरं डिंभकद्वयं ॥ ५६ ॥ अहो लावण्यसंपूर्णो । रूपवानेष दारकः ॥ अहो समग्रसौंदर्य—राशिरेषापि दारिका ॥ ॥ ५७ ॥ अथोक्तं यक्षदत्तेन । केनापीदं समुज्झितं ॥ म्रियतामापदं वापि । प्राप्नुयादिति वांछया ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५८ ॥ अतोऽनयोर्गृहाणैकं । यत्तव प्रतिभासते ॥ गृह्णाम्यहं द्वितीयं तु । श्रेष्ठिन् यत्त्वं विमुंच-
सि ॥ ५९ ॥ ततो महेश्वरः प्राह । बालिका मे भवत्विति ॥ बालकं त्वं गृहाणेम—मेवमस्त्विति
सोऽवदत् ॥ ६० ॥ तल्लाभहृष्टसंतुष्टौ । लात्वा तड्डिंभयुग्मकं ॥ तदालोकनसन्निष्ठौ । गतौ गेहे
निजे निजे ॥ ६१ ॥ दारको यक्षदत्तेन । स्वभार्यायै समर्पितः ॥ अयं पुत्रस्तवेत्युक्त्वा । यत्नतः
पाल्यतामिति ॥ ६२ ॥ महेश्वरोऽपि सस्नेह—मर्पयामास दारिकां ॥ गेहिन्यास्तव पुत्रीयं । यत्नेन
प्रतिपालय ॥ ६३ ॥ अथेदं वर्धते तत्र । धात्रीपंचकलालितं ॥ क्षीरपानाभिषेकांक—धारणक्रीड-
नादिभिः ॥ ६४ ॥ सद्भोज्यैर्लेह्यपेयाद्यै—र्नानालंकरणादिभिः ॥ तस्यैवं लाल्यमानस्य । वर्षाण्य-
ष्टौ क्रमाद्ययुः ॥ ६५ ॥ ततः शब्दादिविद्यानां । ग्रहणाय युगं ततः ॥ पुष्पालंकारवस्त्राद्यैः । प्रवि-
भूषितविग्रहं ॥ ६६ ॥ श्रेष्ठिभ्यां कृतपूजस्य । वरवस्त्रफलादिभिः ॥ एकस्यैव च सानंद—मुपाध्या-
यस्य ढौकितं ॥ ६७ ॥ युग्मं ॥ एकत्रैव प्रयत्नेन । गृह्णतः सकलाः कलाः ॥ परां कोटिं समारूढा ।
तस्य प्रीतिः परस्परं ॥ ६८ ॥ एवं स्नेहानुरक्तस्य । पठतः क्रीडतस्तथा ॥ क्रमेणोपात्तविद्यस्य । सं-
जातं नवयौवनं ॥ ६९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ महेश्वरेणोक्तं । पश्याहो यक्षदत्तक ॥ परस्परमिदं युग्मं । जातं प्रेमानुरक्तकं ॥ ७० ॥
अयं कुबेरदत्ताख्यः । पुत्रस्तेऽतीववल्लभः ॥ मत्पुत्रिकावियोगेन । प्राणान्मुञ्चति निश्चितं ॥ ७१ ॥
इयं कुबेरदत्तापि । मत्पुत्री बंधुवत्सला ॥ निजात्मनो वियोगेन । नूनं प्राणैर्विमुच्यते ॥ ७२ ॥
तदहो यक्षदत्तात्र । संगतमिदमेव हि ॥ अन्योन्यमनयोरेव । यद्विवाहो विधीयते ॥ ७३ ॥ अथा-
नंदितचित्तोऽसौ । यक्षदत्तोऽब्रवीदिदं ॥ साधु साधु त्वया प्रोक्तं । श्रेष्ठिंस्तत्क्रियतामिति ॥ ७४ ॥
ततश्चोभयसंमत्या । निजकापत्ययोस्तयोः ॥ कारितं सर्वसामग्र्या । पाणिग्रहणमंगलं ॥ ७५ ॥ अ-
थैवं तिष्ठतोस्तत्र । संपादितविवाहयोः ॥ अन्योन्यं परमप्रेम—तंतुनिर्बद्धचेतसोः ॥ ७६ ॥ नित्यं
नानाप्रकाराभिः । क्रीडाभिः क्रीडतोरलं ॥ संपद्यमाननिःशेष—तुंगभोगोपभोगयोः ॥ ७७ ॥ अ-
खंडसुखसंदोह—समुद्रांतर्निमग्नयोः ॥ अतियाति तयोः कालः । स्वर्गे स्वर्गौकसामिव ॥ ७८ ॥
त्रिभिर्विशेषकं ॥ अन्यदा द्यूतसक्ताभ्यां । ताभ्यां ग्रहणके किल ॥ संचारिते स्वनामांके । स्वे मु-
द्रिके परस्परं ॥ ७९ ॥ ततः कुबेरदत्तोऽसौ । ददर्शाथ कथंचन ॥ सत्कां कुबेरदत्ताया—स्तां ना-
मांकितमुद्रिकां ॥ ८० ॥ ततो विचिंतयामास । यथेयं ननु मुद्रिका ॥ मन्मुद्रिकासमानैव । वर्णा-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

कघटनादिभिः ॥ ७१ ॥ भाव्यं च कारणेनात्र । ननु केनापि निश्चितं ॥ अतः पृछामि गत्वाहं । वृत्तांतं पितरं निजं ॥ ७२ ॥ संचिंत्यैवं निजे चित्ते । द्यूतक्रीडां विमुच्य च ॥ गत्वा पितुः समीपेऽसौ । तं वृत्तांतमपृछत ॥ ७३ ॥ यक्षदत्तोऽपि निर्बंधं । ज्ञात्वा तस्या निवर्तकं ॥ मूलादारज्य निःशेषं । तं वृत्तांतं न्यवेदयत ॥ ७४ ॥ ततः श्रुत्वा पितुः पार्श्वे । सर्वं व्यतिकरं निजं ॥ पाणिग्रहणपर्यंतं । मंजूषादर्शनादिकं ॥ ७५ ॥ स एवं चिंतयामास । नूनमेषा मम स्वसा ॥ नार्याभावोऽपि नैवास्या—मभून्मम कदाचन ॥ ७६ ॥ तदेव सुंदरं जातं । यदकृत्यं न सेवितं ॥ मया मोहविमूढेन । सहोदर्या तया सह ॥ ७७ ॥ अहो दुरंत एवायं । घोरः संसारसागरः ॥ यन्मध्यवर्तिनः सत्वाः । प्राप्नुवंति विडंबनां ॥ ७८ ॥ मातापि वत्सला भूत्वा । भार्या यत्र प्रजायते ॥ भार्यापि मातृभावेन । धिक्संसारविडंबनां ॥ ७९ ॥ स्वसा भूत्वा जनी यत्र । जनी भूत्वा स्वसा भवेत् ॥ माता सुता सुता माता । यत्रासौ निर्गुणो भवः ॥ ८० ॥ एवमादि विचिंत्यासौ । संसारासारतां गतः ॥ गत्वा कुबेरदत्तायाः । सर्वमाख्यद्यथा श्रुतं ॥ ८१ ॥ उक्तवांश्च यथा भद्रे । खेदं चेतसि माकृथाः ॥ यत ईदृश एवायं । नानानर्थभृतो भवः ॥ ८२ ॥ इत्यादिभिः प्रियैर्वाक्यै—र्भववैरस्य

दीपकैः ॥ प्रतिबोध्य पितुर्गेहे । प्रेषयामास तामसौ ॥ ९३ ॥ ततश्च पितरं पृष्ट्वा । द्रव्योपार्जनहेतवे ॥ कृत्वावशेषसामग्रीं । जगाम मथुरां पुरीं ॥ ९४ ॥ व्यवहरन्नसौ तत्र । विविधक्रयविक्रयैः ॥ प्रभूतमर्जयामास । द्रव्यं पुण्यानुभावतः ॥ ९५ ॥ अथ कुबेरसेनाख्यां । वेश्यामपश्यदन्यदा ॥ ख्यातकीर्तिं स्वकामेव । जननीं पूर्ववर्णितां ॥ ९६ ॥ ततस्तस्याः सुरूपत्वा—त्कामाकुलितमानसः ॥ काले गछति तामेव । चक्रे च स्वपरीग्रहे ॥ ९७ ॥ तत्रैव विदधत्सर्वं । भोजनस्नपनादिकं ॥ पुत्रमुत्पादयामास । तस्यामेव स्वमातरि ॥ ९८ ॥ इतश्च—

अथ कुबेरदत्तापि । वसतिस्म पितुर्गृहे ॥ कुर्वती धर्मकार्याणि । यथाकामं यथाबलं ॥ ९९ ॥ तमेव निजवृत्तांतं । चिंतयंती दिवानिशं ॥ संसारस्य च वैरस्यं । भावयंती क्षणे क्षणे ॥ १०० ॥ शुश्राव सुव्रताख्याया । गणिन्याश्चरणांतिके ॥ सर्वज्ञभाषितं धर्मं । भावतः प्रतिवासरं ॥ १ ॥ अन्यदा जातवैराग्या । संसारोछेदकारणं ॥ गणिन्याः सुव्रताख्यायाः । समीपे व्रतमाददे ॥ २ ॥ ततः श्रुतमधीयाना । संवेगातिशयादियं ॥ षष्टाष्टमादिकं तेपे । तपस्तीव्रं सुदुष्करं ॥ ३ ॥ एवं सर्वा प्रकुर्वत्याः । सामाचारीं यथोदितां ॥ संसारासारतां चैव । भावयंत्या विशेषतः ॥ ४ ॥ वर्धमानशु-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

त्यंत—परिणामातिरेकतः ॥ क्षयोपशमतश्चैव । सदाचरणकर्मणः ॥ ५ ॥ तस्याः कुबेरदत्तायाः ।
विशिष्टगुणहेतुकं ॥ अवधिज्ञानमुत्पन्नं । रूपिवस्तुप्रकाशकं ॥ ६ ॥ तेन प्रलोकयंती च । भारतं
क्षेत्रमंजसा ॥ क्रमेणोपयुजे सर्व । मथुरां नगरींप्रति ॥ ७ ॥ ददर्श भ्रातरं तत्र । कलत्रीकृतमातरं
॥ बालवत्सं तयोरेव । पुत्रं चाचिंतयत्ततः ॥ ८ ॥ अहो मुरौद्रमज्ञानं । महादुःखौघकारणं ॥ म-
हाविडंबनाहेतु—र्महामूलं महापदां ॥ ९ ॥ अज्ञानोपहता जीवा । न बुध्यंते हिताहितं ॥ हेयो-
पादेयतां चैव । धर्माधर्मस्वरूपतां ॥ १० ॥ भक्ष्याभक्ष्यादिकं वस्तु । पेयापेयादिकं तथा ॥ कृत्या-
कृत्यविभागं च । गम्यागम्यं शुभाशुभं ॥ ११ ॥ अज्ञानेन हि जीवानां । दीर्घः संसारसागरः ॥
दीर्घा कर्मस्थितिश्चैव । दीर्घा दुःखपरंपरा ॥ १२ ॥ अज्ञानादेव कुर्वंति । जीवाः कर्मातिनिर्घृणं ॥
गोहत्यां भ्रूणहत्यां च । स्त्रीहत्यां ब्रह्मघातनं ॥ १३ ॥ जल्पंति च मृषावादं । परद्रव्यं हरंति च ॥
परदारांश्च सेवंते । लुभ्यंति च परीग्रहे ॥ १४ ॥ भक्षयंति च मांसानि । मद्यानि च पिबंत्यलं ॥
भुंजते च दिवारात्रौ । पशुवन्नियमं विना ॥ १५ ॥ तस्मादज्ञानमेवेह । सर्वानर्थप्रवर्तकं ॥ शिष्टसं-
मतनिःशेष—व्यवहारस्य बाधकं ॥ १६ ॥ एवं विचिंत्य सा चित्ते—ऽनुज्ञाप्य गणिनीं तथा ॥ क्र.

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

मेण सह साध्वीभि—र्जगाम मथुरां पुरीं ॥ १७ ॥ ततः कुबेरसेनाया। गेह एव गतस्मया ॥ य-
याचे सर्वदोषौघ—विनिर्मुक्तमुपाश्रयं ॥ १८ ॥ दत्तस्तयापि सानंदं । निरवद्य उपाश्रयः ॥ तस्थौ
तत्रैव सा तुष्टा । तत्प्रतिबोधहेतवे ॥ १९ ॥ अन्यदा च रुदंतं तं । वीक्ष्य स्वभ्रातृपुत्रकं ॥ गत्वा
वेगेन तद्देशे । जग्राह करसंपुटे ॥ २० ॥ तयोः समक्षमेवैनं । निवेश्यांके निजे ततः ॥ एवं प्रो-
वाच सा वाक्यैः । परस्परविरोधिभिः ॥ २१ ॥ यथा त्वं मम पुत्रोऽसि । भ्राता च मे सहोदरः ॥
भ्रातृव्योऽसि च मे वत्स । मम त्वं देवरोऽसि च ॥ २२ ॥ तव पितापि यो वत्स । स मे भ्राता पि-
ता पतिः ॥ ममायं श्वशुरश्चैव । भवत्येव न संशयः ॥ २३ ॥ येयं ते जननी वत्स । माता श्वश्रूः
स्वसा मम ॥ सपत्नी भ्रातृजाया च । भवत्येषा सुनिश्चितं ॥ २४ ॥ इत्थमुल्लापयंती तं । बालकं च
मुहुर्मुहुः ॥ श्रुत्वा कुबेरदत्तोऽपि । तदंतिकमुपागतः ॥ २५ ॥ उवाच च यथार्थे त्वं । किमित्येवं
प्रभाषसे ॥ वचनानि विरुद्धानि । मदीयं पुत्रकंप्रति ॥ २६ ॥

एवमुक्ता सती सापि । तंप्रत्याह प्रबुद्धधीः ॥ विरुद्धं नैव भाषेऽहं । धर्मशीला कदाचन ॥
॥ २७ ॥ यन्मया भाषितं भद्र । तदेतत्सत्यमेव हि ॥ यथा च सत्यमेवेदं । तथाकर्णय कथ्यते ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २८ ॥ ततः प्रकथ्य वृत्तांतं । मूलतः सर्वमेव हि ॥ बत्ताण नावकाणां च । सा संबंधाविधित्स· या ॥ २९ ॥ येनाहं जनताध्यक्षं । परिणिन्ये त्वया किल ॥ तेनायं मे शिशुः पुत्रो । भवतीत्य· वगम्यतां ॥ ३० ॥ मम मातुः सुतो येन । तेन भ्राता नवत्ययं ॥ येन पुत्रो मम भ्रातु—स्तेन मे भ्रातृजोऽपि हि ॥ ३१ ॥ येन भ्राता मम नर्तु—स्तेनायं देवरो मम ॥ इत्येतैरेष संबंधी । चतु· र्भिर्मम नात्रकैः ॥ ३२ ॥ पितापि पुनरेतस्य । मातुर्मे येन नंदनः ॥ तेनायं नवति भ्राता । येनो· ढा तेन मे पतिः ॥ ३३ ॥ सपत्न्या जात इत्येष । पुत्रो मे तेन बालकः ॥ मन्मातुर्येन नर्तायं । जनकोऽपि च तेन मे ॥ ३४ ॥ माता या बालकस्यास्य । माता सैव ममापि हि ॥ येनैष जन· नीभर्तु—स्तेन श्वश्रूरियं मम ॥ ३५ ॥ येन भ्रातुश्च नार्येयं । भ्रातृजाया च तेन मे ॥ येन ना· र्या च मे भर्तुः । सपत्नीयं ततो मम ॥ ३६ ॥ ततः कुबेरदत्तोऽपि । समाकर्ण्यार्यिकावचः ॥ अ· त्यंतं खेदमापन्न—श्चिंतयामास मानसे ॥ ३७ ॥ अरेरेऽहं महामूढो । महादुःकृतकारकः ॥ पापा· नामप्यहं पापो । जघन्यानां जघन्यकः ॥ ३८ ॥ यन्मयेदमकर्तव्यं । लोके शास्त्रे च निंदितं ॥ मातर्यपि महापापं । महापापेन सेवितं ॥ ३९ ॥ अहो ह्यज्ञानमूढेन । कामाकुलितचेतसा ॥ कृ·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं कुकर्म कीदृक्ं । मया दुर्गतिगामिना ॥ ४० ॥ एवंविधदुराचार—घोरावर्जितकर्मणः ॥ मन्ये श्वभ्रेऽपि नैवास्ति । निवासो निर्घृणस्य मे ॥ ४१ ॥ केनोपायेन नो जाने । लोकधर्मविरोधिनः ॥ अमुतः पातकाद् घोरा—च्छुद्धिर्मम भविष्यति ॥ ४२ ॥ एवमात्मानमत्यंतं । निंदंतं पापभीरुकं ॥ कुबेरदत्तभार्यापि । वचो भूयोऽब्रवीदिदं ॥ ४३ ॥ किं त्वं महानुभावैवं । खेदं वहसि मानसे ॥ यतस्ते सर्वमेवेदं । जातमज्ञानदोषतः ॥ ४४ ॥ अज्ञानांधितबुद्धीनां । यज्जीवानां विडंबनाः ॥ भवंत्येवंविधा घोरा—स्तदत्राहो किमद्भुतं ॥ ४५ ॥ कृत्याकृत्यमजानाना । जीवा अज्ञानदोषतः ॥ हिंसादिभ्यो न कुर्वंति । विनिवृत्तिं कदाचन ॥ ४६ ॥ अनिवृत्ताश्च ते तेभ्यो । विदधत्यसमंजसं ॥ तस्मादज्ञानतः सर्वा । जीवानां हि विडंबना ॥ ४७ ॥ यत्त्वया चिंतितं भद्र । पातकादमुतः कथं ॥ शुद्धिर्जायेत मे तत्र । तवोपायः प्रकथ्यते ॥ ४८ ॥ सर्वेषामपि पापानां । प्रव्रज्या शुद्धिकारिका ॥ जिनोदिता ततः सैव । कर्तव्या शुद्धिमिच्छता ॥ ४९ ॥ ददति ब्राह्मणादिभ्य । एके पापविशुद्धये ॥ गोदानं स्वर्णदानं च । भूमिदानान्यनेकधा ॥ ५० ॥ आत्मशुद्ध्यर्थमेवान्ये । कारयंति व्रतान्यपि ॥ जुह्वत्यग्नौ पशूंस्तत्र । ह्यश्वादींश्च सहस्रशः ॥ ५१ ॥ अमेध्यभुग्गवामेके । पृष्ठभा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गं स्पृशंति च ॥ गवां मूत्रं पिबंत्यन्ये । ह्यन्ये पंचगवं तथा ॥ ५२ ॥ शुद्ध्यर्थं स्नांति तीर्थेषु । वि-
शंत्यन्ये हुताशने ॥ तथापि नैव शुध्यंति । विना दीक्षां जिनोदितां ॥ ५३ ॥ किंच शौचं विना
शुद्धि—र्जायते न कदाचन ॥ सत्वाहिंसादिकं तच्च । यतः प्राहुर्मनीषिणः ॥ ५४ ॥ सर्वजीवदया
शौचं । शौचं सत्यप्रभाषणं ॥ अचौर्यं ब्रह्मचर्यं च । शौचं संतोष एव च ॥ ५५ ॥ कषायनिग्रहः
शौचं । शौचमिंद्रियनिग्रहः ॥ प्रमादवर्जनं शौचं । ध्यानं शौचं तथोत्तमं ॥ ५६ ॥ दुष्टयोगजयः
शौचं । शौचं वरविवेकिता ॥ तपो द्वादशधा चैव । शौचमाहुर्मनीषिणः ॥ ५७ ॥ सर्वज्ञोक्तेन वृ-
त्तेन । तत्सर्वं च दयादिकं ॥ शौचं संपूर्णमेवास्ति । सदांतरात्मशुद्धिकृत् ॥ ५८ ॥ अथ कुबेरद-
त्तोऽपि । श्रुत्वा चैतत्तदंतिके ॥ जगाद संस्तुवन्नेवं । तां परमोपकारिणीं ॥ ५ए ॥ त्वमार्ये धर्ममा-
तासि । त्वमेव मे सहोदरी ॥ कल्याणमालिका मूला । त्वमेव मम सद्गुरुः ॥ ६० ॥ अकृत्यागा-
धगर्तायां । दुर्गमायां निमज्जतः ॥ दत्तो हस्तावलंबो मे । त्वयैव हितकारिणि ॥ ६१ ॥ अकृत्य-
सेवनोपात्त—पापपंकमनंतकं ॥ धर्मोपदेशनीरेण । प्रक्षालितं त्वया मम ॥ ६२ ॥ त्वमज्ञानमहा-
ध्वांत—ध्वंसनैकरविप्रभा ॥ कल्पपादपशाखेव । संकल्पितफलप्रदा ॥ ६३ ॥ समग्रसंपदां मूलं ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सर्वदोषविषापहं ॥ सद्विवेकस्फुरद्रत्नं । दत्तं मेऽद्य त्वयैव हि ॥ ६४ ॥ अतो मे तावकं वाक्यं । रुचितं हितभाषिणि ॥ गृहीष्येऽहमिमां दीक्षां । सर्वपापप्रणाशिनीं ॥ ६५ ॥ ततस्तां च प्रणम्यासौ । समुत्थाय च सत्वरं ॥ गत्वा गृहे निजं लोकं । समाकारितवानथ ॥ ६६ ॥ ततस्तं सर्वमापृच्छ्य । सन्मान्य च यथोचितं ॥ कृत्वा चास्य कुटुंबस्य । सर्वस्यापि च सुस्थितं ॥ ६७ ॥ धर्मस्थानेषु निःशेषं । स्वं द्रव्यं विनियोज्य च ॥ दीनादिभ्यो यथाशक्त्या । दानं दत्वानुकंपया ॥ ६८ ॥ तथा कुबेरसेनां च । भवनैर्गुणदर्शकैः ॥ हितैः पथ्यैः प्रियैर्वाक्यैः । संतोष्य च सविस्तरं ॥ ६९ ॥ इत्यादि सकलं कृत्वा । कृत्यं तत्समयोचितं ॥ मित्रपुत्रकलत्रादौ । स्नेहं मोहं विमुच्य च ॥ ७० ॥ ततो जग्राह सद्दीक्षां । सर्वं संगं विमुच्य सः ॥ तथाविधसुसाधूनां । समीपे समतायुतः ॥ ७१ ॥ पंचभिः कुलकं ॥

अथ कुबेरसेनापि । तद्वियोगेन दुःखिता ॥ अनुभूतश्रुतासार—नानारूपविडंबना ॥ ७२ ॥ तस्याः कुबेरदत्ताख्य—व्रतिन्याश्चरणांतिके ॥ नित्यं शुश्राव सद्धर्मं । सर्वकल्याणकारकं ॥ ७३ ॥ युग्मं ॥ अन्यदा सा भणत्येवं । यतिधर्मोऽतिदुष्करः ॥ नाहमेनं क्षमा कर्तुं । गेहवासाभिनंदिता

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

॥ ७४ ॥ अतः श्रावकधर्मो मे । सुकरः प्रतिभासते ॥ तेनेदमेव मे देहि । कृत्वानुग्रहमंजसा ॥
॥ ७५ ॥ ततः सम्यक्त्वमूलं सा । पंचाणुव्रतसंयुतं ॥ सप्तशिक्षाव्रतोपेतं । गृहिधर्मं सद्गुत्तमं ॥७६॥
ददौ तस्यै विधानेन । सापि जग्राह भावतः ॥ द्रव्याद्यभिग्रहांश्चैव । प्रतिपन्ना तदंतिके ॥ ७७ ॥
युग्मं ॥ गृहीत्वा ब्रह्मचर्यं च । यद्भुवनेऽपि दुष्करं ॥ पालयंती प्रयत्नेन । कामभोगेषु निःस्पृहा ॥
॥ ७८ ॥ सस्पृहा मोक्षसौख्येभ्यः । सदनुष्ठानतत्परा ॥ संसारवासनिर्विण्णा । गमयतिस्म वासरान् ॥
॥ ७९ ॥ ततः कुबेरदत्तापि । साध्वी साध्वीसमन्विता ॥ तत्रत्यभूरिलोकानां । कृत्वानुग्रहमुत्तमं ॥
॥ ८० ॥ कुर्वंती चंद्रिकेवोच्चै—र्भव्यकैरवबोधनं ॥ परोपकारताहेतो—र्विजहार महीतले ॥ ८१ ॥
एनां समाकर्ण्य कुबेरसेना—वक्तव्यतां भव्यविवेकदात्रीं ॥ निरस्य निःशेषभवाभिनंदितां । सुसाधुधर्मे कुरुतादरं जनाः ॥ ८२ ॥ उक्तः संसारासारताधिकारः ॥

॥ इति श्रीवर्धमानसूरिविरचितायां श्रीधर्मरत्नकरंडटीकायां प्रथमो भागः समाप्तः ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादच्छटाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितं ॥ २ ॥ युग्मं.
चारित्रपूर्वा विजयाभिधाना । मुनीश्वराः सूरिवरस्य शिष्याः ।
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छसुनेतुरेते ॥ ३ ॥

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे
पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आ. श्री कैलाससागर सूरि ज्ञानमंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा
गांधीनगर, पिन-

श्री जिन दत्त धर्म लक्ष्मी
ज्ञान मंदिर
आगरा

॥ इति श्रीधर्मरत्नकरण्डटीकायां प्रथमो भागः समाप्तः ॥

श्री जिन दत्त धर्म लक्ष्मी
ज्ञान मंदिर
आगरा

आ. श्री कैलाससागर सूरि ज्ञानमंदिर
श्री महावीर जैन आराधना केन्द्र
गांधीनगर, पिन-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust